TEXT PROBLEM WITHIN THE BOOK ONLY

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५३

सत्यापाढविरचितं श्रौतसूत्रं

गोपीनाथभट्टकृतज्योत्स्नाव्याख्यासमेतम् ।

तत्र

नवमदशमप्रश्नद्वयात्मको द्वितीयो भागः ।

एतत्पुस्तकं

वे० शा० सं० रा० रा० काशीनाथशास्त्री आगाशे

तत्र

हरि नारायण आपटे

इत्येतैः

पुण्यास्थपत्तने

आनन्दाश्रममुद्रणालये

आङ्ग्लाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८३०

खिस्ताब्दाः १९०८

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ।)

मूल्यमाणकद्वयाधिकं रूपकद्वयम् (२।०)

UNIVERSAL
LIBRARY

OU_184149

UNIVERSAL
LIBRARY

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५३

सत्याषाढविरचितं श्रौतसूत्रं

गोपीनाथभट्टकृतज्योत्स्नाव्याख्यासमेतम् ।

तत्र

नवमदशमप्रश्नद्वयात्मको द्वितीयो भागः ।

एतत्पुस्तकं

वे० शा० सं० रा० रा० काशीनाथशास्त्री आगाशे

इत्येतैः संशोधितम् ।

तच्च

हरि नारायण आपटे

इत्येतैः

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८३०

खिस्ताब्दाः १९०८

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ।)

मूल्यमाणकद्वयाधिकं रूपकद्वयम् (२।२)



अथ नवमः प्रश्नः ।

तत्र प्रथमः पटलः ।

अभिषवादि माध्यंदिनꣳ सवनं तायते ।

अभिषवो महाभिषवः स आदिर्यस्य तदभिषवादि माध्यंदिनं सवनं तायत आरभ्यते क्रियत इति यावत् ।

तस्य प्रातःसवनेन कल्पो व्याख्यातः ।

तस्य माध्यंदिनस्य सवनस्य प्रातःसवनेन कल्पः प्रकारो व्याख्यात उक्त इत्यर्थः ।

द्विदेवत्यर्तुग्रहैन्द्राग्नवैष्णवदेवा दर्विहोमाश्च न विद्यन्ते ।

प्रातःसवनिकत्वेनैतेषां प्राप्तौ निषेधोऽनेन क्रियते । दधिग्रहादयोऽन्तर्यामान्ता दर्विहोमास्ते च न विद्यन्ते ।

वसतीवरीभ्यो निषिच्य निग्राभ्याः करोति ।

वसतीवरीभ्यो होतृचमसे निषिच्य नितरां सिक्त्वा वसतीवरीभ्यो होतृचमसेनापो गृहीत्वा निग्राभ्याः स्थेत्यनेन निग्राभ्याः करोतीत्यर्थः ।

सर्वꣳ राजानꣳ*मभिषुण्वन्ति ।

तृतीयसवन ऋजीषममिषुण्वन्तीति श्रुतेस्तृतीयसवने सोमाभिषव एव नास्तीति भावः ।

ग्रावस्तुते सोमोष्णीषं प्रयच्छति ।

विस्रस्य राजानमिति शेषः । विस्रस्य राजानं ग्रावस्तुते सोमोष्णीषं प्रयच्छतीति । तथैवापस्तम्बः—राजानमुपनद्धं तूष्णीं ग्रावसूपावरोह्य बन्धनाद्विस्रस्य ऋजीषमधस्ताच्चर्मणो न्युप्य तच्चर्म परिमृज्य सर्वं राजानमुपरि न्युप्य सोमोपहननं वासो ग्रावस्तुते प्रयच्छतीति । इदं च न दानं किं तु पुनस्तस्मात्प्रत्यादेयमेव तस्य प्रज्ञातं निधानम् । सोमोपहननं वासो यजमानः परिधत्त इत्यग्रे प्रतिपत्तिदर्शनात् । सोमपरिश्रयणवाससोऽपि प्रज्ञातं निधानम् । सोमपरिश्रयणं पत्नीत्येतस्याप्यग्रे प्रतिपत्तिदर्शनात् । असंप्रेषितो ग्रावस्तोत्रीया अन्वाहेत्यापस्तम्बः । ग्रावस्तोतेति शेषः । न ग्रावस्तुते सोमाभिषवे प्रैषोऽस्तीत्यर्थः । प्रातःसवनेन कल्पो व्याख्यात इत्यनेन महाभिषवोऽपि तद्वत् ।

तत्र विशेषमाह—

इहाइहेति सꣳराधयन्तोऽभिषुण्वन्ति ।

इहाइहेति उच्चैर्वदन्त इत्यर्थः । संशब्दात्पुनःपुनराम्रेडनमेतस्य शब्दस्य याव-दभिषवं न तु द्विवारमेव पठनम् ।

---

* उच्यतीति ज. म. पुस्तकयोः पाठः ।

उत्तमस्य पर्यायस्य मध्यमेऽभिषवे बृहद्बृहदित्यभिषुण्वन्ति ।

अत्राभिषुण्वन्तीत्यस्य पुनर्वचनमत्र बृहद्बृहदित्यभिषवमन्त्र एवायं न तु संराधनमात्रम् । तेनात्र मन्त्रान्ते क्रियेति सिध्यति पूर्वत्र तूच्चारणसमकालोऽभिषव इति भेदः ।

उत्तमेऽभिषवे सुसंभृते राजनि ।

उत्तमेऽभिषवे सुसंभृते राजनीत्यनेनोत्तमेऽभिषवे सर्वस्मिन्सोमरसे निर्गते पूतभृति सुसंभृते राजनीत्यर्थः । उत्तमेऽभिषव इत्यनुक्ते प्रत्यभिषवं यत्सुसंभरणं तत्र सर्वत्रापि स्यात्तन्निवृत्त्यर्थम् । सुसंभृते राजनीत्यनुक्तेऽभिषवोत्तरं सुसंभरणात्पूर्वमेव स्यात्तन्निवृत्त्यर्थम् ।

देवा ग्रावाण इन्दुरिन्द्र इत्यवादिषुरेन्द्रमचुच्यवुः परमस्याः परावत आऽस्मात्सधस्थादोरोरन्तरिक्षादासुभूतमसुषवुर्ब्रह्मवर्चसं म आसुषवुः समरे रक्षाꣳस्यवधिषुरपहतं ब्रह्मज्यस्येति प्रतिप्रस्थाता ग्राव्णोऽनुमोदते ।

अनुमोदनं क्रीडारूपेण लालनं क्रीडाभावनयुक्तमन्त्रपठनम् । तच्च चतुर्णामपि पृथक्पृथक् । सकृदेव मन्त्रः । बहुवचनलिङ्गात् । तत उपरे ग्राव्णः संमुखान्कृत्वेत्यादि ग्रावस्वध्यूहनान्तं करोति ।

अत्र सवनीयानां निर्वपणमेके समामनन्ति ।

अत्रास्मिन्काले । अत्रेति वचनान्नोत्तरत्र विहितकाले न च पूर्वत्रापि तेन पूर्वोऽपि कालोऽस्तीति गम्यते । स चोक्तो बौधायनेन—प्रातःसवन एव सर्वसवनीयान्निर्वपेत्कृतान्तात्पौरोडाशिकं कर्म प्रत्यादद्दीतोत्तरयोः सवनयोरनुसवनमध्यूहनेनैव कपालेषु प्रतिपद्येत सिद्धमत ऊर्ध्वमिति तथा नु खलु माध्यंदिनीयाः सवनीया निरुप्यन्त इति क्षुल्लकवैश्वदेवस्य स्तोत्र इति ब्रूयात्तृतीयसवने सवनीया इति माहेन्द्रस्य स्तात्र इत्येव ब्रूयादिति । अनुसवनमङ्गाराध्यूहनेनैव प्रतिपद्यते । प्रातःसवनोपहितेष्वेव कपालेषूत्तरयोर्द्वयोः सवनीययोरधिश्रयणमित्यर्थः । क्षुल्लकवैश्वदेवस्य स्तोत्र इत्याज्यानामादिमे स्तात्र इत्यर्थः । तृतीयसवनसंबन्धिसवनीयाः केत्याशङ्कायां माहेन्द्रस्तोत्र इति माहेन्द्रस्तोभस्य काल इति तदर्थः । एतावता कालत्रयसत्त्वं सिध्यति ।

धाराग्रहकाले शुक्रामन्थिनावेवाग्रे गृहीत्वाऽऽग्रयणं तिसृभ्यो धाराभ्यो गृह्णात्याधवनीयात्तृतीयां धारां करोत्युवध्यं गृहीत्वा ।

उवध्यं गृहीत्वेत्यनन्तरं प्रतिप्रस्थातारं मरुत्वतीयग्रहग्रहणे सहत्वार्थं संनिहितं करोतीति शेषो ध्यब्बोधितसमानकर्तृकतानिर्वाहाय । आधवनीयात्तृतीयधाराकरणमुदचनेन । अत्र

---

१ च. तत्सर्व ।

पूर्वोत्तरत्वं मन्त्रक्रमापेक्षया । शुक्रामन्थिनावेवाग्रे गृहीत्वेत्यनेनात्रैव कालः । तस्य प्रातःसवनेन कल्पो व्याख्यात इत्यनेनातिदेशेन रथंतरसाम्नैन्द्रवायवाग्रान्गृह्णीयाद्बृहत्साम्नि शुक्राग्रानिति व्यवस्था माध्यंदिने सवनेऽपि स्यात्तन्निवृत्त्यर्थम् । अग्रग्रहणमग्रताविषयकत्वप्रदर्शनार्थम् ।

ऋतुपात्राभ्यां मरुत्वतीयौ गृह्णीतो मरुत्वन्तं वृषभं वावृधानमिति स्वेन पात्रेणाध्वर्युः पूर्वं गृह्णाति मरुत्वाꣳ इन्द्र वृषभो रणायेति स्वेन पात्रेण प्रतिप्रस्थातोत्तरम् ।

अत्र पूर्वोत्तरत्वं मन्त्रक्रमापेक्षया । मरुत्वद्देवताको ग्रहो मरुत्वतीयः । इन्द्रस्येदं विशेषणम् । द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ चेति पाणिनिसूत्राच्छप्रत्ययः ।

गृहीत्वा राजानमतिपावयति यावन्तं माध्यंदिनाय सवनायाऽऽहृतं मन्यते ।

व्याख्यातं प्रातःसवने । अत्रापि गृहीत्वेत्यनुवाद उत्तरत्रान्वयी । गृहीत्वेत्यनन्तरमध्वर्युरिति शेषो ग्रहणातिपावनयोरध्वर्युकर्तृकताया निर्वाहाय ।

विरमति धारा प्रपीड्य पवित्रं निदधाति ।

इदमपि प्रातःसवने व्याख्यातम् ।

व्याख्यातमेकधनानामाधवनीयेऽवनयनम् ।

एकधनानामित्युक्तिर्मैत्रावरुणचमसाभावोऽत्रेतिसूचनाय । एकधनैकदेशानाधवनीयेऽवनीय तिरःपवित्रं पूतभृत्येकदेशमवनयतीत्यनेन सूत्रेण व्याख्यातमुक्तमित्यर्थः ।

पवमानग्रहान्कलशाञ्छुक्रामन्थिनावाग्रयणमुक्थ्यं च ग्रहावकाशैरुपस्थाय निःसर्पन्तः समन्वारभन्ते ।

अत्र ल्यपा निःसर्पणाङ्गतैवोपस्थानस्य न तु प्रसर्पणाङ्गता । तेनाध्वर्युब्रह्मयजमानानामेवोपस्थानमत्र न तु प्रतिप्रस्थातुः । तस्य निःसर्पणाभावात् । पवमानग्रहाणामुपस्थानं कलशोपस्थानं शुक्रामन्थ्यादीनामुपस्थानमात्रमत्र न तु पदार्थक्रमोऽपि विवक्षितः । किं तु मन्त्रक्रम एवात्र भवति । तेन प्रथमं पवमानग्रहोपस्थानं कृत्वा शुक्रामन्थ्यादीनामुपस्थानं च कृत्वा कलशानामुपस्थानम् । द्वौ समुद्राविति द्रोणकलशाधवनीययोः पवमानग्रहयोः । द्वे द्रवसी इति पूतभृतः पवमानग्रहस्य । चक्षुभ्यां म इति शुक्रामन्थिनोर्ग्रहयोः । आत्मने म इत्याग्रयणस्य ग्रहस्य । अक्षीभ्यो म इत्युक्थ्यस्य ग्रहस्य । विष्णोर्जठरमिन्द्रस्य जठरं विश्वेषां देवानां जठरमित्येतैः क्रमेण कलशानामुपस्थानम् । उप कलशो ह्वयतामित्यादि षट्कमपि भवति । अनुक्तसमुच्चयार्थ-

चकारेण संगृहीतत्वात् । एतेनैव मरुत्वतीयोपस्थानार्थं परिभूरग्निमिति कोऽसि को नामेत्येतदुपस्थानमपि संगृहीतं भवति । नाऽऽहवनीयधुवातिग्राह्यादीनामुपस्थानं प्रातःसवन उपस्थितत्वात् ।

वैप्रुषान्सप्तहोतारं च हुत्वा माध्यंदिनं पवमानꣳ सर्पन्ति
तस्य बर्हिष्पवमानेन कल्पो व्याख्यातः ॥ १ ॥

वैप्रुषान्सप्तहोतारं च हुत्वेति प्रातःसवने व्याख्यातम् । माध्यंदिनं पवमानं माध्यंदिनपवमानार्थं सर्पन्ति सदः सर्पन्ति । तस्य माध्यंदिनस्य पवमानस्य ।

अत्र मन्त्रविशेषमाह—

त्रैष्टुभः पन्था रुद्रा देवता द्रुकेणापरिपरेण
पथा स्वस्ति रुद्रानशीयेति मन्त्रꣳ संनमति ।

स्पष्टम् ।

उत्तरेण हविर्धानं गत्वोत्तरेणाऽऽग्नीध्रीयं धिष्णियं
परीत्य दक्षिणेन वा मार्जालीयमन्तरेण वा ।

उत्तरेणाऽऽग्नीध्रीयं धिष्णियं परीत्यान्तरेण सदोहविर्धाने गत्वा दक्षिणेन मार्जालीयं वेत्यर्थः । अन्तरेण वेत्यत्रान्तरेण हविर्धानमार्जालीयावित्यध्याहार्यं सामर्थ्यात् । अत्र वाकारद्वयं द्वावपि पक्षौ मुख्यावितिद्योतनार्थम् ।

पूर्वेण द्वारेण सदः प्रविश्याध्वर्युर्यजमानो
ब्रह्मा चावतिष्ठन्तेऽग्रेण प्रशास्त्रीयं धिष्णियं
परीत्योद्गातारो माध्यंदिनेन पवमानेन स्तुवते ।

पूर्वेण द्वारेण सदः प्रविश्याग्रेण प्रशास्त्रीयं, धिष्णियं परीत्याध्वर्युर्यजमानो ब्रह्मा चावतिष्ठन्त इत्येवं वाऽन्वयः । अत्रावस्थानं नामोपवेशनमेव । अथवाऽग्रेण प्रशास्त्रीयं धिष्णियं परीत्येत्यस्योत्तरसूत्रेऽन्वयः । दक्षिणेनोदुम्बरीमिति सूत्रान्तरेऽस्मिन्पक्षेऽधिकमुक्तं तदप्यविरोधात्कर्तव्यम् ।

यदन्यत्पश्वानयनात्तत्संप्रेष्यति प्रतिप्रस्था-
तर्दधिघर्मेण चरेति संप्रैषस्यान्तꣳ संनमति ।

प्रतिप्रस्थातः पशुनेहीति पश्वानयनं तस्मादन्यद्यत्प्रैषणं तत्संप्रेष्यति । तर्हि एतावदेव प्रेषणं नेत्याह प्रतिप्रस्थातर्दधिघर्मेण चरेति संप्रेषस्यान्तं संनमति ऊहतीत्यर्थः । संप्रेष्यतीति वचनाद्यजुर्वेदेनाध्वर्युरिति परिभाषासूत्राद्विशेषावचनाच्चाध्वर्युः प्रैषवक्ता ।

विहृतेषु व्याघारितेषु धिष्णियेषु ।

विभूरसीत्यादिभिर्मन्त्रैराग्नीध्रेण विहृतेषु अध्वर्युणा चतुर्गृहीतेन सोमेन पञ्च-

गृहीतेनाऽऽज्येन च यथापूर्वं व्याघारितेषु शेषे च भक्षिते सति । अत्र विहरणात्पूर्वं हविर्धानं प्रविश्य विष्णो त्वं न इति ग्रहोपस्थानमेतेनैव मन्त्रेण पात्रसंमर्शश्च भवति ।

स्तीर्णे बर्हिषि ।

आग्नीध्रेण स्तीर्णे बर्हिषीत्यर्थः ।

प्रतिप्रस्थाता पशुपुरोडाशं निरू(रु)प्य सवनीयाग्निर्वपति ।

पूर्वत्र सवनीयनिर्वापपक्ष आग्नीध्रोऽत्र पुरोडाशालंकरणमपि करोति । पूर्वत्र सवनीयनिर्वापपक्षे पशुपुरोडाशस्यैव निर्वापोऽत्र ।

एकादशकपालोऽत्र पुरोडाशः ।

पशुपुरोडाशस्य त्वाग्नेयविकारत्वात्प्रकृतिप्राप्तान्यष्टावेव । अत्र माध्यंदिने सवने ।

नाऽऽमिक्षा विद्यते ।

तस्य प्रातःसवनेन कल्पो व्याख्यात इत्यनेनाऽऽमिक्षाया अपि प्राप्तिः स्यात्तां वारयितुं निषेधः । अर्थः स्पष्टः ।

अलंकृतेषु प्रतिप्रस्थाता दधिघर्मेण चरति ।

अत्र निर्वापपक्षेऽत्रैवालंकरणं सवनीयानाम् । चरतीत्येकवचनं प्रतिप्रस्थात्रभिप्रायं तस्यैव मुख्यत्वात् । बहुवचनान्तपाठस्त्वृत्विगेव ।

यावती द्यावापृथिवी इत्याग्नीध्रागार
औदुम्बर्याꣳ स्रुचि दधि गृह्णाति ।

अगारग्रहणं धिष्ण्यसमीपोपविष्टस्य मण्डपबहिष्ठस्यापि दधिघर्मग्रहणं स्यात्तद्व्यावृत्त्यर्थम् । स्रुग्ग्रहणं तूष्णीं जुहूवत्समार्गः कार्य इत्येतदर्थम् ।

वाक्च त्वा मनश्च श्रीणीतां प्राणश्च त्वाऽपानश्च श्रीणीतां
चक्षुश्च त्वा श्रोत्रं च श्रीणीतां दक्षश्च त्वा बलं
च श्रीणीतामोजश्च त्वा सहश्च श्रीणीतामायुश्च त्वा जरा
च श्रीणीतामात्मा च त्वा तनूश्च श्रीणीताꣳ शृतोऽसि
शृतं कृतः शृताय त्वा शृतेभ्यस्त्वेत्याग्नीध्रीयेऽधिश्रित्य ।

अत्रोपस्तरणाभिघारणे न भवतः । अवचनात् ।

होतर्वदस्व यत्ते वाद्यमिति संप्रेष्यति ।

स्पष्टम् ।

यदि श्रातो जुहोतन यद्यश्रातो ममत्तनेत्युच्यमाने श्रातꣳ हविरिति प्रत्याह ।

उच्यमान इत्यत्र होत्रेति शेषः ।

तमादायाऽऽहवनीयं गत्वाऽऽश्राव्य प्रत्या-
श्राविते दधिघर्मस्य यजेति संप्रेष्यति ।

आहवनीयं गत्वेतिवचनं गमनाव्यवहितोत्तरकालमेवाऽऽश्रावणं न तु मध्ये कालव्यवधानं कार्यम् । एतदर्थमेवाऽऽश्रावणप्रत्याश्रावणवचनम् । दधिघर्मस्य यजेति संप्रेष्यति । प्रतिप्रस्थातेति शेषः । अधिकारात् ।

यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्य-
माहुः । यो देवानां देवतमस्तपोजास्तस्मै
त्वा तेभ्यस्त्वा स्वाहेति वषट्कृते जुहोति ।

स्पष्टम् ।

अनुवषट्कृते हुत्वा हरति भक्षम् ।

होतारं प्रतीति शेषः ।

तं भक्षयन्ति ये प्रवर्ग्ये[1] ।

ये प्रवर्ग्ये नियुक्ता ऋत्विजस्ते तं दधिघर्मं भक्षयन्तीत्यर्थः । भक्षिणामयं नियमः । न तु भक्षणधर्मातिदेशः । यथाप्रवर्ग्यमित्यवचनात् । न च घर्मधर्माः । दधिघर्मस्य कृत्स्नविधानात् । अतो नोपहवयाचनम् ।

तस्याऽऽरण्येऽनुवाक्यो भक्षमन्त्रः ॥ २ ॥

इति हिरण्यकेशिसूत्रे नवमप्रश्ने प्रथमः पटलः ।

तस्य दधिघर्मस्य दधिभक्षमन्त्र आरण्य आरण्यग्रन्थे पठितोऽनुवाक्योऽनुवाकात्मकः । उक्तो भवतीति शेषः । कोऽसौ । भूर्भुवः सुवर्मयि त्यदित्यनुवाकः । वक्ष्यति च प्रवर्ग्यसूत्रे—भूर्भुवः सुवरित्यनुवाकेन दधिघर्मं भक्षयन्तीति । अस्मिन्भक्षमन्त्रे पूर्वोत्तरे शान्ती । तथा च प्रवर्ग्यसूत्रम्—मदन्तीरुपस्पृश्य प्रथमेनानुवाकेन शान्तिं कृत्वाऽधीयीताधीत्य चोत्तमेनैवं कर्मस्विति । एवमित्यतिदेशादत्रापि मदन्त्युपस्पर्शः । अयं मन्त्रो ब्राह्मणोक्तेन मन्त्रेण विकल्पते । स च मयि त्यदिन्द्रियं महदित्यारभ्य वाग्जुषाणा सोमस्य तृप्यत्वित्यन्तः । अस्मिन्पक्षे न शान्ती । अत्राऽऽपस्तम्बेन विशेष उक्तः—मित्रो जनान्प्रसमित्रेति भक्षयित्वा नाभिदेशमभिमृशन्त इति । अविरोधान्मन्त्रविनियोगस्य सूत्रकृतोऽपीष्टत्वाच्चेदमप्यङ्गीकर्तव्यम् । अप्रवर्ग्ये क्रतौ न दधिघर्मः ।

---

१ ग. ङ. च. ज. ञ. ञ. ट. प्रवर्ग्यम् ।

दधिघर्म प्रकृत्याऽऽश्वलायनः—प्रवर्ग्यवांश्चेदिति । आपस्तम्बेन तु विकल्प उक्तो दधिघर्ममुक्त्वा नाप्रवर्ग्ये स्यादित्यपरमित्यनेन सूत्रेण । अप्रवर्ग्ये क्रतौ न स्याद्व दधिघर्म इति तदर्थः ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखया-
जिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथ-
दीक्षितविरचितायां श्रीमद्भगवत्सत्यापाढहिरण्यकेशिसू-
त्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-
शामिकायां ज्योत्स्नाख्यायां वृत्तौ नवमप्र-
श्नस्य प्रथमः पटलः ॥ १ ॥

अथ नवमप्रश्ने द्वितीयः पटलः ।

पुरोडाशानासाद्य तैः समवदाय प्रचरति
माध्यंदिनस्य सवनस्येति संप्रेष्यति ।

प्रतिप्रस्थात्रा हृतान्पुरोडाशानासाद्य तैः पुरोडाशैः समवदायं प्रचरति । समव-दानस्वरूपं तु प्रातःसवन एवोक्तम् । प्रचरतीत्येकवचनमध्वर्योर्मुख्यत्वाभिप्रायेण । प्रातः प्रातःसावस्येत्येतस्य स्थाने माध्यंदिनस्य सवनस्येति । एवमूहितेन प्रैषमन्त्रेण प्रेष्यति । प्रशास्तारं प्रत्ययं प्रैषः ।

पशुपुरोडाशेन प्रचर्य समवदाय सवनीयैः प्रचरति ।

पशुपुरोडाशेन प्रचर्येतिवचनान्नित्य एव पशुपुरोडाशः । अनेनाऽऽपस्तम्बोक्तम-नित्यत्वं निवर्त्यते । नित्यत्वे लिङ्गमप्यस्ति । वषया प्रातःसवने चरन्ति पुरोडाशेन माध्यंदिने सवनेऽङ्गैस्तृतीयसवन इति । बह्वृचानामप्येष एव सिद्धान्तः ।

पशुपुरोडाशस्य सवनीयानां च समानꣳ स्विष्टकृदिडम् ।

गतार्थं प्रातःसवने ।

आधवनीयं पूतभृत्यवनीय दशाभिः कलशं मृष्ट्वा न्युब्जति ।

इदमपि गतार्थं तत्रैव ।

उन्नीयमानेभ्योऽनुब्रूहि होतुश्चमसमनून्नयध्वमुभयतः स्रुक्रान्कुरुध्व-
मच्छावाकस्य चमसाध्वर्योऽपि त्वमुन्नयस्व प्रतिप्रस्थातः प्रोक्षि-
तापोक्षिताञ्छकलानुपकल्पयोन्नेतः सोमं प्रभावयेति संप्रेष्यति ।

प्रैषमध्ये विशेषस्य सत्त्वात्तत्परिज्ञानाय प्रैषस्य कृत्स्नः पाठः ।

होतृचमसमुख्यानेकादश चमसानुन्नयति पुर-
स्तादाग्नीध्रचमसादच्छावाकचमसमुन्नयति ।

पुरस्तादाग्नीध्रचमसादच्छावाकचमसमुन्नयतीत्येतावान्विशेषोऽत्र । अन्यत्समानम् । एकादशेति सदस्याभिप्रायम् ।

माध्यंदिनस्य सवनस्य निष्केवल्यस्य भागस्य शुक्रवतो
मन्थिवतो मधुमत इन्द्राय सोमान्प्रस्थितान्प्रेष्य मध्यतः-
कारिणां चमसाध्वर्यवो वषट्कृतानुवषट्कृताञ्जुहुत होत्र-
काणां चमसाध्वर्यवः सकृत्सकृदुत्वा शुक्रस्याभ्युन्नीयोपाव-
र्तध्वमिति संप्रेष्यति यत्प्राक्पुनरभ्युन्नीतेभ्यस्तस्मिन्कृते
प्रसर्पणमन्त्रैर्होत्रकाः प्रसृप्य पुनरभ्युन्नीतानां यजन्ति ।

पुनःशब्दोऽवधारणे । अभ्युन्नीतेभ्यः प्रागेव यत्कर्म तस्मिन्कृते नमोऽग्नये मखघ्न इत्यादयो मन्त्राः प्रसर्पणमन्त्रास्तैर्होत्रकाः सदः प्रसृप्य । दक्षिणार्धपरेक्षणान्तं सदःप्रसर्पणम् । अत्रापि पुनःशब्दोऽवधारणार्थक एव । यत्प्राक्पुनरभ्युन्नीतेभ्यस्तस्मिन्कृत इत्येतस्यायमर्थः—यत्प्रागेवाभ्युन्नीतेभ्यः प्रेषणं तस्मिन्कृते तस्मिन्नुच्चारिते सति । अस्मिन्नवसरे प्रसर्पणमन्त्रैर्होत्रकाणां प्रसर्पणम् । एतदर्थमेव कृत्स्नवैषस्य पाठः । प्रथमत आश्वलायनसूत्रोक्तरीत्योपविष्टेषु सत्स्वपीदं याजुषहोत्रविषयकं पुनःप्रसर्पणं वाचनिकम् ।

अयाड्ग्नीदिति होतुराख्याय निरवदाय होत्र इडामा-
दधात्युपह्रूयमानामुपोद्यच्छन्ते चमसाश्चमसाध्वर्यवः ।

होतुराख्यायेतीदमाख्यानग्रहणात्समद्रमकरित्येतदुच्चारणकाल एव निरवदानं न तु तदनन्तरम् ।

नेडाशकलमच्छावाकाय निदधाति ।

एतादृशविशेषविधानार्थ एवायमनुवादः । अर्थस्तु स्पष्टः । प्रातःसवनेन कल्पो व्याख्यात इत्यनेनेडाशकलनिधानं प्राप्तं तदनेन निवार्यते ।

यथाचमसं चमसिनो भक्षयन्ति तेषां व्याख्यातो भक्षमन्त्रः ।

चमसमनतिक्रम्येति यथाचमसम् । कृतव्याख्यानं प्रातःसवने ।

सन्नेषु नाराशंसेषु दक्षिणेन वेदिमवस्थितासु
दक्षिणासु दाक्षिणानि जुहोति यथा वैसर्जनानि ।

दक्षिणेनेत्येनपा वेदिसंलग्नदेशे दक्षिणानामवस्थानम् । वेदिर्महावेदिः । दक्षिणाप्रयुक्तानि होमात्मकानि कर्माणि दाक्षिणानि । यथा वैसर्जनानीत्यनेनामात्यान्वारम्भोऽतिदिश्यते ।

प्रच्छादनार्थस्य वाससो दशायाꣳ हिरण्यं बद्ध्वाऽऽज्येऽवधाय स्रुग्दण्डे वाससोऽन्तमुपनियच्योदु त्यं चित्रमिति द्वाभ्याꣳ शालामुखीये जुहोति शेषमाज्यस्य करोति ।

गतार्थमेतत् ।

नीयमानासु पूर्वः प्रतिपद्याग्ने नयेति नयवत्यर्चाऽऽग्नीध्रे जुहोति ।

परिक्रमिभिराग्नीध्रीयमण्डपं प्रति नीयमानासु सतीषु पूर्वः प्रथमं प्रतिपद्य गत्वा, अग्ने नयेत्यृङ्नयवती । नयपदघटितत्वात् । यथा वैसर्जनानीत्येतावतैव प्रच्छादनार्थस्य वाससो दशायाꣳ हिरण्यं बद्ध्वाऽऽज्येऽवधाय स्रुग्दण्डे वाससोऽन्तमुपनियम्येत्येतदन्तेषु पदार्थेषु सिद्धेषु । अत्र पुनर्वचनमेते पदार्थाः पूर्वाहुत्योरेव न नयवत्यां दाक्षिणहोम एव न वैसर्जनहोम इतिविशेषबोधनार्थम् । तेन वैसर्जनहोमे नयवत्यामपि भवति । अत एवाऽऽपस्तम्बेन तथैव समन्वारब्धेषु षऽग्ने नयेत्याग्नीध्रीये जुहोतीति पाक्षिकत्वमन्वारम्भस्योक्तम् ।

शेषमाज्यस्य करोति ।

स्पष्टम् ।

दिवं गच्छ सुवः पतेति हिरण्यꣳ हुत्वोद्गृह्णाति ।

हुत्वोद्गृह्णाति हिरण्यमित्यन्वयः । स्रुक्त ऊर्ध्वं हिरण्यं गृह्णातीत्यर्थः ।

वनेषु व्यन्तरिक्षं ततानेति द्वितीयां यद्यनो रथोऽधीवासो वा दीयते ।

यदि यजमानेनानः शकटं दीयते रथो वा दीयतेऽधीवासश्चर्मपट्टो वा दीयते तदेयं द्वितीयाहुतिः ।

प्रजापते न त्वदेतानीति तृतीयां यद्यश्वः पुरुषो हस्ती वा दीयते ।

यदि यजमानेनाश्वः पुरुषो दासो हस्ती वा दीयते तदेयं तृतीयाहुतिः ।

नीतासु दक्षिणासु यज्ञपतिमृषय एनसाऽऽहुरिति ॥ ३ ॥ पञ्चभिराग्नीध्रीये वैश्वकर्मणानि जुहोति ।

नीतासु दक्षिणासु तेन तेनर्त्विजा नीतासु दक्षिणासु सतीषु यज्ञपतिमृषय एनसाऽऽहुरिति पञ्चभिर्मन्त्रैराग्नीध्रीये वैश्वकर्मणानि जुहोति । पञ्चम्यामाहुतौ वैश्वकर्मणत्वं सृष्टिन्यायेन । यज्ञपतिं० घोरा ऋषयः० अनन्यान्सोमपान्० ये भक्षयन्तः० नमः पितृभ्य इति पञ्चेति भरद्वाजः स्पष्टमाह । एतदाहुत्यात्मकानि कर्माणि वैश्वकर्मणानि विश्वकर्मण इमानि वैश्वकर्मणानि । एतान्याग्नीध्रीये जुहोति । आग्नीध्रीयग्रहणमाहवनीयव्यावृत्त्यर्थम् । यथापाठमवसानं त्यज्यतेऽत्र । यत्र विश्वकर्मपदं यावति मागे आयाति तदनुरोधेनावसानानि कल्प्यन्ते भरद्वाजेन स्पष्टतयोक्तत्वात् ।

यथागृहीतं मरुत्वतीयावादायेन्द्राय मरुत्व-
तेऽनुब्रूहीन्द्राय मरुत्वते प्रेष्येति संप्रेष्यति ।

गृहीतौ ग्रहावनतिक्रम्येति यथागृहीतम् । मरुत्वतीयौ ग्रहावध्वर्युप्रतिप्रस्थातारावादायेत्यर्थः । यजुर्वेदेनाध्वर्युरितिपरिभाषामूत्राद्ध्वर्युरेव ।

हुत्वा व्यवनयेते ।

वषट्कारानुवषट्कारयोर्हुत्वा व्यवनयेते । अध्वर्योः पात्रे प्रतिप्रस्थाता संपातमवनयति तस्यैकदेशमध्वर्युः प्रतिप्रस्थातुः पात्र इति संपातावनयनं कुरुत इत्यर्थः । व्यवनयेते इत्यत्र विशब्दः प्रातःसवनिकसंपातावनयनतोऽत्र वैलक्षण्यद्योतनार्थः । तच्च वैलक्षण्यमुभयोरप्येकरूप्येण न तु संपातावनयनमध्वर्योरेकदेशावनयनं प्रतिप्रस्थातुरित्येवंरूपोऽत्र भेद इत्येवंरूपं वैलक्षण्यम् ।

यथर्तुग्रहेषु प्रतिप्रस्थानेन भक्षयन्ति ।

यथर्तुग्रहेषु प्रतिप्रस्थातृपात्रेण प्रथममुखेन भक्षणं तथाऽत्रापीत्यर्थः ।

द्विर्होता सकृत्सकृदितरौ ।

होतुर्द्विर्वारभक्षणं वषट्कारानुवषट्कारनिमित्तमितरयोरध्वर्युप्रतिप्रस्थात्रोर्होर्भाभिषवनिमित्तं सकृत्सकृत् । तत्राध्वर्योर्मुखतः प्रवृत्तत्वात्तस्यैव प्रथमो भक्षोऽनन्तरं प्रतिप्रस्थातुः ।

मार्जालीये पात्रं प्रक्षाल्य होतुः सकाशे निदधाति ।

सकाशे समीपे ।

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभि-
मानः । अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्ध-
निष्ठा । इन्द्र मरुत्व इह पाहीत्यन्यतरेण स्वेन पात्रेणा-
भक्षितेन तृतीयं मरुत्वतीयं कलशाच्छस्त्रवन्तं गृह्णाति ।

वाशब्देनैव विकल्पे सिद्धेऽन्यतरवचनं व्यवस्थार्थं विकृतिषु जनिष्ठा इति मन्त्रः प्रकृताविन्द्र मरुत्व इति । स्वेन पात्रेणाभक्षितेनेति प्रातःसवने दर्शितप्रयोजनम् । द्वौ मरुत्वतीयौ गृहीतौ । अयं तृतीयो मरुत्वतीयो ग्रहग्रहणकालेऽयं शस्त्रवान्ग्रह इतिज्ञानाभावश्यकत्वार्थम् । एतज्ज्ञानाभावे यजुर्भेषप्रायश्चित्तं दक्षिणाग्नौ ।

ऋतुपात्रमारभ्य प्रतिगृणाति ।

आरभ्याऽऽलभ्य । अत्राऽऽलम्भशब्दार्थो हस्ते ग्रहणमेव । तिष्ठतोऽध्वर्योर्मुख्यालम्भशब्दार्थस्य यावत्प्रतिगरं कर्तुमसंभवात् । ऋतुपात्रं दक्षिणहस्ते गृहीत्वा शस्त्रं प्रतिगृणातीत्यर्थः ।

---

१ ग. °रूपं ।

उक्थं वाचीति शस्त्रं प्रतिगीर्य सर्वत्र माध्यंदिने सवने जपति।

स्पष्टम्।

शस्त्रं प्रतिगीर्य ग्रहमादत्ते चमसाꣳश्चमसाध्वर्यव उक्थशा
यज सोमस्येति संप्रेष्यति। व्याख्यातमनुप्रकम्पनं ग्रहना-
राशꣳसानां भक्ष आप्यायनसादने च नाराशꣳसानाम्।

ऐन्द्राग्नवच्छस्त्रप्रतिग्रहनाराशꣳसाश्चेत्येव लाघवात्सूत्रे कर्तव्ये गुरुसूत्रकरणं(!) शस्त्रप्रतिगरोत्तरमेतत्सूत्रपाठ आवश्यकः। एतदकरणे यजुर्भेषप्रायश्चित्तं भुवः स्वाहेति दक्षिणाग्नौ। अदृष्टमेवैतत्फलं दृष्टासंभवात्।

महाꣳ इन्द्रो य ओजसा महाꣳ इन्द्रो नृवदित्यन्यत-
रेण शुक्रपात्रेण माहेन्द्रं कलशात्स्तुतशस्त्रवन्तं गृह्णाति।

वाकारेणैव विकल्पे सिद्धेऽन्यतरग्रहणं विनिवेशविकल्पार्थम्। रथंतरे पूर्वया ग्रहणं बृहत्युत्तरया। एतदुक्तं बौधायनेन— बृहत्पृष्ठे महाꣳ इन्द्रो नृवदित्येतयेति। उभय-साम्नि तु ग्रहाग्रवत्। वैराजादिष्वनियमः। विनिवेशविकल्पे द्विबर्ही इति बृहतो लिङ्गमिदमप्यस्ति। एतेन यत्तुल्यविकल्प इति यैरुक्तं तन्निरस्तम्। तृतीयसवनेऽत्र सवनीयानां निर्वपणमेके समामनन्तीति वक्ष्यमाणसूत्रेऽत्रग्रहणेन ज्ञापितो माहेन्द्रग्रह-ग्रहणोत्तरमपि सवनीयनिर्वपणकालः। तेनात्र पक्षे सवनीयनिर्वपणम्। बौधायनेनाप्यत्र तार्तीयसवनीयानां निर्वाप उक्तः। तच्च दर्शितमेव प्राक्। भारद्वाजादयश्चाऽऽहुः— अत्र तार्तीयसवनिकमभिषवमभिषुणुयान्स(त्स)वनीयान्सौम्यमिति निर्वपेदाश्विरमवनये-दित्येकं तृतीयसवनमित्यपरमिति। स्तुतशस्त्रवन्तमिति दर्शितप्रयोजनं प्रातःसवने।

तꣳ सादयित्वा स्तोत्रमुपाकरोति तद्व्याख्यात-
मपवृत्ते स्तोत्रे शस्त्रमुपाकरोति तद्व्याख्यातम्।

व्याख्यातमेतत्प्रातःसवने।

शस्त्रं प्रतिगीर्य ग्रहमादत्ते चमसाꣳश्चमसाध्वर्यवः।

स्तुते वैश्वदेववच्छस्त्रग्रहनाराशꣳसा इति लाघवाद्वक्तव्ये गुरुसूत्रकरणप्रयोजनं सूत्र-पाठावश्यकत्वार्थम्। सूत्रं कृतव्याख्यानम्। शस्त्रं प्रतिगीर्येत्यपि दर्शितप्रयोजनम्।

अतिग्राह्यानितरेऽध्वर्यव आग्नेयं प्रतिप्रस्थातैन्द्रं नेष्टा सौर्यमुन्नेता।

अध्वर्युशब्देन प्रतिप्रस्थातृनेष्टृन्नेतारः। अध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेतेत्यध्वर्यव इति सूत्रात्। एतेषां ग्रहाणामादानावसरस्तु आपस्तम्बेन प्रदर्शितः—माहेन्द्रं स्तुति-ग्राह्या अनु गृह्यन्त इति। आग्नेयमतिग्राह्यं प्रतिप्रस्थाता, ऐन्द्रमतिग्राह्यं नेष्टा सौर्य-मतिग्राह्यमुन्नेतेत्यर्थः।

उक्थशा यज सोमस्येति संप्रेष्यत्यग्ने तेज·
स्विन्तेजस्वीत्येतैर्यथारूपमतिग्राह्यान्जुहोति ।

अग्ने तेजस्विन्नित्ययं मन्त्रः प्रतिप्रस्थातुराग्नेयातिग्राह्यहोमे । इन्द्रौजस्विन्नि·त्ययं मन्त्रो नेष्टुरैन्द्रातिग्राह्यहोमे । सूर्य भ्राजस्विन्नित्ययं मन्त्र उन्नेतुः सौर्यातिग्राह्य·होम इत्यर्थं यथारूपशब्दार्थः । एतद्धोमावसरस्त्वापस्तम्बेन स्पष्टमुक्तः—हुते माहेन्द्रे पश्चाद्धिहोमधर्मेण हूयन्त इति । न त्वस्य वषट्कारो । कुतः । आपस्तम्बसूत्रेऽनु. हूयन्त इति वचनात् । उक्थशा यज सोमस्येत्येकवचनाद्देवताभेदाच्च । ततो माहेन्द्र·स्यानुवषट्कारः ।

मयि मेधां मयि प्रजामित्येतैर्यथारूपमतिग्राह्यान्भक्षयन्ति ।

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु इत्याग्नेयं प्रतिप्रस्थाता भक्षयति । मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु इत्यैन्द्रं नेष्टा भक्षयति । मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधात्विति सौर्यमुन्नेता भक्षयतीति यथारूपशब्दार्थः । मन्द्राभिभूतिर्वाग्देवीत्युभयोर्बाधः । अध्वर्योर्होमाभिषवनिमित्तकभक्षकर्तृत्वादुपहानं त्रिभिः कार्यम् ।

सर्वभक्षा नाऽऽप्यायनसादने भवतः ।

स्पष्टम् ।

त्रिभिरुक्थ्यविग्रहैः प्रचरतो यथा पुरस्तात् ।

यथा पुरस्तादित्यनेनोक्थ्यस्थाल्या उक्थ्यपात्रेण तृतीयांशस्य ग्रहणमायतने सादनं स्थालीप्रत्यभिमर्शनं त्रिषु ग्रहेषु यथाक्रमं तत्तच्छस्त्रिप्रमुखैकादशे चमसोन्नयनं पुरस्तादाग्नीध्रचमसादच्छावाकचमसस्योन्नयनं स्तुतशस्त्रोपाकरणं शस्त्रप्रतिगरादिमक्ष्य·न्तानि कर्माणि च प्राप्यन्ते ।

तत्र विशेषमाह—

इन्द्राय त्वेति सर्वत्र ग्रहणसादनौ संनमतः ।

मित्रावरुणौ, इन्द्र इन्द्राग्नी इत्येता देवता बाधित्वेन्द्रदेवता विधीयते । इन्द्रश·ब्दवानेव मन्त्रः सर्वत्रेतरयोरपि भवति । तत्र ग्रहणमन्त्र उपयामगृहीतोऽसीति । एष ते योनिरिन्द्राय त्वेति सादनः । गृह्यतेऽनेनेति ग्रहणः । सीद्यतेऽनेनेति सादनः । मन्त्रयोर्विशेषणे एते ।

विश्वे देवा मरुत इन्द्रो अस्मानिति सꣳस्थिते जुहोति ।

व्याख्यातं प्रातःसवने ।

---

१ ग. च. °रौ कुरुतः ।

प्रशास्तः प्रसुवेति संप्रेष्यति सर्पतेत्याह
प्रशास्ता संतिष्ठते माध्यंदिनꣳ सवनम्॥४॥
इति हिरण्यकेशिसूत्रे नवमप्रश्ने द्वितीयः पटलः।

गतम्।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखया-
जिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथ-
दीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसू-
त्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-
शामिकायां ज्योत्स्नाख्यायां वृत्तौ नवम-
प्रश्नस्य द्वितीयः पटलः॥ २॥

अथ नवमप्रश्ने तृतीयः पटलः।

आदित्यारम्भणं तृतीयसवनं तायते।

प्रथमत आदित्यग्रहविधानादेव सिद्ध इदं वचनं भ्रान्त्याऽऽदित्यग्रहं विस्मृत्य वसतीवरीभ्यो निषिच्येत्याद्येव करोति तदाऽऽदित्यग्रहप्रयुक्तं विधिं सूदवत्पात्रꣳ सादयतीत्यन्तं कृत्वा पुनर्वसतीवरीभ्यो निषिच्येत्यादि कृतमपि करोति न तु विपर्यासप्रयुक्तप्रायश्चित्तेन चारितार्थ्यमितिज्ञापनार्थम्।

तस्य माध्यंदिनेन सवनेन कल्पो व्याख्यातः।

स्पष्टम्।

अपिधाय हविर्धानस्य द्वारे यदा बहवोऽन्तर्वेदि।

अपिधायाऽऽच्छाद्य। यदा बहवोऽन्तर्वेदि उपविष्टाः स्युस्तदा द्वारापिधानं नान्यदेति। बहव इत्यनेन ये कर्मानभिज्ञा बहुजनास्तेऽत्र बहुवचनेन गृह्यन्ते। तथा चाऽऽपस्तम्बः—हविर्धानस्योभे द्वारौ संवृत्य बहुजनायां वेद्यामिति।

यदा वाऽस्य भातृव्यः।

यदाऽस्य यजमानस्य भ्रातृव्यः शत्रुरन्तर्वेद्युपविष्टो भवति तदाऽपि द्वारापिधानम्।

अन्तर्वेदि यजमानः पत्नी च भवतोऽथाऽऽदित्यं गृह्णाति।

अन्तर्वेदि यजमानस्य सत्त्वे सिद्धेऽप्यत्र वचनं वेदिमध्यभागे हविर्धानात्मक उपवेशनविधानार्थं तच्चोभयोः। समासाभावात्साहित्यं न विवक्षितम्। अथशब्दोऽन्तर्वेद्युभयकर्तृकोपवेशनानन्तर्यार्थः।

यस्य भ्रातृव्यः सोमेन यजेत याव-
दादित्यं गृह्णीयात्तावद्बहिर्वेदि तिष्ठेत् ।

यदा बहूनां मध्ये भ्रातृव्योऽपि अन्तर्वेदि प्रविष्ट एव यजमानो भवेत् । भ्रातृव्यकर्तृके सोम आदित्ये गृह्यमाणे तस्य यज्ञे तावत्पर्यन्तं बहिर्वेदि तिष्ठेदित्यर्थः । अमुमर्थं स्पष्टमाहाऽऽपस्तम्बः—भ्रातृव्ययज्ञे तु गृह्यमाण आदित्ये बहिर्वेदि तिष्ठेदिति । भ्रातृव्ययज्ञे स्वयंगतस्त्वादित्यग्रहणकाल तत्र बहिर्वेद्येव तिष्ठेदित्यापस्तम्बसूत्रार्थः ।

कदाचन स्तरीरसीति य आदित्यस्था-
ल्यां सोमस्तस्यैकदेशमादित्यपात्रेण गृह्णाति ।

सोमोऽत्राऽऽदित्यस्थालीगतो द्विदेवत्यग्रहसंपातात्मकः ।

कदाचन प्रयुच्छसीति शृतातङ्क्यं दधि ।

यदादित्यग्रहार्थं पूर्वं कृतं दधि तद्गृह्णाति ।

यज्ञो देवानां प्रत्येतीति य आदित्यस्थाल्यां सोमस्तꣳ सर्वं गृह्णाति ।

द्विदेवत्यसंपातात्मकसोमावशेषः सोमस्तं सर्वं गृह्णाति । उपरिष्टादुपयामा ऋचेति-परिभाषात एतेषु मन्त्रेष्वन्त उपयामगृहीतोऽसीति भवति ।

विवस्व आदित्येत्युपाꣳशुसवनेनाऽऽदित्यं मेलयति ।

आदित्यग्रहार्थं तत्पात्रे गृहीतं सोमं दधि च मेलयत्यालोडयतीत्यर्थः ।

या दिव्या वृष्टिस्तया त्वा श्रीणामीत्यादित्यं
पयसा दध्ना वोपरिष्टाद्वृष्टिकामस्य श्रीणीयात् ।

उपरिष्टादन्तिमसोमग्रहणानन्तरम् । अत्र यजमानेन वृष्टिकामेन पयसा दध्ना वाऽन्तिमसोमग्रहणानन्तरं श्रयणं करिष्य इति संकल्पः कार्यः । यानि तु कामयतिः श्रावयतीति दर्शपूर्णमासयाजमानसूत्रात् ।

न मध्यतो दधि गृह्णातीत्येकेषाम् ।

एकेषामाचार्याणां मते कदाचन प्रयुच्छसीति शृतातङ्क्यदधिग्रहणस्य लोपः ।

तस्मिन्नुपाꣳशुसवनं ग्रावाणमवदधाति ।

तस्मिन्गृहीत आदित्यग्रह उपांशुसवनाख्यो यो ग्रावा तमुपरि दधाति । अत्र ग्रावपदं न पठन्त्युदीच्यास्तद्युक्तिसहमेव ।

तमुद्यम्य विज्ञानमुपैति ।

तमुपांशुसवनमुद्धृत्य गृहीत्वा तस्मादादित्यग्रहाद्विज्ञानं भाविवृष्टेरिष्टत्वं जानीयात् ।
तदेवाऽऽह—

यद्युद्भृतस्य क्षिप्रꣳ स्तोकः प्रस्कन्दे-
द्वर्षुकः पर्जन्यः स्याद्यदि चिरमवर्षुकः ।

यदि उद्भृतस्योच्छलितस्य सोमरसस्य क्षिप्रं शीघ्रं स्तोको बिन्दुः प्रस्कन्देद्बहिः पतेत्तदा वर्षुको वर्षणशीलः पर्जन्यो भवेद्यदि चिरं विलम्बेन तदाऽवर्षणशील इत्येष विज्ञानशब्दार्थः । यदि चिरं प्रस्कन्देदिन्यन्वयः ।

न सादयति ।

ग्रहमित्येव शेषः । सर्वग्रहाणां परिमार्जनं यथायोनि सादनं चेति परिभाषातः प्राप्तं सादनमनेन निषिध्यते । परिमार्जनं तु भवत्येव तस्य निषेधकवचनाभावात् । ग्रावाणं तु सादयत्येव कार्यानुरोधात्तथोपांशुसवनं ग्रावस्वपिसृजतीति बौधायनोक्तेश्च ।

आसमुद्रादान्तरिक्षादिति दर्भैराच्यावयति ।

परिभोजनीयदर्भैरादित्यमाच्यावयति विलोडयति ।

अहं परस्तादहमवस्तादिति दर्भैर्हस्तेन वाऽपिदधाति ।

पुनर्दर्भग्रहणादन्यान्ये दर्भा न तु पूर्वगृहीता एव । हस्तेन दक्षिणेनापिदधाति आच्छादयत्यादित्यग्रहम् ।

सूर्यो मा देवो देवेभ्यः पात्वित्युत्तिष्ठति ।

स्पष्टम् ।

कविर्यज्ञस्य वितनोति पन्थामिति हरति ।

उत्तरवेदिं प्रति नयतीत्यर्थः ।

आदित्येभ्यः प्रियेभ्यः प्रियधामभ्यः प्रियव्र-
तेभ्यो महस्व सरस्वपतिभ्य उरोरन्तरिक्षस्याध्यक्षे-
भ्योऽनुब्रूह्यादित्येभ्यः प्रियेभ्यः प्रियधामभ्यः
प्रियव्रतेभ्यो महस्व सरस्वपतिभ्य उरोरन्तरि-
क्षस्याध्यक्षेभ्यः प्रेष्येति संप्रेष्यति ॥ ९ ॥

स्पष्टम् ।

यास्ते विश्वाः समिधः सन्त्यग्न इति दर्भा-
नाहवनीये प्रास्यान्यत्रेक्षमाणो जुहोति ।

अयं मन्त्रः प्रधानीभूतायां होमक्रियायामेवान्वेति न तु दर्भप्रासने । यत्तु मन्त्रेण दर्भप्रासनं तूष्णीं होम इति केचिद्वदन्ति तत्तुच्छम् । आहुतिं घृतस्येतिलिङ्गविरोधात्प्रधानीभूतहोमक्रियायामेवान्वयस्य युक्तत्वाच्च ।

उल्लम्भय पृथिवीमिति वृष्टिकामस्य जुहुयात् ।

अनेन मन्त्रेण यास्ते विश्वा इत्यस्य बाधः । तस्स्थानापन्नत्वात्प्रधानीभूतहोमक्रिया-विनियोगवदेतस्यापि विनियोगो लिङ्गाभावेऽपि । अत्र यजमानेन वृष्टिकामेन संकल्पः कार्यो वृष्टिकाम उल्लम्भय पृथिवीमित्यनेन मन्त्रेणाऽऽदित्यग्रहं होष्यामीति ।

न हुत्वाऽन्वीक्षेत ।

हुतमपि सादनपर्यन्तं न वीक्षेत कुतो होमकाले ।

नानुवषट्करोति न भक्षयति सूदवत्पात्रꣳ सादयति ।

सूदः शेषः । अवधानार्थो निषेधो नानुवषट्करोतीति । होमाभिषवनिमित्तको भक्षः प्राप्तस्तद्बाधनार्थं न भक्षयतीति । भक्षणाभावेऽपि शेषस्थापनं न स्यात्तदर्थं सूदवदिति। उत्तरत्र विनियोगादेव शेषस्थापने सिद्ध इदं वचनमवधानार्थम् ।

वसतीवरीभ्यो निषिच्य निग्राभ्याः करोति।

होतृचमसे वसतीवरीभ्यो निषिच्य निग्राभ्याः स्थेति निग्राभ्याः करोतीत्यनेन विधिनेत्यर्थः ।

य उपाꣳशुपात्रेऽꣳशुस्तमृजीषेऽपिसृज्यादाभ्याꣳ-शुमुपाꣳशुपावनौ चर्जीषं तूष्णीमभिषुण्वन्ति ।

एतान्यदार्भानृजीषेऽपिसृज्य प्रक्षिप्यैतैः सहर्जीषं तूष्णीमेवाभिषुण्वन्ति । इहाइहेत्यपि भवति । तस्य माध्यंदिनेन सवनेन कल्पो व्याख्यात इति सूत्रात् । नच तूष्णीमभिषुण्वन्तीति वचनेन विरोधः शङ्क्यः । इहाइहेत्यस्याभिषवकरणत्वाभावात् । बृहद्बृहदिति तु न भवति । एतस्याभिषवकरणत्वेन तूष्णीमितिवचनेनैतस्य बाधात् ।

न ग्रावस्तुते सोमोष्णीषं प्रयच्छति ।

माध्यंदिनसवनातिदेशतः प्राप्तस्य निषेधः ।

न प्रतिप्रस्थाता ग्राव्णोऽनुमोदते ।

अस्यापि माध्यंदिनसवनातिदेशतः प्राप्तस्य निषेधः ।

अत्र सवनीयानां निर्वपणमेके समामनन्ति ।

अत्रास्मिन्काले न माध्यंदिने सवने माहेन्द्रग्रहग्रहणोत्तरं नोत्तरत्र विहिते च काल इत्यर्थः ।

धाराग्रहणकाल आग्रयणं चतसृभ्यो धाराभ्यो गृह्णात्यादित्यपात्राच्चतुर्थीं धारां करोति ।

उक्तास्तिस्रो धारा माध्यंदिने सवने । सूदवदादित्यपात्राच्चतुर्थी धारेत्यत्र विशेषः ।

तं गृहीत्वा राजानमतिपावयति यावन्तं तृतीयसवनायाऽऽर्भं
मन्यते विरमति धारा प्रपीड्य पवित्रं निदधाति ।

क्रियाङ्गत्वेन पाठार्थमिदं सूत्रम्। एतत्पाठाभावे यजुर्भ्रंषप्रायश्चित्तं दक्षिणाग्नौ ।

यत्प्राक्पवमानग्रहेभ्यस्तस्मिन्कृत आग्नीध्रागारे
पत्न्याशिरं मथित्वाऽपरेण द्वारेण हविर्धाने प्रवि-
श्यास्मे देवासो वपुषे चिकित्सतेति चतसृभिराशिरं
यजमानः पत्नी च तिरःपवित्रं पूतभृत्यवनयतः ।

पवमानग्रहेभ्यः प्राग्य एकधनैकदेशाश्चाऽऽधवनीयेऽवनीय तिरःपवित्रं पूतभृत्यवनयतीति यत्कर्म तस्मिन्कृते सति आग्नीध्रागार आग्नीध्रमण्डपे । पत्नीबहुत्वे मुख्यैव मथनं पूतभृत्यवनयनं च करोति न तु सर्वाः। चतसृभिरिति वचनात्सर्वमन्त्रान्तेऽवनयनम्। एकमन्त्राणि कर्माणीतिपरिभाषाया बाधः। हविर्धाने प्रविश्येत्येतदनन्तरं तिष्ठतीतिक्रियाया अध्याहारः। तेनात्रैका पत्नी कर्त्री, उत्तरत्रोभयोः कर्तृत्वम्। एवं च समानकर्तृकत्वमनुपपन्नमिति पूर्वोत्तरविरोधः प्राप्तः सोऽनेनाध्याहारेणोपपन्नो भवति। उत्तरत्र यदाशिरग्रहणं तदुत्तरं विमज्येति शेषः। तथा च विभागार्थमुत्तरत्राऽऽशिरग्रहणं सप्रयोजनं भवति पवित्रशब्देन दशापवित्रम्।

पवमानग्रहान्कलशानाग्रयणं च ग्रहावका-
शैरुपस्थाय निःसर्पन्तः समन्वारभन्ते ।

माध्यंदिनसवनवन्व्याख्येयम्।

वैप्रुषान्सप्तहोतारं च हुत्वाऽऽर्भवं पवमानꣳ सर्पन्ति
तस्य माध्यंदिनेन सवनेन कल्पो व्याख्यातः ॥ ६ ॥

तृतीयसवनस्यर्भुदेवतासंबन्धादार्भवत्वं, तृतीयसवनस्य तदीयसंबन्धित्वेनाऽऽर्भवमिति तार्तीयसवनिकपवमानस्यापि संज्ञा। माध्यंदिनपवमानातिदेशेनोत्तरेणाऽऽग्नीध्रीयं धिष्ण्यं परीत्य दक्षिणेन वा मार्जालीयमन्तरेण वेत्येतत्प्राप्यते।

जागतः पन्था आदित्या देवता हृकेणापरिपरेण
पथा स्वस्त्यादित्यानशीयेति मन्त्रꣳ संनमति ।

संनाम ऊहः।

यदन्यद्धिष्ण्यविहरणात्तत्संप्रेष्यति प्रतिप्रस्था-
तः पशौ संवदस्वेति संप्रैषस्यान्तꣳ संनमति ।

अग्नीद्ध्रीहः स्तृणाहि पुरोडाशाꣳ अलं कुरु प्रतिप्रस्थातः पशौ संवदस्वेत्येतावान्प्रैषोऽत्र सूत्रासिद्धो भवति। प्रतिप्रस्थातः पशौ संवदस्वेत्यनुच्यमाने धिष्ण्य-

विहरणादन्यद्यत्प्रैषजातं तत्संप्रेष्यतीत्यर्थे सिद्धे माध्यंदिनसवनातिदेशात्प्रतिप्रस्थातर्धिधर्मेण चरेति प्रैषान्तः प्राप्नुयात्तद्व्यावृत्त्यर्थमिदं वचनम् ।

अविहृतेष्वव्याघारितेषु धिष्णियेषु स्तीर्णे
बर्हिषि प्रतिप्रस्थाता सवनीयान्निर्वपति ।

आग्नीध्रेण स्तीर्णे बर्हिषि सति प्रतिप्रस्थाता सवनीयान्निर्वपति । अयमप्येकः सवनीयनिर्वापकालः ।

द्वादशकपालोऽत्र पुरोडाशः ।

अत्र तृतीयसवने माध्यंदिनेन सवनेन कल्पो व्याख्यात इत्यतिदेशान्नाऽऽमिक्षा विद्यत इत्यामिक्षानिषेधोऽप्यत्र सिद्धो भवति ।

न पशुपुरोडाशो विद्यते ।

माध्यंदिनसवनातिदेशात्पशुपुरोडाशस्यापि प्राप्तत्वान्निषेधः क्रियते ।

अष्टाकपालान्सर्वत्र सवनीयानेके समाम-
नन्त्येकादशकपालानेके द्वादशकपालानेके ।

अत्र मध्यमः पक्ष एकादशकपालानेव प्रातःसवने कुर्यादेकादशकपालान्माध्यंदिने सवने, एकादशकपालाश्च तृतीयसवने यज्ञस्य सलोमत्वायेति स्वशाखागत एव । इतरौ पक्षौ शाखान्तरीयौ ।

अलंकृतेषु प्रतिप्रस्थाता संवाद-
प्रभृतिना पशुतन्त्रेण प्रतिपद्यते ।

पूर्वत्र निर्वापेऽपि अत्रैवालंकरणं प्रैषानुरोधात् । जुह्वां पञ्चगृहीतं गृहीत्वा पृषदाज्यस्रुवं चाऽऽदायेत्यादि हृदयशूलं प्रज्ञातं निदधातीत्यन्तं यत्पशुतन्त्रं तेन प्रतिपद्यते तत्करोतीत्यर्थः । पञ्चहोत्रासादनादिरङ्गैः प्रचारोऽध्वर्योः सामर्थ्यात् ।

तस्य दक्षिणेन हविर्धानमुत्तरेण वा समवत्तं परिहरति ।

तस्य पशोः, दक्षिणेन हविर्धानमुत्तरेण वा समवत्तं स्रुग्गतमिडागतं च परिहरति परितो हरन्ति ।

न यजमानो भक्षान्भक्षयति भक्षणमेके समामनन्ति ।

भक्षानिति बहुवचनादिडाहविःशेषयजमानभागानां निषेधः । भक्षणपक्ष एतेषां सर्वेषामपि भक्षणमस्ति ।

पुरोडाशानासाद्य तैः समवदाय प्रच-
रति तृतीयस्य सवनस्येति संप्रेष्यति ।

प्रतिप्रस्थात्रा हृतान्पुरोडशानासाद्य तैः पुरोडाशैः समवदायं सहावदाय प्रचरति ।

---

१ स. च. ५य प्र०

आधवनीयं पूतभृत्यवनीय दशाभिः कलशं पृष्ट्वा न्युब्जत्युन्नीयमानेभ्याऽनुब्रूहि होतुश्चमसमनून्नयध्वं तीव्राः आशीर्वतः कुरुध्वमच्छावाकस्य चमसाध्वर्योऽपित्वमुन्नयस्वोन्नेतः सोमं प्रभावयेति संप्रेष्यति।

प्रैषमध्ये विशेषस्य सत्त्वात्कृत्स्नः पाठः। तीव्रशब्देनाविकट्वम्लवन्तः सोमा उच्यन्ते। आशीर्वत इत्यनेनाऽऽशिरवन्त उच्यन्ते।

होतृचमसमुन्नयनेकादश चमसानुन्नयति।

गतम्।

प्रचरणकाले प्रस्थितैरेव प्रचरति।

प्रचरणकाले प्रस्थितैरुत्तरवेदिं प्रति प्रस्थानं प्राप्तैः। एतादृशैश्चमसैः सद्भिरेव प्रचरति न तु पूर्वमित्यर्थः।

तृतीयस्य सवनस्यर्भुमतो विभुमतः प्रभुमतो वाजवतः सवितृवतो बृहस्पतिवतो विश्वदेव्यावतस्तीव्राः आशीर्वत इन्द्राय सोमान्प्रस्थितान्प्रेष्य मध्यतःकारिणां चमसाध्वर्यवो वषट्कृतानुवषट्कृताञ्जुहुत होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धुत्वा तीव्रस्याऽऽशीर्वतोऽभ्युन्नीयोपावर्तध्वमिति संप्रेष्यति।

प्रैषमध्ये विशेषस्य सत्त्वात्कृत्स्नः पाठः प्रैषस्य। अत्र होत्रकचमसानां सकृत्सकृद्धोमे चमसाध्वर्यवो दक्षिणामुखा एव न प्राङ्मुखाः। प्राचीरन्या आहुतयो हूयन्ते प्रत्यञ्चौ शुक्रामन्थिनाविति शुक्रामन्थिसंयोगवचनात्। उन्नीयमानमूक्ते परिहिते चमसाध्वर्युभिरितरेष्वात्तेषु चमसेषु अध्वर्योर्होतृचमसमादायैव प्रैषो ग्रहयोरभावात्।

श्येनाय पत्वने स्वाहेति ॥ ७ ॥ एतैः पुनरभ्युन्नीताञ्जुहोति वट्स्वयमभिगूर्ताय नम इत्यनुवषट्कारान्।

एतैः पुनरित्यत्र पुनःशब्दोऽप्यर्थकः स चाभ्युन्नीतशब्दानन्तरमन्वेतव्यः। तथा चैतैर्मन्त्रैरभ्युन्नीतानपि जुहोतीत्यर्थो भवति। एतस्मादर्थकरणाद्धोतृचमसस्यापि संग्रहो भवति। तेन प्रथमो मन्त्रः श्येनाय पत्वने स्वाहेति। अनेन होतृचमसस्य होमः। अन्ये षण्मन्त्राः प्रशास्त्रादीनां चमसेषु क्रमेण ज्ञेयाः। साम्यादयमर्थो लभ्यते। तच्च साम्यं कथमित्याकाङ्क्षायां सप्त मन्त्राः सप्त कर्तारश्च। तथा च सप्त मन्त्राः सप्तसु चमसेषु संबद्धा भवन्ति। मन्त्रसमुदायविनियोगे षड्भिरित्येवं विनियोगो न कृतः। अवशिष्टो विकल्पार्थ इत्यपि नोक्तम्। एवं चाऽऽचार्येणैतादृशस्वशैलीपरित्यागेन यत एवमेव सूत्रि-

---

१ ग. च. °सैः षड्भिरे°। २ ग. च. °माने सू°।

ततः सप्त मन्त्राः सप्तसु संबद्धा भवन्तीत्ययमर्थ एव सूचितो भवति। तथा च जैमिनिः—सप्तं स्यादश्रुतत्वादिति। विशेषस्याश्रवणात्साम्यमेव भवतीत्यर्थः। आश्वलायनेनापीयं परिभाषोक्ता—बहुषु बहूनामनुदेश आनन्तर्ययोग इति। पाणिनिरपि स्वशास्त्र उपयोगित्वात्परिभाषां कृतवान्—यथासंख्यमनुदेशः समानामिति। तथा चैवमेवात्र व्याख्यानं समीचीनं नान्यदिति। वट्स्वयमभिगूर्ताय नम इत्यनुवषट्कारान्। अनुवषट्कारप्रयुक्तान्होमान्।

तृम्पन्ताꣳ होत्रा मधोर्घृतस्येति हुताननुमन्त्रयते।

हुतान्प्रत्येकमनुलक्षीकृत्य मन्त्रयत इत्यर्थः।

यथाचमसं चमसिनो भक्षयन्ति तेषां व्याख्यातो भक्षमन्त्रः।

व्याख्यातमेतन्माध्यंदिने सवने। अस्मिन्सवने होतृचमसेऽध्वर्योर्होमाभिषवप्रयुक्तस्य भक्षस्य सत्त्वेन प्रतिभक्षितुः सत्त्वाद्धोतुः समाख्याभक्षः पृथगेव भवति न तु तन्त्रेण सिद्धिः। तीव्रस्याऽऽशीर्वतोऽभ्युन्नीयोपावर्तध्वमित्यनेन सकृत्पूतभृत एवोन्नयनं कर्तव्यमिति बोध्यते।

सप्तेषु नाराशꣳसेषु स्वꣳ स्वं चमसं न्यन्ते
श्रीꣳस्त्रीन्पुरोडाशशकलान्दक्षिणत उपास्यन्ति।

स्वं स्वं चमसमित्यनन्तरमनुरुध्याहार्यः। अपभ्रष्टो वा सूत्रे। तथा च द्वितीया युक्तैव। आपस्तम्बेनैवमेव पठितम्—स्वꣳ स्वं चमसमनु न्यन्त इति। श्रीꣳस्त्रीनिति वीप्सा सर्वचमसिव्यापिकर्तृत्वार्था। हविःशेषपुरोडाशसंबन्धिशकलान्स्वस्वचमसाद्दक्षिणतः पितृतीर्थेनोपास्यन्ति निक्षिपन्ति। निक्षेपणं तूष्णीमेव। दानप्रभृतिमन्त्राणां जपस्यैव विधास्यमानत्वात्। निक्षेपणे यज्ञोपवीत्येव। अग्रे प्राचीनावीतविधानात्। अन्यथा प्राचीनावीतं विधायोपासनविधानं कृतं भवेन्न कृतं च तथा। तस्मात्पुरोडाशशकलोपासने यज्ञोपवीत्येव। प्राचीनावीतानि कृत्वोपास्यन्तीत्येवमन्वयः कदाचित्स्यात्तथा चोपासनेऽपि प्राचीनावीतं स्यादितिशङ्कानिरसनार्थं तत्कृत्वेत्युपासनानुवादः। तदुपासनं कृत्वा। तदित्यस्य तानीत्यर्थः। तानि उपासनानि। सुपां सुलुगित्यनेन बहुवचनविभक्तेर्लुक्। कर्तृबहुत्वाभिप्रायं बहुवचनम्।

तत्कृत्वा प्राचीनावीतानि कृत्वा षड्ढोतारं व्याख्याय
दानप्रभृतीन्प्रत्यायनान्तान्पिण्डपितृयज्ञमन्त्राञ्जपन्ति।

पुरोडाशशकलोपासनकर्तारः सर्वे प्राचीनावीतानि कृत्वा सूर्यं ते चक्षुरिति षड्ढोतारं व्याख्याय वाक्यशः पठित्वा न वाग्वेतेति। एतस्य प्रायश्चित्त एव श्रुतौ

---

१ ग. घ. °न्तस्त ई°।

सूत्रे च विनियोगात्। अहोमार्थत्वादग्रहोऽत्र। पितृयज्ञे षड्दोतारमिति श्रुतिरपि। चमसप्रसर्पण एव षड्दोतृव्याख्यानम्। एतत्ते ततामुकशर्मन्ये च त्वामनु। एतत्ते पितामहामुकशर्मन्ये च त्वामनु। एतत्ते प्रपितामहामुकशर्मन्ये च त्वामनु। आपो देवीः०। अत्र पितरो यथा० स्वाहोष्म० अमीमदन्त पि० आङ्क्ष्व ततामुकशर्मन्। आङ्क्ष्व पितामहामुकशर्मन्। आङ्क्ष्व प्रपितामहामुकशर्मन्। अभ्यङ्क्ष्व ततामुकशर्मन्। अभ्यङ्क्ष्व पितामहामुकशर्मन्। अभ्यङ्क्ष्व प्रपितामहामुकशर्मन्। एतानि वः पितरो० नमो वः पितरो रसाय पितरो नमो वो० नमो वः पितरः शुष्माय पित० नमो वः पितरो जीवाय पि० नमो वः पितरः स्वधायै पित० नमो वः पितरो मन्यवे पित० नमो वः पितरोऽघोराय पित० ऊर्जस्वतीः स्व० उत्तिष्ठत पितरः प्रे० परेत पितरः सो० यन्तु पित० मनो न्वाहु० आ न एतु० पुनर्नः पित० अक्षन्न० प्रजापते न० दानप्रभृतिप्रत्यायनान्ता एते पिण्डपितृयज्ञमन्त्रा एताञ्जपन्त्येव न कर्मापि। वासोदानोदपात्रनिनयनयोस्तु सकृदेव मन्त्रः। यजमानस्य स्वपितॄणामुपलक्षणं सिद्धमेव। इतरेषां चमसिनां तु स्वस्वपितॄणामेव। स्वेभ्यः पितृभ्य उपास्येयुरित्याश्वलायनोक्तेः। कात्यायनमते तु यजमानपितॄणामुपलक्षणं सर्वेषाम्। तथा च तत्सूत्रम्—यजमानस्य पितृभ्यो वा तस्याधिकारादिति। यजमानस्य फलार्थित्वात्फलार्थेषु कर्मसु तस्यैवाधिकारः। वाशब्दः स्वपितॄणामुपलक्षणं कार्यमितिपूर्वपक्षव्यावर्तक इति कात्यायनसूत्रार्थः। अस्मिन्पक्षे यजमानस्य ततामुकशर्मन्, यजमानस्य पितामहामुकशर्मन्, यजमानस्य प्रपितामहामुकशर्मन्, यजमानस्य ततामुकशर्मन्यजमानस्य पितामहामुकशर्मन्यजमानस्य प्रपितामहामुकशर्मन्यजमानस्य ततामुकशर्मन्यजमानस्य पितामहामुकशर्मन्यजमानस्य प्रपितामहामुकशर्मन्, इत्येवं मन्त्राणां प्रयोगः। असाविति वचनाभावेऽपि पिण्डपितृयज्ञमन्त्रेषु असावित्येतस्य शब्दस्य सत्त्वात्तत्स्थानिको नामनिर्देशोऽत्रापि भवति। पिण्डपितृयज्ञगन्त्राञ्जपन्तीतिवचनात्। अत्र यजमानः सर्वे वा पुरोडाशशकलोपासनादिकर्मकर्तारो जीवत्पितृकाः स्युस्तदाऽपि शकलोपासनादिकर्म पितामहप्रपितामहवृद्धप्रपितामहोद्देशेनैव कर्तव्यम्।

वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति।
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः॥ इति वचनात्।
उद्वाहे पुत्रजनने पिण्डेष्ट्यां सौमिके मखे।
तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः॥

इतिमैत्रायणीयपरिशिष्टवचनाच्च।

सौमिके मख इत्यनेन सोममखान्तर्गतं पित्रुद्देश्यकं कर्मोच्यते तत्रेत्यर्थः। एवं च जीवत्पितृकैरपि स्वस्य यजमानस्य वाऽपि पितामहप्रपितामहवृद्धप्रपितामहोद्देशेनेदं

कार्यमेव । यदि पुरोडाशशकलनाशो दैवात्तदा लोपः । पिण्डदानलोपनिमित्तकं सर्वप्रायश्चित्तं होतव्यम् । यदा तु पितृपितामहौ जीवतस्तदा प्रपितामहवृद्धप्रपितामहातिवृद्धप्रपितामहानुद्दिश्य कर्तव्यम् । यदि त्रयाणामपि जीवनं तदा लोप एव । नात्र सर्वप्रायश्चित्तमपराधाभावात् ।

तस्मिन्कृते वाममद्य सवितरित्येतेषामेके
नान्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति ।

शकलोपासनप्रभृतिप्रत्यायनमन्त्रजपान्तसमुदायरूपे कर्मणि कृते सतीत्यर्थः । तस्मिन्कृत इत्यनेनाध्वर्योर्नेदं कर्मेति सूचितमचमसित्वादिति भावः । इदं सर्वेषामचमसिनामुपलक्षणम् । इत्येतेषामेकेनेतिवचनान्मन्त्रत्रयमत्र श्रुतौ पठितमस्ति तत्र येन केनाचिन्मन्त्रेण ग्रहणं कर्तव्यमित्यवगतं भवति । सावित्रं सवितृदेवताकं ग्रहमाग्रयणात्परिप्लवया ।

न सादयत्युपनिष्क्रम्य देवाय सावित्रेऽनु-
ब्रूहि देवाय सवित्रे प्रेष्येति संप्रेष्यति ।

अत्रोपनिष्क्रम्येति वचनादन्यप्रैषेषु विशेषवचनाभावे हविर्धाने स्थित्वाऽपि प्रेषा भवन्तीति गम्यते । अत्रोपनिष्क्रमणोत्तरमेवेति नियमः । एवमन्यत्रापि । अन्यत्स्पष्टम् ।

हुत्वा नानुवषट्करोति न भक्षयति सूदवत्पात्रꣳ सादयति ।

द्विदेवत्यर्तुग्रहेष्वादित्यग्रहसावित्रयोश्च नानुवषट्कारो विद्यत इत्येतत्सूत्रादेव निषेधे सिद्धे प्रयोगे भ्रष्टित्यवगमार्थम् । होमाभिषवनिमित्तभक्षस्य प्राप्तत्वान्निषेधः । सूदवत्पात्रꣳ सादयतीतिवचनं सर्वहोमव्यावृत्त्यर्थम् ।

उपयामगृहीतोऽसि सुशर्माऽसि सुप्रतिष्ठान इत्येतेनैव
पात्रेणाभक्षितेन वैश्वदेवं कलशाच्छस्रवन्तं गृह्णाति ।

क्षयतीति निषेधेनैव सिद्धेऽत्राभक्षितेनेतिवचनं ग्रहग्रहणकालेऽयं सावित्रग्रहो न भक्षितस्तस्मिन्नेव वैश्वदेवो गृह्यत इतिज्ञानावश्यकत्वार्थम् । एतदभावे यजुर्भेदप्रायश्चित्तं भुवः स्वाहेति दक्षिणाग्नौ होतव्यम् । शस्रवन्तमित्येतस्य प्रयोजनं प्रातःसवन ऐन्द्राग्नग्रहे प्रदर्शितमेव ।

एकया च दशभिश्च स्वभूत इत्येतस्याꣳ
शस्यमानायां प्रातर्युजौ विमुच्येथामिति
प्रतिप्रस्थाता द्विदेवत्यपात्राणि विमुच्या-
परया द्वारा निर्हृत्य मार्जालीये प्रक्षाल्य
पूर्वया द्वारा प्रपाद्याऽऽयतनेषु सादयति ।

एतस्यामृचि शस्यमानायां प्रातर्युजौ विमुच्येथामिति मन्त्रेणोत्तरवर्तिनौ द्विदेवत्यपात्राणि विमुच्य हविर्धानमण्डपस्यापरया द्वारोपनिर्हृत्य मार्जालीये प्रक्षाल्य हविर्-

र्थानस्य पूर्वं द्वारा नीत्वा तत्तदायतने सादयति। प्रतिप्रस्थातृग्रहणमध्वर्युस्थावृत्त्यर्थम्। उपेत्यनेन स्वमुखसमीपे धृत्वा निर्हरणम्। स्पष्टं च सूत्रान्तरे—मुखसमीपे द्विर्देवत्यपात्राणि धृत्वा निर्हरतीति। निःशब्दो निर्गमनोत्तरं सृष्टिनिहरणार्थ इति उपसर्गबलादयमर्थो गम्यते।

प्र द्यावा यज्ञैः पृथिवी ऋताद्धेत्येत-
स्याः ऋचः प्रथमायामन्यतरतोमोदं प्रति-
गृणाति मोदामोद इथोथामोद इवेति।

एतदृक्संबन्धिनि प्रथमे विरामे मोदामोद इवेति प्रणव ओथामोद इवेति। अयमन्यतरतोमोदः। यत्रैकस्मिन्प्रतिगरे मोदा, इति शब्दः सोऽन्यतरतोमोद इत्युच्यते।

विपरीतमेके समामनन्ति।

प्रथम ओथामोद इवेति प्रणवे मोदामोद इवेति। स एष प्रतिगरोऽनन्तराज्याहावादेस्तस्या ऋच आरम्भेत्यर्थः। सप्तमी पञ्चम्यर्थे। ततः परं तु यथापूर्वमेव प्रतिगरः। एष याजुषहोत्रविषये विशेषः।

उक्थं वार्चीन्द्रायेति शस्त्रं प्रतिगीर्य सर्वत्र तृतीयसवने जपति।

उक्थ्यादिष्वपि।

शस्त्रं प्रतिगीर्य ग्रहमादत्ते चमसाश्चमसाध्वर्यवः।

वैश्वदेववद्ग्रहनाराशस्या इति लाघवाद्बुक्कण्डे शस्त्रं प्रतिगार्येतिवचनं तृतीयसवन आश्वलायनसूत्रोक्तो यः शस्त्रधर्मोऽभिहिंकारादिः स एवात्र भवति प्रकृत्यविनियुक्तस्वेऽपीतिज्ञापनार्थम्। ग्रहमादत्ते चमसाश्चमसाध्वर्यव इत्येतत्सूत्रपाठावश्यकत्वमेवैतत्प्रयोजनं नान्यदुच्यते। यथा प्रातःसवने वैश्वदेवेनेत्यनन्तरं वक्ष्यमाणेनैव ग्रहाश्चमसादानसिद्धेः।

तेन प्रचरति यथा प्रातःसवने वैश्वदेवेन ॥ ८ ॥

इति हिरण्यकेशिसूत्रे नवमप्रश्ने तृतीयः पटलः।

तेन वैश्वदेवग्रहेण। यथा प्रातःसवने वैश्वदेवग्रहेण प्रचरति तथाऽनेन वैश्वदेवग्रहेणापि प्रचरतीत्यर्थः। प्रैषयोरुच्चैस्त्वस्यानुवादोऽनिदेशः कृतः। एतच्च नाराशं-

सधर्मातिदेशार्थम् । तेन सर्वमक्षाश्रमसा भवन्तीति सिद्धं भवति । सकृज्जारासंसं तृतीयसवनमिति वचनात् ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखया-
जिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथ-
दीक्षितविरचितायां श्रीमज्जगन्नत्यषाढहिरण्यकेशिसू-
त्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-
शमिकायां ज्योत्स्नाख्यायां वृत्तौ नवमप्र-
श्नस्य तृतीयः पटलः ॥ ३ ॥

अथ नवमप्रश्ने चतुर्थः पटलः ।

सौम्यस्य पात्रसंसादनप्रभृतीनि कर्माणि प्रतिपद्यते ।

पात्रसंसादनप्रभृतीनीत्यनेनान्वाधानादि ब्रह्मणमानयनकरणान्तं निवर्त्यते । अत्र यजुर्वेदेनाध्वर्युरिति सूत्रादध्वर्युः कर्मसु वेदयोगादिति कात्यायनसूत्राच्चाध्वर्युः कर्ता । पक्षे प्रतिप्रस्थातृकर्तृकताऽपि । अत्र ज्ञापकं प्रतिप्रस्थाता सवनीयानां पात्रसंसादनप्रभृतीनि कर्माणि प्रतिपद्यत इति सूत्रे दर्शितमस्ति । सौम्यविषये सूत्रकृता विशेषानुपदेशाद्विजातीयशैलीस्वीकाराच्च समन्त्रकमसमन्त्रकं वा सौम्यमध्वरमिति पक्षद्वयं प्रदर्शितं भवति । तथा च द्वैधसूत्रम्—सौम्यस्य मन्त्र इति मन्त्रवान्स्यादिति बौधायनस्तूष्णीक इति शालिकिरिति । पात्रासादनप्रभृतीनि कर्माणि प्रतिपद्यत इति उक्तं तत्र पात्राण्येतानि चरुस्थालीशूर्पकृष्णाजिनोलूखलमुसलानि प्रस्कन्दनसंवपनार्थं पात्री । प्रणीताप्रणयनपात्रमप्यासादयति हविःसंयवनरूपदृष्टप्रयोजनसत्त्वान्न प्रणीताः प्रणयतीतिनिषेधकवचनाभावाद्यजुरुन्मूनाभिः संयौतीतिविशेषवचनाभावाच्च । मदन्तीपात्रमपि श्रपणानुगुणत्वात् । कुटरुदषदुपलानामभावः प्रयोजनाभावात् । अपति द्रव्ये कर्मलोपो यथा चरौ समाहननमाप्येभ्यो निनयनमिति भरद्वाजोक्तेश्च । शम्यया समाहननपक्षे तस्या अप्यभावः । स्फ्यागिहोत्रहवण्योः पिष्टसंयवनार्थमेक्षणवेदप्राशित्रहरणेडापात्रान्वाहार्यस्थालीयोक्त्रचतुर्धाकरणपात्रोपवेषादीनां निवृत्तिः । पाशुकासादनेनैव प्रसङ्गसिद्धेः । अत एव यथार्थमिति नोक्तम् । पवित्रे कृत्वा प्रणीताप्रणयनं समन्त्रपक्षे समन्त्रममन्त्रपक्षे मन्त्ररहितं कुर्यात् ।

सौम्यं चरुं निर्वपति ।

निर्वपिः समन्त्रक एव तूष्णीपक्षेऽपि अग्निहोत्रहवण्यादानादिः परिदानान्तः । निर्वपिमात्रं वा देवतासंबन्धाय व्यम्बकेष्टिवत् । निष्फलीकरणान्तं कर्म समन्त्रकपक्षे

समन्त्रमसमन्त्रकपक्षे मन्त्ररहितम् । धृष्टद्यादानादि समन्त्रपक्षे समन्त्रमसमन्त्रपक्षे मन्त्ररहितम् । पवित्रे वेद्यामुभयपक्षेऽपि तूष्णीमेवापि दधाति । यजमाने प्राणापानौ दधामीतिलिङ्गविरोधात् । यजमानो वै प्रस्तरः प्राणापानौ पवित्रे यजमान एव प्राणापानौ दधातीत्यर्थवादाच्च । श्रवणमर्थसिद्धम् । समन्त्रपक्षे सूर्य ज्योतिरित्यादि तूष्णीमेवाभिधारणं समन्त्रपक्षेऽपि अग्नीषोमीयविकारत्वात् ।

तमासाद्य ।

तं चरुमासाद्य । आसादनं विना यागस्यारंभवादर्थादासादने सिद्ध इदं वचनमासादनोत्तरसामिधेनीप्रयाजाज्यभागाभावबोधनार्थम् । आसादनोत्तरं घृतयाग एवान्यदिति ।

आज्यस्थावदाय घृतस्य यजेति संप्रेष्यति वषट्कृते हुत्वा ।

आज्यस्थाऽऽज्यादित्यर्थः । अवयवषष्ठी वा । आज्यस्यैकदेशं यागपर्याप्तमित्यर्थः । तच्च ध्रौवं चतुरवत्तिपञ्चावत्तिव्यवस्थया चतुर्गृहीतं पञ्चगृहीतं वा गृहीत्वा दक्षिणाऽतिक्रम्याऽऽश्राव्य प्रत्याश्राविते घृतस्य यजेति वषट्कृते जुहोतीत्यर्थः । आज्यद्रव्यकत्वादुपांशुत्वम् । आपस्तम्बोऽपि स्पष्टमुपांशुत्वमाह—आज्येनोपांशूभयतः सौम्यं परियजत्यन्यतरतो वेति । उपांशुधर्मकत्वादेवोपांशुत्वे सिद्धे पुनर्वचनं सर्वोपांशुत्वार्थमिति तद्व्याख्यातृभिर्व्याख्यातम् । तेन सवनस्वरो बाध्यते । परप्रत्यायनार्थत्वाद्यजेत्युच्चैः, आश्राव्यणप्रत्याश्रावणे च । अन्यत्र प्रवरसंशब्दाश्रावणसंप्रेष्यस्य इतिसूत्रात् । घृतस्येति पदस्योपांशुत्वमेवानया रीत्या । देवतानिर्णयस्तु याज्यातो ज्ञेयः । तत्र याज्ये आश्वलायनेनोक्ते—त्वं सोम पितृभिः संविदान इति सौम्यस्य याज्या तं घृतयाज्याभ्यामुपांशूभयतः परियजन्ति घृताहवनो घृतपृष्ठो अभिधृते श्रितो घृतस्य धाम । घृतमुषस्त्वा हरितो वहन्तु घृतं पिबन्यजसे देवदेवानिति पुरस्तादुरु विष्णो विक्रमस्वोरुक्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिरेत्युपरिष्टादन्यतर[त]श्चेदग्नाविष्णू महि धाम प्रियं वामुपांश्वेवेति । घृताहवन इति याज्यथाऽग्निर्देवताऽऽद्यस्य घृतयागस्य । उरु विष्णो विक्रमस्वेति याज्यया विष्णुर्देवतोत्तरस्य घृतयागस्य । अन्यतस्तःपरीज्यापक्षेऽग्नाविष्णोर्देवतात्वम् ।

अत्रैव तिष्ठन्सौम्यस्य हस्तेन पूर्वमवदानमवद्यति मेक्षणेनोत्तरमुदङ्ङधिक्रम्याऽऽश्राव्य प्रत्याश्राविते सौम्यस्य यजेति संप्रेष्यति वषट्कृते दक्षिणामुखस्तिष्ठन्दक्षिणार्धपूर्वार्धे जुहोति ।

सूत्रकारेण प्राचीनावीत्य(ता)विधानादनियमोऽन्यत्रेतिसूत्राद्विकल्पः । आपस्तम्बस्तु

---

१ ब. अ, 'आभीक्ष्ण्य'। २ क, ग, घ. जुहोतीति।

प्राचीनावीती सौम्येन प्रचरतीति प्राचीनावीतित्वमेवाऽऽह । मेक्षणेन चरूणामिति सूत्रादुपयमवदानमपि मेक्षणेनैव प्राप्तं तत्र पूर्वावदाने मेक्षणं बाधित्वा हस्तो विधीयते । अनियमशङ्काव्यावृत्त्यर्थं मेक्षणेनोत्तरमिति । उदङ्कृतेकम्येतिवचनमुदग्दिशि स्थित्वा यागं इत्येतदर्थम् । आश्राव्य प्रत्याश्रावितं इति वचनमाश्रावणविधय आश्रावयेति-प्रकारत्रयमध्ये आश्रावयेति प्रथम एव प्रकारोऽत्र भवतीतिज्ञापनार्थम् । प्रत्याश्रावणस्याऽऽश्रावणसंबद्धत्वाद्वचनम् । वषट्कृत इति वचनं वषट्कारसमकालं दानमिति यः पक्षस्तद्वारणार्थम् । उदग्दिशि स्थित्वा यागेऽपि प्रङ्मुखः स्थित्वा यागं कुर्यादिति स्यात्प्राङ्न्यायादिति सूत्रात् , एतद्बाधनार्थं दक्षिणामुख इति । अर्थादाग्नीध्र उत्तरामुखः सामुख्याय । अर्थादेव निष्ठितायां प्रातायां तिष्ठन्निति वचनं घृतयागे प्रङ्मुखोऽपि पत्ने भवतीति ज्ञापयितुम् । दक्षिणार्धपूर्वार्धे जुहोतीति वचनमाचारमनु जुहोतीति प्रकृतिप्राप्तस्य स्थानस्य बाधनार्थम् ।

घृतस्य यजेति यथा पुरस्तात् ।

घृतयाग इति शेषः ।

अन्यतरतः परीज्यामेके समामनन्ति ।

आदावन्ते वेत्यर्थः । सौम्यस्य न स्विष्टकृदादि । अत एवाऽऽपस्तम्बेन वषट्कृते प्रत्याक्रम्याऽऽज्येन चरुमभिघार्योद्गातृभ्यो हरन्तीति सूत्रे प्रत्याक्रम्याऽऽज्येन चरुमभिघार्येत्यनेन स्विष्टकृदादीनां निवृत्तेर्दर्शितत्वात् ।

तमाज्येनाभिपूर्णोद्गातृभ्यो हरन्ति ।

तं सौम्यम् । आज्येन स्थाल्याज्येन । उद्गातृभ्य इति वचनात्सर्वैः सहैव स सौम्यश्चरुर्मा भूत्यर्थात्सिध्यति । हरन्ति प्रयच्छन्ति । बहुवचनं परिकर्म्यध्वर्युगणान्यतमप्राप्त्यर्थम् ।

सन्नोऽत एतद्बत इहेत्येवेक्षन्ते ।

उद्गातार इत्येव शेषः । बहुवचनसामर्थ्यात्तेषामेव सांनिध्याच्च । स्पष्टमेतदाहाऽऽपस्तम्बः—तमुद्गातारोऽवेक्षन्ते सन्नो एतद्बत इहेति । केचित्तु कल्पान्तरकारास्तदवेक्षणमाध्वर्यव आम्नातमित्यध्वर्यूणामपीच्छन्ति तन्निरासार्थमुद्गातृग्रहणम् । यत्तु श्रुतावीक्षन्ते पावेमं वै सौम्येति तदप्युद्गातृकर्मैव प्रसङ्गादुक्तमिति भावः ।

तस्मिन्नात्मानं *परिपश्यन्ति ।

उद्गातार इत्येव । तस्मिंश्चरुगत आज्ये । हिरण्यधारणे । परिरभ्यावनामार्थकः । अवनता भूत्वा पश्यन्तीत्यर्थः ।

---

* सूत्रपुस्तकेषु परिपश्यन्त इति पाठः ।

य आत्मानं न परिपश्येदितासुः स्यादभि-
दर्दिं कृत्वा यन्मे मनः परागतमित्यवेक्षेत ।

यस्तस्मिन्नाज्ये प्रतिबिम्बितमात्मानमभिपूर्णार्थोऽयस्यात्पत्वबोधेन न परिपश्येदन्तर्न पश्येदितासुर्गतासुर्गतप्राणोऽल्पायुः स्यादेतद्दोषपरिहारायाभिदर्दिं कृत्वा यन्मे मनः परागतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसीति मन्त्रेण तस्मिन्नवेक्षेतावनतो मूर्त्वेक्षेत । अभिदर्दिर्नाम दर्दिर्दानमुदारिदानमभिदर्दिः । तदुक्तं बौधायनेन—अभिदर्दिं कृत्वाऽवेक्षेत तन्मिन्नून आज्यमानीयावेक्षेतेति । एवं कृते हि आज्यस्थ मूनस्त्वाद्दृश्यते हि च्छ येति । श्रुतावन्यदपि उक्तमवेक्षणस्य प्रयोजनम्—यो गतमनाः स्यात्सोऽवेक्षेत यन्मे मनः परागतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसीति मन एवाऽऽत्मन्दाधार न गतमना भवतीति । आपस्तम्बेनापि यो गतमनाः स्यात्सोऽवेक्षेत यन्मे मनः परागतमिति न गतमना भवतीति । योऽन्योऽपि कश्चिद्गतमनाः शून्यहृदय इव भवति सोऽप्यवेक्षेत यस्यार्थः ।

आमयाव्यन्नाद्यकामो वा प्राश्नीयात् ।

आमयो रोगस्तद्वानामयावी, अन्नाद्यकामनावान्वा चेत्तं सौम्यं चरुं प्राश्नीयात् । कर्मणातुश्रवणाद्यजमानेन संकल्पः कार्योऽन्नाद्यकामः सौम्यचरुप्राशनं करिष्य इति । आमयावित्वनिमित्तकप्राशने कामपदाभावान्न संकल्पः ।

यो वाऽलमन्नाद्याय सन्नामयाविनेन +प्राश्यः ।

यः कश्चन पुरुषोऽन्नाद्यायान्नभक्षणायालं समर्थः सन्केनचित्प्रतिबन्धेन नान्नमद्यात्तेन कर्मबहिर्भूतेनापि पुरुषेण प्राश्यः । सौम्यश्चरुरिति शेषः । नैमित्तिकमिदम् । विसर्गरहितः पाठः प्रामादिकः ।

शलाकाभिर्विष्णियानाग्नीध्रो ज्वलतो विहरति ।

दर्भाणां तृणानां च मूलानि शलाकास्ताभिः सहाऽऽग्नीध्रीयाहुताञ्शलाकाभिर्ज्वलतो विहरति । विहरणं नाम तत्तद्विष्णियेषु स्थापनम् ।

नवगृहीतमाज्यमध्वर्युर्गृहीत्वा ज्वलतो व्याघारयति ।

आहवनीयाग्नीध्रीयहोत्रीयमार्जालीयानामप्याज्येनैव व्याघारणं न सोमेन । अत एव नवगृहीतमित्युक्तम् । पुनर्ज्वलत इति वचनं व्याघारणकालेऽपि ज्वलनार्थम् । सोमाभावान्नसोमावः ।

---

* सूत्रपुस्तकेषु प्राश्नीयेति पाठः ।

शेषमाज्यस्य करोति धारयन्ति धिष्ण्यान् ।

धिष्ण्यानग्नीन् ।

उपयामगृहीतोऽसि बृहस्पतिसुतस्य त इत्यु-
पाꣳशुपात्रेण पात्नीवतमाग्रयणाद्गृह्णाति ।

पत्नीवन्तं ग्रहं गृह्णामीत्यन्तो मन्त्रस्य ।

तं धिष्ण्यवद्याघारणसंपातेनाऽऽज्येन श्रीत्वा न सादयति ।

तं गृहीतं पात्नीवतं ग्रहम् । पत्नीवान्देवता यस्य स पात्नीवतस्तं पात्नीवतम् । अग्निरत्र विशेष्यः । पत्नीवानिति विशेषणम् । एभिरग्न इति याज्यालिङ्गात् । आज्यवचनं यद्घृतेन पात्नीवतꣳ श्रीणाति वक्ष्यमाणेन वशे कृत्वा गृह्णातीतिश्रुतिगतो घृतशब्द आज्यमेव व्याचष्टे न घनीभूताज्यमिति प्रदर्शयितुꣳ*आज्यशब्दः ।

उपनिष्क्रम्याग्नीन्पात्नीवतस्य यजेति संप्रेष्यति ।

उपनिष्क्रम्येत्येतस्य प्रयोजनं प्राग्दर्शितमेव ।

अग्नाऽइ इ पत्नीवाऽइ इति वषट्कृते जुहोति ।

स्विष्टा सोमं पिब स्वाहेत्यन्तो मन्त्रस्य ।

कृताकृतोऽनुवषट्कारः ।

कृताकृतो वैकल्पिकः । पत्नीवतशब्दस्य सूत्रकृतोपांशुत्वानभिधानादुच्चैष्टुभमेव ।

उपाꣳश्वनुवषट्करोतीत्येकेषाम् ।

अनुवषट्कारस्योपांशुत्वेऽपि सोमस्याग्ने वीहीत्यन्तमेवोपांशु, वौषडिति तूच्चैरेव ।

अग्नीन्नेष्टुरुपस्थमासीद नेष्टः पत्नीमुदानयोद्गात्रा पत्नीꣳ
संरूयापयोन्नेतर्होतृचमसमुरूयाꣳश्चमसानुन्नयन्होतृचमसे
ध्रुवायावकाशं कुरु सर्वꣳ राजानमुन्नय माऽतिरिरिचो
दशाभिः कलशौ मृष्ट्वा न्युब्जेति संप्रेष्यति ॥ ९ ॥

उपस्थोऽकृस्तमासीद तत्र निषीद सोममक्षणार्थं, नेष्टः पत्नीमुदानयोद्गातृसमीपे संरूयापनार्थम् । उद्गात्रा पत्नीं प्रति हिंकारं हिंकारं प्रति संरूयापय पत्नीमीक्षयेति हिंकारोच्चारणकालेऽन्वीक्षयेक्षणं कारयेत्यर्थः । लाट्यायनद्राह्यायणाभ्यामप्येवमेवोक्तम्— यज्ञायज्ञीयस्य हिंकारं प्रति पत्नीमुद्गातेक्षेत निधनं प्रति पत्नीदक्षिणमूरुमभिविश्लेत्तृतीयायाꣳ स्तोत्रीयायां प्रस्तुतायाꣳ सर्वं तदुदकं निनयेदिति । यदि क्रत्वन्तरे यज्ञायज्ञीयसाम नास्ति तदा हिंकारामावात्कदा पत्नीमुद्गातेक्षेतेत्याशङ्कायामाह—अहिंकारे तु प्रतिहारवेलायां पत्नीमुद्गातेक्षेतेति । उन्नेतर्होतृचमसमुरूयांश्चमसानुन्नयन्सन्होतृचमसे ध्रुवाय ध्रुवावनयनार्थमवकाशं कुरु इत्यर्थः । अवशिष्टप्रैषः कृतव्याख्यानः ।

* आज्यशब्द इत्यधिकमिति शेषम् ।

अग्नीन्नेष्टुरुपस्थमासीदेत्यस्यार्थमाह—

अन्तरा नेष्टारं धिष्णियं चाऽऽग्नीध्रो व्यवसृप्य भक्षयत्युपस्थे वा नेष्टुरासीनो नोपस्थ आसीत यद्युपस्थ आसीत क्लीबः स्यात्।

व्यवसृप्य प्रविश्योपविश्य भक्षयति उपस्थ आसीनो वा। नेष्टुरुपस्थ आसीनो वा भक्षयति। ननु पूर्वं नेष्टुरुपस्थमासीदेत्युक्तमिदानीं तु नोपस्थ आसीतेत्युच्यते तत्कथमेतत्पूर्वविरुद्धमुच्यते। सत्यमुभयं दुर्घटम्। अत एव विरोधाद्विकल्पः कृतः सूत्रकृता। अग्नीन्नेष्टुरुपस्थमासीदेत्यत्रोपस्थमिति द्वितीया सप्तम्यर्थे। इदं च सूत्रकृतैव प्रदर्शितमुपस्थे वेतिसप्तम्यन्तनिर्देशेन। अन्तरा नेष्टारं धिष्णियं चाऽऽग्नीध्रो व्यवसृप्येत्यनेन सामीप्यमुच्यते। अग्नीन्नेष्टुरुपस्थमासीदेत्यत्र यदा नोपस्थ आसीत तदाऽग्नीन्नेष्टुरुपस्थमासीदेति संप्रैषांशस्य लोप इति कोचित्। सामीप्यार्थकत्वमादायापि सप्तम्युपपद्यत एवेति न लोप इत्यन्ये। क्लीबः षण्ढः।

होतृचमसमुख्याश्चमसानुन्नयति।

स्पष्टम्।

स्तुतशस्त्रे भवतः।

स्पष्टम्।

प्रज्वलयित्वा धिष्णियानग्निष्टोमस्तोत्रमुपाकरोति।

अग्निष्टोमग्रहणमग्निष्टोमसंस्थाप्रयुक्तं मुख्यं स्तोत्रमिदमितिप्रदर्शनार्थम्।

अविस्रस्य नीवीराविरिव नाभीः कुर्वाणाः सर्वे सकर्णप्रावृता भवन्ति।

नीवीविस्रंसनमकृत्वैव। आविः प्रकटा इवेपन्नाभीः कुर्वाणाः सन्तः सकर्णं यच्छिरो मुखरहितं तत्प्रावृत्यैव तिष्ठन्ति। सर्वग्रहणं कर्मासंबद्धानां सदः प्रविष्टानामपि प्रावृतशिरस्कत्वप्राप्त्यर्थम्।

तानेवाऽऽह—

ये सदस्याः सदसः।

सदसः सदःसंबन्धिनो ये सदस्याः सभासदस्तेऽपि सकर्णप्रावृता भवन्ति। सदःसंबन्धित्वं सदःप्रविष्टत्वमेव। षष्ठ्यर्थः संबन्धित्वम्।

ऋत्विजो यजमानश्चेत्येकेषाम्।

ऋत्विजोऽपि सर्वे सकर्णप्रावृता भवन्ति न तु स्तोत्रसंबन्धिन एवर्त्विज इत्येतदर्थमत्रापि सर्वग्रहणमनुवर्तनीयम्। यजमानस्य स्तोत्रसंबन्धित्वाभावेन प्राप्तौ विकल्पः। एकेषामित्यनेन यजमानस्य विकल्पः। एकेषामितिवचनं मङ्गलकरणार्थमिति प्रथमपाठक उक्तमेव प्राक्।

विश्वस्य ते विश्वावतो ह्वयिष्यावत इत्युद्गात्रा पत्नीꣳ संरूपायति ।
प्रेषानेष्टाऽत्र कर्ता ।

अगन्देवान्यज्ञ इति पत्नी दक्षिणमूरुं नग्नंकृत्य वक्ष्रणानाविष्कृत्य ।

दक्षिणमूरुं नग्नंकृत्यापोदवसनं कृत्वेत्यर्थः । ऊरुसंधिर्वक्ष्रणं ते च संधयोऽत्र बहवः । अतो बहुवचनम् । आविष्करणं प्रकटीकरणम् । अत्राऽऽपस्तम्बेनेतरेषामप्र एतस्याकरणायोपाय उक्तः—उपरि दूरमुद्धेहेद्या वक्ष्रणानामाविष्कर्तोरश्छोनमुरुण्यस्याः प्रजा जायत इति विज्ञायत इति । यथोरुसंधिर्नाऽऽविष्कृतः स्यात्तथोद्धरेद्वासस्तथा कृते सति अहीतमुखी, अम्लानमुखी, अस्याः पत्न्याः प्रजा जायत एवं कृते सतीत्यर्थः ।

स्वाहाकृताः समुद्रेष्ठा इत्यभ्यन्तरमूरोरुदीची पत्नी पत्नेजनीरुरुणोपप्रवर्तयति ।

उदीची, उदङ्मुखी, ऊरुणा दक्षिणेनापोदवसनेन पत्नेजनीरप उपप्रवर्तयति अभ्यन्तरं गमयति । अत्र पक्षान्तरमाहाऽऽपस्तम्ब.—ऊर्वोरुपप्रवर्तयेदित्येक इति । ऊर्वोरेव वा हस्तेन प्रवर्तयति न तु नाभ्यामन्तरतो गमयतीत्यर्थः ।

संरूपायनमुपप्रवर्तनं चाऽऽऽ तृतीयस्याः स्तोत्रीयायाः क्रियते ।

तृतीया स्तोत्रीया प्रथमपर्यायसंबन्धिन्येव । अत्र उत्तमायां स्तोत्रीयायामिति उत्तमवचनादत्र प्रथमपर्यायसंबन्धिन्येव तृतीया स्तोत्रीया छन्दोगसूत्रे द्रष्टव्या । अत्राऽऽऽग्निविधौ । तृतीयस्तोत्रपर्यन्तमित्यर्थः । अर्थः स्पष्टः । इदं पत्नीसंस्कारस्याप्रतिषत्न्यावर्तते । एकस्यां पत्न्यां रजस्वलायां पत्नेजनीग्रहणस्य तत्संबद्धकर्मणां च लोपः । आग्निमारुतशस्त्रे विशेषमाहाऽऽऽपस्तम्बः—अभ्यग्रमाग्निमारुतं प्रतिगृणातीति । अभ्यग्रं त्वरितम् । आश्वलायनेऽपि त्वभ्यग्रमाग्निमारुतमिति । सुशब्दादित्वरितम् । आपस्तम्बेनान्योऽपि विशेषोऽत्रोक्त —आपो हि ष्ठा मयोभुव इत्यभिज्ञायापो विधिवन्प्रतिगृणातीति । अपोऽवस्कन्दयन्प्रतिगृणात्यापोहिष्ठीये तृच इत्यर्थः । आश्वलायनः—आपो हि ष्ठेति तित्रो वियतमप उपस्पृशन्नन्वारब्धेष्वपावृतशिरस्क इति ।

स्वादुष्किलायं मधुमाꣳ उतायमित्येतस्याꣳ शस्यमानायामुभयतोमोदं प्रतिगृणाति मदामोद इव मोदामोद इवेत्याहावादूर्ध्वं व्याहावात्सिद्धः प्रतिगरः ।

एतस्यां शस्यमानायामिति सप्तमी पञ्चम्यर्थे । तेनैतस्याः शस्यमानाया ऋच आरभ्येत्यर्थो भवति । एतस्या ऋच आरभ्योभयतोमोदः प्रतिगरः । मदामोद इव मोदामोद इवेत्युभयरूपप्रतिगरेऽपि मोदशब्दादुभयतोमोदत्वं प्रतिगरस्य । अयमुभयतोमोदः प्रतिगर आ, आहावात्स्वादुष्किलीयासंबन्धिमध्यतमाह्हावपर्यन्तम् । स्वादुष्किलीयान्तिमाहावो व्याहाव उच्यते । व्याहावादित्यनन्तरं पूर्वतनस्योर्ध्वशब्द-

स्यानुवृत्तिः। ऊर्ध्वमित्यनन्तरं चकारोऽध्याहर्तव्यः। आहावादूर्ध्वमपि उभयतोमोद एव प्रतिगरः। व्याहावात्सिद्धः प्रतिगरः। व्याहावादारभ्य सिद्धः प्रसिद्ध एव प्रतिगरो भवतीत्यर्थः।

भूतमसि भूते मा धा इति प्रतिप्रस्थाता ध्रुवमभिमन्त्रयते।

नेष्टुन्नेतृव्यावृत्त्यर्थं प्रतिप्रस्थातृग्रहणम्। एतयोरप्यध्वर्युत्वाविशेषात्। अध्वर्योर्व्यावृत्तिस्तु तस्य व्यापृतत्वादेव भविष्यति। भूयासमित्यन्तो मन्त्रस्य।

द्यावापृथिवीभ्यां त्वा परिगृह्णामीति परिगृह्णाति।

अञ्जलिना ध्रुवं परिगृह्णाति। अञ्जलिना परिगृह्याऽऽस्त इत्यत्र दर्शनात्स्पष्टतयाऽञ्जलिना परिगृह्णातीत्यापस्तम्बेनोक्तत्वाच्च।

विश्वे त्वा देवा वैश्वानराः प्रत्यव-
यन्त्विति ध्रुवꣳ स्थानात्प्रत्यावयति।

प्रत्यावयति स्वस्थानाच्चालयति। प्रशब्दो झटितिचालनार्थः। प्रत्यावयन्त्वित्यन्तो मन्त्रस्य।

दिवि देवान्हꣳहान्तरिक्षे वयाꣳसीति हरति।

होतृचमसस्समीपं हरतीत्यर्थः। पार्थिवानित्यन्तो मन्त्रस्य।

ध्रुवं ध्रुवेण हविषाऽव सोमं नयामसीति होतृचमसे ध्रुवम-
वनयति परिधानीयायाꣳ शस्यमानायाꣳ सकृच्छ-
स्तायामादितो वा शस्त्रस्य॥ १०॥ मध्यदेशेऽन्ततो वा।

शस्यमानायामित्यत्राऽऽदित आरभ्याऽऽन्तम्। सकृच्छस्तायामित्यनेन मध्यमे पर्याये। शस्त्रादौ शस्त्रमध्ये शस्त्रान्ते वेति पञ्च पक्षाः सिद्धा भवन्ति।

शस्त्रं प्रतिगीर्य होतृचमसमध्वर्युरादत्ते चमसाꣳश्चमसा-
ध्वर्यव उक्थशा यज सोमानामिति संप्रेष्यति।

शस्त्रं प्रतिगीर्येति दर्शितप्रयोजनम्। अवशिष्टं सूत्रमपि दर्शितप्रयोजनम्।

व्याख्यातश्चमसानां भक्षः।

यथाचमसं चमसिनो भक्षयन्तीत्यारभ्य तृतीयꣳ होत्रका इत्यन्तेन सूत्रेण व्याख्यात इत्यर्थः।

सर्वभक्षा नाऽऽप्यायनसादने भवतः।

अनाराशंसत्वादिति भावः।

अग्नीदौपयजानङ्गारानाहरेत्येतत्प्रभृति पाशुकं कर्म प्रतिपद्यते।

स्पष्टम्।

---

१ ग. ङ. च. ज. ञ. ट. नाच्च्याव।

नानूयाजान्ते स्वरुं जुहोति न हृदय-
शूलेन चरन्ति यद्यनूबन्ध्या भवति ।

इदं बहूनूबन्ध्योपलक्षणम् ।

प्रहृतेषु परिधिषु सꣳस्रावेणाभिहुत्य हारियोजनेन चरन्ति ।

संस्रावेणाभिहुत्येतिवचनं परिधिप्रहरणाङ्गं संस्रावहोम इतिबोधनार्थम् । सोमाङ्गत्वात्पुनर्वचनम् । हरिरस्मिन्युज्यते स्वस्थानं प्रति गमनायेन्द्रस्येति हरियोजन इन्द्रस्तत्संबन्धिग्रहो हारियोजनस्तं संस्रावाभिहोमान्ते परिधिप्रहरणाख्यकर्मणि कृते गृह्णातीत्यर्थः ।

उपयामगृहीतोऽसि हरिरसि हारियोजन इत्युन्नेता
द्रोणकलशेन हारियोजनꣳ सर्वमाग्रयणं गृह्णाति ।

अत्र तृतीया सप्तम्यर्थे । आग्रयणस्थालीस्थसोमस्य स्थाल्या अल्पपात्रत्वेन द्रोणकलशस्य महत्पा(हापा)त्रत्वेन तस्माद्ग्रहीतुमशक्यत्वात् । सर्वमाग्रयणमाग्रयणस्थालीस्थं सर्वं सोमं द्रोणकलशे हारियोजनं ग्रहं गृह्णाति ।

तं बर्हीभिर्धानाभिः श्रीत्वा न सादयति ।

धाना अत्र लौकिक्य एव । भर्जिता यवा धानाः । बौधायनेनाप्युक्तं प्रैष एव—धाना हारियोजनीः कुरुतेति ।

शीर्षन्नधि निधायोपनिष्क्रम्येन्द्राय हरिवतेऽनुब्रूहीन्द्राय हरिवते प्रेष्येति
संप्रेष्यति धानासोमेभ्योऽनुब्रूहि धानासोमान्प्रास्थितान्प्रेष्येति वा ।

शीर्षन्, शीर्ष्णि । विभाषा ङिश्योरिति लोपः सप्तम्याः । शीर्षन्नधि शीर्ष्ण उपरीत्यर्थः । उपनिष्क्रम्येत्यनेन हविर्धानाद्बहिर्गत्वैवायं प्रैषः ।

हरीः स्थ हर्योर्धाना इति विक्रम्य वषट्कृते
जुहोत्यनुवषट्कृते हुत्वा हरति भक्षम् ।

विक्रम्येति विविधं क्रमणं विक्रगणमग्रतः पृष्ठतश्च पादयोः करणं पुनः पुनः । अत्र हेतुः श्रुतौ विक्रम्य हीन्द्रो वृत्रमहन्समूध्या इति । वषट्कारोत्तरं तूष्णीमेव विक्रमणम् । मन्त्रेण होमः । इन्द्राय स्वाहेति स्वाहाकारलिङ्गात् । हरति भक्षं सदः प्रति हरति भक्षम् ।

तꣳ सर्वे समशः प्रतिविभज्योन्नेतर्युपहवमिष्ट्वेष्टयजुः
षस्ते देवसोमेति चिश्चिषाकारं धाना भक्षयन्ति ।

वाचनिकोऽत्र भक्षलाभो होत्रुन्नेतृव्यतिरिक्तानामपि निमित्ताभावेऽपि । होतुर्वषट्कारप्रयुक्तो भक्षः । उन्नेतुर्होमाभिषवप्रयुक्तो भक्षः । इतरेषां वाचनिकः । तं हारियो-

---

१ ग. चरति ।

जनं होता, उन्नेता, अन्ये च। एते सर्वेऽपि हारियोजनगतस्य सोमस्य पात्रान्तरे धानाभिः सह समान्मार्गान्कृत्वेत्यर्थः । प्रतिः सांमुख्यार्थः । उन्नेतरुपह्वयस्वेति सर्वेऽप्युन्नेतारमुपह्वयेष्टयजुपस्ते देवसोमेति मन्त्रेण चिश्चिषाकारं चिश्चिषां कृत्वा कृत्वेत्यर्थः । चिश्चिषेति शब्दानुकारस्तथा शब्दं कृत्वा धानाभ्यो रसं हृदयं गमयन्ति रसमात्रं निगिरन्ति ।

संदृश्यासंभिन्दन्तो धानानां निम्नानि कुर्वन्तो निरवधयन्तः ।

संदं(दृ)श्य धाना असंभिन्दन्तश्च धाना भेदनं तासामकुर्वन्तः । दन्तैर्धानासु चिपिटाकारतामात्रं कृत्वा निम्नानि धानानां स्थूलप्रदेशे निम्नानि कुर्वन्तः। स्थूलप्रदेशे निम्ना धानाः कुर्वन्त इति यावत् । निरवधयन्तस्ताभ्यो रसं निष्कृष्य पिबन्त इत्यर्थः ।

आपूर्याः स्थाऽऽ मा पूरयतेत्युत्तरवेद्यां धाना निष्ठीव्योपवपन्ति रय्यै त्वा पोषाय त्वेति वा ।

निष्कृष्टरसा धाना उत्तरवेदिसमीपे निष्ठीव्य थूत्कृत्य वपन्तीत्यर्थः । आपूर्या इत्यनेन रय्यै त्वेति विकल्पते । अत्राऽऽपस्तम्बेनाऽऽचमनमुक्तम्—तत आचामन्तीति । धान्नभक्षणेनोच्छिष्टत्वादिति भावः ।

दधिक्राव्णो अकारिषमित्याग्नीध्रागारे दधिद्रप्सान्भक्षयन्ति ।

द्रप्सशब्देन दधन उपरितनो घनीभूतोंऽश उच्यते ।

एकधनपरिशेषान्यथाचमसं व्यासिच्य हरिणीर्दूर्वाः संप्रोन्नाय्य तीव्रीकृत्य रसं जनयित्वाऽप्सु धौतस्य सोमदेवत इति रसमवघ्रेण भक्षयित्वा चात्वालेऽवनयन्ति ।

एकधनानां ये परिशेषास्तान्सर्वांश्चमसेषु क्रमेण निक्षिप्य तेषु हरिणीर्हरिता दूर्वाः संप्रोन्नाय्य मर्दयित्वा तीव्रीकृत्य दूर्वारसेनापां श्लक्ष्णीकरणं तीव्रीकरणं रसं दूर्वारसं जनयित्वोत्पादयित्वा तं रसमप्सु धौतस्येति मन्त्रेणावघ्रेणावजिघ्रेण भक्षयित्वा चात्वालेऽवनयन्ति चमसिनः । यथाचमसं व्यासिच्येत्यनेन चमसिनामेवेदं कर्म नान्येषामचमसिनामध्वर्वादीनामिति गम्यते । अपरेण चात्वालमास्ताभे वेति भक्षणदेश आपस्तम्बेनोक्तः ।

यन्म आत्मनो मिन्दाऽभूदिति मिन्दायाऽऽहवनीयमुपतिष्ठन्ते ॥ ११ ॥

चमसिनोऽचमसिनश्च । एकैवात्र मिन्दा । एकवचनात् ।

---

१ क. ग. ङ च. ज. ञ. ञ. संदश्या° । २ क. ज. ञ. ञ. ड. निरिव° । ३ ग. ङ. च. ज. ञ. ञ. ड. °णीर्दूर्वाः । ४ ङ. च. ज. ञ. ञ. 'ञाय ती' । ५ ग. च. 'वेनेति ।

देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजन-
मसि पितृकृतस्यैनसोऽवयजनमस्यात्मकृतस्यैनसोऽवयज-
नमसि परकृतस्यैनसोऽवयजनमस्येनस एनसोऽवयजन-
मसि यच्चाहमेनो विद्वाꣳश्चकार यच्चाविद्वाꣳस्तस्यैनसोऽ-
वयजनमसीति प्रतिमन्त्रमाहवनीये शकलानभ्यादधति ।

प्रतिमन्त्रमितिवचनमेकेतिकरणादेक एव मन्त्रस्तदन्ते शकलानामभ्याधानमिति स्यात्तन्मा भूदित्येतदर्थम् ।

उभा कवी युवाना सत्यादा धर्मणस्पती । सत्यस्य धर्मण-
स्पते वि सरूयानि सृजामह इति सरूयानि विसृजन्ते ।

सरूयाविसर्गोऽत्राद्रोहविसर्गः । तत ऊर्ध्वमद्रोहो द्रोहो वा न तु नियमेन द्रोह एव कर्तव्य इति विधिः ।

अभिमृष्टे वेदे पत्नीः संयाजयन्ति ।

यजमानेनाभिमृष्टे वेदे सति पत्नीः संयाजयन्ति । परिधिषु संस्रावहोमानन्तरं हविःशेषप्राशनं ततो वेदाभिमर्शस्ततः पत्नीसंयाजा इत्येतावानेवात्र क्रम इति प्रकृतितोऽत्र विशेषः ।

स्तीर्णे वेदे नवगृहीतमाज्यमध्वर्युर्गृहीत्वा धातारातिरित्यन्त-
र्वेद्यूर्ध्वस्तिष्ठञ्जुहोहाऽऽहवनीये नव समिष्टयजूꣳषि जुहोति ।

स्तीर्णे वेद इत्यनेन समिष्टयजुर्होमात्पूर्वं सर्वप्रायश्चित्तहोमोत्तरमत्र वेदस्तरणकाल इति प्रकृतितोऽत्र विशेषः । अध्वर्युग्रहणं नियमार्थमध्वर्युरेव जुहोति न यजमानोऽपि अन्वारम्भद्वारा । सूत्रान्तरेऽत्रान्वारम्भ उक्तो यजमानस्य तद्व्यावृत्त्यर्थमिदं वचनम् । अन्तर्वेदिवचनं दर्विहोमधर्मव्यावृत्त्यर्थम् । ऊर्ध्वत्वस्य प्रकृतितः प्राप्तत्वेऽपीदं वचनमन्यदार्विहोमात्मकेषु होमेषु पक्षे प्रहृताऽपि भवतीतिज्ञापनार्थम् । जुहूग्रहणं प्रकृतिप्राप्तध्रुवाव्यावृत्तये । आहवनीयग्रहणप्रयोजनं यद्यप्यत्र नास्ति तथाऽप्याहवनीये नवानामपि समिष्टयजुषामयं होम इति प्रयोगकाले स्मरणार्थमित्यदृष्टमेव प्रयोजनं कल्प्यम् । एतत्स्मरणाभावे यजुर्भेषप्रायश्चित्तं भुवः स्वाहेति दक्षिणाग्नौ होतव्यम् । नव समिष्टयजूꣳषि जुहोति नवभिर्मन्त्रैरेव समिष्टयजूꣳषि जुहोतीत्यर्थः । तत्राऽऽद्याः षण्मन्त्रा ऋचः । अवशिष्टा यजूꣳषि । षड्ऋग्भियाणि जुहोति त्रीणि यजूꣳषीति श्रुतिरपि । ऋग्भियाणि ऋग्रूपाणि । ऋङ्मयाणीत्यपेक्षित ऋग्भियाणीति च्छान्दसः पाठः । एतास्वृक्षु स्वाहाकारः परिभाषासिद्धः । यजुःषु तु पठित एव स्वाहाकारोऽस्ति ।

अयोक्त्र एवाञ्जलौ पूर्णपात्रानयनं सोमस्य फलीकरणहोमः सारस्वतहोमादि। उक्तश्चायमर्थो भरद्वाजेन—समानमा समिष्टयजुष इति।

यं कामयेत प्रमायुकः स्यादिति स्रुवेण
तस्य जिह्मास्तिष्ठꣳस्तूष्णीं प्रह्वो वा।

समिष्टयजुर्होमे यं द्वेष्यं प्रमायुकः सद्योमरणशीलः स्यादिति यो यजमानः कामयेत तस्यैतादृशकामवतो यजमानस्य प्रयोगे स्रुवेण जिह्मः कुटिलाङ्गस्तिष्ठन्नित्यर्थः। कामनाविषये स्रुवो जिह्मता च विधीयते। तूष्णीमित्यनेन मन्त्रेषु मानसिकत्वं विधीयत उपांशुतां बाधित्वा। प्रह्वो वेत्यनेन पक्षे प्रह्वता विधीयते। जिह्म इत्यनेन तिर्यग्वक्रता प्रह्व इत्यनेन पृष्ठवक्रतेत्यनयोर्भेदः। अन्यत्स्पष्टम्। अत्र बर्हिषो नानुप्रहरणम्। वेदिमुपोषतीत्यनेन विशेषप्रतिपत्तेरग्रे विधास्यमानत्वात्, हृदयशूलचर्यातः प्राक्पशुवत्। अध्वर्योर्यज्ञविमोकः। यां घर्मे स्थालीमिति सौम्यस्थालीविमोकमत्र केचिदिच्छन्ति तन्न विमुक्तत्वात्तस्याः पूर्वमेव। प्रासङ्गिकं च नोत्कर्षेदसंयोगादिति न्यायात्।

इदं तृतीयꣳ सवनं कवीनामिति सꣳस्थिते जुहोति।

संस्थितवचनात्समिष्टयजुषः परमपि कर्मशेषः समापनीय एव। अनूबन्ध्याभावे हृदयशूलोद्वासनादि यूपोपस्थानान्तं समानं ब्राह्मणतर्पणम्। ततः सोमप्रायश्चित्तानि सोमस्कन्दनप्रयुक्तानि प्रायश्चित्तानि अन्यान्यपि यथानिमित्तं शास्त्रान्तरोक्तानि प्रायश्चित्तानि चात्र कर्तव्यानि सवनाहुतेः पूर्वम्। व्याख्या तु प्रातःसवनवदेवात्रापि।

प्रशास्तः प्रसुवेति संप्रेष्यति सर्पतेत्याह
प्रशास्ता संतिष्ठते तृतीयसवनम्॥ १२॥
इति हिरण्यकेशिसूत्रे नवमप्रश्ने चतुर्थः पटलः।

इदमपि व्याख्यातं प्रातःसवन एव।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-शामिकायां ज्योत्स्नाख्यायां वृत्तौ नवमप्रश्नस्य चतुर्थः पटलः॥ ४॥

अथ नवमप्रश्ने पञ्चमः पटलः ।

अवभृथस्य तन्त्रं प्रक्रमयति ।

अथावभृथस्तत्र यावत्क्रियते तद्व्याख्यास्याम इत्येतावतैव सिद्धेऽवभृथस्य तन्त्रं प्रक्रमयतीत्येवं गुरुसूत्रकरणमध्वर्युतन्त्रविषय एव तत्र यावत्क्रियते तद्व्याख्यास्याम इत्येतस्य प्रवृत्तिर्न होत्रतन्त्रविषय इति । तेन देवा यो अप्सु महिम इत्यत्र भवत्येव । भूः प्रपद्य इत्यादि तु न भवति वेदेरभावात् ।

तत्र यावत्क्रियते तद्व्याख्यास्यामः ।

गृहमेधीयायां प्रायणीयायां च गतार्थम् ।

अग्नीनन्वाधाय वेदं कृत्वाऽग्नीन्परिस्तीर्य पाणी प्रक्षाल्योलपराजीः स्तीर्त्वा यथार्थं पात्राणि प्रयुनक्ति ।

अग्न्यन्वाधानवचनमेतद्वचनाभावे तत्र यावत्क्रियते तद्व्याख्यास्याम इतिसूत्रार्थप्राप्तिः स्यात्तस्य प्राप्त्यर्थम् । कृतव्याख्यानं प्रायणीयायाम् । कालतस्तन्त्रम् । पौर्णमासतन्त्रत्वे ज्योतिरुत्तमं यज्ञायेति, इमामूर्जं ये प्रविष्टा इति च । आमावास्यतन्त्रत्वे ज्योतिरुत्तममद्य यज्ञाय०इमामूर्जं यथातिथीति । उभयत्रापि आवभृथः हविरिति विशेषः समान एव । न व्रतग्रहणं पूर्वगृहीतव्रतस्याद्याप्यमुक्तत्वात् । अर्थलोपात् । नैधमाबर्हिराहरणम् । तूष्णीमसिदमादाय निष्टप्य परिभोजनीयांश्छित्त्वाऽऽहृत्य परिभोजनीयदर्भेभ्यो वेदार्थं दर्भान्गृहीत्वा तेन वेदं कृत्वा परिस्तृणीत नोभावग्नी कर्मणे वामिति पाणी प्रक्षाल्योलपराजीं यज्ञस्य संततिरसीति मन्त्रेण स्तीर्त्वा यथार्थं यथाप्रयोजनं पात्राणि दर्भेषु प्रक्षालितानि न्यञ्चिलानि प्रयुनक्ति । उलपराजीमित्येकवचनप्रयोजनं प्रायणीयायां दर्शितमेव । अत्र क्त्वाप्रत्ययादुलपराजीस्तरणानन्तरमेव पात्राणां प्रयोगः । अवभृथस्य सर्वशेषत्वान्न ब्रह्मयजमानसदनकरणम् । सुत्यार्थं कृताभ्यामेव सदनाभ्यां सिद्धेः । स्फ्यं कपालमेकं महत्सामर्थ्यात् । अग्निहोत्रहवणीं शूर्पं कृष्णाजिनं शम्यामुलूखलं मुसलं दृषदमुपलां स्रुवं जुहूमुपभृतं ध्रुवामाज्यस्थालीं कुटरुं पात्रीं मेक्षणं वेदं मदन्तीपात्रमुपवेषं निषेचनपात्रं वेदाग्राणि वस्त्रयुग्ममुदुम्बरशाखां चेत्येतावन्ति पात्राणि । न ब्रह्मवरणं प्रधानार्थवरणेनैव सिद्धेः । यजमानोपवेशनम् । ततो वाचस्पत इत्याद्येव ब्रह्मणः पवित्रकरणम् ।

न प्रणीताः प्रणयति ।

ब्रह्मन्नपः प्रणेष्यामीति नास्ति न प्रणीताः प्रणयतीति प्रणयनस्य निषेधात् । यजमान वाचं यच्छेत्येतावानेवात्र प्रैषः ।

निर्वपणकाले वारुणमेककपालं निर्वपति।

संविशन्तां० दक्षाय वा० वेषाय० प्रत्युष्टं० यजमान हविर्निर्वप्स्यामीत्यादि स्रुच्योप्येत्यन्तं भवति। निर्वपणकाल इत्यनेन संविशन्तामित्यादिसत्त्वं सूचितम्। वरुणाय जुष्टं निर्वपामीति वारुणमेककपालं निर्वपति। वरुण हव्यꣳ रक्षस्व। वरुणाय वो जुष्टं प्रोक्षामीति। शुन्धध्वमिति पात्रप्रोक्षणं कृष्णाजिनादानादि अव्यवकिरन्तीति प्रैषान्तं कर्म प्राकृतं तन्त्रं वचनाभावेऽपि प्राप्यते। अन्यथेतद्धिना हविष एवासिद्धेः। मदन्त्यधिश्रयणम्। प्रथमेन मन्त्रेणैव पुरोडाशार्थैककपालोपधानम्। निर्दग्धं० भृगूणामङ्गिरसां तपसा तप्यस्व। अङ्गाराध्यूहनं पात्रीनिष्टपनादि पिष्टोत्पवनान्तम्।

यजुरुत्पूताभिः संयौति।

यस्मिन्कस्मिंश्चित्पात्रे शुद्धा अपो गृहीत्वा देवो वः सवितेति पञ्चभिः पठितगायत्र्यात्मकेन मन्त्रेण सकृन्मन्त्रेण द्विस्तूष्णीमित्येवंरीत्योत्पूय ताभ्यः स्रुवेण गृहीत्वा समाप इति पिष्टं मिश्रयतीत्यर्थः। अद्भ्यः परिप्लुताः स्थेत्यादि। न विभागो न निर्देशः। अर्थलोपात्। यजुरुत्पूतत्वविधानप्रयोजनं सवनीयनिर्वापप्रकरणे प्रदर्शितमेव ततो द्रष्टव्यम्।

अभिवासित आप्यलेपं निनीय संप्रैषेण प्रतिपद्यते।

अभिवासितशब्देन वेदेन साङ्गारं भस्माध्यूहनमभिवासनमुच्यते। अविदहन्तः श्रपयतेतिप्रैषनिवृत्तिरनेन क्रियते। प्रैषं विनैवात्राविदाहविशिष्टश्रपणं कर्तव्यम्। आप्यलेपं निनीयेतिवचनं महावेदेरास्तृतत्वान्निवृत्तिराशङ्किता स्यात्तन्निवृत्त्यर्थम्। तूष्णीमेव स्फ्यमादाय संप्रैषेण प्रतिपद्यते। आप्यलेपनिनयनोत्तरं संप्रैष एव नाऽऽस्तम्बोक्ता वेदिरितिप्रदर्शनार्थो ल्यप्प्रत्ययः।

यदन्यदिध्मबर्हिषः पत्नीसंनहनाच्च तत्संप्रेष्यति।

यत्र स्तम्बयजुर्हरणं तत्रैव स्फ्यादानं समन्त्रकं नान्यत्र तस्य तदङ्गत्वात्। तत्र प्रैष एतत्सूत्रात्प्रोक्षणीरासादय स्रुवं च स्रुचश्च संमृड्ध्याज्येनोदेहीत्येतावान्प्रैषोऽत्र भवति। यद्यपि प्रोक्षण्यासादनस्य दृष्टार्थता नात्र तथाऽप्यदृष्टार्थं सादनं कर्तव्यमेव। इध्मबर्हिषः पत्नीसंनहनाच्चान्यत्वात्। ततोऽग्निहोत्रहवण्यां पवित्रान्तर्हितायामप आनीयेत्यादिनाऽग्रं परिमृशतीत्यन्ते निशिताः स्थेत्यादि दिवः शिल्पमित्यन्तं करोति। परिभोजनीयदर्भानुदुम्बरशाखां चाऽऽदाय तूष्णीं निष्टप्य तूष्णीं जुहूवत्संमृज्य पुनर्निष्टप्य प्रोक्ष्य स्रुचां समीपे निदधाति। तूष्णीं संमार्गानग्नौ प्रहरति। वक्ष्यमाणसूत्रादिदं प्राप्यते। न प्राशित्रसंमार्गः। तस्यैवाभावात्।

यत्प्रागाज्यग्रहणात्तत्कृत्वा प्रतिहृत्य
गार्हपत्य आज्यानि गृह्णाति।

पूषा ते बिलं विष्यत्वित्यादि यत्प्रागाज्यग्रहणात्कर्म तत्कृत्वाऽऽज्यं गार्हपत्य-

समीपे प्रतिहृत्य । प्रतिहरणं नाम पर्यावृत्य हरणं प्रतिहरणम् । गार्हपत्यस्योत्तरत आज्यानि गृह्णाति ।

सर्वाणि चतुर्गृहीतानि द्विर्वोपभृति ।

उपभृत्यपि चतुर्गृहीतं द्विर्वेति लाघवाद्वक्तव्य एवं वचनं जुह्वादिषु प्रकृतितः प्राप्तस्य पञ्चगृहीतस्य निवृत्त्यर्थम् । उपभृति ब्रह्मणस्त्वेत्यादिचतुर्भिः । नोपभृतꣳ समानयत इति वक्ष्यमाणनिषेधाद्धविर्हरणमेव समानयनं न स्वाहाकारार्थमित्यवगम्यते । अत औपभृदाज्यस्य प्रयाजसंबन्धाभावात्प्रथमस्य चतुर्गृहीतस्य प्रयाजार्थस्य निवृत्तिः । द्विर्वोपभृतीत्यस्मिन्पक्षे विशे त्वा सुवीर्याय त्वेति द्वाभ्यां द्विवारं ग्रहणम् । प्रकृतिवद्ध्रुवायाम् । अपोद्धृत्याऽऽज्यस्थालीं स्रुवेणेडाभ्यां सह । अन्यत्र कार्यानुरोधेनापोद्धरणमर्थप्राप्तम् । स्वधा पितृभ्य ऊ० आसादितानां प्रोक्षणीनां प्रतिपत्तेरावश्यकत्वादिदम् । पवित्रापिसर्जनं तूष्णीमेव वेद्यामेव । प्रस्तराभावात् । प्रस्तरापिसर्जन एव मन्त्रः । यजमानो वै प्रस्तरः प्राणापानौ पवित्रे यजमान एव प्राणापानौ दधातीत्यर्थवादात् ।

अलंकृत्य पुरोडाशमुत्तरेऽꣳसेऽवभृथꣳ सꣳसादयति ।

अलंकृत्य पुरोडाशमित्यनेनेदमहꣳ सेनाया इत्यादिविधिः प्राप्यते । अत्राभिपूरणं न विद्यते । कृत्स्नस्य प्रधानकर्मण्यप्रदेयत्वात् । स्विष्टकृद्वचनाच्च । उत्तरवेदेरुत्तरेऽसेऽवभृथे प्रक्षेपणीयं द्रव्यसमुदायं संसादयति एकत्र करोति ।

तमेवाऽऽह—

पुरोडाशमाज्यान्यौदुम्बरीमाधिषवणफलके रवर-
पाꣳसूनृजीषं च यत्किंच सोमलिप्तमन्यत्र चत-
सृभ्यः सोमस्थालीभ्य आग्रयणस्थाल्या उ-
क्थ्यस्थाल्या आदित्यस्थाल्या ध्रुवस्थाल्याः ।

यत्किंच सोमलिप्तमित्यनेनाधिषवणचर्मादि गृह्यते । नास्मिन्पुरोडाशसादने याजमानमपूर्वत्वात् । चतसृभ्यः सोमस्थालीभ्य इत्येतावतैव चतसृणां प्रसिद्धत्वाद्ग्रहणे सिद्धे निर्देशो देविकाहविर्निर्वापपक्षे चतसृभ्यः स्थाल्योऽन्यत्र तस्मात्स्थलादपसार्य प्रज्ञाता अन्यत्र स्थाप्यास्ताश्च प्रथमत आग्रयणस्थाली स्थाप्या तत उक्थ्यस्थाली तत आदित्यस्थाली ततो ध्रुवस्थालीत्येवं क्रमेणैव स्थाप्या इत्येतादृशक्रमप्राप्त्यर्थम् ।

आयुर्दा अग्ने हविषो जुषाण इति
जुहोति यतरस्मिन्नग्नौ श्रपयति ।

अत्रावभृथनिचङ्कुणेति मन्त्रेण द्वितीयाऽऽहुतिः । नमो रुद्राय वास्तोष्पतय इति तृतीयाऽऽहुतिः । उक्तं चाऽऽपस्तम्बेन—आयुर्दा अग्ने हविषो जुषाण इत्यवभृथमवैष्यञ्जुहुयादवभृथनिचङ्कुणेति च । नमो रुद्राय वास्तोष्पतये । आयने विद्रवणे ।

उद्यामे यत्परायणे। आवर्तने विवर्तने। यो गोपायति तꣳ हुव इति चेति। तत्राव-भृथनिचङ्कुणेति मन्त्रस्य सूत्रकृताऽन्यत्र विनियुक्तत्वान्नाऽऽहुतौ विनियोगः। नमो रुद्रायेत्यस्य च मन्त्रस्याविनियुक्तत्वादत्र सामान्यपरिभाषया विनियोगः। जपे वा विनियोगः। स च होमोत्तरम्। यतरस्मिन्नग्नौ श्रपयतीत्यत्राऽऽवृच्यते वा एतद्यज-मानोऽग्निभ्यामिति श्रुतिलिङ्गं मूलम्। यदि गार्हपत्ये श्रपणं तदा गार्हपत्य इयमान-हुतिर्यद्याहवनीये श्रपणं तदाऽऽहवनीय इति।

समुप्तेऽवभृथे।

समुप्त औदुम्बर्यामासन्द्यां स्थापिते। आसन्द्यत्रोपस्थितत्वाद्राजासन्द्येव।

प्रस्तोतः सामानि गायेति संप्रेष्यति सह
पत्न्या त्रिः सर्वे साम्नो निधनमुपयन्ति।

निधनं साम्नोऽन्त्या भक्तिः। त्रिःशब्दस्योपयन्तीत्यनेनान्वयः। तथा च त्रिरुप-यन्तीत्यन्वयो भवति। त्रिरुपयन्तीत्यस्य त्रिराहुरित्यर्थः। प्रैषे सामानीति बहुवचनं देशत्रयकर्तव्यसामगानाभिप्रायेण। तेन सकृदेव प्रैषः सिद्धो भवति।

उरुꣳ हि राजा वरुणश्चकारेति चात्वालं
गत्वा वदन्ति चात्वालाद्वा प्रयान्तो वदन्ति।

चात्वालं गत्वा चात्वालसमीपे स्थित्वा वदन्तीति प्रथमपक्षार्थः। चात्वालं त्यक्त्वा तदग्रे प्रयान्तो निर्गच्छन्तो वा वदन्तीति द्वितीयपक्षार्थः।

अन्तरेण चात्वालोत्करावुदञ्चो निष्क्रामन्ति।

उभयपक्षेऽपि चात्वालोत्करावन्तरेण निष्क्रामन्ति। उदञ्च उदङ्मुखाः।

सर्वा दिशोऽवभृथगमनमाम्नातम्।

अत्र यां दिशं व्रजन्ति सैव प्राची तदनुरोधेन तत्तद्दिक्स्थानानि कल्पयित-व्यानि। सर्वेषां मन्त्रः। पत्न्या अपि। सह पत्न्येति पूर्वसूत्रानुवृत्त्येदं लभ्यते।

नोदीचेन संचरितवा इत्येकेषाम्।

उदीचेनोदग्दिग्गतेन। इदं पथो विशेषणम्। उदीचेन पथा न संचरेदित्ये-केषामाचार्याणां मतमित्यर्थः।

मध्यदेशे द्वितीयꣳ साम्नो निधनमुपयन्त्युदकान्ते तृतीयम्।

स्पष्टोऽर्थः।

शतं ते राजन्भिषजः सहस्रमित्यपो दृष्ट्वा जपन्ति।

सर्वेषां बहुवचनाज्जपः। एकवचनपाठेऽध्वर्योरेव जपः। बहुवचनपाठे पत्न्या अपि।

---

१ ग. 'मे निव°। २ ग. च. °अस्य वि°। ३. ग. च. 'हुतिरि'।

अभिष्टितो वरुणस्य पाश इत्युदकान्तमभितिष्ठन्ति ।
उदकान्तं गत्वोदकाभिमुखास्तिष्ठन्ति सर्वे ।
अपः प्रगाह्य तिष्ठन्तोऽवभृथेन चरन्ति ।

अपः प्रगाह्यापो विलोड्य । तिष्ठन्तोऽवभृथेन चरन्तीत्यनेनाऽऽघारादावाक्रमण-प्रत्याक्रमणयोर्निवृत्तिः क्रियते । दक्षिणतो ब्रह्मा यजमानः पत्नी च । उत्तरत आग्नीध्रः पश्चाद्धोता मध्ये हवीꣳषि पात्रान्तरस्थानि केनचिद्धृतानि उखे मध्ये वाऽऽसन्द्यां वा स्थापयेत् । अपामवलोडनं सर्वेषाम् । होताऽनामन्त्रित एव बर्हिस्तूणीमाचम्य निवीती भूत्वा देवा यो अप्सु महिम इत्याचम्य यज्ञोपवीती भूत्वा पुनराचम्य, अभिष्टितो वरुणस्य पाशः, उदकान्तमभितिष्ठति । ततोऽपोऽवलोड्य तिष्ठन्नवभृथे न चरति ।

ओढासु देवतासूदकमुपवाज्य स्रुवाघार-
माघार्याग्नीदुदकं त्रिः संमृष्टेतीति संप्रेष्यति ।

ओढासु आवाहितासु देवतासु सतीषु । इदं याजुषहौत्रे । ओढासु देवतास्वितिसूत्राद्धोत्रा देवतावाहनं कर्तव्यम् । अग्निमग्न आ३० सोममा ३ ० वरुणमा ३ ० देवाꣳ आज्यपाꣳ आ० अग्नीवरुणौ स्विष्टकृतावा ३ ० । ओढासु देवतास्वितिसूत्रावत्यो देवतास्तासां केवलावाहनमात्रं कार्यं न तु निगदशेषपठनम् । उदकं वेदेनोपवाज्य । अदृष्टार्थमिदमुपवाजनम् । स्रुवाघारमाघार्य ध्रुवामाप्याययति । इदं ध्रुवाप्यायनं ध्रुवां वै रिच्यमानामितिनिषेधस्य प्राबल्यात् । अग्नीदुदकं त्रिः समृड्ढीति संप्रेष्यत्यध्वर्युः । ततः संप्रेषित आग्नीध ऊहितेन मन्त्रेणोदकं प्राक्संस्थं त्रिः संमार्ष्टि । स चोह इत्थम्—उदक वाजजिद्वाजं त्वा सरिष्यद्वाजं जेष्यद्वाजि वाजजिद्वाजजित्यायै संमाज्म्युदकमन्नादमन्नाद्यायेति ।

संमृष्टेऽप्सु तृणं प्रास्य ।

संमृष्ट इत्यनेन संमार्गः सूच्यते । संमृष्ट इति भूतनिर्देशात्संमार्गोत्तरमप्सु प्रासनं संमृष्टे विहितेनोहितेनाऽऽग्नीध्रेण संमृष्ट उदक इत्यर्थः । अत्राग्निसंमार्जनानाममावात्तत्स्थाने परिभोजनीयदर्भान्स्पग्येन सह गृहीत्वा तैः सह स्पग्येन संमार्गं करोति । अत्र भरद्वाजेनोक्तम्—चोद्यमाने कर्मणि द्रव्यमुत्पादयेद्यथा गृहमेधीयेऽग्निसंमार्जनानीति । गृहमेधीय इत्यवभृथोपसदादीनामग्निसंमार्जनाभाववतामुपलक्षणम् । आग्नीध्रेण संमार्गे कृत आहवनीयदेशं संलक्ष्याप्सु तृणं प्रास्यति । अस्मिंस्तृणे सर्वा आहुतयो होतव्याः । बर्हिरग्निजुहोत्याहुतीनां प्रतिष्ठित्या अथो अग्निवत्येव जुहोतीति श्रुतेः । भुवनमसि विप्रधस्योदक यष्टूरं नम इत्यग्निशब्दस्थान उदकशब्दस्योहः । अत्र स्याग्निशब्दस्याऽऽहवनीयपरत्वादत्राऽऽहवनीयाभावादुदकस्य तत्स्थानीयत्वात् । यष्टृशब्दस्य तद्विशेषणत्वादुदकशब्दस्य नपुंसकलिङ्गत्वादेतदनुरोधेन विशेषणीभूतो यष्टृ-

शब्दोऽपि नपुंसकलिङ्गः कार्यः । सप्रथा नमो देवेभ्य इति मन्त्रपक्षे तु सप्रथो नमो देवेभ्य इत्यूहः । सप्रथा इति शब्दः सान्तः । तस्योदकविशेषणत्वे सप्रथ इति नपुंसकलिङ्गकत्वम् । स्वधा पितृभ्यः । सुहु ह्यग्निस्त्वा० उपभृदेहि देवस्त्वा० सुयमे मे० अग्नाविष्णू इति नास्ति । वेदेरभावेन तत्प्रयुक्तस्याऽऽक्रमणस्य तत्संबन्धिमन्त्रस्य चाभावः । विष्णोः स्थानमसीति नास्ति । अतिक्रमणाभावात् । अवस्थानस्य तत्संबन्धिमन्त्रस्य चाभावः । अन्तर्वेदि दक्षिणं पादमित्यादि लुप्यते वेदेरभावात् ।

अग्नेरनीकमप आविवेशेति स्रुच्यमाधारयति ।

स्रुच्यं स्रुक्साध्यम् । अत्रत्याग्निशब्दस्येज्यमानदेवप्रकाशकत्वान्नोहः । हुत्वाऽनुप्राणिति । बृहन्ना इति स्रुचमुद्गृह्णाति । पाहि माऽग्न इति नास्ति प्रत्याक्रमणाभावात् । अग्नय इदमिति त्यागः । वागस्याऽऽग्नेयीत्यूहः । समक्तम० उन्नीतꣳ रायः सुवीराय स्वाहा । यज्ञेन० सादयित्वा स्रुचौ । इध्मसंनहनस्थाने संमार्गतृणानि स्पय उपसंमृश्य क इदमध्व० क इदमग्नी० ब्रह्मन्प्रवरायाऽऽश्रावयिष्यामि । वाचस्प० ओ३ माश्रा३ ० आ३ श्रा३ ० अस्तु० तिष्ठ होतरिति प्रयोगक्रमः ।

यथोपसत्स्वेवं प्रवरं प्रवृणीते ॥ १३ ॥ तिष्ठेत्येतावान्प्रवरः ।

सीद होतरित्युपसत्सु इति तस्यात्र बाधितत्वात्तिष्ठेति विशेषः । अग्निर्देवो होतेत्यादिमानुष इत्यन्तस्य लोपः । नच प्रवरलोपे प्रवरार्थस्यावस्थानादेर्लोपः स्यादिति वाच्यम् । तिष्ठेत्येतावान्प्रवर इत्यनेनैतादृशप्रवरसत्त्वबोधनेन तदङ्गभूतान्नमवस्थानादीनामपि बोधनात् । देवाः पितर इत्यारभ्य मां देवेष्वाश्रावयाऽऽयुषे वर्चस इत्येतस्मात्प्राग्यो मन्त्रभागस्तस्य यस्यर्षेरहमस्मि तं नान्तरेमीत्यर्थकाद्यस्यास्मि न तमन्तरेमीतिलिङ्गाद्दृष्युत्कीर्तनविशिष्टप्रवरसंबन्धित्वं प्रतीयते । प्रकृते तादृशप्रवराभावादेतस्य मन्त्रभागस्य लोपो युक्त एव । तिष्ठेत्येतावत एव शब्दस्य सूत्रकृता प्रवरत्वव्यवहारात्प्रवरत्वं सिद्धं, सिद्धे च प्रवरत्वे तस्य फलजनकत्वमपि । एवं च प्रवरसंबन्धिफलयाचनार्थो यावान्मन्त्रभागोऽत्राबाधितस्तावत एव जपो मां देवेष्वाश्रावयाऽऽयुषे वर्चस इत्येतस्य कर्तव्य एव । होताऽग्निर्होता वेत्व० देवता । घृतव० यान् ।

अपबर्हिषः प्रयाजान्यजति ।

अध्वर्युर्घृतवतीमध्वर्यो स्रुचमास्यस्वेत्युच्यमाने जुहूभृतावादायापबर्हिषः प्रयाजान् यजति । प्रयाजाङ्गत्वात्स्रुगादापनम् । यज० पृथिवी होता० वक्ता । अपगतो बर्हिः प्रयाजो येभ्यस्ते प्रयाजा अपबर्हिषः । बर्हिर्नेज चत्वारः प्रयाजा भवन्तीत्यर्थः ।

नोपभृतꣳ समानयते ।

प्रयाजेषु नोपभृतꣳ समानयते । एतस्य बर्हिरर्थत्वात्प्रकृते तस्याभावात् । एतस्मादेव ज्ञायते बर्हिरर्थमेव समानयनं न स्वाहाकारार्थमपि । अतः स्वाहाकारार्थं

प्रकृतावाज्यमवशेषणीयमित्यवगम्यते । अत्र प्रयाजशेषेण ध्रुवां वारुणं पुरोडाशमवभृथं चाभिघारयति । शेषप्रतिपत्तेरावश्यकत्वादेतस्य प्राप्तिः ।

अप्सुमन्तावाज्यभागौ ।

अप्सु इति शब्दो ययोस्तावप्सुमन्तौ । तौ च अप्स्वग्ने सधिष्टव, अप्सु मे सोमो अब्रवीदिति ।

ताभ्यां प्रचर्य पुरोडाशाद्वरुणं यजति ।

ताभ्यां प्रचर्येतिवचनमप्सुशब्दघटिताभ्यामेव प्रचारो न तु चातुर्मास्यप्रकरणगत-श्रुतिपठितया वृषा सोम द्युमाꣳ असीतिद्वितीयाज्यभागसंबन्धिवैकल्पिकपुरोनुवाक्ययेत्येतदर्थम्, मध्ये नैमित्तिकप्रायश्चित्तानुष्ठानार्थं वा । तर्हीदं कुत्र कर्तव्यमिति चेदनूया-जान्ते कर्तव्यमित्यर्थात् । अग्निर्होतेति यजमानं पुरोडाशाद्वरुणं यजति । अत्र न कृत्स्नावदानं तस्य स्विष्टकृत्येव विधास्यमानत्वात् । जुह्वामुपस्तीर्य ध्रुवामाप्याय्य मा भेरित्यभिमृश्य द्विरवदायाभिघार्य ध्रुवां नाऽऽप्याययति । यदवदानानीति प्रत्यभि-घार्य वरुणायानुब्रूहि । आश्राव्य प्रत्याश्राविते वरुणं यजेति प्रयोगो वरुणयागस्य, इमं मे वरुण श्रुधी०तत्त्वा यामि ब्रह्मणा० मोषीर्वो० इति याज्यानुवाक्ये वरुणायेदं० वरुणस्याहं देवयज्ययाऽन्नादो भूयासमिति ।

कृत्स्नं पुरोडाशमवदायाग्नीवरुणौ स्विष्टकृतौ यजति ।

तस्य प्रयोगः- जुह्वामुपस्तीर्य ध्रुवां नाऽऽप्याययति । कृत्स्नं पुरोडाशमवदाय द्विरभि-घारयति । उभयत्रापि ध्रुवां नाऽऽप्याययति । एताभ्यामभिघारणाभ्यां ध्रौवसमाप्तिः । अग्नीवरुणाभ्याꣳ स्विष्टकृद्भ्यामनुब्रूहि । आश्राव्य प्रत्याश्राविते ऽग्नीवरुणौ स्विष्ट-कृतौ यजेति । उत्तरपूर्वार्धस्थानं संलक्ष्य यागः स्विष्टकृत इति प्रयोगः । त्वं नो अग्ने वरु० मुमुग्ध्यस्मोऽ३म् । येऽ३ यजामहेऽग्नीवरुणौ स्विष्टकृतौ भू० वरायाग्निरग्नेः प्रिया धामान्ययाट्सोमस्य प्रिया धामान्ययाड्वरुणस्य प्रिया धामान्ययाड्देवानामाज्यपानां प्रिया धामानि यक्षदग्नीवरुणयोः स्विष्टकृतोर्होत्रोः प्रिया धामानि यक्षत्त्वं महि० जुषताꣳ हविः स त्वं नो अग्नेऽवमो० एधीऽ३ वौ० इति होतुर्विशेषः । यज० अग्नी-वरुणाभ्याꣳ स्विष्टकृद्भ्यामिदम् । अग्नीवरुणयोः स्विष्टकृतोरहं देवयज्ययाऽऽयुष्मान्य-ज्ञेन प्रतिष्ठां गमेयम् । अग्नीवरुणौ मे दुरिष्टात्पातꣳ सविताऽवशꣳसाद्यौ मेऽन्ति दूरेऽ-रातीयति तावेतेन जेषमिति । वैश्वानरे हवि० परिधिदेशं संलक्ष्य प्रक्षालनं निनयति ।

अग्नीदुदकꣳ सकृत्संमृष्टदीति संप्रेष्यति ।

संमार्गोऽत्रापि अर्थात्सिद्धः संमृष्ट इतिवचनाभावेऽपि । आग्नीध्रः स्फ्यवर्जितैस्तै-रेव परिहोमनीयदर्भैरुदकꣳ संमार्ष्टि उदक वाजसिद्वाजं त्वा सप्तवद्वाजं निमिवद्वाजि

वाजजिद्वाजजित्याये संमार्ज्म्युदकमन्त्रादमन्त्राद्यायेति । तूष्णीमेव संमार्गदर्भानप्सु प्रक्षिपति । नात्र यो भूतानामधिपतिरिति । हुतं तव स्वाहेतिलिङ्गविरोधात् । नास्ति वेदिर्बर्हिर्लिङ्गविरोधात् ।

अपबर्हिषावनूयाजौ यजति देवौ यज
यजेति पूर्वमनूयाजꣳ संप्रेष्यति यजेत्युत्तरम् ।

महाहविर्होता० उद्गाता । यदुपभृत्याज्यं तज्जुह्वामानीय तेनापबर्हिषावनूयाजौ यजति । अपगतं बर्हिर्ययोस्तौ बर्हिर्व्यतिरिक्तावनूयाजौ यजति । देवौ यज यजेति पूर्वं प्रथममनूयाजं संप्रेष्यति । यज इत्युत्तरमनूयाजम् । प्रथमस्यानूयाजस्य द्वियजित्वाद्यजिद्वयम् । उत्तरस्यैकयजित्वादेक एव यजि । अङ्गिरसो माऽस्य यज्ञस्य प्रातरनुवाकैरहौषुरिति नाराशंसानूयाजे जपः ।

एतावत्क्रियते ।

मान्यदुत्तरं कर्मेत्यर्थः ।

यत्ते ग्रावणा चिच्छिदुः सोम राजन्नियाण्यङ्गानि
स्वधिता परूꣳषि । तत्संधत्स्वाऽऽज्येनोत वर्ध-
यस्वानागसो अधमित्संक्षयेम । यत्ते ग्रावा
बाहुच्युतो अचुच्यवुर्नरो यत्ते दुरुहुर्दक्षिणेन ।
तत्त आप्यायतां तत्त निष्ट्यायतां देव सोम ।
यत्ते त्वचं बिभिदुर्यच्च योनिं यदा स्थानात्प्र-
च्युतो वेनसि त्मना । त्वया तत्सोम गुप्तमस्तु नः
सा नः संधास्त्परमे व्योमन् । अहाच्छरीरं पयसा
समेत्यान्योऽन्यो भवति वर्णो अस्य । तस्मिन्वय-
मुपबृहास्तव स्म आ नो भज सदसि विश्वरूप
इति चतसृभिरुदुम्बरशाखया दध्नर्जीषमभिजुहोति
पञ्चभिः सप्तभिर्नवभिरेकादशभिस्त्रयोदशभिर्वा ।

जुहोतिचोदितत्वात्स्वाहाकारस्तत्तद्वगन्तेषु । चतसृभिर्ऋग्भिः स्रुक्संमार्गानन्तरं नासंसृष्टेन पात्रेण जुहुयाच्छास्त्रान्तरप्रापितसंमार्गयौदुम्बरशाखया लौकिकेन दध्नर्जीषमभि ऋनीषस्योपरि जुहोति । पञ्चभिः सप्तभिर्नवभिरेकादशभिस्त्रयोदशभिर्वेति पृथक्पृथगुपादानं समसंख्याव्यावृत्त्यर्थम् । आज्येनेति केचित्तत्संधत्स्वाऽऽज्येनेति लिङ्गात् । तदयुक्तम् । दध्नेतिवचनविरोधापत्तेः । प्रोक्षणशब्दवदेवाऽऽज्यशब्दस्य दध्न्युपपत्तेश्च ।

---

१ क. °र्बर्हिः । लिङ्ग° ।

अजीषस्य स्रुचं पूरयित्वा समुद्रे ते हृदयमित्यप्सूपमारयति ।

अजीषस्येति षष्ठ्यवयवे । तेनजीषैकदेशेन स्रुक्पूरणम् । स्रुचं प्रचरणीम् । तस्या एव सोमसंबन्धित्वात् । अन्यां वा लौकिकीम् । लौकिकस्रुग्ग्रहणपक्षेऽवभृथपात्रप्रयोग एतस्या अपि प्रयोगः । प्रोक्षणं संमार्गश्च तूष्णीं जुहूवत् । अजीषैकदेशेन पूरितां स्रुचमप्सूपमारयति अप्सु निमज्जयतीत्यर्थः ।

अप्सु धौतस्य सोमदेवत्य इति यो भिन्दूना-
मुच्चरति तमवघ्रेण भक्षयत्युपस्पृशति वा ।

यो भिन्दूनामुच्चरति उच्चलति रलयोः सावर्ण्यात्, भिन्दूनां बिन्दूनां मध्ये यो महत्त्वाद्धेतोर्बिन्दुरुत्प्लवते तमवघ्रेणावघ्राणेन भक्षयति उपस्पृशति वा तं बिन्दुमवघ्राणपर्यन्तं तस्य स्थातुमशक्यत्व उपस्पर्शः ।

अवभृथनिचङ्कुणेत्यवभृथꣳ संप्रविश्यन्ति ।

बहुवचनादध्वर्युप्रतिप्रस्थातृनेतारो यजमानश्च संप्रविश्यन्ति अवभृथमवभृथद्रव्यसमुदायं सम्यक्प्रक्षिपन्ति उदक इत्यर्थः ।

देवीराप इत्युपतिष्ठन्ते ।

बहुवचनात्सर्वे याजुषाः ।

सुमित्रा न इति मार्जयन्ते ॥ १४ ॥

पूर्ववत्सर्वे याजुषाः ।

उन्नेतर्वसीयो न उन्नयाभ्युदु त्ये मधुमत्तमा गिरः
स्तोमास ईरते सप्राजितो धनसा अक्षितोतयो
वाजयन्तो रथा इव कण्वा इव भृगवः सूर्या
इव विश्वमिद्धीतमानशुरित्युन्नेतारꣳ संप्रेष्यति ।

वसीय इत्युन्नेतृविशेषणम् । अभि उदकतीरामिमुखं नोऽस्मानुन्नयोत्तारयेति । मधुमत्तमा इत्यादिनोत्तार्यविशेषणानि तन्माहात्म्यार्थकानि ।

उदेत प्रजामुत वर्चो दधाना युष्माञ्चाय उत यज्ञा
असृक्षत । गायत्रं छन्दोऽनुसꣳरभध्वमथा स्याम सुरभयो
गृहेष्वित्युन्नेता होतृमथमान्यजमानमथमान्योन्नयति ।

सर्वानृत्विजः । यजमानं पत्नीं च । सकृदेव मन्त्रः । उदेतेति बहुवचनलिङ्गात् ।

प्रतियुतो वरुणस्य पाश इत्युदकान्तं प्रतियौति ।

अन्तिमसीमास्यमुदकं प्रतिलोडयति ।

---

१ ज. ञ. ट. 'वज्रिन्ने'।

प्रत्यस्तो वरुणस्य पाश इत्युदकान्तं प्रत्यस्य ।

अन्तिमसीमास्थमुदकं पादाग्रेण प्रत्यस्येत्यर्थः । अमुमर्थमाह बौधायनः—पराङ्मृत्तः प्रपदेनोदकान्तं प्रत्यस्यतीत्यर्थः (स्येति) । प्रत्यस्येति स्यपोऽप्रतीक्षमायन्तीत्यत्रान्वयः । बहुवचनात्सर्वकर्तृकता प्रत्यसनेऽनवेक्षमाणाः प्रत्यायन्तीत्यत्र च ।

औदुम्बरीः समिधो धारयन्तः ।

सर्व ऋत्विजो यजमानः पत्नी चेत्येकैकामौदुम्बरीं समिधं धारयन्ति । समिध इति बहुवचनमनेककर्त्रभिप्रायम् ।

अपाम सोमममृता अभूमेति महीयां जपन्तः ।

अपाम सोममित्यस्या ऋचः समाख्या महीयेति । संज्ञायाः प्रयोजनं व्याख्यातमुन्नयनं महीयेत्यत्रेतस्याः संप्रत्ययार्थम् । बहुवचनात्सर्वेषां जपः ।

उन्नेतारं पुरस्कृत्वाऽप्रतीक्षमायन्ति ।

पुरस्कृत्वा सर्वेषामग्रे कृत्वाऽवभृथदेशमप्रतीक्षमप्रतीक्षमाणा आयन्ति विहारं प्रति आगच्छन्तीत्यर्थः ।

परोगोष्ठे मार्जयन्ते ।

गोष्ठो गवां वसतिस्थानं तस्य परः पुरोवर्ती यो देशस्तत्र मार्जयन्ते सर्व ऋत्विजो यजमानः पत्नी च । अत्र सुमित्रा न इति मन्त्रमाह भरद्वाजः ।

एधोऽस्येधिषीमहीत्याहवनीये समिधोऽभ्यादधति ।

तत औत्तरवेदिकेऽग्नौ गृहीतां स्वां स्वामौदुम्बरीं समिधमभ्यादधति । आद्यो यजमानः । ततः सर्व ऋत्विजः । तेनैव मन्त्रेणौत्तरवेदिकेऽग्नावेव ।

अपो अन्वचारिषमित्युपतिष्ठन्ते ।

समिदाधानक्रमेणोपतिष्ठन्ते ।

एवं पत्नी गार्हपत्येऽभ्याधायोपतिष्ठते ॥ १५ ॥

अनन्तरं पाठात्सर्वेषामन्ते पत्नीकर्तृकाभ्याधानमुपस्थानं च । एवमिति यथा सर्वैर्मन्त्रेणाभ्याधानोपस्थाने कृते तथाऽनयाऽपि कर्तव्ये इत्येतदर्थम् । औत्तरवेदिकाग्नेरतिदेशतः प्राप्तस्य बाधनार्थं गार्हपत्यग्रहणम् । तत्र पयस्वत्यग्न आगमं तां मा सꣳसृज वर्चसेति मन्त्र ऊहः ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-शामिकायां ज्योत्स्नाख्यायां वृत्तौ नवमस्य पञ्चमः पटलः ॥ ५ ॥

---

१ ग. घ. °हीयाभिर्ख्यं ।

अथ नवमप्रश्ने षष्ठः पटलः ।

प्राग्वंशश्च उदयनीयायास्तन्त्रं प्रक्रमयति ।

प्राग्वंशमाग्नीध्रे विधानम् । तन्त्रं प्रक्रमयतीत्यनुवादः । प्राग्वंशविधानम् । एषोऽग्नाऽऽहवनीयो यतः प्रणीयते स गार्हपत्य इति शालामुखीयं गार्हपत्यकर्मभ्योऽन्वस्यन्ति तत्र गार्हपत्यकर्माणि क्रियन्त इत्येताभ्यां सूत्राभ्यामौत्तरवेदिकाग्निराहवनीयः शालामुखीयो गार्हपत्य इति प्राप्तं तयोर्व्यावृत्तिः क्रियतेऽनेन । तेन प्राकृतेष्वेवाग्निषूदयनीयेति सिद्धं भवति । तन्त्रं प्रक्रमयतीत्यनुवादोऽस्यामिष्टावपि हौत्रविषये नास्त्यपूर्वता किंत्वाध्वर्यवविषय एवेत्येतदर्थमेव तन्त्रं प्रक्रमयतीतिवचनम् ।

तस्याः प्रायणीयया कल्पो व्याख्यातः ।

तस्या उदयनीयायाः प्रायणीयया कल्पः प्रकारोऽन्यन्वाधानादिको व्याख्यात उक्तः ।

अनूयाजसमिधमुपसंनह्यति ।

अत्रैतावान्विशेषः प्रायणीयातः । अर्थः स्पष्टः ।

यस्यां स्थाल्यां प्रायणीयꣳ श्रपयति तस्यां
सनिष्कासायां तेन मेक्षणेन श्रपयति ।

सनिष्कासायामित्यस्यायमर्थः—निष्कासमभि निरुप्तहविष्कायामिति । तेन न श्रुतिविरोधः ।

पत्नीꣳ संनह्यति ।

योक्त्रस्यावभृथे त्यक्तत्वादिति भावः ।

न जुह्वामाज्यं गृह्णाति यदि प्रयाजा न भवन्ति ।

स्पष्टम् ।

कृताकृताः प्रयाजाः ।

एतस्या इष्टेः कृत्स्नत्वेऽपि प्रयाजानूयाजानां कृताकृतत्वमेवेतिज्ञापनार्थं यदि प्रयाजा न भवन्तीत्येतावतैव पाक्षिकत्वेऽवगते कृताकृताः प्रयाजा इति वचनम् ।

अत्र देवताक्रमे विशेषमाह—

पथ्याꣳ स्वस्तिमुत्तमामाज्येन देवतां[2] यजति ।

अग्निः सोमः सविता पथ्या स्वस्तिरदितिरित्येवं देवताक्रमोऽत्रेत्ययं विशेषः । देशक्रमस्तु तत्तद्देवतानुरोधेनैव । तथा चाऽऽपस्तम्बः—तेष्वेव देशेष्वग्निमाज्यभागान्

---

१ ब. °चनं स्पष्टार्थम् । २ ङ. ज. ञ. ट. ढ. देवता ।

प्रथमं यजति पथ्याꣳ स्वस्तिमुत्तमामिति । यत्र देशे या देवता प्रागिष्टा तत्रैव त यजतीत्यापस्तम्बसूत्रार्थः । अन्यश्च विशेष उक्त आपस्तम्बसूत्रे—याः प्रायणीयस्य याज्या इत्युक्तमिति । याज्यानुवाक्यानां विपर्यासोऽपि ब्राह्मणोक्तोऽनुसंधेय इत्यापस्तम्बसूत्रार्थः ।

न स्थालीं निष्कासं मेक्षणं च निदधाति ।

अग्रे प्रयोजनाभावादिति भावः ।

न ध्रुवायाः शेषं करोति ।

प्रयोजनाभावात् ।

कृत्स्ना संतिष्ठते ।

शाखान्तरत्वव्यावृत्त्यर्थमिदं वचनम् ।

अनूबन्ध्यायास्तन्त्रं प्रक्रमयति ।

अत्र तन्त्रं प्रक्रमयतीतिवचनमुदयनीयासमाप्त्यव्यवहितोत्तरमेव तन्त्रप्रक्रमः कर्तव्य इत्येतदर्थम् ।

तस्या निरूढपशुबन्धेन कल्पो व्याख्यातः ।

तस्या अनूबन्ध्याया निरूढपशुबन्धेनैन्द्राग्नेन सौर्येण प्राजापत्येन वा कल्पः प्रकारो व्याख्यात उक्तः । यज्ञमनु यज्ञसमाप्तिमनु बध्यत इत्यनूबन्ध्या दीर्घ आर्षः । षड्ढोतपश्चिष्टिश्चाङ्गभूते न विद्येते इतिसूत्रात्षड्ढोतृपश्चिष्टी न स्तः ।

मैत्रावरुणीं वशामुपाकरोति ।

वशा वन्ध्या । सा च गौः । तथा चाऽऽपस्तम्बेन गोपदघटितावेव प्रैषावुक्तौ-मित्रावरुणाभ्यां गोर्वपाया मेदसोऽनुब्रूहि मित्रावरुणाभ्यां गोर्वपाया मेदसः प्रेष्येति संप्रैषाविति । उभयोर्वशागोशब्दयोरपि वा प्रयोगः । वशाशब्देनेदमपि ज्ञायते गोशब्देन स्त्रीजातिरत्र गृह्यत इति । हविरवदानप्रैषविषयेऽप्यापस्तम्बः—एवमवदानेषु हविष इत्यन्तौ नमतीति । वपाया मेदस इत्येतस्य स्थाने हविष इत्यूह इत्यर्थः पञ्चपशूनां मध्ये त्र्यक्षरोर्ध्वसंख्यकाक्षरत्वादग्नीषोमीय एवैतस्याः प्रकृतिः । तेनाग्नीषोमीये तद्विकारेषु चाऽऽश्वबालः प्रस्तर ऐक्षवी विधृती कार्ष्मर्यमयोऽधि(?) कांपौतुदारवे त्र्योऽमुष्मा अमुष्य वपाया मेदसः प्रेष्यामुष्मै पुरोडाशस्य प्रेष्यामुष्मा अमुष्य हविष प्रेष्येत्येतत्सूत्रोपात्ता धर्मा अत्र भवन्ति । अत्र स्त्रीपशुत्वादमुष्मा इत्येतस्य स्थानेऽमुष्मा इत्यूह इति विशेषः ।

तिस्रो वा द्विरूपां मैत्रावरुणीं बहुरूपां
वैश्वदेवीꣳ शितिपृष्ठां बार्हस्पत्यामिति ।

द्विरूपा द्विवर्णा मैत्रावरुणी । बहुरूपाऽनेकवर्णा वैश्वदेवी । शितिपृष्ठा श्वेतपृष्ठा बार्हस्पत्या एवं तिस्रः । शितिपृष्ठायां द्विरूपत्वेऽपि पृष्ठे श्वेतवर्णसत्त्वं नियतमिति द्विरूपवशातो विशेषः । इतिशब्दो बार्हस्पत्यानुबन्ध्याविषये प्रकारान्तरमप्यस्तीति-ज्ञापनार्थम् । तेनाऽऽपस्तम्बोक्तो रोहिणी बार्हस्पत्येति रोहितवर्णोऽपि पक्षे सिद्धो भवति ।

उपाꣳशु मध्यतो वैश्वदेव्या प्रचरत्याश्रुतप्र-
त्याश्रुते अप्युपाꣳशु भवत उच्चैरितराभ्याम् ।

यदि मध्यतस्तदैव वैश्वदेव्या उपांशुत्वं नाऽऽवन्ततो वा । तेनाऽऽवन्ते वाऽपि यागपक्षोऽस्तीति अवगम्यते । अन्यत्र प्रवरसंवादाश्रावणमंप्रैषेभ्य इति सूत्रा-त्प्राप्तस्याऽऽश्रावणस्योच्चैष्ट्वस्यानेन बाधः । आश्रावणग्रहणमस्मिन्सूत्रे प्रत्याश्रावणोप-लक्षणम् । अपिशब्दात्संप्रैषा अप्युपाꣳशु भवन्तीतिसूचनार्थम् । परप्रत्यायनं तु हस्ताङ्गुलिस्फोटनाद्युपायेन सूत्रकृद्विधानबलादनन्यगतिकत्वाच्चेदं कल्प्यते । इतराभ्यां मैत्रावरुणीबार्हस्पत्याभ्याम् । अनियमशङ्काव्यावृत्त्यर्थमिदं वचनम् । अनूबन्ध्यात्रि-त्वपक्ष एव विकृतिविशेष एव समावेश इत्याहाऽऽपस्तम्बः—ता न सर्वत्राऽऽलभन्ते वाजपेये राजसूये सत्रे सहस्रे सर्ववेदसे वेति । अन्यश्च विशेषोऽस्मिन्पक्षे तत्रैवोक्तः—यः कामयेत सर्वो मे यज्ञः स्यात्सरस इति स एतास्तिस्रोऽनूबन्ध्या आलभेतेति । अनेन तु कामेन सर्वत्राऽऽलम्भः । सरसो वीर्यवान् । प्रस्तरस्यैवाऽऽहरणं बर्हिषः कल्पेनात्र । यूपरशनास्वरुहृदयशूलानां प्रयोगाभावः । उत्तरवेदिदेश एव पाशुकाज्यग्रहणम् । अग्रे नयनाभावात् । पुंलिङ्गशब्देषु स्त्रीलिङ्गेनोहः सर्वमन्त्रेषु । मित्रावरुणाभ्यां गोर्वपाया मेदसोऽनुब्रूहि । मित्रावरुणाभ्यां गोर्वपाया मेदसः प्रेष्येत्यूहः । मित्रावरुणाभ्यां गोः पुरोडाशस्यानुब्रूहि । मित्रावरुणाभ्यां गोः पुरोडाशस्य प्रेष्य । मित्रावरुणाभ्यां गोर्हविषोऽनुब्रूहि । मित्रावरुणाभ्यां गोर्हविषः प्रेष्येति प्रैषाः । गोशब्दानन्तरं सर्वत्र वशाशब्दो वा प्रैषेषु ।

अनूबन्ध्यायाः पशुपुरोडाशं निरू(रु)प्य दैविकानि हवीꣳष्यनुनिर्वपति ।

दैविकानीमानि दैविकानि देविकारूयदेवतासंबन्धीनीत्यर्थः ।

धात्रे पुरोडाशं द्वादशकपालं निर्वपतीति यथा समाम्नातम् ।

धात्रे पुरोडाशं द्वादशकपालं निर्वपत्यनुमत्यै चरुꣳ राकायै चरुꣳ सिनीवाल्यै चरुं कुह्वै चरुमित्येतानि पञ्च । पञ्चेति स्पष्टमेवापठदापस्तम्बः । धात्रे पुरोडाशं द्वादश-

कपालं निर्वपत्यनुमत्यै चरुꣳ राकायै चरुꣳ सिनीवाल्यै चरुं कुह्वै चरुमित्यत्र यथा समाम्नातं तथेत्यर्थः।

सोमस्थालीष्वेते चरवः पयसि श्रप्यन्ते।

धात्रे द्वादशकपालः पुरोडाशः। आग्रयणस्थाल्यामनुमत्यै चरुः। उक्थ्यस्थाल्यां राकायै चरुः। आदित्यस्थाल्यां सिनीवाल्यै चरुः। ध्रुवस्थाल्यां कुह्वै चरुरित्यर्थः।

अनूबन्ध्यायाः पशुपुरोडाशस्य देविका-
हविषां च समानꣳ स्विष्टकृदिडम्।

स्पष्टम्।

मैत्रावरुणीं पुरोनुवाक्यामन्वाह।

स्पष्टम्। मैत्रावरुणीं पुरोनुवाक्यामन्वाहेतिवचनं प्रकृतावेकैवानूबन्ध्या त्रित्वपक्षस्तु अनन्तरप्रदर्शितविकृतिविषय एवेतिज्ञापनार्थम्।

संप्रैषश्च भवति।

अग्नीषोमीयविकृतित्वमेव न तु स्त्रीत्वसामान्यमादाय सरस्वतीविकृतित्वमितिज्ञापनायेदं सूत्रम्। सौरीर्नव श्वेता वशा अनूबन्ध्या भवन्ति पञ्चदश वेत्यश्वमेधे या अनूबन्ध्यास्तास्वपि अनूबन्ध्यानामातिदेशात्तास्वप्यतोऽतिदेशात्तत्रापि संप्रैषो भवति। एवं सर्वास्वप्यनूबन्ध्यासु।

अनूयाजान्ते स्वरुं जुहोति हृदयशूलेन चरति यथा पुरस्तात्।

परिधिप्रहरणोपलक्षणमिदम्।

मैत्रावरुणीमामिक्षामेकेऽनूबन्ध्यायाः स्थाने समामनन्ति
हविराहुतिप्रभृति ॥ १६ ॥ इडान्ता संतिष्ठते।

स्थान इत्यनेनानूबन्ध्याकार्यसंपादनमामिक्षया क्रियतेऽल्पत्वेऽप्येतस्याऽऽमिक्षाकर्मण इति सूच्यते। कलौ गवालम्भस्य—

अग्निहोत्रं गवालम्भं संन्यासं पलपैतृकम्।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्॥

इति गवालम्भनस्य निषेधनादामिक्षायाग एव। स्थानशब्दस्वारस्यादेतस्याः प्रतिनिधित्वं नास्ति। हविराहुतिप्रभृति प्रधानप्रभृतीडान्ता भवतीत्यर्थः। इडयाऽन्तः समाप्तिर्यस्याः सेडान्ता। इडान्तेत्यनेनैव संस्थायां सिद्धायां पुनः संतिष्ठत इतिवचनं प्रतिपत्तिकर्मणाऽपि संस्थाऽऽवश्यकीतिद्योतनार्थम्। तेन वाजिनयागस्य निष्पन्नद्रव्यप्रतिपत्तिरूपत्वात्कर्तव्यता सिद्धा भवति। तथा च भरद्वाजः—निष्पन्ने द्रव्ये न कर्मलोप इति। आश्वलायनोऽपि आज्ययागप्रभृति वाजिनान्तेति। हविराहुतिप्रभृती-

त्यनेन द्रव्योत्पादकानि यावन्ति कर्माणि तावन्त्येव कर्तव्यानि नाग्न्यन्वाधानादितन्त्र-मिति सूच्यते। लौकिकेन दध्नैवाऽऽमिक्षाऽत्र। सायंदोहावचनात्। खण्डेष्टिरामिक्षा समाख्याता। ततो देविकाहविषां यागः। अग्न्यान्वाधानादिब्राह्मणतर्पणान्तकर्मकलापेन(?)। उभयोस्तन्त्रं तु न भवति। स्वरूपविरोधात्। आपस्तम्बस्त्वत्राप्येतेषामनुनिर्वापमिच्छति तामनु देविकाहवीꣳषि निर्वपतीति। बौधायनोऽत्रानुग्रहमाह—आज्येन देविका यजेदित्याङ्गीगविरिति। भरद्वाजोऽप्याह—आमिक्षां करिष्यन्नाज्येन देविका इति। आज्यपक्ष उपांशुयाजधर्मेण यागः। निर्वापपक्षेऽत्रापि समानं स्विष्टकृदिडम्। तथा चाऽऽपस्तम्ब आमिक्षायागं प्रकृत्य समानं तु स्विष्टकृदिडमिति। इदमपि स्वीकार्यमशक्तौ। एवकाराश्रवणात्।

सदोहविर्धानानां प्रथमकृतान्ग्रन्थीन्विस्र-
स्योदीची हविर्धाने बर्हिर्वेदि निर्वर्त्य।

सदश्च हविर्धाने च सदोहविर्धानानि तेषां सदोहविर्धानानां हविर्धानयोर्दक्षिणमग्रेणाऽऽहवनीयमुदङ्नीत्वा बर्हिर्वेदि निर्गमयति अव्यवायार्थम्। प्रथमं कृताः सदसो हविर्धानस्य हविर्धानयोश्च ये ग्रन्थयस्तान्विस्रस्य। एतेन ज्ञायते प्रथमग्रन्थयः प्रज्ञाता भवन्तीति। यं प्रथमं ग्रन्थिं ग्रथनीयाद्यत्तं न विस्रꣳसयेदपेहेनाध्वर्युः प्रमीयेत तस्मात्स विस्रस्य इति श्रुतौ दोषश्रवणादावश्यकं ग्रन्थिविस्रंसनम्। अपहेन मूत्रनिरोधेनेत्यर्थः। उदीची उदग्रे निर्वर्त्याव्यवायेन निष्काश्य।

यत्कुसीदमप्रतीत्तमित्याहवनीयाद्वेदिमुपोषति।

वेदिमुपोषतीत्यत्र स्तृतबर्हिषा वेदेर्दाहेन स्वरूपनाशासंभवाल्लक्षणया तत्स्थं बर्हिर्लक्ष्यते। तेन वेद्यां स्तीर्णस्य बर्हिषो दाहः सिध्यति। न च्छर्दिष्यपि। यदोषधीभिर्वेदिꣳ स्तृणाति यदनुपोष्य प्रयायादिति ब्राह्मणेन स्तीर्णस्य बर्हिष एव दाहविधानात्।

प्राग्वꣳशे गार्हपत्यात्पत्नी।

एतस्मादेव सूत्राज्ज्ञायते—उदयनीयेष्टिबर्हिषः प्रहरणं नैव समिष्टयजुर्होमे। अप्रहृतस्योदयनीयेष्टिबर्हिष उपोषणं पत्न्या कार्यमिति। उष प्रुष दाह इति धातुर्दाहेऽर्थे वर्तते। उपशब्दः समीपेऽवस्थानार्थः।

घृतꣳ सधस्थ परि ते ददामीति तिसृभिर्धूममुद्यन्तमनुमन्त्रयते।

बर्हिर्दाहजन्यं धूममुद्यन्तमुदूर्ध्वं यन्तमनुमन्त्रयत इत्यर्थः।

विश्वलोप विश्वदावस्य त्वा संजुहोमीत्यञ्जलिना सकृन्प्रदाव्ये जुहुयाद्यदि मिश्रमिव चरित्वा मन्यते।

सकृच्छब्दो यवमिष्टेषु रूढो नित्यं बहुवचनान्तः शब्दस्वाभाव्यात्। अत्र भक्षि-

तानामेव यवानां सक्तवो ग्राह्याः। होमे विनियोक्ष्यमाणत्वात्। यदि साध्वसाधु मिश्रमिव यज्ञे चरितवानिति मन्यते तदा प्रदाव्ये वेद्युपोषणेऽग्नौ सकृल्लौकिकाञ्जुहुयात्। श्रुतिरपि—यदि मिश्रमिव चरेदञ्जलिना सकृत्प्रदाव्ये जुहुयादेष वा अग्निर्वैश्वानरो यत्प्रदाव्यः स एवैनꣳ स्वदयतीति। अत्राऽऽपस्तम्बेन विशेष उक्तः—अष्टकां विधान्यामित्युक्तमिति। योऽर्वाक्संवत्सरादात्मनः शुभाशुभे जिज्ञासते तस्यायमयज्ञसंयुक्तः कल्पः क्रमप्राप्तो ब्राह्मणस्थः प्रदर्श्यत इत्येतस्याऽऽपस्तम्बसूत्रस्यार्थः। उक्तं ब्राह्मण इति शेषः। तच्च ब्राह्मणम्—अष्टकां विधान्यामेकाष्टकायामपूपं चतुःशरावं पक्त्वा प्रातरेतेन कक्षमुपोषेद्यदि दहति पुण्यसमं भवति यदि न दहति पापसममेतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्रमुपयन्तीति। तत्रैकाष्टकां स्वयमेव गृह्णन् वक्ष्यति—अष्टकां व्याख्यास्यामो माघ्याः पौर्णमास्या योऽपरपक्षस्तस्याष्टमीमेकाष्टकेत्याचक्षत इति। अष्टका नाम नित्यः पितृकार्यसमुदायस्तं व्याख्यास्यामः। मघाभिः प्रायेणोपयुज्यते सा माघी पौर्णमासी माघमासस्य पौर्णमासीत्यर्थः। तस्याः समीपे योऽपरपक्षस्तस्याष्टमीमेकाष्टकेत्याचक्षत आचार्याः। एकशब्दः प्रधानवाची। एका प्रधानाऽष्टका। यथैकपुरुष इत्यत्र प्रधानपुरुष उच्यते। किमपेक्ष्य प्राधान्यमिति चेदुच्यते—हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणां याश्चतस्रोऽष्टम्यस्ताः सर्वा इष्टकास्ता अपेक्ष्य। किमर्थमेतद्वचनं तस्याः पूर्वेद्युरुत्तरेद्युश्च कर्मविधानार्थम्। यद्येवं तस्य सप्तम्यामनूराधैरित्येव वक्तव्यम्। एवं तर्हि कालसंयोगादष्टकाशब्दः कर्मणीदमेव चाष्टकादीनां प्राधान्यमिति ज्ञापनार्थम्। किमेतस्य ज्ञापने प्रयोजनं समाख्यासामर्थ्यात्सर्वास्वप्यष्टकास्विच्छातः क्रिया स्यादस्यास्तु प्राधान्यान्नियतता च। एकाष्टकायां दीक्षेरन्निति एकाष्टकायां क्रयः संपद्यत इति च। अत्राप्यस्याः संप्रत्यय इत्येतदर्थमेतस्या एकाष्टकाया एव विशेषणमङ्गां विधान्यामिति। सा हि संवत्सरस्याहानि विदधाति प्रक्रमयति। कथं संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्निति श्रुतेः। तस्यां प्रातश्चतुःशरावव्रीहिपिष्टसंभितमपूपं पक्त्वाऽङ्गारसात्कृत्वा तेनारण्ये कथं संदहेत्स चेदपूपः प्रदीप्तो दहति कथं तदा पुण्यसमं शुभं भविष्यतीति विद्यात्। विपर्यये त्वशुभमिति। एवमृषयः पुरा परीक्ष्य दीर्घसत्रेष्वेव दीक्षयन्तीति।

पृथगरणीष्वग्नीन्समारोपयते प्राजिहितं गार्हपत्यं
दक्षिणाग्निꣳ शालामुखीयं गतश्रियस्तृतीयम्।

गतश्रियस्तृतीयमित्यनेनाऽऽहवनीयाजस्रत्व एवेदमिति बोध्यते। समारोपयत इत्यनेनाऽऽत्मसमारोपोऽप्यत्राभिमतः। आपस्तम्बोक्तिवदुत्तरत्र निर्मथ्येत्यवचनात्।

---

१ ग. च 'मन्थ्येत्य'।

प्राचीनमुदीचीनं वोदवसाय विहारꣳ साधयित्वोदव-
सानीयामिष्टिं निर्वपत्याग्नेयमष्टाकपालं पञ्चकपालं वा ।

उदवसानार्थेष्टिरुदवसानीया तां निर्वपतीत्यर्थः। अग्न्याधानादिब्राह्मणतर्पणान्तो-
ऽग्निहोत्रम्। अष्टाकपालपक्षः शाखान्तरीयः पञ्चकपालपक्षः स्वशाखागतः ।

अत्र विशेषमाह—

तस्योपाꣳशु सर्वं क्रियत ओत्तमादनूयाजात् ।

तस्याष्टाकपालस्य पञ्चकपालस्य वा। सर्वमित्यनेन तन्त्रसहितस्य सर्वस्य प्रधान-
स्याऽऽश्रावणप्रत्याश्रावणसंप्रैषादिसहितस्योपांशुता विधीयते । परप्रत्यायनं संज्ञया ।
आ, उत्तमादनूयाजात् । अत्राऽऽङ्मर्यादायाम् । तेनोत्तमादनूयाजात्प्रागित्ययमर्थो
भवति । उत्तमानूयाजप्रभृति प्राकृत एव स्वर इत्यर्थात् । अत्राऽऽपस्तम्बो हौत्रे
विशेषमाह—यदि पञ्चकपालो गायत्र्यौ संयाज्ये यद्यष्टाकपालः पङ्क्त्यावितिं । दक्षि-
णाविशेषोऽपि तेनोक्तः—अनड्वान्दक्षिणाऽनड्वाहं वा हिरण्यमिति । आश्वलायने-
नापि पौनराधेयिक्या धर्मा उक्ताः—पौनराधेयिक्यविकृतेति ।

उरु विष्णो विक्रमस्वेति पूर्णाहुतिमेक
उदवसानीयायाः स्थाने समामनन्ति ।

द्वादशगृहीतेन स्रुचं पूरयित्वाऽन्तर्वेद्यूर्ध्वस्तिष्ठन्नित्यापस्तम्बः ।

सा यावद्रात्रौ कियद्रात्रेण वा संतिष्ठते तदैव
सायमग्निहोत्रं जुहुयात्काल एव प्रातर्होमः ।

सेष्टिरुदवसानीया । यावती चासौ रात्रिश्च यावद्रात्रिः । तत्र रात्रिर्द्विविधा
महती, अल्पा च । एतयोरुभयोरपि रात्र्योः कियद्रात्रेण वा संतिष्ठते । कियदित्यनेन
कालानियमः सूच्यते । कियद्रात्रिर्यस्य स कियद्रात्रः कालः । यदा संतिष्ठते तदैव सायम-
ग्निहोत्रमतिपन्नकालमपि जुहुयात् । गौणकालानतिपातात् । प्रातर्होमं त्वागामिनं स्वकाल
एव जुहोति । नन्वस्मिन्काले कः प्रसङ्गः । अस्ति प्रसङ्गः । उदवसानीयान्ते सायंप्रात-
राहुतिरिति श्रुतेः । सूत्रकारमताच्च । यथाऽऽह बौधायनः—सायंप्रातरग्निहोत्रे प्रतिजुहो-
तीति । सूत्रकाराभिप्रायस्तु सायमाहुतिश्रुतिस्तावन्नित्याया एव सायमाहुतेरतीतका-
लाया गौणकालानुज्ञार्था । प्रातराहुतिश्रुतिरपि प्रसङ्गाद्भाविन्याः प्रातराहुतेरनुवा-
दिका नत्वपूर्वाग्निहोत्रविधायिकेति । अत एवोक्तं काले प्रातर्होम इति । केचित्तु अग्नि-
होत्रद्वयमिदं सोमाङ्गं संतिष्ठतेऽग्निष्टोम इत्युत्तरत्र वचनादिति प्राहुः । तथा चोदव-
सानीयं प्रकृत्याऽऽह कात्यायनः—तदन्ते सायमाहुतिः सोमाङ्गं संनिध्यविरोधाभ्यां
नित्या वा प्रातराहुतेरिति श्रुतेरिति । एतेषां मतेऽनारब्धेऽग्निहोत्रेऽपि कर्तव्यमग्निहो-

त्रम् । अनन्तरे काले दशहोत्रादिधर्मेण यावज्जीवसंकल्पेनाऽऽरब्धव्यमिति । जैमिनिनाऽपि उक्तं षष्ठाध्याये सप्तमे पादे दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् । उत्कर्षो वा दीक्षितत्वादविशिष्टं हि कारणमिति । दैवादवभृथोत्कर्षे दीक्षाकालस्य शिष्टत्वादसमाप्तत्वान्नियतानामतिक्रमेऽप्यनुत्कर्षः प्राप्तकालत्वादिति पूर्वसूत्रार्थः । वाशब्दः पूर्वपक्षव्यावर्तकः । दीक्षितत्वाद्दीक्षाया अनुन्मुक्तत्वादुत्कर्ष एव हि यस्मादविशिष्टं पूर्वेण तुल्यमेव कारणमत इत्यर्थो द्वितीयसूत्रस्य । स एव तत्र प्रतिहोमो न विद्यते यथा पूर्वेषाम् । कालप्राधान्याच्च । तत्र दैवादुदवसानीयेष्टयुत्कर्षे यथा पूर्वेषां यथाऽवभृथेष्टेः पूर्वतना होमास्तेषां प्रतिहोमो न विद्यते तथा दैवादुत्कृष्टाया उदवसानीयाया उत्तरेषामपीति प्रथमसूत्रार्थः । कालप्राधान्यात् । सा यावद्रात्रौ कियद्रात्रेण वा संतिष्ठते तदैव सायमग्निहोत्रं जुहुयादिति कालप्राधान्यादपि प्रतिहोमो न विद्यत इति द्वितीयसूत्रार्थः । अन्यच्च जैमिनिः—प्रतिषेध ऊर्ध्वमवभृथादिष्टेरिति । अवभृथेष्टेरूर्ध्वमिष्टेः प्रकृतिभूतायाः प्रतिषेध इत्यर्थः । अन्यच्च स एवाऽऽह प्रतिहोमाश्चेत्सायमग्निहोत्रप्रभृतीनि हूयेरन्निति । प्रातस्तु षोडशिनीति च । दैवान्मानुषाद्वा विलम्बादुत्तरेद्युरुत्कृष्टा यद्युदवसानीया तदोत्तरस्यैवाह्नः सायं होमः कर्तव्यो न पूर्वस्य । अर्वागुदवसानीयेष्टेरग्निहोत्रेऽनधिकारात् । अयमर्थ एताभ्यां जैमिनिसूत्राभ्यां लभ्यते । श्रुतिरपि—एतया पुनराधेयसंमितयेष्ट्येष्ट्वाऽग्निहोत्रं जुहुयादिति । सर्वप्रायश्चित्तं तु होतव्यम् । उदवसानीयोत्कर्षात् । यत्र तु क्रतुवशादुत्कर्षस्तत्र न प्रायश्चित्तम् । यथाऽतिरात्रे । भारद्वाजस्तत्राऽऽह—सुत्यावदग्निहोत्रप्रत्यग्निहोत्राण्यतिपन्नानि प्रतिजुहुयान्न वा प्रतिजुहुयादिति ।

संतिष्ठतेऽग्निष्टोमः ॥ १७ ॥

इति हिरण्यकेशिसूत्रे नवमप्रश्ने षष्ठः पटलः ।

संतिष्ठतेऽग्निष्टोम इति वचनमग्निहोत्रद्वयस्य सोमाङ्गत्वं वक्तुम् । अर्थः स्पष्टः ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-शामिकायां ज्योत्स्नाख्यायां वृत्तौ नवमप्रश्नस्य षष्ठः पटलः ॥ ६ ॥

अथ नवमप्रश्ने सप्तमः पटलः ।

उक्थ्यः षोडश्यतिरात्रोऽप्तोर्यामश्चाग्निष्टोमस्य गुणविकारा भवन्ति ।

एवं तावत्सर्वैज्यैर्ज्योतिष्टोम इति सूत्रकृत्प्रदर्शितज्योतिष्टोमत्वरूपव्यापकधर्मावच्छिन्नज्योतिष्टोमावान्तरगताग्निष्टोमत्वरूपव्याप्यधर्मावच्छिन्नाक्रान्ता सर्वकामोऽग्निष्टोम इत्यादिना सूत्रकारेणाग्निष्टोमशब्देन व्यवहृतसर्वैकाहाहीनसत्रमूलप्रकृतिभूताग्निष्टोमसंस्था व्याख्याता । इदानीं संस्थान्तराणि व्याख्यायन्ते । तत्रेदं तावद्वक्तव्यं कियत्योऽस्य संस्था इति । तिस्र इत्येकः पक्षश्चतस्र इत्यपरः पक्षः । तत्र त्रित्वे तावल्लिङ्गानि यद्यग्निष्टोमो जुहोति यद्युक्थ्यः परिधौ निमार्ष्टि यद्यतिरात्रो यजुर्वदन्प्रपद्यत इति, यद्यग्निष्टोमः सोमः परस्तात्स्यादुक्थ्यं कुर्वीत यद्युक्थ्यः स्यादतिरात्रं कुर्वीतेति, यावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोति यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति यावदतिरात्रेणोपाप्नोति तावदुपाप्नोतीत्यादि द्रष्टव्यम् । अथ चतुष्ट्वेऽपि नाग्निष्टोमो नोक्थ्यो न षोडशी नातिरात्र इति एतद्वा अग्निष्टोमं प्रथममुपयन्त्यथोक्थ्यमथ षोडशिनमथातिरात्रमिति । तानग्निष्टोमेन नाऽऽप्नोत्तानुक्थ्येन नाऽऽप्नोत्तान्षोडशिना नाऽऽप्नोत्तान्नात्रिया नाऽऽप्नोदित्यादि । द्रष्टव्यम् । तत्र कैश्चित्कल्पकारैस्त्रित्वकल्प आश्रितः । यथा लाट्यायनद्राह्यायणादिभिरुक्तं—स्वतन्त्रस्य ज्योतिष्टोमस्य संस्थाकल्पा अग्निष्टोममुक्थ्यमतिरात्रमित्यादि अन्यैराचार्यैस्तु चतस्र एताः संस्थाः प्रकृत्यधिकारेऽनुक्रान्ता यथाऽऽश्वलायनादिभिः । एवं मतभेदे संप्लवमाने स्वमतेनाऽऽचार्यः प्रकृतिसंस्था दर्शयति उक्थ्यः षोडश्यतिरात्रोऽप्तोर्यामश्चाग्निष्टोमस्य गुणविकारा भवन्तीत्यनेन सूत्रेण । आपस्तम्बेनाप्येवम् । तत्रायमभिप्रायः सूत्रकारस्य—अग्निष्टोम एव तावत्सर्वसोमानां मौलिकी प्रकृतिः । यथा च वक्ष्यति सप्तदशप्रश्ने प्रथमे खण्डे सर्वक्रतुनां प्रकृतिरग्निष्टोम इति । संस्थान्तराणि तु दाक्षायणयज्ञादय इव दर्शपूर्णमासयोस्तस्यैव गुणविकारमात्राणि भवन्ति न तु त्रिकद्रुकादिव क्रत्वन्तराणि अग्निष्टोमो ज्योतिरादेरग्निष्टोमस्य प्रकृतिः । उक्थ्यो गवादेरुक्थ्यस्य । षोडशी च वाजपेयादिषोडशिनः । अतिरात्रो विश्वजिदादेरतिरात्रस्य । अप्तोर्यामः सप्तदशे प्रश्ने द्वादशे खण्डे—अप्तोर्यामेण पशुकामो यस्मात्पशवः प्रप्रेव भ्रश्शेरन्नित्यैकादशिनाः पशवो भवन्तीति । एतस्यैव सवात्मकत्वं वक्ष्यति त्रयोदशे प्रश्ने त्रयोदशे खण्डे सवप्रकरणे व्याख्यातोऽप्तोर्याम इत्यनेन सूत्रेण । सवप्रकरणात्सवात्मकत्वमप्येतस्य । नामातिदेशमात्रमत्र । एवं च ये सर्वपृष्ठाः सर्वस्तोमा विश्वजित्प्रकृतेरप्तोर्यामनाम्नो वैकृतातिरात्रविशेष एव । अतो नाप्तोर्यामो

नाम ज्योतिष्टोमः प्रकृतिभूतोऽस्तीति संगिरन्ते ते प्रत्युक्ता भवन्ति । तस्यापीह ज्योतिष्टोमसंस्थाधिकारवचनात्प्रकृत्यधिकाराच्चास्त्येव प्रकृतिभूतत्वम् । भरद्वाजेनाप्यत्र ज्योतिष्टोमं प्रकृत्य पञ्चैताः प्रकृतिसंस्था अग्निष्टोम उक्थ्यः षोडश्यतिरात्रोऽप्तोर्याम इत्युक्त्वा यज्ञपुच्छमभिधायान्तत उपसंहृतं संतिष्ठते ज्योतिष्टोम इति । अतोऽप्यस्त्येव प्रकृतिभूतो ज्योतिष्टोमोऽप्तोर्याम इति । ननु गौतमाद्या आचार्याः सप्त संस्थाः सोमस्योपदिशन्ति अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमयज्ञसंस्था इति । तासु चोत्तराः षडप्याद्यस्याग्निष्टोमस्य गुणविकारा एतत्केन विशेषणात्यग्निष्टोमवाजपेययोरनुपादानमिति चेन्न । प्रकृतिभूतानामेव ज्योतिष्टोमसंस्थानामत्राऽनुक्रमणस्याभिप्रेतत्वात् । न तु सोमसंस्थामात्रस्याग्निष्टोमगुणविकारमात्रस्य वा । तत्र न तावदत्यग्निष्टोमः कस्यचित्क्रताः प्रकृतिः । वाजपेयस्तु न प्रकृतिः । नापि ज्योतिष्टोमः सर्वसप्तदशत्वाद्वाजपेयस्य । अतो युक्तमेवानयोरनुपादानम् । तस्मादेवं सिद्धं पञ्चशाखोऽग्निष्टोमो ज्योतिष्टोम एव सर्वसोमानां प्रकृतिरिति । तथा सर्वक्रतूनां प्रकृतिरग्निष्टोम इत्येतदभिप्रायं द्रष्टव्यम् । न चाग्निं व्याख्यास्यामः स उत्तरक्रत्वर्थ इति सूत्रादुत्तरक्रत्वर्थत्वस्याग्निविषये विधानेनार्थादग्निष्टोम उत्तरवेदिसिद्धेः, आपस्तम्बेन परिभाषासूत्रेऽग्निष्टोम उत्तरवेदिरुत्तरेषु क्रतुष्वग्निरिति स्पष्टवचनाच्चोक्थ्यादीनामग्निष्टोमविकारत्वादुक्थ्यादिष्वप्यग्निचित्यानिषेधोऽस्त्विति वाच्यम् । गुणविकृतेन रूपेण तेषामनग्निष्टोमत्वादुत्तरक्रतुत्वाच्च । न चाग्निष्टोम उत्तरवेदिरित्यापस्तम्बसूत्रमपि पञ्चशाखप्रकृत्यभिप्रायमुत्तरेषु क्रतुष्वितितु तद्विकाराभिप्रायमिति वाच्यम् । अन्यत्र साद्यस्केभ्यो वाजपेयात्षोडशिन इति षोडशिपर्युदासानुपपत्तेः । न च षोडशिविकाराद्वाजपेयादिति वाजपेयविशेषणतया षोडशीयोज्य(?) इति वाच्यम् । व्यभिचाराभावेन विशेषणवैयर्थ्यात् । संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवदित्यभियुक्तोक्तेः । न ह्यषोडाशिविकारोऽपि वाजपेयोऽस्ति येन तद्व्यवच्छेदाद्विशेषणमर्थवद्भवेत् । किमिदानीमुक्थ्यादिषु लभ्यत एवोत्तरवेदिः । मैवम् । सर्वास्वेव विकृतिषु लभ्यते विकल्पेन । सप्तदशे प्रश्न एकादशे खण्डेऽपचितिक्रामोऽपचितिभ्यामुभयसामानौ भवतः पक्षिभ्यां साग्निचित्याभ्यामित्यत्र नियमदर्शनात् । अनग्निकान्वा यज्ञक्रतूनाहरेदिति बौधायनोक्तेश्च । तस्मात्सिद्धमुक्थ्यादिष्वपि भवत्येव पक्षेऽग्निचित्येति । उक्थ्यपर्यायैः सह संस्था यस्य स उक्थ्यः । षोडशेन स्तुतेन शस्त्रेण च संस्था यस्य स षोडशी । रात्रिमतीत्य संस्था यस्य सोऽतिरात्रः । यदाप्नोत्तदप्तोर्यामस्याप्तोर्यामत्वमित्युक्तमप्तोर्यामस्य निर्वचनम् । अथवाऽप्तुः सोमः, आग्रयणादप्तुं प्रस्कन्दयतीति बौधायनोक्ते दर्शनात्तस्यातिरिक्तयापनमस्मिन्नित्यप्तोर्याम इति । एतदुदाहृतं बौधायनेन—सोमो वा अयमतिरिच्यमानमनूपायन्तो देवा

अब्रुवन्नसोवा अयमतिरोचितः को याम इति तदसोर्यामस्यासोर्यामत्वं तस्मा एतानि स्तोत्राण्यवकल्पयांचक्रुरितीति । नित्यानां कर्मणां संस्थानां च भेदः संस्थाशब्दार्थश्च मत्कृतसंस्काररत्नमालायां मत्कृतश्रौतोपयोग्युपोद्घातप्रकरणे च द्रष्टव्यः ।

उक्थ्येन पशुकामो यजेत ।

गुणविकारास्ते ते कामास्तेन सत्सु कामेष्वेव भवन्ति नासत्सु कामेषु । गौतमेन तु गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनानि चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्च महायज्ञा अष्टकाः पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्याश्वयुजीति सप्त पाकयज्ञसंस्था अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमयज्ञसंस्था इत्येते चत्वारिंशत्संस्कारा अष्टावात्मगुणा दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो माङ्गल्यमकार्पण्यमस्पृहेति यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स ब्रह्मणः सायुज्यमाप्नोतीति फलश्रवणात्काम्यता, यो ह्येतान्संस्कारान्न करोति स पापीयान्भवतीति दोषश्रवणान्नित्यताऽप्येषामुक्ता । तेनैतेषां काम्यत्वं नित्यत्वं च ।

तस्याग्निष्टोमेन कल्पो व्याख्यातः ।

तस्योक्थ्यस्य ।

तत्र विशेषमाह—

पञ्चदशछदि सदः ।

नियमविधिरयम् ।

क्रतुकरणꣳ हुत्वैतेनैव मन्त्रेण मध्यमे
परिधावभ्यन्तरं लेपं निमार्ष्टि ।

यमग्ने पृत्सु मर्त्यमितिमन्त्रसाध्यो होमः क्रतुकरणसंज्ञकस्तं हुत्वा । एतेनैव यमग्ने पृत्सु मर्त्यमिति मन्त्रेणैव ।

ऐन्द्राग्नमुक्थ्ये द्वितीयꣳ सवनीयमालभते ।

द्वितीयवचनात्समभ्युच्चयः सवनीयपश्वोरवगम्यते । उक्थ्याधिकारे पुनरुक्थ्यग्रहणमसमभ्युच्चयपक्षोऽप्यस्तीतिज्ञापनार्थम् । अत एवोक्तमापस्तम्बेन समभ्युच्चयवदेके समामनन्तीति । अयं च शाखान्तरीयः पक्षः । स्वशाखायां तु वाजपेयप्रकरणे श्रुतावेकैकेन पशुनैकैकसंस्था प्रदर्शिता ।

तृतीयसवने धाराग्रहकाल आग्रयणं गृहीत्वोक्थ्यं गृह्णाति ।

स्पष्टम् ।

अत्र विशेषमाह—

अग्निष्टोमचमसानुन्नयञ्त्रिभ्यश्चम-
सगणेभ्यो राजानमतिरेचयति ।

अग्निष्टोमचमसोन्नयनकाले त्रिभ्यश्चमसगणेभ्यश्चमसगणत्रयार्थं राजानमतिरेचयति अतिरिक्तं करोति ।

सर्वꣳ राजानमुन्नय माऽतिरीरिचो दशा-
भिः कलशौ मृष्ट्वा न्युञ्जेति च लुप्यते ।

चस्त्वर्थेऽत्र ।

अथैतदुपयोगिपरिभाषामारचयति—

एतदग्निष्टोमचमसानाꣳ संप्रैषस्य यो य
उत्तमः सꣳस्थानचमसगणस्तमुन्नयन्नेतत्संप्रेष्यति ।

एतत्सर्वꣳ राजानमुन्नय माऽतिरीरिचो दशाभिः कलशौ मृष्ट्वा न्युञ्जेत्येतत्संप्रैषस्यैषोऽशो यो य उत्तमः संस्थानचमसगणः संस्थासमापनभूतश्चमसगणस्तानुन्नयंस्तत्र वक्तव्य इत्यर्थः । यो य इति वीप्सा सर्वक्रतुसंस्थानचमसगणविषयत्वं बोधयितुम् ।

अग्निष्टोमचमसैः प्रचर्य त्रिभिरुक्थ्यविग्रहैः प्रचरतो यथा पुरस्तात् ।

यथा पुरस्तादित्यनेन सर्वोऽपि प्रातःसवनिको विधिः प्राप्यते ।

अत्र विशेषमाह—

इन्द्रावरुणाभ्यां त्वेति प्रथमे ग्रहणसादनौ संनमतीन्द्राबृह-
स्पतिभ्यां त्वेति द्वितीय इन्द्राविष्णुभ्यां त्वेति तृतीये ।

स्पष्टम् ।

षोडशिना वीर्यकामः ।

वीर्यं बलम् ।

तस्योक्थ्येन कल्पो व्याख्यातः ।

तस्य षोडशिनः ।

तस्य शुण्ठ्याऽधीलोधकर्ण्या सोमं क्रीणाति ।

अधिकारादेव षोडशिनः प्राप्तौ तस्येतिवचनं काम्यत्वपक्ष एवैतादृशसोमक्रयो न नित्यत्वपक्षे । एतस्माज्ज्ञापकादपि नित्यत्वमप्यवगम्यते । शुण्ठाऽल्पकाया ह्रस्वेति यावत् । अधीलोधकर्णा चक्षुषोरधि उपरि लम्बमानकर्णा कर्णस्योपरि वर्णान्तरं यस्या इति वा ।

सप्तदशच्छदि सदः ।

नियमविधिरयम् ।

पात्रसंसादनकाल उत्तरेऽंसे खा-
दिरं चतुःस्रक्ति षोडशिपात्रं प्रयुनक्ति ।

अग्निष्टोमिकपात्रसंसादनकाले सर्वपात्रासादनानन्तरमागन्तूनामन्ते निवेश इति न्यायेनान्ते यथावकाशं कस्त्वेति मन्त्रेण प्रयुनक्ति । तेषां यान्यनादिष्टवृक्षाणि विकङ्कतस्य तान्यहोमार्थानि तु वारणस्थेत्यनेन होमार्थत्वाद्वैकङ्कते प्राप्ते तद्बाधनाय खादिरमिति । उलूखलाकारता प्रकृतितः प्राप्ता सा चतुःस्रक्तीत्यनेन बाध्यते ।

क्रतुकरणꣳ हुत्वैतेनैव मन्त्रेण द्रोणकलशꣳ रराटीं वोपस्पृशति ।

स्पष्टम् ।

ऐन्द्रं वृष्णिꣳ षोडशिनि तृतीयꣳ सवनीयमालभते ।

वृष्णिर्मेषः । षोडशिग्रहणप्रयोजनं तृतीयग्रहणप्रयोजनवत् ।

आतिष्ठ वृत्रहन्नित्येतेषामेकेन षोडशिनं गृह्णाति ।

एतेषां षण्णां मन्त्राणामेकेनान्यतमेन मन्त्रेण ।

पुरस्तादुत्तमादुक्थ्यपर्यायात्पूर्वयोः सवनयोर्द्रोणकलशाद्गृह्णाति सर्वैरुक्थ्यपर्यायैः प्रचरित आग्रयणात्तृतीयसवने ॥ १८ ॥

पूर्वयोः सवनयोः प्रातःसवने माध्यंदिने सवने च । अन्यत्स्पष्टम् ।

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा । प्रजापतिः प्रजया संविदानस्त्रीणि ज्योतीꣳषि सचते स षोडशी । एष ब्रह्मा य ऋत्वियइन्द्रो नाम श्रुतो गणेप्र ते महे विदथे शꣳसिषꣳ हरी । य ऋत्वियः प्र ते वन्वे वनुषो हर्यतं मदम् । इन्द्रो नाम घृतं न यो हरिभिश्चारु सेचते । श्रुतो गण आ त्वा विशन्तु हरिवर्पसं गिर इति सर्वेषु ग्रहणेषु षोडशिनमभिमन्त्रयते ।

सर्वेषु ग्रहणेष्वित्यनेन ग्रहणं ग्रहणं प्रत्यभिमन्त्रणम् ।

अच्छावाकचमसमुख्याꣳश्चमसानुन्नयन्ने-
कस्मै चमसगणाय राजानमतिरेचयति ।

व्याख्यानं गतार्थम् ।

---

१ क. ख. सेवते ।

तैः प्रचर्य षोडशिना प्रचरति।

अच्छावाकचमसमुख्यैश्चमसैः प्रचरतीत्येकवचनमध्वर्युमुख्यत्वाभिप्रायेण। बहुवचनपाठस्त्वृजुरेव। ननु तैः प्रचर्य षोडशिना प्रचरतीतिल्यब्बोधितसमानकर्तृकत्वमनुपपन्नम्। अच्छावाकचमसमुख्यानां चमसानां प्रचरणस्य प्रतिप्रस्थातृकर्तृकत्वात्षोडशिप्रचारस्याध्वर्युकर्तृकत्वादिति चेत्सत्यम्। तैः प्रचर्येत्यनन्तरं प्रतिप्रस्थातरि स्थित इति समानकर्तृकत्वनिर्वाहायाध्याहार आवश्यकः। अन्यथा समानकर्तृकत्वमनुपपन्नं स्यात्। बौधायनमतात्तु सवने सवने गृह्णातीति पक्षे प्रथमे त्रयः क्रमात्तत्र तत्र सवने सवनग्रहणार्था उत्तरे तु त्रयस्तैरेव विकल्पन्ते।

समयाविषिते सूर्ये हिरण्येन बर्हिभ्यो
च षोडशिनः स्तोत्रमुपाकरोति।

समयाविषित आदित्येऽस्तं गच्छति सति स्तोत्रोपाकरणमित्यर्थः।

श्वेतमश्वं पुरस्ताद्धारयंत्यरुणपिशङ्गं कृष्णं वा।

पुरस्ताच्छब्देन समीपप्रदेश उच्यते। उद्गातृभ्य इति शेषः। अरुणो लोहितवर्णः। पिशङ्गो गोरोचनवर्णः। एतदुभयवर्णवानित्यर्थः। अश्वधारणप्रदेशनियमो लाट्यायनद्राह्यायणाभ्यामुक्तः—अश्वः कृष्णः पूर्वस्यां सदसो द्वारि प्रत्यङ्मुखस्तिष्ठेदिति धानंजय्योऽपरस्यां प्राङ्मुख इति शाण्डिल्य इति। सर्वथा विहितवर्णाश्वस्याभावस्तदोपाय उक्तस्ताभ्यामेव—तदभावे यः कश्चनेति। उक्तवर्णाश्वस्याभावे यः कश्चन नास्मिन्वर्णनियमः। यदि तु सर्वथाऽश्वस्यैवाभावस्तदा प्रतिनिधिरुक्तस्ताभ्यामेव गौर्वाऽजो वाऽश्वाभाव इति। गौरत्र बलीवर्द एव स्त्रीत्वसाजात्यात्।

हिरण्यꣳ सांप्रदायꣳ स्तुवते।

अध्वर्युणा दत्तं हिरण्यं संप्रदाय संप्रदाय स्वस्वभक्तिगानकाले परस्परं संप्रदाय संप्रदाय स्तुवते। उद्गातार इति शेषः सामर्थ्यात्। लाट्यायनद्राह्यायणाभ्यामपि उक्तम्—यो यः सामाङ्गं ब्रूयात्स हिरण्यं धारयेदुद्गाता निधनमुपयत्सु सर्वे वाऽभिमृशेयुरिति।

हरिवच्छस्त्रम्।

भवतीति शेषः। हरिपदकर्मसमुदायघटितं शस्त्रं भवतीत्यर्थः।

उपरिष्टात्स्तोत्रियानुरूपाभ्यामोथामोद इव मदे-
मदामोद इवोमथेति व्यत्यासं प्रतिगृणाति।

यासूद्गातृभिर्गानं कृतं ता ऋचः स्तोत्रिया उच्यन्ते। तदुत्तरभूता ऋचोऽनुरूपा उच्यन्ते। एताभ्य उभयीभ्य ऋग्भ्योऽनन्तरमोथामोद इव मदेमदामोद इवोमथेति।

---

१ क. ज. ञ. ञ. °यन्त्यरु°। २ क. ग. च. ढ. °दाय्यꣳ।

आ त्वा वहन्तु हरय इत्यारभ्यावसानप्रणवक्रमेण व्यत्याससमवसान ओथामोद इव मद इति प्रणवे मोदामोद इवोमयेति एवं क्रमेणानुष्टुब्भ्यः । अयमवधिरनुष्टुप्सु सिद्धः प्रतिगर इति सूत्राच्छभ्यते ।

अनुष्टुप्सु सिद्धः प्रतिगरः ।

प्रप्रवस्त्रिष्टुभमिषमित्यनुष्टुभ आरभ्य प्रासिद्धः प्रतिगर ओथामोद इव, ओ३थामोद इवेति प्रतिगर इत्यर्थः । एकवचनं जात्याभिप्रायं प्रतिगर इति ।

शस्त्रं प्रतिगीर्य ग्रहमादत्ते चमसाꣳश्चमसाध्वर्यव
उक्थशा यज सोमानामिति संप्रेष्यति ॥ १९ ॥

शस्त्रं प्रतिगीर्येति वचनं दर्शितप्रयोजनम् । अव्यवधानार्थता चाऽप्यत्र । अदृष्टार्थताऽप्यत्र सूत्रपाठस्य ।

इन्द्राधिपतेऽधिपतिस्त्वं देवानामस्यधिपतिं मामायु-
ष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति षोडशिनं जुहोति ।

वषट्कृतेऽनेन मन्त्रेण जुहोति । तूष्णीमेव होमोऽनुवषट्कारे ।

इन्द्रश्च सम्राड्वरुणश्च राजा तौ ते भक्षं चक्र-
तुरग्र एतं तयोरनुभक्षं भक्षयामि वाग्जुषाणा
सोमस्य तृप्यत्विति ग्रहस्य भक्षयति ।

ग्रहस्य षोडशिनो ग्रहस्य । ग्रहस्येति षष्ठी द्वितीयार्थे । होत्रा वषट्कारनिमित्त-कृतभक्षं होमाभिषवनिमित्तं षोडशिनं ग्रहं भक्षयतीत्यर्थः ।

आदित्यवद्ग्रहेण चमसानाम् ।

षोडशिनस्त्विन्द्रश्च सम्राडित्येव नित्यं भक्षमन्त्रः प्राकृतं भक्षणमन्त्रं बाधित्वा । चमसांस्तु प्राकृतैरेव मन्त्रैर्भक्षयन्ति भक्षेहीत्यादिभिर्यजमानादयः ।

अनुष्टुप्छन्दस इति भक्षमन्त्रꣳ संनमति ।

अनुष्टुप्छन्दस इति शब्दं जगतीछन्दस इत्येतस्य स्थाने योजयतीत्यर्थः । यथाऽऽदित्यवद्ग्रहणस्य सोमदेवते मतिविदस्तृतीयस्य सवनस्यानुष्टुप्छन्दस इन्द्रपीतस्येति मन्त्रो भवति ।

अतिरात्रेण ब्रह्मवर्चसकामः ।

स्पष्टम् ।

तस्य षोडशिना कल्पो व्याख्यातः ।

तस्यातिरात्रस्य ।

एकविꣳशतिछदि सदः ।

नियमार्थमिदम् ।

न क्रतुकरणं जुहोति न द्रोणकलशꣳ रराटीं वोपस्पृश-
त्येतदेव यजुर्वेदनहविर्धाने प्रपद्यत एतावान्क्रतुकरणः ।

एतावान्यजुर्वेदनहविर्धानप्रपदनमेवेत्यर्थः । होम उपस्पर्शनं चेत्येतदुभयरूपाऽत्र न वाच्या क्रियेत्यर्थः । यथोक्तेये समुच्चयस्तथाऽत्र समुच्चयव्यावृत्तिरनेन क्रियते ।

सारस्वतीं मेषीमतिरात्रे चतुर्थीꣳ
सवनीयामालभते मेषमित्येकेषाम् ।

सारस्वतः प्रचरणकल्पोऽत्र, ऐन्द्रे सारस्वत्यां च दार्शपौर्णमासिकः प्रचरणकल्प इति सूत्रात् । सर्वे यजप्रैषाः प्रधानेषु मैत्रावरुणव्यापारामाव इत्यर्थः ।

षोडशिनश्चमसानुन्नयꣳस्त्रयोदशभ्यश्च-
मसगणेभ्यो राजानमतिरेचयति ।

षोडशिनः षोडशसंबन्धीश्चमसानुन्नयन्पर्यायत्रयं मिलित्वा द्वादश चमसगणा आश्विनसंबन्धी त्रयोदशश्चमसगण एवं त्रयोदश चमसगणास्तेभ्यस्तदर्थं राजानमतिरेचयति अतिरिक्तं करोति षोडशिनश्चमसानुन्नयन्निति पूर्वसूत्रे च नित्यवदनुवादान्नित्यः षोडशी प्रदर्श्यते । पूर्वं तु काम्यतयोक्तः कथमिदमुभयं घटिष्यत इति चेत् । नात्र किंचिद्दुर्घटम् । दधिग्रहवन्नित्यस्यापि काम्यत्वाविरोधात् । केचित्तु पुनरत्र विरोधाच्छाखान्तरदर्शनाच्च षोडशिनो वैकल्पिकत्वमातस्थिरे ।

तैः प्रचर्य रात्रिपर्यायैः प्रचरति ।

ननु तैः प्रचर्येत्यत्र समानकर्तृकत्वमनुपपन्नं षोडशिप्रचारस्याध्वर्युमात्रकर्तृकत्वाद्रात्रिपर्यायाणामुभयकर्तृकत्वादिति चेत्सत्यम् । स्वसूत्रे सर्वेषां पर्यायाणामप्यध्वर्युकर्तृकताया एवोक्तत्वेन समानकर्तृकत्वानुपपत्त्यभावात् । उभयकर्तृकत्वे हि समानकर्तृकत्वानुपपत्तिः । सूत्र उत्तरयोः पर्याययोः प्रतिप्रस्थातुर्विधानाभावान्नास्ति सा ।

उपयामगृहीतोऽसीन्द्राय त्वाऽपि शर्व-
रायेति मुख्यं मुख्यं चमसमुन्नयति ।

वीप्सा सर्वचमसगणार्था । उन्नेतेति शेषः सामर्थ्यात् ।

स्तुतशस्त्रे भवतः ।

स्पष्टम् ।

---

१ ब. °नरेतद्विरो° ।

होतृचमसमुख्यात्प्रथमानुन्नयति मैत्रावरुणचम-
समुख्यान्द्वितीयान्ब्राह्मणाच्छꣳसिचमसमुख्याꣳ-
स्तृतीयानच्छावाकचमसमुख्याꣳश्चतुर्थान् ।

प्रथमान्प्रथमगणान् । एवं द्वितीयतृतीयचतुर्थगणान् ।

स प्रथमो रात्रिपर्यायः ।

रात्रिसंबन्धी पर्यायः । आवर्त्यानि स्तुतशस्त्राणि पर्यायशब्देनोच्यन्ते

एवं विहितो द्वितीयस्तृतीयश्च रात्रिपर्यायः ।

स्पष्टम् ।

तैः प्रचर्याऽऽश्विनस्य पात्रसꣳसादनप्रभृतीनि
कर्माणि प्रतिपद्यत आश्विनं द्विकपालं निर्वपति।

अत्रापि समानकर्तृकत्वान्यथानुपपत्त्या प्रतिप्रस्थातुर्वचनाभावाच्चाऽऽश्विनपात्र-संसादनादिकमध्वर्योरेव । पात्राणि कपालद्वयशूर्पकृष्णाजिनोलूखलमुसलदृषदुपलपात्री-मेक्षणात्मकानि पात्राणि । द्वंद्वसंपत्तिस्त्वित्थं कपालाभ्यां सह द्वंद्वत्वार्थं तृणं शूर्पकृ-ष्णाजिने द्वंद्वम् । उलूखलमुसले द्वंद्वं दृषदुपले द्वंद्वं कुटरुणा सह द्वंद्वत्वार्थं तृणं पात्रीमेक्षणे द्वंद्वं मदन्तीपात्रेण सह द्वंद्वत्वार्थं तृणं सोमार्थाज्यस्थाल्याः सत्त्वात्सैवा-ऽऽज्यस्थाली तदेव चाऽऽज्यम् । संयवनरूपप्रयोजनसत्त्वात्प्रणीताप्रणयनं कर्तव्य-मेव । प्राशित्रहरणेडापात्रचतुर्धाकरणपिष्टलेपपात्रफलीकरणपात्राणि न सन्ति अकृत्स्नत्वात्प्रयोजनाभावाच्च । समन्त्रं निर्वापः पवित्रकरणादिनिर्वपणकालेऽश्विभ्यां जुष्टं निर्वपामीति । अश्विनौ हव्यꣳ रक्षेथां वो जुष्टं प्रोक्षाम्यश्विभ्याम् । पात्रप्रो-क्षणादि यवाग्रयणोत्तरमेतदनुष्ठाने यवमय एव पुरोडाशः । व्रीहिमयं पुरोडाशं निर्वपतीत्येतादृशवचनस्यात्राभावात् । त्रिष्फलीकरणान्ते मदन्तीरधिश्रित्य कपाल-द्वयमुपदधाति आद्याभ्यां मन्त्राभ्यामाप्यनिनयनान्ते ।

तमासाद्य ।

तमाश्विनं पुरोडाशमुद्वासनविधिना वेद्यां प्रियेण नाम्ना प्रियꣳ सद आसीदत्वित्या-साद्य । व्यक्षरनामत्वादैन्द्राग्नविकारः । अत एव तूष्णीमभिघारणम् ।

होतृचमसमुख्यान्संधिचमसानुन्नयति ।

अहोरात्रयोः संधौ जायन्त इति संधिचमसास्तानुन्नयति उन्नेतैव सामर्थ्यात् ।

स्तुतशस्त्रे भवतः ॥ २० ॥

स्पष्टम् ।

---

१ ग. च. °त्विस्युद्वास्य । व्य° ।

त्रिवृद्रथन्तरꣳ संधिस्तोत्रम्।

त्रिवृच्छब्देन नवसंख्योच्यते। राथंतरमिति स्वार्थेऽण्प्रत्ययः। नवस्तृभु रथंतरे गातव्यमुद्गातृभिरित्यर्थः।

आश्विनꣳ शस्त्रम्।

अश्विनौ देवता यस्य तदाश्विनम्। अश्विदेवताकं शस्त्रं होता शंसतीत्यर्थः। तच्च परःसहस्रमित्यापस्तम्बाश्वलायनादयः।

उदित आदित्य आश्विनं परिधाय होतृचम-
समध्वर्युरादत्ते पुरोडाशं प्रतिप्रस्थाता च।

उदिते सौर्याणि प्रतिपद्यत इत्याश्वलायनः। आश्विनं परिधायाऽऽश्विनशस्त्रस्य परिधानोत्तरं होतृचमसमध्वर्युरादत्ते पुरोडाशमाश्विनं पुरोडाशं प्रतिप्रस्थाता। अत्र चस्त्वर्थे। प्रतिप्रस्थाता चेत्युत्तरत्र प्रतिप्रस्थातृविधानेनाध्वर्योः प्राप्तेरर्थात्सिद्धावत्र वचनं पक्षे पर्यायत्रये सर्वपर्यायसंबन्ध्यन्तिमगणद्वयसंबन्धिस्तोत्रशस्त्रोपाकरणादावाश्विननिर्वापादिसादनात्प्राक्तनकर्मणि च प्रतिप्रस्थातृकर्तृकताऽप्यस्तीतिज्ञापनार्थम्। तेनाऽऽपस्तम्बबौधायनभरद्वाजसूत्रैः सहाविरोधः सिद्धो भवति। परिधायेत्यत्रान्तर्भावितण्यर्थो विवक्षणीयः समानकर्तृकत्वनिर्वाहाय। अत्रैव प्रतिप्रस्थातृविधानात्पूर्वत्र प्रतिप्रस्थातुर्व्यापारो नैवास्तीत्यवगम्यते। तेन पक्षद्वयमत्र सिद्धं भवति।

आददते चमसाꣳश्चमसाध्वर्यवः।

होतृचमसव्यतिरिक्तांश्चमसांस्तत्तच्चमसाध्वर्यव आददते होतृचमसस्याध्वर्युणाऽऽत्तत्वात्। तस्य चमसाध्वर्युर्विरमति। गतम्।

अश्विभ्यां तिरोअह्नियानाꣳ सोमानामनुब्रूह्यश्विभ्यां
तिरोअह्नियान्सोमान्प्रस्थितान्प्रेष्येति संप्रेष्यति।

संधिना तिरोहितेनाह्ना यान्त इति तिरोअह्नियाः। इदं च सोमविशेषणम्।

सह सोमैः पुरोडाशं प्रतिप्रस्थाता सर्वहुतं जुहोति।

सर्वहुतं कृत्स्नम्। जुहूपभृतावादाय प्रत्याक्रम्येत्यादि सर्वं वर्तते। अपर्यावर्तनादयो धर्मा नात्र भवन्ति। एककपालत्वाभावात्। वाचनिकं कृत्स्नावदानम्।

पङ्क्तिच्छन्दस इति भक्षमन्त्रꣳ संनमति।

आदित्यवद्वरुणस्य सोमदेवते मतिविदस्तृतीयस्य सवनस्य पङ्क्तिच्छन्दस इन्द्रपीतस्येति मन्त्रे संनाम ऊहः कार्य इत्यर्थः।

---

१ च. °ता वेत्यु°। २ च. °णा गृहीतत्वा°।

अग्नेर्यामेण पशुकामः ।

पशवो गवाश्वादयः ।

तस्यातिरात्रेण कल्पो व्याख्यातः ।

तस्याग्नेर्यामस्य कल्पः प्रकारो व्याख्यात उक्तः ।

संधिचमसानुन्नयꣳश्चतुर्भ्यश्चमसगणेभ्यो राजानमतिरेचयति ।

गतार्थम् ।

चत्वारश्चमसगणाः स्तुतशस्त्रवन्तो होतुर्मैत्रा-
वरुणस्य ब्राह्मणाच्छꣳसिनोऽच्छावाकस्य च ।

चतुर्भ्यश्चमसगणेभ्यो राजानमतिरेचयतीत्येतावतैव गणचतुष्ट्वसिद्धे चत्वारश्चमसगणाः स्तुतशस्त्रवन्तो होतुर्मैत्रावरुणस्य ब्राह्मणाच्छꣳसिनोऽच्छावाकस्य चेतिवचनं राजातिरेककाले चत्वारश्चमसगणाः स्तुतशस्त्रवन्त एको गणो होतुर्द्वितीयो मैत्रावरुणस्य तृतीयो ब्राह्मणाच्छंसिनश्चतुर्थोऽच्छावाकस्येतिस्मरणावश्यकत्वार्थम् । अन्यस्य प्रयोजनस्याभावात् ।

तेषाꣳ संधिचमसैः प्रचरणकल्पो व्याख्यातः ।

स्पष्टम् । अत्राऽऽपस्तम्बेन विशेष उक्तः—आग्नेयान्प्रथमानुन्नयत्यैन्द्रान्द्वितीयान्वैश्वदेवाꣳस्तृतीयान्वैष्णवाꣳश्चतुर्थानिति । चमसगणानामेतानि विशेषणानि । तानाग्नेस्त्रिवृता स्तोमेन नाऽऽग्नेयादित्याद्यर्थवादोक्ता अग्न्यादय एव तस्य तस्य चमसगणस्य देवता इति भावः । अन्योऽपि विशेषस्तनैवोक्तः—तेषाꣳ संधिचमसवत्प्रचरणकल्प इत्येक इति । अथवा संधिचमसवदेवाऽऽश्विनान्येव सर्वेषां स्तुतशस्त्राणि भवन्ति । संधिचमसविकारत्वादुत्तरेषां गणानामिति भावः । तदुक्तं बौधायनेन—तदु वा आहुः सर्वाण्येवाऽऽश्विनानि स्तुतशस्त्राणि स्युः पररात्रमतिरिच्यते यत्सर्वं तदाश्विनमिति चैकमथापरं त्रिवृत्पञ्चदशं सप्तदशमेकविंशमयैतेषां देवता अग्निरिन्द्रो विश्वे देवा विष्णुरितीति । भरद्वाजश्चाऽऽह—तत्र चत्वारि स्तोत्राणि शस्त्राण्याश्विनानि सयाज्यान्याम्नातानि भवन्तीति । आश्वलायनेनापि शस्त्रसूक्तानि सयाज्यान्याश्विनान्येवोक्तानि स्तोत्रियानुरूपास्त्वाग्नेय्यादयः कृता यथोभयमनुगृहीतं स्यादिति । तत्र संधिचमसवत्कल्पोऽश्विभ्याꣳ सोमानामनुब्रूह्यश्विभ्याꣳ सोमानां प्रेष्येति संप्रैषौ नानूक्थशो यज सोमानामिति । नच तिरोआह्नियानामिति भवति संधितिरोधानाभावादेषां सोमानामिति द्रष्टव्यम् ।

अतिच्छन्दाश्छन्दस इति भक्षमन्त्रꣳ संनमति ।

आदित्यवद्ब्रह्मणस्य सोमदेवते मतिविदस्तृतीयस्य सवनस्यातिच्छन्दाश्छन्द इन्द्रपीतस्येति मन्त्र ऊहः कर्तव्य इत्यर्थः ।

अग्नीदौपयजानङ्कारानाहरेत्येतत्प्रभृतीनि पाशुकानि कर्माणि
सर्वासु सꣳस्थासु समानानि क्रियन्त आ प्रातरग्निहोत्रात्॥२१॥
इति हिरण्यकेशिसूत्रे नवमप्रश्ने सप्तमः पटलः।

अग्नीदौपयजानङ्कारानाहरेत्येतदादीनि पशुसंबन्धिकर्माणि प्रातरग्निहोत्रपर्यन्तानि सर्वासु संस्थासु समानानि क्रियन्ते भवन्तीत्यर्थः। प्रातरग्निहोत्रस्याप्यङ्गत्व इदमपि लिङ्गम्।

इत्योकोपाहश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ नवमप्रश्नस्य सप्तमः पटलः॥ ७॥

अथ नवमप्रश्नेऽष्टमः पटलः।

क्रतुपशव ऐकादशिनाश्च विकल्पन्ते।

एवं सर्वसोमप्रकृतिभूता अग्निष्टोमादिसंस्थारूपा ज्योतिष्टोमा व्याख्याताः। इदानीं सर्वपशुगणप्रकृतिभूता ऐकादशिना व्याख्यायन्ते। एकादशास्यां पशव इत्यैकादशिनीज्या तत्र भवा ऐकादशिनाः। के पुनस्ते, आग्नेयः कृष्णग्रीवः सारस्वती मेषी वभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः सꣳहितोऽधोरामः सावित्रो वारुणः पेत्व इत्यनुवाक उपात्ताः। क्रतुपशवस्तु प्रागेव तत्तत्संस्थासु दर्शिताः। उभये चैते प्रकृतावेव पृथक्शाखास्वाम्नातास्तुल्यार्थत्वाद्विकल्पन्ते।

तेषाꣳ समवाये विभवन्ति तन्त्रमङ्गान्यविभवन्ति प्रत्यक्षार्थानि प्रतिसंस्कारमभ्यावर्तन्ते।

तेषामैकादशिनानां समवाये सह प्रयोगे यान्यङ्गानि अदृष्टार्थानि सकृत्कृतान्येव सर्वेषामुपकर्तुं प्रभवन्ति तान्यङ्गानि तन्त्रं भवन्ति सकृदेव क्रियन्ते यथाऽऽज्योपकारकाणि प्रयाजादीनि। अविभवन्ति तन्त्रासंभवीनि यानि प्रत्यक्षं दृष्टोऽर्थः प्रयोजनं येषां तानि प्रत्यक्षार्थानि प्रत्यक्षोपकारकसंनिपातीनि तान्यावर्तन्ते। आवर्तमानानि च तानि संस्कारं संस्कारमभ्यावर्तन्ते। एतावता किमुक्तं भवति पदार्थानुसमयेनैकैकः

संस्कारः सर्वेषां कार्यः, न तु काण्डानुसमयेनैकैक इत्यर्थः । तद्यथा सर्वानुपाकृत्य सर्वान्नियुनक्ति ततः सर्वान्प्रोक्षतीत्यादिप्रोक्षणस्यादृष्टार्थत्वे(त्व) संभवे तन्त्रमपि क्रमस्तेषां यः पशूनां क्रमः स एवोपाकरणनियोजनादीनां क्रम इत्यर्थसिद्धम् । स्पष्टमुक्तमापस्तम्बेन—यथाचोदितꣳ सꣳस्कारा इति ।

यथार्थमूहः ।

विकृतौ यथार्थमूह इति परिभाषणात्प्रकृतावूहनिवृत्तिं मा शङ्कीति पुनरूहवचनम् । तेन पशुभिरेहि पशुषु संवदस्व पशवो मायुनक्तेत्याद्यूह्यत एव ।

यूपाहुतिꣳ हुत्वाऽग्निष्ठप्रथमानेकादश
यूपानुपशयपात्नीवतौ च च्छिनत्ति ।

पुनर्यूपाहुतिवचनाद्दीक्षितस्यापि हूयते यूपाहुतिर्निषेधे सत्यपि । सा चैकैवाऽऽरादुपकारित्वादुपशयस्यापि ।

एकयूपेन विकल्पते ।

एकयूपेनेयं यूपैकादशिनी प्रकृतिविकृतिसाधारण्येन विकल्पते । यूपसंस्कारविषय आपस्तम्बः—सर्वेषाꣳ शकलाहरणात्रश्चनहोमा इति । उपशयपात्नीवतौ च च्छिनत्तीत्युक्तं तत्र च्छेदनार्था धर्मा आज्यशेषꣳ स्रुवं चाऽऽदत्त इत्यादयोऽत्यन्यानगामित्वादयश्चाच्छेदनान्ता एकैकस्य यूपस्याऽऽवर्तन्त । विभवन्ति तन्त्रमङ्गान्यविभवन्ति प्रत्यक्षार्थानि प्रतिसंस्कारमभ्यावर्तन्त इति परिभाषासूत्रात् । मानं तक्षणं चैकैकस्य सर्वेषां प्रथमशकलपाताहरणमवटार्थत्वान्नोपशयस्यावटाभावात्तस्य सर्वत्र स्थाण्वाहुतिः । स्पष्टमप्येतदुक्तमापस्तम्बेन—सर्वेषाꣳ शकलाहरणात्रश्चनहोमा इति । शकलस्यावटसंस्कारार्थत्वादनवटस्योपशयस्य न शकल उपशयस्यावटनिक्षेपणाभावात्सर्वस्यैव तक्षणं नोपरार्थमवशेषणमित्यर्थसिद्धमिति सूत्रकृता नोक्तम् । आपस्तम्बेन स्पष्टमेतदुक्तं सर्वमुपशयं तक्षतीति । उपशयशब्दार्थस्तु तत्तद्यूपस्योप समीपे शेत एव नावटं स्थाप्यत इति । पात्नीवतमपि तथैव च्छिनत्ति । तस्यास्त्येवोपरः । अधोनाभिमित्यग्रे वक्ष्यमाणत्वादधोनाभिसंमितो यथा भविष्यति तावत्परिमाणं छिनत्ति । अचषालमित्यग्रे वक्ष्यमाणत्वाच्चषालरहितः ।

दशरथाक्षाभेकादशोपराꣳ रज्जुं मीत्वा तस्याश्चतुर्विꣳशेन भागेन वेदिं विमिमीते प्रक्रमस्थानीया भवति ।

वेदिमानकाले चतुरधिकशताङ्गुलां रज्जुं दशकृत्वोऽभ्यस्तां कृत्वैकादशोपरां रज्जुं तस्यामुपसमस्यति यावति देश एकादशयूपमूलानि स्थास्यन्ति तावतीं रज्जुरेकादशो-

---

१ क. ज. ञ. ट. विकल्प्यते ।

परा दशरथाक्षा, एकादशोपरिमितायास्तस्याश्चतुर्विंशो भागः पञ्चतिलोनैकोनपञ्चाशदङ्गुलात्मकस्तत्प्रमाणेन दण्डेन वेदिं विमिमीत इत्यर्थः। इयं चतुर्विंशभागसंमिता रज्जुः प्रक्रमस्थानीया भवति। इयमेव रज्जुरत्र प्रक्रमो भवति न तु द्विपदस्त्रिपदो वा प्रक्रम इतिशुल्वसूत्रोक्तोऽत्रेत्यर्थः।

अग्निष्ठं द्वाभ्याꣳ रशनाभ्यां परिवीयैकादशिनीरशना अग्निष्ठे परिवीय वासयति।

अग्निसमीपे तिष्ठतीत्यग्निष्ठस्तं संमाय तं द्वाभ्यां रशनाभ्यां युगपत्परिव्ययति। तत्र रशनादाने द्विवदूहः। परिवीरसीति नोह्यते यूपाभिधानात्। ततोऽन्या एकादशिनीरशना एकादशीनीसंबन्धिरशना एकादशिनीरशना अवशिष्टा दशाग्निष्ठे परिवीय परिवेष्ट्य वासयति। अवशिष्टा एकादशिनीरशना अग्निष्ठ एव यावत्पर्यन्तं यथा यथाऽऽसां विनियोगस्तावत्पर्यन्तं तदहरेव परिवेष्टिता एव स्थापिता भवन्तीत्यर्थः

श्वोभूत आश्विनं गृहीत्वा यूपान्संमिनोति।

गतम्।

पूर्वेद्युः संमानमेके समामनन्ति।

पूर्वेद्युरग्निष्ठेन सहैवोपस्थापयतीत्येक आचार्या वदन्तीत्यर्थः। नास्मिन्पक्षेऽग्निष्ठे रशना वासयति। परिवीता एव तु यूपास्तिष्ठन्ति। अन्यथाऽञ्जनाद्यापरिव्ययणाद्यजमानस्य यूपानुत्सर्गविरोधात्।

तन्नप्रभ्रेरादानं परिलेखनोऽभ्यावर्तते।

विभवन्ति तन्नमङ्गानीत्युक्तस्यैव न्यायस्य दर्शनार्थमिदं वचनम्। परिलेखनो विधिरभ्यावर्तते। अविभवन्ति प्रत्यक्षार्थान्यभ्यावर्तन्त इत्यस्य न्यायस्य दर्शनार्थमिदं वचनम्।

परिलेखने क्रमविशेषमाह—

दक्षिणमग्निष्ठात्परिलिख्योत्तरं परिलिखत्येवं व्यत्यासमुदगपवर्गान्।

उदङ्न्यायानीतिपरिभाषाप्राप्तोदगपवर्गत्वबाधनायायं क्रमविशेषः। अग्निष्ठाद्यूपावटाद्दक्षिणं यूपावटं परिलिख्योत्तरं यूपावटं परिलिखति। ततो दक्षिणयूपावटाद्दक्षिणं यूपावटं तत उत्तरयूपावटादुत्तरं यूपावटं ततस्ततोऽपि दक्षिणं ततस्ततोऽप्युत्तरम्। एवं रीत्या यावद्दश यूपावटाः स्युस्तावतः पञ्च दक्षिणतः पञ्चोत्तरतः परिलिखति। उदगपवर्गवचनं दक्षिणस्य कृत्वोत्तरस्य क्रियायोदगपवर्गान्संमिनोति न तूपक्रमानुसारेण दक्षिणापवर्गानिति भावः।

रथाक्षमात्राणि यूपान्तरालानि भवन्ति ।

रथाक्षश्चतुरधिकशताङ्गुलः । तिर्यगक्षश्चतुःशतमितिशुल्बसूत्रात् । चतुःशतं चतुरधिकशतं चतुःशतम् । चतुरधिकशताङ्गुलो रथाक्ष इत्यर्थो भवति ।

वेदिसंमितां वा मिनोति ।

यावत्प्रमाणा वेदिश्चतुर्विꣳशतिः पुरस्तात्तिरश्चीति प्राकृतप्रमाणसिद्धा वेदिस्तस्यामेकादश यूपावटान्परिलिखति न तु दशरथाक्षामेकादशोपराꣳ रज्जुं मीत्वा तस्याश्चतुर्विꣳशेन भागेन वेदिं विमिमीते प्रक्रमस्थानीया भवतीत्येवंप्रमाणां वेदिं मीत्वा तस्यामेकादश यूपावटान्परिलिखतीतिविधिर्भवति ।

समानजातीयेनैकैकमनुसमेति कृत्स्नमेकैकमाञ्जनप्रभृति द्विरशनमपवर्जयति ।

एकविधिविहितमेकप्रकारं कर्मैका कर्मव्यक्तिः समानार्थसंबन्धिनी क्रियमाणप्रकारत्वात्समानजातीया व्यक्तिर्न तु सैव व्यक्तिः । नहि पूर्वपदार्थे कृतानष्टोत्तरत्र संबद्धा कर्तुं शक्या तस्माद्व्यक्तिभेदे जातिरवश्यं वाच्या । तस्या अभिव्यञ्जकं तु तत्तद्विधिविहितत्वमात्रम् । तेन संस्कार्येषु पदार्थेषु मध्य एकमेकमेव पदार्थमनुक्रमेण समानजातीयेनैकेनैककर्मणाऽनुसमेत्यनन्तरं तथैव विजातीयेनापीति । समेति संबध्नाति । सोऽयं पदार्थानुसमय इति व्यपदिश्यते क्रमविशेषः । तत्रैवं कर्मक्रमः परिलेखनक्रमेणैवावटखननयूपप्रक्षालनप्रोक्षणाद्येकैकस्य करोति । ततः प्रोक्षणीशेषनिनयनादिशकलाभिहोमान्तमप्येकैकस्य करोति । अवटसंस्कारार्थत्वेनैककर्मत्वात् । कृत्स्नं समुदायीभूतं कर्माञ्जनादि परिव्ययणान्तमपि कर्म काण्डानुसमयेनैकैकस्य करोति । मध्ये यूपोत्सर्गविरोधाद्यजमानस्य व्यक्तवचनाच्चेत्यभिप्रेत्यानेन काण्डानुसमयमाह— कृत्स्नमेकैकमित्यादिनाऽपवर्जयतीत्यन्तेन सूत्रेण । आञ्जनप्रभृतियूपाञ्जनप्रभृति द्विरशनं द्वाभ्यां द्वाभ्यां रशनाभ्यां परिव्ययतीत्यन्तेन स्थविमद्दणीयासि[1] प्रवयतीति विधिनाऽपवर्जयति । अपवर्गः समाप्तिस्तं गमयतीत्यर्थः । मीमांसकाश्चाऽऽहुः—वचनात्तु परिव्ययणान्तमञ्जनादीति । तत्रोपशयस्य निखननाभावादवटसंस्कारा निवर्तन्ते । पात्नीवतस्य तु सर्वेऽप्युत्तरत्र भविष्यन्ति ।

प्रतियूपꣳ स्वरवः ।

यूपः स्वरोः प्रयोजको न तु पश्वञ्जनमतो न प्रतिपशु भवन्तीति भावः । दिवः सूनवः स्थेति तन्त्रेण स्वरूणामासन्नानामादानं तेषां विभवन्ति तन्त्रमञ्जानीति सूत्रादन्तरिक्षस्य त्वेत्यनूहेनावगूहनं यूपभेदान्नोपशयस्य ।

---

१ क. ग. °दणिमति प्र° ।

उपरसंमितां मिनुयात्पितृलोककामस्य ।

यस्यामुपरा एव समानाः सोपरसंमितेत्युच्यते । पितृलोकं कामयतोयजमानस्येत्यर्थः ।

रशनसंमितां मध्ये च संमितां मनुष्यलोककामस्य ।

यस्यां रशना एव समाना यूपानां मध्यमागाश्च समानास्ताम् । अस्मिन्मनुष्यलोक इतरेणातुलतां बुभूषुर्मनुष्यलोककाम इत्युच्यते ।

चषालसंमितामिन्द्रियकामस्य ।

यस्यां चषालाः समानास्तामिन्द्रियकामस्य, इन्द्रियं सर्वेन्द्रियपाटवं तत्काम इन्द्रियकाम इत्युच्यते ।

सर्वान्समान्प्रतिष्ठाकामस्य ।

मिनुयादिति सर्वत्र शेषः । उपरसंमितामित्यत्रोपराणामायामसाम्यमवगन्तव्यम् । यन्मध्यसंमितत्वं रशनासंमितत्वं च तद्यूपमध्यानां रशनानां च तिर्यक्त्वस्याप्येतत्साम्यम् । यच्चषालसंमितत्वं तच्चषालपृथुत्वसाम्यम् । एतदर्थं प्रमाणीभूतं सूत्रमायामत उपराणीत्येतदारभ्य प्रथिम्नश्चषालानीत्येतदन्तमग्रे वक्ष्यते ।

ये त्रयो मध्यमास्तान्समान्पशुकामस्य व्यतिषजेदितरान्प्रजयैवैनं पशुभिर्व्यतिषजति ।

मध्यमा मध्यतना ये त्रयो यूपास्तान्समान्कुर्यात्पशुकामस्य । मध्यतनेभ्य इतरान्व्यतिषजेत् । एकैकान्तरिता मध्यमेभ्य इतरे ये ते न समा भवन्ति किं तु विषमा एवाऽऽभवन्ति । एतेन व्यतिषङ्गेणैनं यजमानं प्रजया पशुभिश्च व्यतिषिक्तं विशेषेणातिषिक्तं समृद्धं करोतीत्यर्थः । उभयोः पार्श्वयोरग्निष्ठादेकैकान्तरितास्ते न समा भवन्तीतरे विषमा एष व्यतिषङ्ग इत्यापस्तम्बः ।

यं कामयेत प्रमायुकः स्यादिति गर्तामितं तस्य मिनुयादुत्तरार्ध्यं वर्षिष्ठमथेतरान्ह्रसीयसः ।

यं यजमानं प्रमायुको झटिति मरणशाली स्यादिति यः कामयेत तस्य यजमानस्य गर्तमितमेकादशिनयूपानां गर्तेन मितं परिमाणं मिनुयात् । गर्तमितस्वरूपमाह—उत्तरार्ध्यं वर्षिष्ठमथेतरान्ह्रसीयस इत्यनेन । इयं पारिभाषिकी संज्ञा । उत्तरार्धे भव उत्तरार्ध्यस्तमुत्तरार्ध्यं वर्षिष्ठं स्थविष्ठम् । अथशब्दः क्रमार्थः । उत्तरार्ध्यस्य वर्षिष्ठत्वसंपादनोत्तरमितरेषु ह्रसीयस्त्वसंपादनमिति ।

दक्षिणार्ध्यं वर्षिष्ठं मिनुयात्स्वर्गकामस्याथेतरान्ह्रसीयसो ह्रसीयसः ।

अत्र वर्षिष्ठता दैर्घ्येण । ह्रसीयसो ह्रसीयस इति वीप्साश्रवणादितरेषां किंचित्कि-

---

१ ग. च. झ. °यात्सुवर्गं ।

त्रिदुत्तरोत्तरं ह्रसीयस्त्वमितिज्ञापनार्थं पूर्वत्र वीप्सायां अश्रवणादुत्तरोत्तरं ह्रसीयस्त्वं नास्ति किंतु तुल्यं ह्रसीयस्त्वमिति ।

आराग्रामभिचरतस्तेषामग्निष्ठं वर्षि-
ष्ठमथेतरान्ह्रसीयसो ह्रसीयसः ।

आराग्रास्वरूपं तेषामग्निष्ठं वर्षिष्ठमथेतरान्ह्रसीयसो ह्रसीयस इत्येतेन सूत्रेणोच्यते । अत्रापि वर्षिष्ठता दैर्घ्येण । पूर्ववद्वीप्साश्रवणादितरेषां किंचिर्त्किंचिदुत्तरोत्तरं ह्रसीयस्त्वम् । आराग्रास्वरूपं स्पष्टमाहाऽऽपस्तम्बः—मध्य उन्नता भवत्यनुपूर्वमन्तौ निनताविति । अग्निष्ठ उन्नतो भवति ततः प्रभृति क्रमेणान्ता निनता भवन्ति दक्षिणत उत्तरतश्चैषाऽऽराग्रेत्यर्थः । आरमिवाग्रं मध्यभागो यस्याः साऽऽराग्रेति । आरशब्देनोच्चतोच्यते ।

समवस्रावि्णीं वृष्टिकामस्य तेषामग्निष्ठ१
ह्रसिष्ठमथेतरान्वर्षीयसो वर्षीयसः ।

तेषां यूपानां मध्येऽग्निष्ठं ह्रसिष्ठमितरान्वर्षीयसो वर्षीयसः । वर्षीयसो वर्षीयस इति वीप्सया क्रमेणोत्तरोत्तरमग्निष्ठव्यतिरिक्तानां वर्षीयसः । अथशब्दः क्रमार्थोऽग्निष्ठस्य ह्रसीयस्त्वसंपादनोत्तरमितरेषु क्रमाद्वर्षीयस्त्वसंपादनमिति । सम्यगवस्रावणमुच्चप्रदेशादाकाशात् । निनतायां पृथिव्यां सम्यक्स्रावणमिव यस्यां सा समवस्राविणीति । वृष्टिर्वर्षणम् ।

व्यत्यस्तं भ्रातृव्यवतो ह्रस्वं दीर्घं च व्यतिषजेत् ।

ह्रस्वं दीर्घं च व्यत्यस्तमेकैकान्तरितं व्यतिषजेद्योजयेदित्यर्थः । स्पष्टममुमर्थमाहाऽऽपस्तम्बः—व्यतिषक्तां भ्रातृव्यवत उभयोः पार्श्वयोरग्निष्ठादेकैकान्तरितास्तेन समा भवन्तीतरे विषमा एष व्यतिषङ्ग इति ।

यदि कामयेत विट्क्षत्राद्ओजीयसी स्यादिति येऽ-
ग्निष्ठाद्दक्षिणे तान्वर्षीयसो वर्षीयसो मिनुयात् ।

यदि यजमानः क्षत्रात्क्षत्रियजातेर्विड्वैश्यजातिरोजीयसी बलीयसी स्यादिति कामयेत तदा येऽग्निष्ठाद्दक्षिणतो यूपास्तान्वर्षीयसो वर्षीयस उत्तरोत्तरं क्रमेण मिनुयादध्वर्युरित्यर्थः ।

यदि कामयेत क्षत्रं विश ओजीयः स्यादिति येऽग्निष्ठा-
दुत्तरे तान्वर्षीयसो वर्षीयसो मिनुयात् ॥ २२ ॥

क्षत्रं क्षत्रियजातिर्विशो वैश्यजातेरोजीयो बलिष्ठं स्यादिति यदि यजमानः कामयेत तदा येऽग्निष्ठादुत्तरे तान्वर्षीयसो वर्षीयस उत्तरोत्तरं क्रमेण मिनुयादित्यर्थः । अर्थादुभयत्रावशिष्टानां ह्रसीयस्त्वम् ।

आयामत उपराणि समानानि स्युस्तिर्यक्तो
मध्यानि रशनाश्च प्रथिम्नश्चषालानि ।

आयामतो दैर्घ्येण समानान्युपराणि भवन्ति । मध्यानि रशनाश्च तिर्यक्तस्तिर्यक्त्वेन समानानि भवन्ति । प्रथिम्नः स्थौल्येन चषालानि समानानि भवन्ति । उपरसंमितां मिनुयात्, रशनसंमितां मध्येन संमितां मिनुयाच्चषालसंमितां मिनुयादित्येतेषूपयुज्यत इदं सूत्रम् ।

उपशयमङ्कृत्वा द्वाभ्यां रशनाभ्यां परि-
धीयाग्रेण दक्षिणार्ध्यं यूपं निदध्यात् ।

दक्षिणार्धे भवो दक्षिणार्ध्यस्तं दक्षिणार्ध्यं यूपमग्रेणोपशयं निदध्यात् । दक्षिणेन वेत्यापस्तम्बः ।

यद्यभिचरेदिदमहममुमामुष्यायणमिन्द्रस्य वज्रे-
णाभिनिदधामीति प्राञ्चमुपशयं निदध्यात् ।

अभिचार एव प्रागग्रयूपनिधानं न तु नित्यतया निधाने सूत्रकृता प्राक्त्वस्यात्रैव विधानात् । तेनाऽऽपस्तम्बोक्तं प्राक्त्वं न नित्यतया निधाने भवति । अमुमित्यत्र द्वितीयाविभक्त्येकवचनान्तव्यावहारिकनाम्नो ग्रहणम् । तच्च शर्मान्तं ब्राह्मणस्य येन व्यवह्रियत इति वासिष्ठसूत्रात् । आमुष्यायणमित्यनेन गोत्रप्रयुक्तनामनिर्देशः । यथा वासिष्ठमिति । येन व्यवह्रियत इति वासिष्ठसूत्राच्छर्मान्तता व्यावहारिकनामविषय एव नान्यनामसु ।

पशुकाल आग्नेयमसितशीर्षमग्निष्ठ उपाकरोति सार-
स्वतीं मेषीमुत्तरतः सौम्यं बभ्रुं दक्षिणत एवं व्यत्यासं
दक्षिणापवर्गान्पौष्णꣳ श्यामꣳ शितिपृष्ठं बार्ह-
स्पत्यꣳ शिल्पं वैश्वदेवमैन्द्रमरुणं मारुतं कल्माषमैन्द्रा-
ग्नꣳ सꣳहितमधोरामꣳ सावित्रं वारुणं पेत्वमुत्तमम् ।

असितं कृष्णं शिरो यस्य सोऽसितशीर्षिः । ग्रीवा(शीर्ष)शब्देन मुखमप्युपलक्ष्यते । मेषी प्रसिद्धा । बभ्रुः कपिलः । श्यामः कृष्णः सर्वोऽपि । शितिपृष्ठः श्वेतपृष्ठः । शिल्पो लवणवर्णः । अरुणो लोहितवर्णः । कल्माषः कृष्णबिन्दुयुक्तवर्णान्तरः । संहितोऽन्यवर्णमिश्रितवर्णः । अधोराम उदरप्रदेशे कृष्णवर्णः । पेत्वोऽपगतपुंस्को मेषः । अग्निष्ठेऽग्निष्ठयूपसमीप आग्नेयमसितशीर्षमुपाकरोति । सारस्वतीं मेषीमुत्तरयूपे सौम्यं बभ्रुं दक्षिणयूपे पौष्णं श्यामं तदुत्तरयूपे बार्हस्पत्यं शितिपृष्ठं दक्षिणयूपे

---

१ म. ज. ड. 'शीर्ष्णम' ।

वैश्वदेवं शिल्पमुत्तरयूपे, ऐन्द्रमरुणं दक्षिणयूपे मारुतं कल्माषमुत्तरयूपे, ऐन्द्राग्नं संहितं दक्षिणयूपे सावित्रमघोरामुत्तरयूपे वारुणं पेत्वं दक्षिणयूपे। एवं व्यत्यासं व्यत्यस्य व्यत्यस्य दक्षिणापवर्गानेतान्पशूनुपाकरोति। एवमुत्तरमुत्तरमुपाकृत्य दक्षिणं दक्षिणमुपकुर्वन्नितरान्पौष्णादीनपि पशूनुपाकरोति। तत्र व्यत्यासक्रमादर्थसिद्धे दक्षिणापवर्गत्वे पुनर्वचनं यत्राप्येकयूपे पश्वेकादशिनी तत्राप्येवमपवर्गार्थम्। नैतेषां पशूनामुपाकरणकाले प्राच्यादिदिगभिमुखत्वनियमः। अर्थादेवोत्तमत्वे सिद्ध उत्तमवचनं वक्ष्यमाण ऐन्द्रस्य लोके वारुणमालभेत वारुणस्य लोक ऐन्द्रमित्यनेन सूत्रेण विहिते स्थानव्यत्यासेऽपि वारुण एवोत्तम इत्येतदर्थम्।

यदि कामयेत योऽवगतः सोऽपरुध्यतां योऽपरुद्धः सोऽवगच्छत्वित्यैन्द्रस्य लोके वारुणमालभेत वारुणस्य लोक ऐन्द्रं य एवावगतः सोऽपरुध्यते योऽपरुद्धः सोऽवगच्छति।

यदि यजमानो योऽवगतो द्वेष्यः किंचिदपरुध्य प्राप्तराज्यः स्यात्सोऽपरुध्यतामैश्वर्याद्भ्रष्टो भवतु। यस्तु तेनापरुद्धोऽवरुद्धः सोऽवगच्छतु प्राप्तैश्वर्यो भवतु इति यो यजमानः कामयेत तदाऽध्वर्युरेतादृशयजमानकर्तृके कर्मणि ऐन्द्रस्य लोके स्थाने वारुणं पशुमालभेत वारुणस्य पशोर्लोक ऐन्द्रं पशुमालभेत। एतत्फलं य एवावगतः सोऽपरुध्यते योऽपरुद्धः सोऽवगच्छति। गतार्थं कामनावाक्येनैवेदम्।

यदि कामयेत प्रजा मुह्येयुरिति पशून्व्यतिषजेदिति प्रजा एव मोहयति।

प्रजा मुह्येयुः प्रजा मोहं गच्छेयुरिति यदि यजमानः कामयेत तदैकैकान्तरितान्पशूनुपाकुर्यादेष व्यतिषङ्गो नाम। यथाऽग्निष्ठ आग्नेयमुपाकृत्य सौम्यमुत्तर आलभते ततः सारस्वतीं मेषीं दक्षिणे बार्हस्पत्यमुत्तरे पौष्णं दक्षिण ऐन्द्रमुत्तरे वैश्वदेवं दक्षिण ऐन्द्राग्नमुत्तरे मारुतं दक्षिणे वारुणमुत्तरे सावित्रं दक्षिणे। एष पशूनां व्यतिषङ्गः। अस्मिन्कल्पे वारुणं पेत्वमुत्तममित्यस्य बाधः। स्थानव्यतिषङ्गमात्रं वाऽत्र। पशवस्तु क्रमेणैवोपाकरणीया इति पक्षे दक्षिणापवर्गानित्यस्य बाधः। एतत्फलमाह प्रजा एव मोहयतीत्यनेन।

यदभि वा हतोऽपां वारुणमालभेत प्रजा वरुणो गृह्णीयादक्षिणत उदञ्चमालभतेऽप वा हतः।

यदि यजमानः, अपामिति षष्ठी द्वितीयार्थे। संमुखं समीपं स्वगृहसमीपं नद्या-

---

१ ग. घ. एवं।

दिगता आप आगच्छेयुरिति यो यजमानः कामयेत तदा प्राञ्चं वारुणमालभेत तत्तदा प्रजा वरुणो गृह्णीयात् । प्रजा वरुणो गृह्णीयादितिदोषश्रवणात्प्रत्यङ्मुखमेवोपाकुर्यात् । एतावता नैष दोषोऽभिवाहतो (?) भवति । दक्षिणत उदञ्चमालभतेऽप वा हतः ।

आरण्यं पशुमाखुं वोपशये निर्दिशत्यसौ ते पशुरिति
निर्दिशेद्यं द्विष्याद्यादि न द्विष्यादाखुस्ते पशुरिति ब्रूयात् ।

उपशय आरण्यं पशुं गवयाद्यन्यतममाखुं वा पशुत्वेन बुद्ध्या निर्दिशेद्यथा गवयस्ते पशुराखुस्ते पशुरिति । अथ वा यं द्विष्यात्तमेव द्वेष्यं पशुत्वेन निर्दिशेदमुकस्ते-पशुरिति । यदि न द्विष्याद्वेष्यो नास्त्येव तदाऽऽखुस्ते पशुरिति ब्रूयात् । यस्तु संत*तमपि द्वेष्यन्नपि न द्विषते तस्याऽऽखुस्ते पशुरित्येव निर्देशो न गवयाद्यन्यतमो विकल्पते । केवलं द्वेष्टैव न स्वयं द्विष्यमाणस्तदा पूर्व एव विधिः । सति द्वेष्ये द्विष्यमाणे च पूर्वेतरो विधिर्विकल्पते । सत्यपि तस्मिन्नद्विष्यमाणे त्वयमेव विधिरिति ।

सर्वेषां प्रतिपशु बर्हींषि वपाश्रपण्यः
कुम्भ्यो हृदयशूलाः प्लक्षशाखाश्च ।

पशुसमुदायापेक्षं बर्हिरादिषु बहुवचनम् । बर्हिरादीनि यथाविहितानि प्रतिपशु भवन्तीत्यर्थः ।

तन्त्रमग्नेर्हरणमधिगुरुत्तमः प्रयाजस्तथा पूर्वः परिवप्योऽन्ततः
संज्ञप्तहोमो रशनानामुदसनमुत्तरः परिवप्यो वपाश्रपणीनामनुप्रहरणमभिहोमो मार्जनं वरदानं च ॥ २३ ॥

एतान्यङ्गानि सर्वेषां पशूनां तन्त्रेण भवन्ति । प्रतिप्रधानं गुणावृत्तिरिति न्यायेन द्रव्यपृथक्त्वेऽभ्यावर्तते यथाऽऽज्यग्रहणे लवने स्तरणे चेति सूत्रस्याऽऽज्यग्रहणादिवत्पशूनामपि द्रव्यभेदादत्रापि प्रवृत्तेश्च । अग्निहरणादीनां प्रतिपश्चावृत्तौ प्राप्तायामेषु तन्त्रविधानम् । तत्रायं कर्मक्रमः—सर्वान्पशून्स्नापयित्वेषे त्वेतिमन्त्रावृत्त्या बर्हिषी आदायोपवीरसीति प्लक्षशाखामग्नये त्वा जुष्टमुपाकरोम्युपो देवानित्याग्नेयमग्निष्ठसमीपमसितशीर्षमुपाकरोति । प्रज्ञाते बर्हिषी निदधाति । पुनरिषे त्वेत्यादि सरस्वत्यै त्वा जुँष्टामुपाकरोमीत्यादि अग्निष्ठस्योत्तरस्मिन्यूपे मेषीमुपाकरोति । निधाय प्रज्ञाते बर्हिषी पुनरिषे त्वेत्यादि सोमाय त्वाजुष्टमुपाकरोमीत्यग्निष्ठस्य दक्षिणे यूपे वभ्रुं सौम्यमुपाकरोति । प्रज्ञाते बर्हिषी निधाय पुनरिषे त्वेत्यादि पूष्णे

---

* अत्र 'सन्तमपि द्वेष्यं न द्विष्टे' इत्यपेक्षितम् ।

---

१ क. ग. अप । २ च. पूर्वोत्तले । ३ क. ग. °शूलं प्लं । ङ. च. °शूलान्प्लक्ष° । ४ च. जुष्टम्° ।

त्वा जुष्टमुपाकरोमीत्यग्निष्ठस्योत्तरस्मिन्यूपे पौष्णं श्याममुपाकरोति प्रज्ञाते बर्हिषी निधाय पुनरिषे त्वेत्यादि बृहस्पतये त्वा जुष्टमुपाकरोमीत्यग्निष्ठस्य दक्षिणे शितिपृष्ठं बार्हस्पत्यमुपाकरोति । प्रज्ञाते बर्हिषी निधाय पुनरिषे त्वेत्यादि विश्वेभ्यो देवेभ्यस्त्वा जुष्टमुपाकरोमीत्यग्निष्ठस्योत्तरस्मिन्शिल्पं वैश्वदेवमुपाकरोति । प्रज्ञाते बर्हिषी निधाय पुनरिषे त्वेत्यादीन्द्राय त्वा जुष्टमुपाकरोमीत्यादि अग्निष्ठस्य दक्षिणेऽरुणमैन्द्रमुपाकरोति । प्रज्ञाते बर्हिषी निधाय पुनरिषे त्वेत्यादि मरुद्भ्यस्त्वा जुष्टमुपाकरोमीत्यग्निष्ठस्योत्तरस्मिन्कल्माषं मारुतमुपाकरोति । प्रज्ञाते बर्हिषी निधाय पुनरिषे त्वेत्यादीन्द्राग्निभ्यां त्वा जुष्टमुपाकरोमीत्यग्निष्ठस्य दक्षिणे संहितमैन्द्राग्नमुपाकरोति । प्रज्ञाते बर्हिषी निधाय पुनरिषे त्वेत्यादि सवित्रे त्वा जुष्टमुपाकरोमीत्यादि अग्निष्ठस्योत्तरस्मिन्नघोरां सावित्रमुपाकरोति । प्रज्ञाते बर्हिषी निधाय पुनरिषे त्वेत्यादि वरुणाय त्वाजुष्टमुपाकरोमीत्यग्निष्ठस्य दक्षिणे पेत्वं वारुणमुपाकरोति । तत उपाकृतेषु पशुषु आरण्यपशुनिदशं द्वेष्यनिर्देशं वोपशययूपे कृत्वोपाकृत्य पञ्च जुहोति । एतस्य होमस्य विभवन्ति तन्त्रमङ्गानीति सूत्रात्तन्त्रेणैव होमः । तत्र पशूनां बहुत्वात्पश्वभिधानशब्देषु बहुवचनान्त ऊहः सर्वत्र । सुवर्गं यात० प्रतितिष्ठत० निष्क्रीता इमे० यन्तु० बध्यमानान्० उपाकृताञ्छशमानान्यद० अपियन्तु पाथः० जीवशब्देऽप्यूहं केचिदिच्छन्ति । ततो मन्थनं तन्त्रेण विभवन्ति तन्त्रमङ्गानीति सूत्राददृष्टार्थत्वस्य प्रत्यक्षतःसिद्धत्वात् । सावित्रेण रशनादानादि नियोजनान्तमेकैकस्य । अविभवन्ति प्रत्यक्षार्थानि प्रतिसंस्कारमभ्यावर्तन्त इति सूत्रात् । संयुक्तानि त्वेकापवर्गाणीति परिभाषया कृत्स्नमेकैकमपवर्जयतीति सूत्रात्काण्डानुसमयः । यूपस्य दक्षिणतः पशुनियोजनं पूर्वोक्तक्रमेण । प्रोक्षणाद्यधस्तादुपोक्षणान्तमेकैकस्य क्रमेण करोति । सर्वेषां मेध्यकरणत्वरूपप्रयोजनैक्यात्संयुक्तत्वं संयुक्तत्वादधस्तादुपोक्षणान्तानां पदार्थानामेव कर्मत्वम् । कृत्स्नमेकैकमपवर्जयतीतिसूत्रात्संयुक्तानि त्वेकापवर्गाणीति सूत्राच्च । स्वदतैनामिति मेष्यां मन्त्र ऊहः । स्रुच्यमाघार्य प्रत्याक्रम्य सं ते प्राण इत्यादि सं यज्ञपतिराशिषेत्यन्तं क्रमेण सर्वेषाम् । अञ्जनरूपपदार्थस्यैकत्वात् । ततो ध्रुवासमञ्जनादि दश प्रयाजास्तेषां तन्त्रमेव । विभवन्ति तन्त्रमङ्गानीति सूत्रात् । नचोत्तमप्रयाजस्य तन्त्रविधानादेतेषां तन्त्रं न भवतीति वाच्यम् । अन्तिमप्रयाजस्य निष्पन्नवपारूपद्रव्यसंस्कारकत्वेन संनिहितत्वेन च साक्षादुपकारकत्वात्प्रतिषेधं प्राप्तिः शङ्किता स्यात्तन्निवृत्त्यर्थं वचनस्याऽऽवश्यकत्वात् । इतरेषां प्रयाजानां तु वपारूपद्रव्याधारसंस्कारकत्वेन संनिहितत्वाभावेन च साक्षादुपकारकत्वाभावादर्थादेवाऽऽवृत्तेरप्राप्तेर्न तन्त्रविधाने सूत्रं कृतमाचार्येण । दशप्रयाजेज्यानन्तरं जुह्वा प्रथमं स्वरुमङ्क्त्वा स्वधितिं चाङ्क्त्वाऽऽग्नेयपशोः शिरोञ्जनादि श्रोण्यञ्जनान्तं करोति । स्वधितिरेक एव । तस्य च पुनः पुनरञ्जनं पूर्वकृताञ्जनाज्यस्य पूर्वपशौ विनियुक्तत्वात् । एवंरीत्या

सर्वेषां पशूनां तत्तत्स्वर्वञ्जनादि कृत्वा शिरोञ्जनादि श्रोण्यञ्जनान्तमेकैकस्य क्रमेण करोति। शमित्रे स्वधितिप्रदानान्ते तस्य तस्य स्वरोः क्रमेण तत्तत्स्वस्वस्थान उपगूहनं शमित्रे स्वधितिं प्रयच्छति यथास्थानꣳ स्वरुमवगूह्योति पशुमूत्रे शमित्रे स्वधितेः प्रदानानन्तरं स्वर्ववगूहनस्य विहितत्वात्। अवगूहनपर्यन्तं क्रमेण प्रज्ञाताः स्वरवो भूमावेव स्थापिता भवेयुः। पर्यग्निकरणं तन्त्रेण विभवन्ति तन्त्रमङ्गानीतिसूत्रात्। पर्यग्निभ्यः क्रियमाणेभ्योऽनुब्रूहीति प्रैष ऊहः। यत्तु केचित्परितो ह्रियमाणो योऽग्निरित्यग्न्यभिधानादनूह इति वदन्ति तदयुक्तम्। पर्यग्नि करोति पर्यग्नि कृत्वेत्यादौ नपुंसकलिङ्गानुपपत्तेः। ननु तवापि गर्भिण्यां पशौ पर्यग्नौ क्रियमाणे जुहोतीति श्रुतौ पुंलिङ्गानुपपत्तिः पर्यग्नौ क्रियमाणायामिति तदा स्यात्। नायमस्ति दोषः। तत्र पशोर्विशेष्यत्वेन पुंलिङ्गाविरोधात। तस्माद्युक्त एवोहः। पर्यग्निकरणं सकृद्गृहीतेनैवोल्मुकेन। तत्र प्रतिपशु पर्यग्निकरणम्। द्रव्यपृथक्त्वेऽभ्यावर्तत इति सूत्रात्। तत्रापाव्यहोमः प्रथमषष्ठैकादशसंख्याविशिष्टपशूनां पर्यग्निकरणे प्रथमे प्रथमापाव्यहोमः। षष्ठे द्वितीयापाव्यहोमः। एकादशे तृतीयापाव्यहोमः। पर्यग्नौ क्रियमाण इतिवर्तमानार्थकशानच्प्रयोगात्। तत्रोपाकृताञ्छशमानान्यदस्थाज्जीवं देवानामपियन्तु पाथ इति पूर्ववदूहः। क्रमेण पशून्प्रमुच्याऽऽश्राव्य प्रत्याश्रावित उप प्रेष्य होतर्हव्या देवेभ्य इति प्रैषः सकृदेव। विभवन्ति तन्त्रमङ्गानीति सूत्रात्। रेवतीर्यज्ञपतिं प्रियधा विशतेति मन्त्रेण बर्हिर्म्यां वपाश्रपणीभ्यां प्लक्षशाखया च पश्वारम्भः पशुसंस्कारकत्वात्प्रतिपशु। यत्तु मुख्यस्यैव पशोरन्वारम्भं केचिदिच्छन्ति तदसत्। विभवन्ति तन्त्रमङ्गानीतिसूत्रविरोधाद्बर्हिर्वपश्रपणीप्लक्षशाखानां भेदेन प्रतिपश्वारम्भस्यार्थादेव सिद्धेश्च। नहि अन्यदीयबर्हिर्वपाश्रपणीप्लक्षशाखाभिरन्यस्य पशोरारम्भः संस्कारोपयोगी भवति। एतेन यावतां पशूनामन्वारम्भस्तन्त्रेण संभवति तावत्सु तन्त्रमित्यपि निरस्तम्। यजमानाभिमन्त्रणं तन्त्रेण विभवन्ति तन्त्रमङ्गानीतिसूत्रात्। अत्र नानाप्राणो यजमानस्य पशुभिर्यज्ञमिति विशेषो मन्त्रे। अग्नेर्हरणं तन्त्रं तन्त्रमग्नेर्हरणमितिसूत्रात्। एतस्याग्नेः पाकप्रयोजनत्वेन प्रत्यक्षार्थत्वाद्द्रव्यपृथक्त्वेऽभ्यावर्तत इति सूत्राच्च प्रतिपशु प्राप्तौ तन्त्रमग्नेर्हरणमितिवचनम्। एकस्यैवाग्नेः पुरस्तान्नयने पाकरूपदृष्टप्रयोजनबलवत्त्वानुरोधेन रक्षोपहननरूपादृष्टफलस्यापि सिद्धेरिति भावः। यावच्छामित्रदेशनयनं तावत्पर्यन्तमन्वारम्भ इति नियमाभावः। एतादृशवचनाभावात्। पशूनां नयनेऽनुग्रहमाह बौधायनः—यथाऽऽग्नेयमेवाध्वर्युर्वपाश्रपणीभ्यामन्वारभते पृथगितरान्परिकर्मिण उदञ्चो नयन्त्यनुपूर्वमप्यतिषजन्त इति। अन्वारम्भः पृथक्पृथगेव भवति न शमितृकर्तृकं परिकर्मिकर्तृकं वा। अग्निगुस्तन्त्रेण। द्रव्यपृथक्त्वेऽभ्यावर्तत इति प्राप्ताविदं वचनम्। तत्रेत्थं याजुषहौत्रानुसारिप्रयोगः—दैव्याः शमितार उत० मेधपतिभ्यो मेधाभ्यो मेधाभ्यो आग्नें० रन्वेनान्माता० उदीचीनानेषां० पृथिवीꣳ शरीराणि एकधे-

कर्षैषां त्वच आच्छद्यतात्पुरा पुरा नाम्या अपिशसो वपा उत्खिदत दन्तरन्तरेवोष्माणं वारयतात्। श्येनमेषां वक्षा॑सि कृणुतात्प्रशसा बाहूञ्छलाद्दोषणि कश्यपेवा॑ंसात-च्छिद्राः श्रोणीः कवषोरून्स्त्रेकपर्णाष्ठीवतः षड्वि॑ंशतिः षड्वि॑ंशतिरेषां वङ्क्रयस्ता अनु० गात्रं गात्रमेषामनू० वनिष्ठूनेषां मारा० ताविमान्पशूञ्छूपयतो० नाभिरुप मा ग्रेदो हविरित्यनूह्यानीति। आश्वलायनः पुरातरिति चैक इति च। स एव मुख्यक्रमेण म्शूञ्छमिता नयति क्रमेण शामित्रैनं कण्ठे बद्ध्वा नयतीति वाजसनेयिश्रुतेः। उत्तरेण षात्वालं शामित्रदेशस्तस्मिन्नाग्नीध्रेणोल्मुकनिधाने कृते तत्तद्वार्हिः समस्य तनुवा भवे-त्युदक्संस्थं प्राक्संस्थं वा न्यस्यति। संज्ञपनप्रैषस्तन्त्रेण विभवन्ति तन्त्रमङ्गानीति सूत्रात्। अमायून्कृण्वतः संज्ञपयताच्छङ्क्यान्प्रब्रूतादिति। शक्यशब्दस्यानूहो वा क्रियाविशेषत्वात्। यजमानजपस्तन्त्रेण विभवन्ति तन्त्रमङ्गानीति सूत्रात्। स्वर्विदः स्थ स्वर्वित्त्वा स्वरित० लोकविदः स्थ लोकं वित्त्वा लोकमित० गातुविदः स्थ गातुं वित्त्वा गातुमित० नाथविदः स्थ नाथं वित्त्वा नाथमित० न वा उवेतान्म्रियध्वे न रिष्यथ देवा॑ इदिथ० दुष्कृतस्तत्र वो दे० अशानां व आशा० यजमानाभिमन्त्रणं पूर्ववत्। पृषदाज्यावेक्षणं तन्त्रम्। पृषदाज्यस्यैवैकत्वात्, एतस्य तु पृषदाज्यसंस्कारत्वात्। नैमित्तिककरणाभिमन्त्रणमपि तन्त्रम्। विभवन्ति तन्त्रमङ्गानीति सूत्रात्। यो नो द्वेष्ट्यनु तꣳ रभध्वमनागस इत्यूहः। पूर्व इति विशेषणं पूर्वः परिवप्यः स्वाहा देवेभ्य इति उत्तमप्रयाजस्य पूर्वपरिवप्यहोमात्प्राक्सत्वात्पूर्वमुत्तमप्रयाजग्र-हणं पूर्वपरिवप्यहोमस्यानन्तरं ग्रहणम्। एतच्चतुष्टयमपि क्रमप्राप्तं संज्ञप्तहोमर-शनोदसनयोरनन्तरमुत्तमप्रयाजपूर्वपरिवप्यहोमयोर्ग्रहणे कर्मक्रमानुरोधात्कर्तव्ये व्यत्या-सेन विधानमाद्यपदार्थस्य संनिधिकर्तव्या अग्निहरणाध्रिगूत्तमप्रयाजास्तथा पूर्वः परि-वप्य इतिप्रदर्शनार्थम्। तेनाग्नेर्हरणाध्रिगूत्तमप्रयाजा आदावेव भवन्ति। अथ वैवं योजना—अग्ने तथाशब्दस्य दर्शनात्पूर्वत्र दृष्टान्तार्थको यथाशब्दोऽध्याहा-रस्तु सिद्ध एव। स चाऽऽद्यपदार्थद्वय एव न तूत्तमप्रयाजेऽपि। प्रयाजस्य प्रधानात्पू-र्वतायाः सर्वमतप्रसिद्धत्वात्। अग्निमतथाशब्दस्तु देहलीदीपन्यायेनोभयत्रान्वेति यथै-तत्पदार्थद्वयं तथोत्तमः प्रयाजस्तथा पूर्वः परिवप्यहोम इत्यर्थः। अथवा संनिधिपदार्थ एव यथा शब्दाध्याहारो यथोत्तमः प्रयाजस्तथा पूर्वपरिवप्यहोम इति। अन्ते कर्तव्यं कर्म संज्ञप्तहोमो रशनानामुदसनरूपचात्वालनिधानकर्म चेति प्रदर्शनाय व्यत्यासेनो-भयोरेतयोः कर्मणोर्ग्रहणम्। पूर्वपरिवप्योत्तरपरिवप्यवपाश्रपण्यनुप्रहरणसंस्रावाभिहोम-मार्जनवरदानानां प्रतिप्रधानं गुणावृत्तिरिति न्यायेन द्रव्यपृथक्त्वेऽभ्यावर्तत इति परि-भाषासूत्राच्च तत्तद्वपायागान्ते प्राप्ताविदं सूत्रम्। वोपिद्वं ततो नो अभयं कृत।

---

१. क. °दोषाणि। २ ग. °षणत्वा°। ३ च. °र्वच्छ्रुतिर्वि°। ४. क. ग. °र्थद्वय°।

प्रजाभ्यः सर्वाभ्यो मृडत० न्यषदत० कृत० मृडत० वाशिद्वं० कृत० मृडत० समुस्क्रमिद्वं० कृत० मृडत० निमेहथ० कृत० मृडत० शकृत्कुरुथ० कृत० मृडत० एतत्प्रायश्चित्तद्वयं सूत्रान्तरीयम्। एतद्वयमुपलक्षणपरत्वेनाऽऽनेयम्। सपत्नाधं० कृत० मृडत० एतत्प्रायश्चित्तमकामसंज्ञपननिमित्तम्। अकामसंज्ञपनं स्वतःसिद्धं मरणम्। पलायिद्वं० कृत० मृडत० निषण्णस्योत्थापने मन्त्रावृत्तिः। संज्ञप्तहोममन्त्रे यत्पशवो मायुमकृषतोरो वा पद्भिराघ्नत इति ऊहः। शमितार उपे० पाशेभ्यः पशून्प्रमुञ्चत० अरातीयन्तमधरं कृणोमि यं द्विष्मस्तस्मिन्प्रतिमुञ्चामि पाशानिति। तत्तदेकशूलया तां तां रशनामुपसृज्य तन्त्रेण चात्वाले न्यासस्तासां पूर्णपात्रानयनादिमार्जनान्तं तन्त्रम्। विभवन्ति तन्त्रमङ्गानीति सूत्रात्। वाक्त आप्यायतामित्याप्यायनं प्रतिपश्चावर्तते। अविभवन्त्यावर्तन्ते प्रत्यक्षार्थानीति सूत्रात्। अवशेषनिनयनं तन्त्रम्। विभवन्ति तन्त्रमङ्गानीति। पशौ तृणान्तर्धानादि उत्कृन्तनान्तमेकैकस्याऽऽवर्तते। ओषधे त्रायस्वैनामिति मेष्यामूहः। यथादेवतं वपोत्कृन्तनम्। अग्नये त्वा जुष्टामुत्कृन्तामि सर० स्वत्यै त्वा जुष्टामु० सोमाय त्वा जुष्टामु० पूष्णे त्वा जुष्टामु० बृहस्पतये त्वा जुष्टामु० विश्वेभ्यो देवेभ्यस्त्वा जुष्टामु० इन्द्राय त्वा जुष्टामु० मरुभ्यस्त्वा जुष्टामु० इन्द्राग्निभ्यां त्वा जुष्टामु० सवित्रे त्वा जुष्टाम० वरुणाय त्वा जुष्टामु० अच्छिन्न इति वा सर्वेषाम्। सर्वाण्यग्राणि पाणौ कृत्वा सर्वाणि स्थविमन्ति लोहितेनाङ्क्त्वा प्रज्ञातानि निधाय युगपदन्ते निरस्यति। विभवन्ति तन्त्रमङ्गानीति सूत्रात्। तत्राग्राणां पाकार्थं विभागेन प्रतिनयनं पृथक्पृथक्। उल्मुकहरणस्य पूर्ववदेव तन्त्रम्। तन्त्रमग्नेर्हरणमितिवचनात्। विभागपक्षे सर्वेषामग्नीनामेकीभावं कृत्वा तस्योल्मुकस्याऽऽहरणं तन्त्रेणैव। अनन्तरप्रदर्शितहेतोः। उर्वन्तरिक्षमन्वेहीत्यस्मिन्मन्त्रे केचिद्वदन्ति तत्खण्डितमेव सवनीयबर्हिराहरणे। पुनरन्वारम्भणं पूर्ववत्। उपायनं तन्त्रेणैव। विभवन्ति तन्त्रमङ्गानीति सूत्रात्। उल्मुकविसर्जनं तन्त्रेणैव। अनन्तरप्रदर्शितहेतोः। वपानिग्रहणमग्रप्राशनं च। सह प्रतिप्रस्थाता श्रपयति। तत्तद्बर्हिरग्रस्य तस्यास्तस्या वपाया अधस्तादुपासनम्। अभिहोमस्तन्त्रेण। एतस्य तन्त्रसाध्यकर्मसु परिगणनात्। प्रादुर्भूतेषु तन्त्रं स्तोकसंप्रैषः। शृतामिघारणं तन्त्रेण। ये व आत्मानः पशुषु० आत्मन्वन्तः सोमघृतवन्तो हि भूत्वा देवान्गच्छत सुवर्विन्दत यजमानाय मह्यमिति। अनूहो वा। उद्वासनमपि तन्त्रेणैव। दृ२हत गा० दक्षिणस्यां वेदिश्रोण्यां तत्तत्प्लक्षशाखायां तां तां निदधाति। प्लक्षशाखाभेदाद्भेदेन निधानं मन्त्रभेदश्च। वपाश्रपणीप्रवृहणमावर्तते। अविभवन्त्यावर्तन्त इति सूत्रात्। याजमानं तन्त्रम्। इमा इन्द्रिय० मामिरि० ताभिर्देवा० सनेय२ शृता मयि श्रयन्ताम्। अयं य० अग्निर्होता, इति वपां वषां प्रत्यभिमर्शः। स्रुगादिनाज्यभागान्तं प्रकृतिवत्कृत्वा प्रयाजशेषेण यथाक्रमं द्विरभि-

यति । प्रचरणकालेऽग्नये छागस्य वपाया मेदसोऽनुब्रूहि । आश्राव्य प्रत्याश्रावितेऽग्नये छागस्य वपाया मेदसः प्रेष्य स्वाहा देवेभ्यः प्रथमवपायामेवात्रैव पूर्वः परिवप्यहोमः । तथा पूर्वः परिवप्य इति सूत्रात् । सरस्वत्यै मेष्या वपाया मेदसोऽनु० सरस्वत्यै मेष्या वपाया मेदसः प्रेष्य । पञ्चपशुप्रकृतित्वपक्ष ऐन्द्रे सारस्वत्यां तद्विकारेषु च दार्शपौर्णमासिकः प्रचरणकल्प इतिसूत्राद्यजिप्रैषा एव सर्वे । मैत्रावरुणव्यापारः प्रधानहविःषु नास्ति । अग्नीषोमीयविकारपक्षे प्रकृतिवत् । अस्मिन्पक्षेऽग्नीषोमीये तद्विकारेषु चाऽऽश्वत्थालः प्रस्तर ऐक्षवी विधृती इत्यारभ्यामुष्मा अमुष्य हविषः प्रेष्येत्येतदन्तात्सूत्रादेतेषामग्नीषोमीयधर्माणां पक्षे सर्वेषु पशुषु प्राप्तिः । सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयं सोमाय च्छा० सोमस्याहं देवयज्ययेन्द्रियावी भू० पूष्णे छा० पूष्णोऽहं देवयज्यया पुष्टिमान्पशुमान्भू० बृहस्पतये छा० बृहस्पतेरहं दे० येन्द्रियावी भू० विश्वेभ्यो देवेभ्यश्छा० विश्वेषां देवानामहं देवा दे० या प्राणैः सा० इन्द्राय छा० अत्र दार्शपौर्णमासिकः पक्षे प्रचरणकल्पः पक्षेऽग्नीषोमीयस्य, इन्द्रस्याहं दे० येन्द्रियावी भू० मरुद्भ्यश्छा० मरुतामहं दे० येन्द्रियावी भू० इन्द्राग्निभ्यां छा० इन्द्राग्नियोरहं दे० येन्द्रियावी भू० सवित्र उपांशु । अथोचैः, छाग० सर्वत्रोपांशु सावित्रैककपालयोर्देवता यजतीति चातुर्मास्यसूत्रात्सर्वत्र सवितृशब्द उपांशु । देवतावाचिनां परानामन्येषामप्युपांशुत्वमाश्वलायनेनोक्तम्—आददद्धसज्जुषत्करदग्रभीदिति देवतानामिति । एतत्प्रयोगस्तु मैत्रावरुणप्रयोगे स्पष्टो भविष्यति । सवितुरहं दे० येन्द्रियावी भू० वरुणाय मेषस्य व० । अत्रोत्तरपरिवप्यहोमः । वरुणस्याहं देव्येन्द्रियावी भू० वपाश्रपणीनां प्रहरणं तन्त्रेण । स्वाहोर्ध्वनभसं मारुतं गच्छतेति ऊहः । संस्रावणं च । चात्वाले मार्जनं तन्त्रेण । विभवन्ति तन्त्रमङ्गानीति सूत्रात् । ततः पशुपुरोडाशप्रचारः । आग्नेयादिवारुणान्तानां निर्वापः । व्रीहिमयाः पशुपुरोडाशाः सर्वेऽप्येकादशकपाला द्वादशकपाला वा । एतेषामुपधानं तत्तद्विकारधर्मेण । तत्राऽऽग्नेयस्य प्रकृतिवत् । सारस्वतपौष्णबार्हस्पत्यसावित्रवारुणानामप्याग्नेयविकारत्वादाग्नेयाष्टाकपालधर्मेण कपालोपधानम् । सौम्यवैश्वदेवयोरग्नीषोमीयवत् । ऐन्द्रमारुतैन्द्राग्नानामैन्द्राग्नवत् । शमितः पशून्विशाखे गुदान्मा निर्वृहीः क्लोम्नः प्लीह्नः पुरीततानि मेदांसि समवधातवा इति । पशुश्रपणार्थं तन्त्रं धृष्ट्यादानं क्रमेण कुम्भीनामधिश्रयणमङ्गारैः परीन्धनमावपनं च क्रमेण । अथ पशुपुरोडाशयागानामनुमन्त्रणानि क्रमेण—अन्नादः१ वाचमन्नाद्यं पुषेयम्२ वृत्रहा३ पुष्टिमान्पशुमान्४ अन्नादः५ प्राणैः सायुज्यं गमेयम्६ इन्द्रियाव्यन्नादः७ इन्द्रियाव्यन्नादः८ इन्द्रियाव्यन्नादः९ अन्नादः१० अन्नादः११ इति क्रमेणानुमन्त्रणानि पशुषु संवदस्वेति संवादप्रयुक्तप्रैषऊहः । जुह्वामेकं पञ्चगृहीतं गृहीत्वा पृषदाज्यस्रुवं चाऽऽदाय घृतस्य हवी३ः शमि-

तरित्यनूहः । नाभिरुप मा मेदो हविरित्यनूह्यानीत्याश्वलायनेन हविःशब्देऽनूहस्योक्तेर्हविष इत्यन्तो नमतीत्यनूबन्ध्याप्रकरणस्थापस्तम्बसूत्रोक्तालिङ्गाच्च । प्रथमहृदयं तदीयहृदयशूलात्प्रवृह्य प्रथमकुम्भ्यामवधाय सं ते मनसा मन इति पृषदाज्येन हृदयमभिघार्य स्वाहोष्मणोऽव्यथिष्या इत्यूष्माणमुद्यन्तमनुमन्त्र्य यस्त आत्मेति कुम्भीगतं पशुमभिघारयति । ततः प्रत्यावृत्य पुनः पञ्चगृहीतं पृषदाज्यस्रुवं च पूर्ववदादाय तूष्णीमेवाभिप्रव्रजति न संवादः । केचित्तु अन्यः पञ्चगृहीताज्यपृषदाज्यस्रुवावानयतीति वदन्ति । पूर्ववद्धृदयस्य हृदयशूलात्प्रवृहणादि यस्त आत्मेत्यभिघारणान्तम् । एवं तृतीयादीनां पशूनामेकैकां कुम्भीमुद्वास्यैकैकां पञ्चहोत्रा क्रमेण तत्तत्पक्षशाखायां निदधाति । दृश्ह गा दृश्हेत्यस्मिन्मन्त्रे नोहः किंत्वावृत्तिरेव । अविभवन्त्यावर्तन्त इति सूत्रात् । यस्त आत्मेति मन्त्रे वपावदूहः । इमानीन्द्रियाण्यमृतानि वीर्याण्येभिरिन्द्राय पशवोऽचिकित्सन् । तैर्देवा० शृतानि मयि श्रयन्ताम् । अयं यज्ञः पञ्चहोता । एतयोरप्यत्र संभवे तन्त्रमविभव आवृत्तिः ।

तस्य तस्याभ्यावर्तते मनोता वा ।

तस्य तस्य पशोरभ्यावर्तते जुहूपभृतोर्वसाहोमहवन्याश्च समवत्तधान्यां चोपस्तृणीत इत्यादीज्यान्तमेकैकस्याऽऽवर्तते । अविभवन्त्यावर्तन्त इति सूत्रात् । मनोता वेत्यनेन मनोतासूक्तस्याप्यावृत्तेर्नियमेन प्राप्तौ विकल्पमाह मनोतासूक्तस्य । अथवैवं सूत्रान्वयः—तस्य तस्य पशोरवदानकाले मनोता वाऽऽवर्तत इति मनोताविकल्पार्थमेव सूत्रकरणम्। जुहूपभृद्वसाहोमहवनीसमवत्तधान्युपस्तरणादीनां त्वर्थादेव प्राप्तिः । अवदानसमकाला तावन्मनोता हविषोऽवदीयमानस्येति लिङ्गात् । तत इज्याकालेन व्यवायात्प्रतिपश्चावर्तनमित्यावृत्तिरर्थत एव सिद्धा । उक्तं चाऽऽपस्तम्बेन स्पष्टं परिभाषासूत्रे मनोतस्याऽऽ(ताया आ)वृत्तिर्भिन्नकालेष्विति । अत्र वर्तमानकालभेदादावृत्तिरिति भावः । अनावृत्तिपक्षोऽप्यापस्तम्बेनोक्तः—तन्त्रं वेति । एवं च सूत्रकृतः पक्षद्वयस्यापीष्टत्वाद्विकल्पः कृतः सूत्रकृताऽपि । तन्त्रपक्षे कथं समकालत्वमिति चेत्सत्यम् । आग्नेयीयं मनोता, इतरपश्चवदानकाले तु नान्यहविषो देवतायाः संस्काराय प्रभवति आग्नेयपश्चवदानसमकाल एवाऽऽग्नेयहविषो देवतायाः एकदेवतत्वात्संस्काराय प्रभवत्येवेति भावः ।

सर्वेषां व्यङ्गाणि समवत्तं च ।

इदं सूत्रं प्रधानार्थतत्तत्पश्चवदानोत्तरकालमेव व्यङ्गाणां स्विष्टकृदर्थमवदानं न तु अन्ते यागेऽपि तदेत्येतद्बोधनार्थम् । उपभृति हिरण्यशकलावधानमन्तेऽभिघारणं च । देवतार्थस्य तु तत्तदनन्तरमेव । समवत्तशब्देनेडावदानमपि तदा तदैव । अभिघारणं त्वन्ते । इज्यान्तमेकैकस्य क्रमेण ।

तस्य तस्यार्धर्चे वसाहोमं जुहोति ।

दिग्घोमार्थं शेषं पात्रान्तरे स्थापयेद्दिग्यागस्याद्दष्टार्थत्वाद्विभवन्ति तन्त्रमङ्गानीति सूत्रादेव सूत्रकृता प्रदर्शितमेव भवति । आपस्तम्बः स्पष्टमेवेदमाह—उद्रेकान्समवनीय दिशः प्रति यजतीति । निहितं शेषमेकीकृत्य तन्त्रेणैव दिग्घोमः । उद्रेकसमवनयनं दिग्घोमतन्त्रतासिध्द्यर्थमेव । अन्यथैतस्य व्यर्थत्वापत्तेः । सर्वेषां व्यङ्गाणि समवत्तं चेत्यनेनोत्तमे पशौ स्विष्टकृद्याग इति ज्ञापितमेवार्थात् । वनस्पतेरपि स्विष्टकृद्विकारत्वात्तस्यापि स्विष्टकृत्समीपस्थान एव याग इत्यपि दर्शितप्रायमेवार्थात् । आपस्तम्बेन स्पष्टमेवोक्तम्—उत्तमे पशौ वनस्पतिं स्विष्टकृतं चेति ।

सर्वेषां गुदैरुपयज उपयजति ।

उपयद्दोमस्यानूयाजानुनिपातित्वात्प्रथमपशोरुपस्थितत्वेन तदीयगुदैनैवोपयाज इति शङ्कामपाकर्तुं सर्वेषामितिवचनं प्रतिपत्त्यर्थमिति भावः । प्रत्येकहोमस्यार्थादेव निवृत्तत्वात्तन्त्रमेव । समुद्रं गच्छत स्वाहेत्येवमूहः सर्वेषु मन्त्रेषु । स्वरुहोमे द्यां वो धू० पृणध्वमित्यूहः । अनूबन्ध्यापक्षेऽग्निष्ठयूपस्वरुहोमो न ।

जाघनीभिश्च पत्नीः संयाजयन्ति ।

प्रतिपत्त्यर्थमिति भावः ।

अनूबन्ध्यावपायाꣳ हुतायामग्रेण शालामुखीयमधोनाभिमचषालं द्विरशनं पात्नीवतस्य यूपꣳ संमाय तस्मिꣳस्त्वाष्ट्रꣳ साण्ड लोमशं पिङ्गलं बहुरूपमुपाकरोति पर्यग्निकृतमुत्सृज्याऽऽज्येन शेषꣳ सꣳस्थापयेत् ।

अनूबन्ध्यावपायां हुतायामाप्रिक्षायाः प्रधानयागे कृते वा त्वाष्ट्रस्य पशोस्तन्त्रमारभ्यते । त्वष्टा देवता यस्य स त्वाष्ट्रः । पात्नीवतस्य यूपं छिनत्तीत्यनेन पत्नीविद्विशेषणविशिष्टोऽत्र देवतेति प्रदर्शितम् । पत्नीवानिति देवता यस्य स पात्नीवतः । विशेषणप्रयुक्ताऽप्यस्मिन्यूपे संज्ञाप्रवृत्तिरिति दर्शयितुं द्विविधाऽपीयं संज्ञा श्रुतौ प्रवृत्ता—इष्टं वपया भवत्यनिष्टं वशयाऽथ पात्नीवतेन प्रचरति तीर्थ एव प्रचरत्यथो एतर्ह्येवास्य यामस्त्वाष्ट्रो भवतीति । यत्पर्यग्निकृतं पात्नीवतमुत्सृजतीत्यादि । अग्रेण शालामुखीयमित्यनेन शालामुखीय एव प्रचारोऽस्येति सूचितम् । स्पष्टमिदमुक्तमापस्तम्बेन—शालामुखीये प्रचरन्तीति विज्ञायत इति । एवं चोदयनीयवत्प्राग्वंशिके विहारे सर्वं तन्त्रमित्युक्तं भवति । अत्राग्नेर्विहृतत्वादुत्तरवेद्यादीन्यर्थलुप्तानि निवर्तन्ते । वेदिस्तु दार्शिकी क्रियते । ये चानूबन्ध्यार्थाः प्राकृताः संस्कारास्तेऽपि क्रियन्ते । यथा प्राजापत्यपरिस्तरणोलपराजयास्तरणादयः । नाभ्रवधो यत्प्रमाणं तावत्-

त्परिमितं मिनोतीत्यर्थः। यूपत्वाच्चषालप्राप्तावचषालमिति वचनम्। द्विरशनमेतस्य पशोरेकादशिन्यङ्गत्वात्तदङ्गभूतस्य यूपस्य रशनाद्वयमप्राप्तं स्यात्तत्प्राप्त्यर्थमिदं वचनम्। संमाय यत्ते शिल्पः परावधीदित्यादिविधिना संमाय स्थितं कृत्वा छेदनं तूपशयच्छेदनोत्तरमेव तस्मिन्यूपे त्वाष्ट्रं त्वष्टृदेवताकं, पात्नीवतस्य यूपं संमायेत्यनेन पत्नीवद्विशेषणस्यापि पशौ संबन्धप्रदर्शनात्पत्नीवद्वृणविशिष्टोऽत्र त्वष्टा देवतेति सिद्धं भवति। पत्नीवते त्वष्ट्रे त्वा जुष्टमुपाकरोमीत्येव सर्वत्रोहः। साण्डमित्यनेन भूयोबलवत्त्वं लक्ष्यते। लोमशमित्यनेन बहुललोमवत्त्वं पिङ्गलं बहुरूपं पिङ्गलबाहुल्येन पिङ्गलवर्णवन्तं सद्बहुरूपं विचित्रवर्णमुपाकरोतीत्यर्थः। तमुपाकृतं पशुं पत्नीवते त्वष्ट्रे इदमुत्सृजामीत्युत्सृज्याऽऽज्येन प्रतिनिधिना शेषं तन्त्रं संस्थापयेत्समापयेत्। वाचनिकमिदम्। एवं च कुम्भीशूलादयः संज्ञपनहोमादयश्चार्थलभ्या द्रव्यक्रिया निवर्तन्ते। अग्निगोर्लोपः। आज्यशेषेण समापनस्य प्रकारन्तु स्पष्टमापस्तम्बेनोक्तः—यावन्ति पशोरवदानानि स्युस्तावत्कृत्व आज्यस्य ध्रौवाज्यस्यावद्येदिति। यद्यत्पशोरवदानं वपाहृदयादि तस्य तस्य स्थाने ध्रौवादाज्यादवद्येत्। त्रींस्त्रीन्पञ्चावत्तिनः। हिरण्यशकलास्तु सर्वत्राविशिष्टा एव। अन्यत्र विशेषमाहाऽऽपस्तम्बः—पशुधर्माज्यं भवतीति। तत्राऽऽज्यं पशुधर्मकं भवति। वक्ष्यति च स एव परिभाषायां तद्धर्मात्स्यादिति। अतो वपास्थानस्याऽऽज्यस्य पत्नीवते त्वष्ट्रे छागस्य वपाया मेदस इति प्रैषः। तथा पशुपुरोडाशहविषोरपि द्रष्टव्यम्। तथा जातवेदो वपया गच्छ देवानित्येव होमः। एवं प्रयाजानूयाजसमिष्टयजुरादयश्च पाशुका एव भवन्ति न प्राकृताः। अत्र पक्षान्तरमप्युक्तमापस्तम्बेन—अपि वा पर्यग्निकृतमेवोत्सृजेन्न संस्थापयेदिति। अपि वा पर्याग्निकरणान्तं कृत्वा पशुतन्त्रमन्त्यमुत्सृजेत्, न त्वाज्येन शेषं संस्थापयेत्। पशुपुरोडाशाद्यनूबन्ध्यायाः शेषं संस्थापयेत्। एवं पर्यग्निकरणान्ते कृत्स्नतन्त्रे वा संस्थिते पात्नीवतेऽनूबन्ध्यायाः शेषं संस्थापयेत्।

यदि कापेयी पञ्चैकादशिनी स्यादभित
आग्नेयमैन्द्रौ पशू भवतः सारस्वतः सौम्यः
पौष्णो बार्हस्पत्य इत्युत्तरतो वैश्वदेवो
मारुतः सावित्रो वारुण इति दक्षिणतः।

पूर्वं स्वशाखोक्तैकादशिनी व्याख्याता। इदानीं तस्यामेवैकादशिन्यां शाखान्तरोक्तो विशेषः प्रदर्श्यते—कपयो नामर्षयस्तैर्दृष्टा कापेयी सा चेच्चिकीर्षिता स्यात्तदाऽऽग्नेयमग्निष्ठ उपाकृत्य दक्षिणोत्तरयोर्यूपयोरैन्द्रावुपाकृतौ भवतः। तत उत्तरेषु यूपेषु सारस्वतसौम्यपौष्णबार्हस्पत्यानुक्रमेणोपाकृत्य दक्षिणयूपेषु वैश्वदेवमारुतसावित्रवारुणानुपाकुर्यात्। व्यत्यासो दक्षिणापवर्गत्वं च पूर्ववत्। नात्रैन्द्राग्नो विद्यते।

ब. च. ज. झ. ञ. पञ्चैका°।

तामेतां कापेया विदुस्तामतिरात्रचरम आलभेत ।

आलभेतेत्यनन्तरमितिकारोऽध्याहर्तव्यः । कपीनामन्तेवासिनः कापेयाध्यायिनो वा कापेयास्तामेतामेकादशिनीमधिकृत्यैवं विदुः—तामतिरात्रचरम आलभेतेति ।

ननु कोऽयमतिरात्रचरमो नाम क्रतुर्यत्रेयमालभ्या तमेव व्यनक्ति—

साऽहीनेषु लिङ्गसंयोगात् ।

सा कापेयी, अहीनेष्वेवाऽऽलभ्या भवति लिङ्गसंयोगाद्धेतोः । अतिरात्रचरमनाम्नो हीनस्य स्पष्टवसाप्रदर्शनाच्छन्दश्शब्दस्य हेतुत्वं नात्र युज्यते । अतः शब्दशब्दं परित्यज्य लिङ्गशब्दप्रयोगः कृतः सूत्रकृता । यत्र फलतश्चरमत्वस्य पर्यवसानं तत्र लिङ्गशब्द इत्याचार्याभिप्रायः । लिङ्ग्यते ज्ञाप्यते चरमत्वरूपोऽभिमतोऽर्थो येन तल्लिङ्गम् । अप्रत्यक्षः शब्दतोऽर्थो यत्रेति यावत् । तस्य संयोगः संबन्धो यत्रेत्यर्थः । अन्तिमातिरात्ररूपं लिङ्गं तस्य संबन्धोऽत्रास्तीति तेष्वेव ह्ययमतिरात्रचरमः शब्दोऽर्थतः संयुज्यते यस्मादतिरात्रा एव चरमास्तेषाम् । यथा वक्ष्यति सप्तदशे प्रश्ने त्रयोदशे खण्डे द्विरात्रप्रभृतय उपरिष्टादतिरात्रा अहीना एकादशरात्रादिति ।

ननु सत्रेष्वप्यविशिष्टमतिरात्रचरमत्वमुभयतोतिरात्रत्वात्तेषाम् । यथा वक्ष्यति अष्टादशे प्रश्ने प्रथमखण्ड उभयतोतिरात्राणि सत्राणीति । तत्तेष्वनयैव भवितव्यं तत्राऽऽह—

सत्रीयेतरा भवति ।

सत्राणि याऽर्हति सा सत्रीया, इतरा कापेयीव्यतिरिक्ता स्वशाखोक्ता सत्रेष्वेव भवति न कापेयी सत्रेषु इत्यर्थः । येषां ह्यतिरात्रचरमत्वमेव विशेषगमकं नातिरात्रप्रथमत्वमपि तेषामेव कापेयीव्यतिरिक्तैकादशिनीयुक्ततरेति तात्पर्यार्थिः ।

अथ षोडशे प्रश्नेऽष्टादशेऽथ पशुक्लृप्तिरित्येतस्मिन्खण्डे गवामयनप्रकरणस्थ एकादशिनीं प्रकृत्य प्रवृत्ते वक्ष्यति तेषु गव्यानतिरिक्तपशून्वैष्णवं वामनमेकविꣳश ऐन्द्राग्नं त्रिणवे वैश्वदेवं त्रयस्त्रिꣳशे द्यावापृथिव्यां धेनुं प्रथमे छन्दो मे तस्या एव वत्सं वायव्यं मध्यम आदित्यामर्षिं वशामुत्तमे मैत्रावरुणीमविवाक्ये प्राजापत्यमृषभं तूपरं महाव्रत आग्नेयमुदयनीय इति लिङ्गायनिकानीति सूत्रे गव्याः पशव उक्तास्तत्र के गव्या इति आकाङ्क्षायामेकादशिनीप्रसङ्गाद्गव्यान्पशूनत्रैवाऽऽह—

उक्षर्षभो वशा वेहद्धेनुर्वत्सोऽनड्वा-
निति गोनामभिर्गव्यान्पशून्प्रतीयात् ।

एतान्यपि गोजातीयानामेतेषां नामानि भवन्त्यतो गव्या एवैते पशवः । यत्र

---

१ क. °कानिति । २ ङ. ज. ञ. ट. उक्ष ऋषभो ।

गव्याः पशव आलभ्यन्त इति श्रुतावुक्तिर्यत्र च गव्यानतिरिक्तपशूनितिसूत्रोक्तिस्तत्रैतान्प्रतीयाज्जानीयादित्यर्थः ।

स्वैरितरान् ।

इतरान्गव्यव्यतिरिक्तान्यशून्स्वैः स्वस्वनामभिरेव तं तमेव प्रतीयान्नतु बहुनामभिरनेकजातीयाः संगृह्यन्ते किंतु एकजातीयैव व्यक्तिरितिप्रसिद्ध्यर्थमिदं सूत्रम् ।

एकदेवतेष्वनन्यदेवतव्यवेतेषु समानः
पशुपुरोडाशो भवति भवति ॥ २४ ॥

इति हिरण्यकेशिसूत्रे नवमप्रश्नेऽष्टमः पटलः ।

यथा वाजपेये सप्तदश प्राजापत्येषु सप्तदशे प्रश्नेऽष्टादशे खण्ड उक्षाणः पशवो विहितास्तेषु च पुनर्वाजपेये सर्वेषां प्रतिपशु बर्हींषि वपाश्रपण्य इत्यारभ्य वरदानं चेत्यन्तमेतत्समानं सूत्रं पुनः कृतं तत्प्रयोजनमेकदेवतपशुषु एकदेवतेष्वनन्यदेवतव्यवेतेष्विति परिभाषाया अनित्यत्वज्ञापनार्थम् । तेनैकदेवतपशुष्वपि पक्षे प्रतिपश्वपि पुरोडाशा भवन्तीतिज्ञापनम् । न विद्यतेऽन्यदेवतं व्यवेतं व्यवधायकं येषां तेऽनन्यदेवताः । एतादृशा य एकदेवताः पशवस्तेषु एक एव पुरोडाशो भवतीत्यर्थः । द्विरुक्तिः प्रश्नसमाप्तिद्योतनार्था ।

इत्योकोपाहश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्निचित्पौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-शामिकायां ज्योत्स्नाख्यायां वृत्तौ नवमप्रश्नस्याष्टमः पटलः ॥ ८ ॥

संपूर्णोऽयं नवमः प्रश्नः ।

अथ दशमः प्रश्नः ।

तत्र प्रथमः पटलः ।

उक्ता अग्निष्टोमादयः संस्थाः पञ्चैकादशिनीयूपैकादशिन्यौ च । अथेदानीमग्निष्टोमादिष्वाकाङ्क्षितं याजमानकर्म वक्तुं शिष्यावधानाय प्रतिजानीते—

अग्निष्टोमस्य याजमानं व्याख्यास्यामः ।

अग्निष्टोमस्येति वचनं मुख्यं कर्मणो नामधेयमग्निष्टोम इत्येव तस्यैव यक्ष्य इत्येतया क्रियया साक्षादेवान्वयो न तु ज्योतिष्टोमसोमशब्दयोः, तयोस्तु अग्निष्टोमशब्दात्पूर्वमित्येतादृशार्थज्ञापनार्थम् । यद्यपि यज देवपूजासंगतिकरणदानेष्विति धात्वनुशासनसूत्रेण यजधातोः पूजाद्यर्थकाल्लटः शतृशानचाविति सूत्रेण लडादेशशानच्प्रत्ययस्तेन निष्पादितेन यजमानशब्देन देवपूजादिकर्मणां कर्ताऽऽत्मनेपदाच्च फलभोक्ता प्रतीयते तथाऽपि योगरूढ्यर्त्विक्साध्यकर्मणि फलभोक्ता यः स एव प्रतीयते । पूर्तेष्वयजत्यर्थेष्वपि यजमानशब्दप्रयोगदर्शनात्, देवपूजाकर्तृत्वदर्शनाच्च । तस्मादृत्विक्कर्तृके कर्मणि यः फलभोक्ता स एव यजमानपदवाच्यः । न च कर्ममात्रफलभोक्तरि दृश्यते प्रयोग उपनयनादिषु सामयाचारिकेष्वपि च फलभोक्तरि प्रयोगाभावात् । यजमानस्य कर्म यत्तद्याजमानम् । पत्न्यामपि उपहूतेयं यजमानेति मन्त्रलिङ्गाद्यजमानत्वसत्त्वात्तस्या अपि कर्मात्र संग्राह्यम् । तथा चैवं विग्रहवाक्यं भवति यजमानयोः कर्म यत्तद्याजमानमिति । यद्यपि तत्तद्वेदविहितानि होतृवेदादिसंज्ञाभिर्होत्रादिनियतकर्तृकाण्येवेति व्यवस्थापितं तथाऽपि विशेषप्रमाणैस्तद्बाधने दंपत्योरपि क्वचित्कर्तृत्वं प्राप्तं तन्निरूप्यत इत्यर्थः । अत्राऽऽदौ संकल्पात्पूर्वमेव सामग्र्युपकल्पनमृत्विगुपकल्पनं च कर्तव्यम् । तद्विना क्रत्वसिद्धेः । तथाच सूत्रं द्रव्यप्रकल्पनं यजमानस्य दक्षिणादानं ब्रह्मचर्यं जपाश्चेति । बौधायनेन कल्पसूत्रेऽत्र स्पष्टमिदमुक्तम्—अग्निष्टोमेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनं च कृष्णविषाणां चेत्यादिना । कर्मान्तेऽपि स पुरस्तादेवोपकल्पयते प्रभूतं तृणं वरशं पश्वाज्यं स्थाल्यमत्रं कुम्भं च कुरीरं चेत्यादि । द्वैधेऽपि अथातोऽग्निष्टोमं व्याख्यास्यामः स ह स्माऽऽह बौधायनो नादृष्ट्वा राजानं चर्त्विजश्च दीक्षेदितीति । सामग्र्यृत्विक्संपादनोत्तरं कृच्छ्रचान्द्रायणगायत्रीजपतिलहोमप्राणायामकूष्माण्डहोमगणहोमतीर्थयात्रासेतुदर्शनादिभिः सपत्नीकमात्मानं संशोध्य ब्राह्मणैरनुज्ञातो वैराणि च प्रशाम्य संकल्पं कुर्यात् । शुचिना कर्म कर्तव्यमिति श्रुतेः पूतः कर्मण्यो भवतीति श्रुतेश्चाधिकारार्थं प्रायश्चित्तजातं समुचितमसमुचितं वा पातकानुसारेण कर्तव्यम् । निर्वैरः सर्वभूतेषु यज्ञेष्वधिकृतो भवेदिति स्मृतेर्निर्वैरि-

णोऽधिकारः। ननु यद्यभिचरेदित्येवमाद्यभिचरितुः प्रयोगा उपदिश्यन्ते कथं वैरिणोऽनधिकार इति चेदुच्यते—अभिचरितुरपि सर्वजनवैरिणोऽनधिकार एव शास्त्रस्यान्यगतिकत्वात्। सर्वं चैतच्छोधनमधिकारासिद्ध्यर्थं कार्यं प्रारिप्सितकर्मणो निर्विघ्नपरिसमाप्त्यर्थं ग्रहशान्त्युदकशान्त्यादि कार्यम्। यतः पापानि श्रेयांसि प्रतिबध्नन्ति जन्मार्जितान्यपि विरुद्धानि च विघातमाचरन्ति दृष्टादृष्टोपायैरतः प्राचीनानामज्ञातानां च पापानां द्विजातिकर्मभ्यः पतनहेतूनां तेषां सर्वेषामपनुत्तये निष्कृतिरवश्यं कर्तव्या। अन्ततः केवलं कूष्माण्डहोममात्रमवश्यमशक्तेनापि कार्यमेव। कूष्माण्डैर्जुहुयात्पूतो देवलोकान्समश्नुत इति श्रुतावत्यन्तपवित्रत्वोक्तेः। एतच्च शोधनं बौधायनेन कर्मान्त उक्तम्—अग्निष्टोमेन यक्ष्यमाणः प्रज्यमात्मानं कुर्वीत येनास्य कुशलं स्यात्तेन कुशलं कुर्वीतेति। प्रज्यं प्रगतज्यं धनुः स्वकार्यक्षमं यथा तथा स्वकार्ये शुद्धिसंपादनेन योग्यं कुर्वीतेत्यर्थः। येन क्षान्तिशान्त्याद्युपायसमूहेन कृशलं विघ्नरहितं कर्म स्यात्तेन कुशलं कर्म कुर्वीतेत्यर्थः। परिसरवर्तिनः सर्वाञ्छिष्टान्सत्कारपूर्वकमाहूय संपूज्य संप्रार्थ्य तेषामभ्यनुज्ञया कर्म कर्तव्यम्। अत्र श्रुतिः—तस्माद्यदब्राह्मणोक्तोऽश्रद्दधानो यजते शंयुमेव तस्य बार्हस्पत्यं यज्ञस्याऽऽशीर्गच्छतीति। बौधायनपरिभाषायामपि ये तत्र ब्राह्मणाः सन्ति ताननुज्ञाप्य कुर्वन्ति यत्कारी स्यात्समृद्धमेवास्य तद्भवतीति। एतत्सर्वं सोमपूर्वाधान आधानात्पूर्वमेव। यः पूर्वमाहिताग्निः स हविर्यज्ञान्कृत्वा पाकयज्ञानामकरणे तानपि कृत्वाऽग्निष्टोमं कुर्यात्। यदा तु सर्वे हविर्यज्ञा एकवारमनुष्ठितास्तदा तत्करणासंभवे प्रायश्चित्तमात्रं कृत्वाऽपि अग्निष्टोमः कर्तव्यः। तथा च कर्मान्तम्—यान्यृणान्युत्थितकालानि स्युस्तानि व्यवहरेदनुज्ञापयीत वेति। ऋणानि ऋणापाकरणार्थानि नित्यानि कर्माणि उत्थितकालानि अन्तरितकालानि अकृतानीति यावत्। स्युर्भवेयुस्तानि व्यवहरेत्कुर्यात्। अनुज्ञापयीत वा सर्वथोभयं कर्तुमशक्तावनुज्ञया तद्विनाऽपि कुर्वीतेत्यर्थः। अनेनेदं सूचितं भवति क्रमोऽत्राविवक्षित इति। उक्तं चाऽऽश्वलायनेन—दर्शपूर्णमासाभ्यामिष्ट्वेष्टिपशुचातुर्मास्यैरथ सोमेनोर्ध्वं दर्शपूर्णमासाभ्यां यथोपपत्त्येके प्रागपि सोमेनैक इति। यथोपपत्ति यथासंभवं, क्रमोऽत्राविवक्षित इति भावः। इष्टिराग्रयणेष्टिः, पशुर्निरूढः। उपलक्षणमिदं सौत्रामण्याः। हविर्यज्ञानां द्वितीयादिप्रयोगे कालसत्त्वेऽनुष्ठानं तदसत्त्वे प्रायश्चित्तमिति द्रष्टव्यम्। संकल्पात्पूर्वस्मिन्दिनेऽपराह्णे मातृकापूजनपूर्वकं नान्दीश्राद्धं कर्तव्यम्। आग्निकं त्वपराह्णत इति स्मृतेर्बौधायनोक्तेश्च। तस्यामेव रात्रावुदकशान्तिप्रतिसरबन्धौ कर्तव्यौ बौधायनोक्तेः। तौ च पृथक्पृथक्त्रयेण वा। तदुक्तत्वादङ्कुरारोपणमपि। उदकशान्तिप्रतिसरबन्धाङ्कुरारोपणानामकरणे प्रत्यवायाभावः करणे फलाधिक्यमिति द्रष्टव्यम्। संकल्पदिने संकल्पात्पूर्वमेव गणपतिपूजनं पुण्याहवाचनं च कार्यम्। स्नानपवनमन्त्राचमनमन्त्रप्रोक्षणान्यपि संभवे कार्याणि

बौधायनधर्मसूत्रोक्तेः। ततः प्रातरेव मध्याह्न एव वा संकल्पं कुर्यात्। समस्ते कृतार्थं श्रूयमाणं यजमानः कामयते यानि तु कामयतिः श्रावयतीति सूत्रात्। त्रिभिर्नामभिराचार्येण व्यवहारात्संकल्पवाक्ये ज्योतिष्टोमसोमाग्निष्टोमशब्दानां प्रयोगः। अग्निष्टोम इत्येव वक्तव्ये सोमेन यक्ष्यमाणो ज्योतिष्टोमेन स्वर्गकामो यजेतेति नामद्वयेनापि व्यवहारं कृतवतः सूत्रकारस्यानेकनाम्नामुच्चारणे प्रयोजनमदृष्टं विना न ह्यन्यत्संभवति। तच्च संकल्पवाक्ये त्रितयोच्चारणद्वारैव संभवति नान्यथा। तत्राग्निष्टोमशब्देन संस्थानिर्देशः। ज्योतिष्टोमशब्देन स्तोमचतुष्टयनिर्देशः। सोमशब्देन द्रव्यनिर्देशः। प्रथमे प्रयोगे सप्रवर्ग्येणेत्यस्यापि निर्देशो वैकल्पिकपदार्थान्यतरपदार्थपरिग्रहावधारणाय। साग्नः प्राधान्यादमुकसाग्नेत्यस्यापि निर्देशः। दक्षिणाविषये बह्वीनां संख्यानां बहूनां द्रव्याणां च विहितत्वान्नियमार्थं संख्यायाः प्रदेयद्रव्यस्य च निर्देशः।

पुरस्तादीक्षाभ्यो राजानमाहार्यं परिवेवेष्टि।

दीक्षाया इत्येकवचनं विहाय दीक्षाभ्य इति बहुवचनान्तः प्रयोगो बहुदिनसाध्यदीक्षापक्ष एव मुख्य इति बोधयितुम्। क्लेशबाहुल्यात्। उत्तरसूत्र एतत्सर्वं स्पष्टी करिष्यामः। गिरौ क्रयणमिति पक्षे नाऽऽहारणम्। परिवेषणं तु तत्र गत्वैवेति सोमक्रय एवोक्तम्। आहार्येति णिच्प्रयोगात्परिकर्मिभिर्वैश्यैरेवाऽऽहारणीयो न तु स्वयं न च शूद्रैराहरणीयः। न च शूद्रैरेवाऽऽहरणीयो न तु विप्रैः स्मृतिषु स्पर्शस्यैव निषिद्धत्वेनाऽऽहरणस्य सुतरां निषेधादिति वाच्यम्। एतस्य निषेधस्याकारणस्पर्शनिषेधपरत्वेनैतन्निषेधपरत्वाभावात्।

समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत्।
शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन्पतत्यधः॥

इति शूद्राहरणनिषेधके शातातपवचन आदिपदेन सोमादेरपि संगृहीतत्वेन सोमाद्याहरणस्यापि निषेधसिद्धेश्च। राजपदं राजोपचारै राजानयनं बोधयितुम्। ते च रथच्छत्रातपत्रसेवकवाद्यघोषाद्याः। परिवेवेष्टि भोजयति सोमात्मिकया देवतया भोजनं कृतमिति भावना कर्तव्या। पयसौदनेनेत्यापस्तम्बः। पयसोपसिक्तेनौदनेनेति तदर्थः। तथा चोभयं मिलितमेव द्रव्यं द्रव्यभेदो न विवक्षितः। अन्यथा चकार उक्तः स्यात्। पायसौदनेनेति पाठे पयसि शृत ओदनो ग्राह्यः। अत्र सूत्रान्तरे विशेषः—राजानमाहार्यं प्रत्यहं प्रातःसायमाक्रयान्नमः सोमाय राज्ञ इति राजानं संपूज्य पायसौदनेन परिवेवेष्टीति। अत्राऽऽवाहनादिविसर्गान्तषोडशोपचारात्मिकैव पूजा। आवाहनं विना पूजाया असंभवात्। विसर्जनं विना क्रयाद्यसंभवात्। नहि यावत्पर्यन्तं देवतासत्त्वं तावत्पर्यन्तं क्रयः कण्डनादिकं च संभवति। या तु तत्र तत्र राजशब्दप्रवृत्तिर्दृश्यते सा च भावनामात्रपरा ज्ञेया। अत्र तु पूजनविधानादेवतात्वाभावाय विसर्जनमावश्य

कम्। अन्यथा क्रयादिनिर्वाहो न स्यात्। आवाहनं विना पूजनमनुपपन्नमिति कृत्वाऽऽवाहनमप्यावश्यकम्। अत एव विसर्जनमपि। यद्यपि विसर्जनस्यापि षोडशोपचारान्तर्गतत्वेन पूजासंपादकत्वात्संपूज्य परिवेवेष्टीत्यनेन पूजोपचारान्तर्गतविसर्जनोत्तरभावित्वं भोजनस्य प्राप्तं तथाऽपि विसर्जनानन्तरं देवताभावाभावेन परिवेषणासंभवाद्विसर्जनात्पूर्वमेव परिवेषणं कर्तव्यम्। अस्मिन्पक्षे नैवेद्यपदार्थो भिन्न एव। परिवेषणं तु महोपहारस्थानीयमिति। अथवा संपूज्येत्यनेन दीपान्तैव पूजोच्यते। पायसौदनेन परिवेवेष्टीति नैवेद्यार्थमेव। अस्मिन्कल्पे न पृथङ्महोपहारः। अवशिष्टोपचारास्त्वनन्तरं भवन्त्येव।

तद्दीक्षासु निवर्तते।

तत्परिवेषणं दीक्षासु दीक्षासंबद्धदिवसेषु, बहुवचनं त्र्यादिबहुदीक्षाभिप्रायेण। तेनैकस्यामपि दीक्षायां परिवेषणनिवृत्तिरस्त्येव। निवर्तते निवृत्तं भवति। अनेन बहुवचनेनापि ज्ञायते बहुदीक्षायक्ष एव मुख्यः क्लेशबाहुल्यादिति। नहि क्लेशबहुलतपो विना दुःखात्मकं पापं नश्यति यथा लोके पाटनमन्तरेण विषमव्रणानां नोपशान्तिस्तद्वत्। न च ज्योतिष्टोमे त्र्यहं नाश्नाति त्र्यहं नाश्नातीत्यादिनोक्तं तपोऽध्वर्योर्युक्तं तस्य दुःखात्मकत्वेन परिक्रीतपुरुषैः कर्तुमुचितत्वात्, दुःखत्वादेव फलभोक्तृसंस्कारत्वाभावाद्यजमानस्य न युक्तमिति वाच्यम्। भाविनः सुखरूपस्य फलस्य प्रतिबन्धकं दुःखजनकं यत्पापं तस्य नाशकत्वेन दुःखरूपस्यापि तपसः खामिसंस्कारत्वसंभवात्। अस्मिन्नर्थे वाक्यशेषगतं लिङ्गं कल्पसूत्रकारैरेवोदाहृतं यदा वै दीक्षितः कृशो भवत्यथ स मेध्यो भवति यदाऽस्मिन्नन्तरं किंचिन्न भवत्यथ स मेध्यो भवति यदाऽस्य कृष्णं चक्षुषोर्नश्यत्यथ स मेध्यो भवति यदाऽस्य त्वचाऽस्थि संधीयतेऽथ स मेध्यो भवति पीवा दीक्षते कृशो यजते यदस्याङ्गानां मीयते जुहोत्येव तादिति विज्ञायत इति। मीयते क्षीयत इत्यर्थः। जैमिनिनाऽपि तपश्च फलसिद्धत्वाल्लोकवत्। वाक्यशेषश्च तद्वदितिसूत्राभ्यामुक्तम्। चकारो या(राद्या)जमानास्तु तत्प्रधानत्वात्कर्मवदिति सूत्राद्याजमानपदं वचनलिङ्गविपरिणामेनानुषज्यते। तथा च तपश्च याजमानमिति वाक्यं भवति फलसिद्धत्वात्फलोत्पत्तिप्रतिबन्धकदुरितनिवर्तनेन फलसाधकत्वात्। लोकवल्लोकसिद्धमेतद्यः फलभोक्ता स एव तपः कर्तेति। वाक्यशेषश्च तद्वदित्यस्यार्थस्तु वाक्यशेषोऽपि लौकिकप्रमाणतुल्योऽस्ति न केवलं लौकिकप्रमाणमात्रमिति। अनेन तपसो दुःखात्मकत्वेन परिक्रीतपुरुषैरेव कर्तुमुचितं दुःखत्वादेव फलभोक्तृसंस्कारत्वाभावः। अतो न यजमानस्य युक्तमिति शङ्का परिहियते। एतत्सूत्रद्वयं तृतीयाध्यायेऽष्टमे पादे वर्तते। वाक्यशेषो यदा वै दीक्षितः कृशो भवत्यथ स मेध्यो भवतीत्यादिः। ननु पुरस्ताद्दीक्षाभ्य इत्येतावतैव दिक्षादिवसेषु अर्थान्निवृत्तौ सत्या-

मयं निषेधो व्यर्थ इति चेत्सत्यम् । तस्य दीक्षादिवसव्यतिरिक्तक्रयादिनात्प्राक्प्राय-णीयादिवसेऽपि कर्तव्यताज्ञापनार्थत्वेन वैयर्थ्याभावात् । तथा चाऽऽपस्तम्बः—अत्र राजानमाहृत्य पयसौदनेन परिवेषयन्त्याक्रयादिति । अत्रेत्यस्य द्वादशसंभारयजुर्हो-मानन्तरमित्यर्थः । आक्रयादित्यनेन दीक्षादिवसेष्वपि परिवेषणं प्रापितं तावन्मात्रमनेन निषिध्यते । सूत्रे परिवेवेष्टीत्येकवचनाद्यजमान एव न पत्नी नचर्त्विजः । प्रथमे दीक्षा-दिवसेऽपि आहारणपरिवेषणे भवत एव । तद्दीक्षासु निवर्तत इत्यनेन सूत्रान्तरप्राप्तदी-क्षादिवससंबन्धिसायंकालिकपूजनपरिवेषणमात्रनिवृत्तिः क्रियते । एतेनैकदीक्षापक्षे निषेधस्य निरवकाशत्वापत्तिः परिहृता भवति । प्रायणीयादिवसेऽपि प्रातरेव पूजन-परिवेषणे भवतो न तु सायम् । आक्रायादित्यनेन क्रयात्प्रागेव तत्कर्तव्यतायां सिद्धायां क्रयोत्तरं तन्निवृत्तेरर्थत एव सिद्धत्वात् । अत्र सक्षेदं पश्येत्यनेन राज्ञ उपस्थानं कर्तव्यम् । यथारूपमितर इत्यनेनाविनियुक्तमन्त्राणां लिङ्गानुरोधेन विनियोगः कर्तव्य इत्यस्यार्थस्य सूत्रकृता प्रदर्शितत्वात् । आपस्तम्बोक्तरीत्या विनियोगस्तु सूत्र-कृतैव ज्ञापनेन निराकरिष्यमाणत्वान्न भवति । देवयजनाध्यवसानोत्तरं वोपस्थानम् । सक्षेत्यादयः शब्दा अग्निवायुसूर्यवाचकाः । सक्षादिशब्दास्तासामेवोपस्थानमिति विद्यारण्याः ।

ब्राह्मणानार्षेयानृत्विजः षोडशैकैकशो वृणीते ।

ब्राह्मणानामेव स्मृतित आर्त्विज्ये सिद्धे पुनर्ब्राह्मणवचनमादरार्थम् । अथवा तस्माद्राजपेययाज्यार्त्विजीन इति श्रुतेः क्षत्रियस्यापि वाजपेययाजिनः प्राप्तिरत्र शङ्किता तन्निरासार्थम् । अथवा सप्तदशभ्य ऋत्विग्भ्योऽन्ये चमसाध्वर्यवस्तेषामनृत्वि नामपि ब्राह्मणानामेव चमसाध्वर्यूणां वरणविध्यर्थम् । आर्त्विज्यं त्रयाणामपि वर्णानां विद्वत्त्वाविशेषात् । याजनं ब्राह्मणस्येतिस्मृत्युक्तस्तु नियमः पुरुषार्थ इति न तदतिक्रमे क्रतुवैगुण्यमिति प्राप्ते यज्ञं व्याख्यास्याम इत्युपक्रम्य ब्राह्मणानामार्त्विज्यमिति यज्ञे सूत्रकारस्मरणं कर्त्वर्थत्वेनैव नियमबोधकम् । अत एव रामायणे—

क्षत्रियो याजको यस्य चण्डालः स विशेषतः ।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ॥ इति ।

सुरा देवताभूता ऋषय ऋत्विग्भूता इत्यर्थः । देवताया अभोक्तृत्वात्क्रतुवैगुण्य एव तात्पर्यम् ।

तथा—राजयाजकयाज्यस्य विनश्यति यथा हविः ॥

इत्यपि वचनं क्रतुवैगुण्यबोधकमेव । एतेन क्षत्रियादिवृत्त्युपजीविनोऽपि निरस्ताः । ब्राह्मणानामार्त्विज्यमित्यत्र लिङ्गान्यपि ब्राह्मणानामिदꣳ हविरित्येवमादीनि द्रष्टव्यानि ।

तस्माद्ब्राह्मणानामेवाऽऽर्त्विज्यमिति सिद्धान्तः । ब्राह्मणवचनमापद्यपि क्षत्रियादिनिवृत्त्यर्थमिति मीमांसकाः ।

द्विजोत्तमानामार्त्विज्यं न तु क्षत्रियवैश्ययोः ।
ब्राह्मणार्त्विज्यनियमः क्रत्वर्थेनापि हि स्मृतः ॥ इति मिश्राः ।

द्वादशाध्याये चतुर्थपादे जैमिनिरपि प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यादिति सूत्रेणाऽऽह । कात्यायनोऽपि ब्राह्मणा ऋत्विजो भक्षप्रतिषेधादितरयोर्दर्शनाच्चेति । तद्वै नाब्राह्मणः पिबेदग्नौ ह्यधिश्रयन्ति तस्मान्नाब्राह्मणः पिबेदिति भक्षप्रतिषेधादित्यर्थः । एवं च क्षत्रियवैश्ययोर्भागस्य होमविधानं न भक्षणमिति भक्षप्रतिषेधात्सिध्यति । द्वयोर्वै देवा अहैव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तेषां द्वेधा विभक्त एव यज्ञ आहुतय एव देवानां ब्राह्मणानाꣳ शुश्रुवुषामनूचानानामाहुतिभिरेव देवाः श्रीणीति (?) दक्षिणाभिर्मनुष्यदेवान्ब्राह्मणानिति । ब्राह्मणानामेवाऽऽर्त्विज्यमित्येतस्मिन्नर्थे दर्शनमेतत् । दक्षिणाशब्दः परिक्रयार्थे वर्तते । तेन ब्राह्मणानामेवाऽऽर्त्विज्यमिति ।

स्मृतिरपि—षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
अध्यापनं याजनं च विशुद्धाच्च प्रतिग्रहः ॥ इति ।

षण्णां कर्मणामिति निर्धारणषष्ठ्यौ । अस्य विप्रस्य । पूर्वत्र तस्यैवोपक्रान्तत्वात् । जीवनानिर्वाहेऽध्यापनयाजनप्रतिग्रहाः कर्तव्याः । जीवननिर्वाहे तु न । अकरणे प्रत्यवायो नास्तीति भावः । आर्षेया ये स्वकीयमृषिं जानन्ति । तथा च वाधूलवैखानसौ—आर्षेयान्वृणीते ये स्वानृषीञ्जानन्तीति । एतेनाप्रज्ञातबान्धवानां निवृत्तिः । शुश्रुवांसश्चाऽऽर्षेयाः । एष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवानिति श्रुतेः । ऋषयो मन्त्रद्रष्टारः । तथा च नैरुक्ताः—ऋषिर्दर्शनात्स्तोमान्ददर्शेत्यौपमन्यवस्तद्यदेनांस्तपस्यमानान्ब्रह्म स्वयंम्वभ्यानर्षत्त ऋषयोऽभवन्तदृषीणामृषित्वमिति । आदर्शमात्पुरुषादव्यवच्छिन्नमार्षं येषां त आर्षेया इत्यपि लक्षणं केचिदाचार्याः प्राहुः । शुश्रुवान्सार्थवेदत्रयाध्यायी सार्थस्वशाखामात्राध्यायी वा । ब्राह्मणानार्षेयानित्यन्येषां शास्त्रान्तरोक्तानामृत्विग्लक्षणानामुपलक्षणम् । तान्यत्र प्रदर्श्यन्ते । तत्र धर्मसूत्रम्—नाननूचानमृत्विजं वृणीते न पणमानमिति । साङ्गस्य वेदस्याध्येता प्रवक्ता वाऽनूचानः । न, अनूचानः, अननूचानः । अननूचानमृत्विजं न वृणीते । नाप्येतावद्देयमिति परिभाषमाणमित्यर्थः । द्वौ नञावनूचानवरणस्यात्यन्तावश्यकतां बोधयतः । धर्मसूत्रे वचनमौपासनहोमपार्वणस्थालीपाकवैश्वदेवादिष्वप्येतादृश एवर्त्विगितिज्ञापनार्थम् । एतेनैतेषु ऋत्विक्कर्तृकताऽपि पक्षेऽस्तीति ज्ञायते । शाङ्खायनोऽपि—आर्षेयान्यूनोऽनूचानमृत्विजो वृणीते सोमेन यक्ष्यमाणश्चतुरः सर्वान्वेति । भरद्वाजोऽपि—वसन्ते ज्योतिष्टोमेन

वक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीते युनः स्थविरान्वाऽनूचानानङ्गहीनानूर्ध्ववाच इति । आपस्तम्बोऽपि-ब्राह्मणानार्षेयानृत्विजो वृणीते युनः स्थविरान्वाऽनूचानानूर्ध्ववाचोऽनङ्गहीनानिति । युनस्तरुणान् । तेषामेव प्रकृतोपयोगात् । अत एव न जीर्द्वंश्याः(नातिवृद्धाः) । न च बालाः । त्रिंशद्वर्षेतरं षष्टिवर्षपर्यन्तं स्थविरत्वम् । एताभ्यां कर्मकरणसामर्थ्यं लक्ष्यते । बालवृद्धयोः क्रियासु पाटवं न स्यादिति युवस्थविरग्रहणम् । नाननूचानमृत्विजं वृणीत इत्यनेनैव सिद्धे पुनर्वचनम्, अनूचानो द्विविधो वेदानूचानः कर्मानूचानश्च, तत्र केवलवेदानूचानोऽशक्तेरर्थान्निषिद्धः, केवलकर्मानूचानस्य शक्तत्वात्प्राप्तिः स्यात्सा मा भूत्कि तु द्विविधानूचानत्वरहितस्यापि निषेधो यथा स्यादित्येतदर्थम् । मार्गादनपगतोऽनूचान इति भरद्वाजः । एतेनोभयविधानूचानस्यापि संग्रहः प्रदर्शितः । ऊर्ध्ववाच उरः कण्ठः शिर इतित्रिस्थानकरणसमर्था वाग्येषां त ऊर्ध्ववाचः । अनङ्गहीना अविकलाङ्गाः । आश्वलायनः—ऋत्विजो वृणीतेऽन्यूनातिरिक्ताङ्गान्ये मातृतः पितृतश्चेति यथोक्तं पुरस्ताद्यून ऋत्विजो वृणीत इत्येक इति । यथोक्तं पुरस्तादित्यनेन प्रदर्शितं सूत्रं तु ये मातृतः पितृतश्च दशपुरुषममनुष्ठितविद्यातपोभ्यां पुण्यैश्च कर्मभिर्येषामुभयतो नाब्राह्मण्यं निनेयेयुः पितृत इत्येक इति । लाट्यायनद्राह्यायणावपि—ऋत्विगार्षेयोऽनूचानः साधुचरणो वाग्म्यन्यूनाङ्गोऽनतिरिक्ताङ्ग द्वयसतोऽनतिकृष्णोऽनतिश्वेत इति । ऋतौ यजन्तीत्यृत्विजः । तथा च निरुक्तम् ऋत्विङ्नामान्युत्तराण्यष्टावृत्विक्कस्मादीरण ऋग्यष्टा भवतीति शाकपूणिऋतुयाजी भवतीति वेति । छन्दोगश्रुतौ प्रकारान्तरेणापि निर्वचनमुक्तम्—प्रजापतिरकामयत बहु स्यां प्रजायेयेति स आत्मन्यृत्व्यमपश्यत त ऋत्विजोऽसृजत यदृत्वियादसृजत तदृत्विज ऋत्विक्त्वमिति । ऋत्विग्दधृगित्यनेन ऋत्विक्शब्दो निष्पाद्यते । आर्षेयानूचानौ व्याख्यातौ । साध्विति प्रशंसायाम् । चरणशब्देन कर्म । तथा च साधुचरण इत्यस्य प्रशस्तकर्मेत्यर्थो भवति । वाग्मी वक्तुं समर्थः । संस्कृतवाक्च शब्दार्थन्यायावगतो वाचः संस्कारः । यो हि संस्कृतां वाचमुदीरयति स वाग्मी, यो बहुतरं वचनमनर्थकं न भाषते सोऽपि वाग्मी । वाचो ग्मिनिरिति ग्मिनिप्रत्ययः । यो हि बहुतरमनर्थकं भाषमाणः स न वाग्मी । स तु वाचालो वाचाट इत्युच्यते । आलजाटचौ बहुभाषिणीति पाणिनिस्मरणात् । कुत्सित इति वक्तव्यमिति वार्तिकात्कुत्सितार्थ एतौ प्रत्ययौ । यो हि पृष्टः सन्प्रतिवचनं न्यायेन ददाति मतिद्वैध उत्पन्ने संशयच्छेत्तेति निर्गलितोऽर्थः । ऊनमेव न्यूनं न्यूनान्यङ्गानि यस्य स न्यूनाङ्गः, न न्यूनाङ्गोऽन्यूनाङ्गः । अतिरिक्तमधिकमङ्गं यस्य सोऽतिरिक्ताङ्गः, नातिरिक्ताङ्गोऽनतिरिक्ताङ्गः । अङ्गानां न्यूनत्वमतिरिक्तत्वं च सामुद्रिकशास्त्रोक्तपुरुषलक्षणसिद्धम् । प्रमाणे प्रमाणे द्वयं द्वयं समं यस्य स द्वयसस्तस्मादप्यन्यूनातिरिक्ताङ्ग इत्यर्थः । प्रमाणे द्वयसज्दघ्नञ्मात्रच इति पाणिनिसूत्रात्प्रमाणेऽर्थे द्वयसच्प्रत्ययः । तस्मात्तसिः । केवलाद्वयसच्प्रत्ययात्तसिश्छान्दसः ।

नातिकृष्णोऽनतिकृष्णः। नातिश्वेतोऽनतिश्वेतः। कृष्णश्वेतशब्दौ वर्णवाचिनौ वयोवाचिनौ च नातिबालो नातिवृद्ध इति। याज्यस्यापि लक्षणमाहतुः—याज्यश्च प्रथमैस्त्रिभिर्गुणैर्व्याख्यात इति। याज्यो यष्टा यजमान इति यावत्। सोऽपि एवंलक्षणो भवति यादृग्लक्षणा ऋत्विजः। प्रथमैर्वा त्रिभिर्गुणैर्व्याख्यातो भवति लुप्तविभाषं सूत्रम्। गुणग्रहणं क्षत्रियवैश्ययोर्यथासंभवं गुणा ग्राह्या इत्येतदर्थम्। बौधायनः—अथर्त्विजां वरणं विज्ञायते ब्राह्मणा ऋत्विजो योनिगोत्रश्रुतवृत्तसंपन्ना अविगुणाङ्गा अत्रिकिणिनो न परिखाक्रान्ता नान्तगा नान्त्य(न्त)जा नाननूचाना न हालेय[वालेय]पुत्रिकापुत्रपरक्षेत्रसहोढकानीनानुजावरद्विप्रवरा आङ्गिरसोऽध्वर्युर्वासिष्ठो ब्रह्मा विश्वामित्रो होताऽयास्य उद्गाता कौषीतकः सदस्यो वसिष्ठा भृग्वङ्गिरसो वा योनिवृत्तविद्याः प्रमाणमित्येके तांश्चेद्वृणीताऽव्यापन्नाङ्गानेव वृणीताकुनखिनमध्वर्युमकिलासिनं ब्रह्माणमषण्ढं होतारमकरालमुद्गातारमशिपिविष्टं सदस्यमिति। योनिः परिशुद्धयोनिः, गोत्रं सद्वंशः, श्रुतमध्ययनं, वृत्तमाचारः। एतैः संपन्ना युक्ताः। अविगुणाङ्गा अविकलाङ्गाः। अत्रिकिणिनः, त्रयः किणा येषां सन्ति ते त्रिकिणिनस्तद्भिन्नाः। किणा आघातादिना जातानि देहगतचिह्नानि। अत्रत्यत्रिकिणशब्देन मल्लयुद्धसंनाहार्थास्फोटनज्याघातभारादिवहनैरुत्पन्नाः किणा विवक्षिताः। एतादृशकिणमध्य एकेनापि किणेन युक्ता न भवेयुरित्यर्थः। इदमुपलक्षणम्। अविहितकार्येषु भूयोभ्यासजनितचिह्नयुक्ता अपि न भवेयुरिति बोध्यम्। न परिखातिक्रान्ताः, परिखा मर्यादा समुद्रवेला तामतिक्रान्ताः समुद्रयायिनो न भवेयुरित्यर्थः। नान्तगाः, अन्तं प्रत्यन्तं देशं म्लेच्छदेशमिति यावत्। तं गच्छन्तीत्यन्तगाः, ते न भवेयुरित्यर्थः। अन्तमन्तवर्णं गच्छन्ति शूद्रस्त्रियं गच्छन्तीति यावत्। तेऽपि न भवेयुः। अन्तमित्युपलक्षणम्, अगम्यां स्त्रियं ये गच्छन्ति तेऽपि न भवेयुरिति। नान्तजा अन्तजाः पूर्वोक्तदेशजातास्ते न भवेयुरित्यर्थः। ये शूद्रस्त्रियामुत्पन्नास्तेऽपि न भवेयुः। नाननूचाना अननूचाना अश्रोत्रियास्ते न वरणीयाः। हलेन कृषिं कृत्वा ये जीवन्ति ते हालेयाः। वालमूर्णाप्रकीर्णकादिकं विक्रीय ये जीवन्ति ते वालेयाः।

कन्यादानसमये—अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति।

इत्यभिसंधानेन दत्तायां पुत्रिकायां जाताः पुत्रिकापुत्राः। परक्षेत्रे जारेणोत्पन्नाः परक्षेत्राः। विवाहसमय एव मात्रा सह गर्भस्थः सन्नेव दत्तः सहोढः। कन्यायामविवाहितायामेव जातः कानीनः। अनुजस्य गुणभूतो ज्येष्ठ आनुजावरः। एकस्मिन्गोत्र उत्पन्नोऽपरस्मिन्गोत्रे दत्तो द्विप्रवरः। एतान्हालेयादीन्ऋत्विक्त्वेन न वृणीतेत्यर्थः। वसिष्ठा भृग्वङ्गिरसो वेत्ययं पक्षस्तत्तद्गोत्रविशिष्टर्त्विगभावे द्रष्टव्यः। यद्यन्मुख्यानां गोत्रं तदेव तत्तद्गणस्थानां पुरुषाणां त्रयाणां त्रयाणाम्। इदं च मुख्यानां गोत्रनियमपक्षे। योनिः परिशुद्धयोनिः। वृत्तमाचारः। विद्या वैदिकविद्या च प्रमाणं वरणयो-

ग्यताप्रयोजकमित्येक आचार्या वदन्तीत्यर्थः । चकारः कर्मकौशल्यसंग्रहार्थः । तान्यो-निवृत्तविद्याकर्मकौशल्यसंपन्नान्यदि वृणीत तदाऽव्यापन्नाङ्गानेव वृणीतेत्यर्थः । योन्या-दिग्रहणं नागोत्रनियम इतिज्ञापनार्थम् । कुनखी कुत्सिता ये नखास्तद्वान् , तद्भिन्नोऽ-कुनखी । किलासः कुष्ठविशेषस्तद्वान् , तद्भिन्नोऽकिलासी । षण्डो नपुंसकस्तद्भिन्नः । कराळो घर्घरस्वरो विकरालमुखश्च तद्भिन्नोऽकरालः । शिपिविष्टो रोगविशेषः । अध्वर्यादीनामकुनखित्वादिप्रदर्शनमत्यन्तापत्तावपि एतद्दोषविशिष्टाः सर्वथैव तत्तद्वृत्वि-ग्विषये परित्याज्या एवेतिदोषाधिक्यज्ञापनार्थम् । कुनखेत्युपलक्षणं क्षतर(स)हित-हस्तत्वस्य ।

स्मृत्यन्तरे—रजस्वलायां भार्यायामार्त्विज्यं श्राद्धभोजनम् ।
यात्रामम्बुनिधिस्नानं वर्जयेत्तत्पतिः सदा ॥ इति ।
गर्गोऽपि—क्षुरकर्म तथाऽऽर्त्विज्यं यात्रामभ्यङ्गमेव च ।
देवतार्चां परगृहे सागरस्नानमेव च ॥
श्राद्धभुक्तिं वर्जयेच्च यदि पत्नी रजस्वला । इति ।
शाट्यायनिः—रजस्वलापतिर्यात्रामार्त्विज्यं श्राद्धभोजनम् ।
सिन्धुस्नानं तथाऽभ्यङ्गं क्षुरकर्म विवर्जयेत् ॥ इति ।
स्मृत्यन्तरेऽपि—रजस्वलाऽङ्गना यस्य गर्भिणी वा यदा भवेत् ।
न यज्ञे वरणे योग्यो गालवो मुनिरब्रवीत् ॥ इति ।
यज्ञग्रहणमाधानादिश्रौतकर्मणां गार्ह्यस्मार्तकर्मणां चोपलक्षणम् ।
देवलः—महागुरुनिपाते तु काम्यं किंचिन्न वा(चाऽऽ)चरेत् ।
आर्त्विज्यं ब्रह्मचर्यं च श्राद्धं देवक्रियां तथा ॥ इति ।
एतत्सापिण्डनात्प्रागिति केचित् । तदुत्तरमपीत्यन्ये ।
संग्रहे—तैलङ्गकर्णाटकलिङ्गवङ्गसंबन्धिनो माथुरियाश्च विप्राः ।
श्राद्धे विवाहे खलु यज्ञपाके न पूजनीया अपि शंभुतुल्याः ॥ इति ।
अत्र मूलं चिन्त्यम् ।
यत्तु कौर्मे—नैकगोत्रे हविर्दद्याद्यथा कन्या तथा हविः ।
इति तच्छ्राद्धप्रकरणपठितत्वात्तद्विषयमेवेति स्मृतिव्याख्यातारः । बौधायनः—
सर्वोऽप्यृत्विगहतं वासः परिधाय शुचिः पूतो मेध्यो विपाप्मा ब्रह्मचारी सहकारिप्र-त्यय आचतुर्थादभिसमीक्षमाण इति ।
संग्रहे—युक्ताः सदाचाररता वेदवेदाङ्गपारगाः ।
दम्भासूयादिरहिताश्छद्मपाखण्डवर्जिताः ॥

---

१ ब. पाकयज्ञे ।

शान्ता दान्ता अनूचाना आर्षेया वाग्मिनस्तथा ।
अनङ्गहीना धर्मिष्ठाः साधवः सत्यवादिनः ॥
ब्रह्मचर्ययुताः स्नाताः कुशलाः सर्वकर्मसु ।
ईक्षमाणा आचतुर्थं कर्माण्यहतवाससः ॥
शुचयो ब्राह्मणाः पूता ऋत्विजः कर्मसु स्मृताः । इति ।

ऋतौ विहितकाले यजन्ति यागानुकूलव्यापारं कुर्वन्तीति ऋत्विक्शब्दार्थः । यागस्य द्रव्यत्यागरूपस्य यजमानकर्तृकत्वादिति ध्येयम् । तत्रर्त्विक्शब्दप्रवृत्तौ वरणमात्रं न निमित्तं चमसाध्वर्युष्वतिप्रसङ्गात् । नचैवं सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदशार्त्विज इति सप्तदशसंख्याविरोधोऽपि नात्रास्ति नच सप्तदशार्त्विज इति वचनं दर्शपूर्णमासयोश्चत्वारश्चातुर्मास्यानां पञ्च पशुबन्धस्य षट्सौम्यस्याध्वरस्यार्त्विजामेकदेशसंख्यैव सप्तदशत्वात्मिकेति स्तोतुमवयुत्यानुवादः । तथा च वरणमात्रं निमित्तमादाय चमसाध्वर्युष्वप्यृत्विक्त्वमस्तिवति वाच्यम् । महासंख्योपादानं यत्र यत्र तत्रैवावयुत्यानुवाद इत्यस्य नियमस्यैकं वृणीते द्वौ वृणीते त्रीन्वृणीत इत्यादिषु सर्वेषु सत्वेव (?) प्रकृते महासंख्यानुपादाने त्वेकदेशसंख्यात्वस्यैवाप्रतीतेरवयुत्यानुवादत्व इत्यस्य वक्तुमशक्यत्वात् । तथा च सिद्धं वरणमात्रं न निमित्तमिति । तर्हि किमिति चेदिति उच्यते तस्यैवाभावात्तदपि वक्तुमशक्यम् । नच भक्षयतःकारिणां चमसाध्वर्यव इति समाख्यया चमसाध्वर्यूणां तत्तद्दत्विग्वरणीयतया यजमानकर्तृकवरणाभावाद्ब्रह्मादिष्वनुवृत्तं चमसाध्वर्युभ्यो निवृत्तं यजमानकर्तृकवरणत्वमेवास्तिवति वाच्यम् । तत्तद्दत्विक्संबन्धिपदार्थकरणमात्रेण समाख्योपपत्त्या तेषामपि यजमानकर्तृकवरणसत्त्वेन वरणस्य च कुत्राप्यृत्विक्कर्तृकताया अदर्शनेन च चमसाध्वर्युव्यावृत्तत्वाभावात् । तर्हीतोऽन्यत्किमिति साङ्गप्रसिद्धभाषया भीषयसि नाहं बिभेमि ब्रह्मादिगतवरणविशेषलाभात् । स च चमसाध्वर्युवरणकरणकमन्त्रगतलिङ्गबलात्कल्प्यः । तच्च लिङ्गं रश्मिपदमेवेत्यग्रे वक्ष्यते । इदमेवामुख्यमृत्विक्त्वमित्यप्यग्रे वक्ष्यते । ब्रह्मादिष्वनुवृत्तं चमसाध्वर्युभ्यो निवृत्तं वरणावान्तरसामान्यम् । ऋतुयजनमपि ब्रह्मादिगतमेवार्त्विक्शब्दस्य निमित्तं दृतिहरशब्दस्येव पशुगतं दृतिहर्तृत्वम् । एवं च प्रसिद्धावयवत्वात्संख्याश्रुतेश्चर्तुयजनविशेषनिमित्तक एवर्त्विक्शब्दः । एवं च प्रसिद्धावयवशक्तित्यागः, अदृष्टशक्त्यन्तरकल्पनाप्रसङ्गः, ऋत्विग्दधृगितिकर्तरिक्विन्नन्तनिपातनशास्त्रविरोधः, ऋत्विग्यज्ञक्रदुच्यत इतिस्मृतिविरोधश्च न भवति । सप्तदशत्वश्रुतिश्चोपपादिता भवति । वरणविधिश्चैवं प्रसिद्धपदार्थको भवति । यावदुक्तं भवति याजकान्वृणीत इति तावदृत्विजो वृणीत इति । तेन नाप्रसिद्धपदार्थकत्वम् । वरणनिमित्तकत्वे तु यूपादिवद-

---

१ च. °ति च ।

प्रसिद्धपदार्थकत्वं वचनव्यक्तिविपर्यासश्चैवं स्यात्। नचैतन्न्याय्यम्। अध्वर्यादिशब्दानां तु प्रसिद्ध्यभावाद्य एवाध्यवसायादेव होतृत्वाध्वर्युत्वादिभिः क्रतुस्वामिपरिकल्पितास्त एव होत्रध्वर्यादय इति। तस्मात्प्रसिद्धावयवत्वात्संख्याश्रुतेश्चर्तुयजनविशेषनिमित्तक एवर्त्विक्शब्द इति। एवं च चमसाध्वर्युष्वतिप्रसङ्ग इत्येतद्वारितं भवति। विस्तरस्त्वाकरे द्रष्टव्यः। एतत्सर्वमाह तृतीयाध्याये सप्तमे पादे जैमिनिः—कर्मकार्यात्सर्वेषामृत्विक्त्वमविशेषादिति न परिसंख्यानादिति च। यद्यप्यध्वर्युसूत्रार्थस्तु अविशेषात्, न विद्यते विशेषो यत्र तदविशेषं तस्मात्। इदं च कर्मकार्यादित्येतस्य विशेषणम्। कर्मकार्यात्कर्मकरस्य भावः कर्मकार्यं तस्मात्कर्मकर्तृत्वात्। अविशेषात्तुल्यात्कर्मकार्यात्सर्वेषां चमसाध्वर्युसहितानामृत्विक्त्वमिति पूर्वसूत्रार्थः। न चमसाध्वर्युष्वृत्विक्त्वं ब्रह्मादिगतर्त्विक्त्ववन्नास्ति सप्तदशसंख्यापरिसंख्यानादिति उत्तरसूत्रार्थः। उद्गीथमुद्गायतीत्युद्गाता, इत्याद्याः कर्मनिमित्ताः संज्ञाः। ब्रह्मादिषु तु कर्मणो बृंहणात्, अवेक्षणेन बन्धनान्नियमादिति यावत्। स ब्रह्मेत्यादिव्युत्पत्त्या ब्रह्मादयोऽपि होताऽध्वरं युनक्तीध्वर्युः, अग्निर्देवानावहति अग्निमग्न आवह सोममावहेत्येवमग्निना देवानावाहयतीति, अध्वरं युनक्तीत्यत्र कर्त्रन्तरसद्भावे सति यावद्भिर्यत्र प्रयोगकार्यं निर्वर्त्यते तत्र तावन्त इति कार्यतः कर्तॄणां परिमाणं स्यात्, न त्वेतावन्त इति नियमो विशेषानवगमादिति सूत्रार्थः। वरणकाले कर्मनिमित्तत्वासंभवेन वरणनिमित्तत्वमेव वक्तव्यम्। नह्येकस्मिन्पुरुषे बहूनि वरणानि समवयन्ति दृष्टार्थत्वात्। नहि वृतस्य वरणं दृष्टार्थम्। तेन वरणानां तन्निमित्तानां च संज्ञानामसंकीर्णविषयत्वाद्यावद्वरणं यावत्संज्ञं च कर्तृभेदः कर्माङ्गम्। एतत्सर्वं तृतीयाध्याये सप्तमे पादे जैमिनिराह तत्रार्थात्कर्तृपरिमाणं स्यादनियमोऽविशेषादिति। अतस्तावत्संख्यैः कर्तृभिर्ज्योतिष्टोमनिर्वृत्तिः। एतेनैकस्यैव पुंसः पाचकलावकवत्कर्म कुर्वतः संज्ञेति निरस्तं प्रवृत्तिसमये तदुत्तरकालं चैतासां संज्ञानां श्रवणाभावात्। वरणं ह्यप्रवृत्ताभ्यर्थनं तच्च सत्रेऽर्थलोपान्निवर्तते। वरणाभावेऽपि अध्वर्युर्गृहपतिं दीक्षयित्वेत्यादिव्यवहारस्तु दृश्यते। स च संकल्पनिमित्तत्वस्वीकारं विनाऽनुपपन्न एवेत्यवश्यं संकल्पनिमित्तत्वं स्वीकार्यमेव। प्रकृतावपि हि संकल्पो निमित्तमेव। यो हि म्रियमाणो नेच्छति न स होत्रध्वर्यादिर्भवति। तस्मात्प्रकृतौ वरणविधानात्तन्मिश्रः संकल्प एव निमित्तम्। सत्रेषु तु संकल्पमात्रं तत्राध्वर्यादिशब्दप्रयोगदर्शनात्। नचैवं वैरूप्यादशोभनमिति मन्तव्यम्। प्रमाणबलादीदृशस्यैव शोभनत्वात्। नहि सत्रे होत्रध्वर्यादिशब्दानां गौणत्वे किंचित्प्रमाणमस्ति। अथाप्यत्यन्तमैकरूप्येण माभ्यमित्याग्रहस्ततः संकल्प एव निमित्तं य एव क्रतुप्रक्रमे तदौपयिकं होत्रध्वर्यादिभावमात्मनः संकल्पयति स एष होत्रध्वर्या-

---

१ क. °यमनादि°।

दिशब्दैरुच्यते । तथा च वक्ष्यति कर्मकार्यात्सर्वेषामृत्विक्त्वमित्यधिकरणे वार्तिककारः सत्रेषु स्वयंकर्तृकत्वाद्वरणभरणयोरनपेक्षितयोरग्रहणाद्विनैव ताभ्यामवैगुण्यमिति । तत्र योग्यतामात्रेण होतृत्वाध्वर्युत्वादिसिद्धिः । तत्र जैमिनिसूत्राणां मध्ये पूर्वसूत्रमर्थात्कर्तृपरिमाणं स्यादनियमोऽविशेषादिति कृतं मध्ये कानिचिदन्यानि सूत्राणि कृत्वाऽनन्तरं कर्मकार्यात्सर्वेषामृत्विक्त्वमविशेषादिति सूत्रं कृतम् । अत्रार्त्विक्शब्दो मुख्यार्त्विक्पर एव । षोडशानामेवाग्रिमसूत्रे परिगणनात् । पक्षे सप्तदशस्य सदस्यस्यापि परिगणनेन तस्यापि मुख्यार्त्विक्त्वात्तत्परोऽपि । नच चमसाध्वर्यूणामपि समन्त्रकवरणसत्त्वान्मुख्यमेवार्त्विक्त्वमस्त्विति वाच्यम् । चमसाध्वर्यूणां नित्योपयुक्तत्वेन तत्सहितानामेव संख्यया ग्रहणे कर्तव्ये षोडशसंख्योपादानस्य विरुद्धत्वापत्तेः । एवं पाक्षिकसप्तदशसंख्योपादानस्यापि । अत एव प्रसिद्धावयवत्वात्संख्याश्रुतेश्चर्तुयजनविशेषनिमित्तक एवर्त्विक्शब्द इति मीमांसकैः सिद्धान्तितम् । समन्त्रकं वरणं तु पूर्ववरणाभावेऽपि वाचनिकमदृष्टार्थम् । स्वतन्त्रवरणस्य विहितत्वादिदमप्यवगम्यत ऋत्विग्भ्यो भिन्ना एव चमसाध्वर्यव इति । तथा च तृतीयाध्याये सप्तमे पादे जैमिनिः—चमसाध्वर्यवश्च तैर्व्यपदेशादिति । चमसाध्वर्यवश्च भिन्ना मध्यतःकारिणां चमसाध्वर्यवो होत्रकाणां चमसाध्वर्यव इत्यृत्विग्भिः सह भेदव्यपदेशादिति सूत्रार्थः । मन्त्रलिङ्गादध्वर्वङ्गत्वमेतेषां यथाऽऽदित्यो मुख्यो रश्मयोऽङ्गीभूतास्तथा चमसाध्वर्यवोऽध्वर्वङ्गभूता इति । अध्वर्युणा केवलेनैकदा सर्वचमसहोमस्य कर्तुमशक्यत्वात्तच्छेषत्वेन वरणमेतेषाम् । अत एव चमसाध्वर्यव इति संज्ञा । अत एव च होत्रध्वर्वादिगतो विशेषो यः स तत्र नास्तीति कल्पितम् । अत एव च गौणमृत्विक्त्वम् । एतेषां संख्यां तु वक्ष्यति सूत्रकार एव सर्वेषां प्रतिपुरुषं चमसाध्वर्यव इति । तृतीयाध्याये सप्तमे पादे जैमिनिरपि—उत्पत्तौ तु बहुत्वश्रुतेरिति । चमसाध्वर्यून्वृणीत इत्युत्पत्तौ बहुत्वे श्रुते बहव एव चमसाध्वर्यव इत्यर्थः । दशत्वं लिङ्गदर्शनादिति च । स्थिते बहुत्वे कियन्तो बहव इत्यनियमे त्रित्वे वा प्राप्ते चमसदशत्वाद्दशभिस्तावद्भवितव्यम् । आधिक्ये प्रमाणाभावाद्दशैवेति । नचैकेन पुंसा हस्तद्वयेन द्वयोश्चमसयोर्होतुं शक्यत्वात्कथं चमसदशत्वेऽपि चमसाध्वर्यूणां दशत्वमिति वाच्यम् । मा हौषीदेक एव द्वाभ्यां हस्ताभ्यां द्वौ चमसाविति शाखान्तरे निषेधेन दक्षिणाचारेण कर्तव्यमिति नियमेन च हस्तद्वयेन होमायोगादिति भावः । दशपेये ज्योतिष्टोमविकृतिभूते दश दशैकैकं चमसमनुप्रसर्पन्तीति विधिशेषे दश चमसाध्वर्यव इति दशत्वानुवादरूपलिङ्गदर्शनात्प्रकृतौ दशत्वं भवतीत्यर्थः । नच गौणमप्यृत्विक्त्वं चमसाध्वर्यूणां माऽस्त्विति वाच्यम् । सर्वथर्त्विक्त्वाभावे समन्त्रकवरणानुपपत्तेस्तद्विना चमसयागकर्तृत्वासंभवात्, अतश्चर्त्विग्लाभार्थं तत्त्वस्यावश्यमङ्गीकरणीयत्वाच्च । इदं ज्ञापयितुमेवार्त्विग्ग्रहणं कृतं सूत्रकृता । मुख्यार्त्विक्त्वाभावाज्ज्ञापाभिप्रवृजनादितानूनप्त्रादिकं च परं तेषां न भवति ।

मन्त्रयं नियमो ये समन्त्रकं वृतास्त एव मुख्या ऋत्विज इति । दर्शपूर्णमासादिषु तदभावापत्तेः । इष्टापत्तौ तु मुख्ययागकर्तृत्वानुपपत्तिः । अत इदं सिद्धं भवति चमसाध्वर्युषु मुख्यमृत्विक्त्वं नास्त्येवेति । षोडशवचनं सदस्यव्यावृत्त्यर्थं चतुर्णां वरणपक्षेऽपि अमन्त्रकवरणवत्त्वव्यृत्विक्त्वं तुल्यमेवेतिप्रदर्शनार्थं वा । तेनामन्त्रकवरणवतामपि व्रतचर्या भवत्येव सर्वत्रेति सिद्धं भवति । एकैकश इति वचनं समुदायेन वरणं व्यावर्तयितुम् । इदं वरणं लौकिकं भिन्नमेव । अग्रे पुनर्वृणीत इतिवचनोपादानात् । अत एवैकैकश इति वचनमपि संगतं भवति । अन्यथा समन्त्रकवरणे मन्त्रभेदादेवैतस्यार्थस्य सिद्धावेकैकश इतिवचनस्य वैयर्थ्यापत्तेः । होत्रकवरणे प्रतिप्रस्थात्रादिवरणे च तत्तद्दक्षिणाम्नां तत्तन्मन्त्रेष्वनिर्देशात्समन्त्रकवरणेन केवलेनैतस्य मैत्रावरुण इति नाम, एतस्य ब्राह्मणाच्छंसीत्यादेर्मन्त्रेभ्यो ज्ञातुमशक्यत्वेन निर्वाहासंभवादमन्त्रकवरणमावश्यकमेव । इदमप्येतेन ज्ञातं भवति सर्वान्यजमानगृहं प्रति सोमप्रवाक आनीय तत्राऽऽमन्त्रणं कुर्यादिति । इदं च प्रथमं वरणं सर्वेषां समानमेव । द्वितीयं समन्त्रकं वरणं तु चतुर्णां वरणपक्षे चतुर्णामेव । महर्त्विग्व्यतिरिक्तानां तु पूर्वेणैव वरणेन सिद्धिः । होत्रादीनां द्वितीयं लौकिकवरणं तु मन्त्रसंस्कारार्थमपेक्षत एवेति द्रष्टव्यम् ।

होता मैत्रावरुणोऽच्छावाको ग्रावस्तुच्च होतारोऽ-
ध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता चाध्वर्यवो ब्रह्मा
ब्राह्मणाच्छंस्याग्नीध्रः पोता च ब्रह्माण उद्गाता
प्रस्तोता प्रतिहर्ता सुब्रह्मण्यश्चोद्गातारः ।

होतार इति मैत्रावरुणाच्छावाकग्रावस्तुत्स्वपि होतृसंज्ञासिध्द्यर्थं, फलं त्वदप्रतिरथं द्वितीयो होतेत्यत्र मैत्रावरुणस्य होतृग्रहणेन ग्रहणम् । सर्वेषां समन्त्रकवरणपक्षे ग्रावस्तुद्वरणे होतृवरणमन्त्रप्रवृत्तिश्च । अध्वर्यव इति प्रतिप्रस्थातृनेष्टृन्नेतृष्वपि अध्वर्युसंज्ञासिध्द्यर्थं, फलं तामध्वर्यव उद्गृह्णन्ति चतुरोऽध्वर्यून्भोजयेदित्यादिषु प्रतिप्रस्थातृनेष्टृन्नेतॄणां ग्रहणम् । प्रतिप्रस्थात्रुन्नेतृवरणेऽध्वर्युवरणमन्त्रप्रवृत्तिश्च । उद्गातार इति प्रस्तोतृप्रतिहर्तृसुब्रह्मण्येष्वपि उद्गातृसंज्ञासिद्ध्यर्थम् । फलं प्राञ्चमुद्गातारो द्रोणकलशं ग्रावस्वध्यूहन्त्यधोक्षमुपकर्षन्तीत्यादिषु प्रस्तोतृप्रतिहर्त्रोर्ग्रहणम् । प्रस्तोतृप्रतिहर्तृसुब्रह्मण्यवरण उद्गातृमन्त्रप्रवृत्तिश्च । सर्वकर्तव्यताऽपि पदार्थानुष्ठाने गणक्रम एव भवति न मुख्याश्चत्वार आदौ ततोऽर्धिनश्चत्वारस्ततस्तृतीयिनश्चत्वारस्ततः पादिनश्चत्वार इत्येवं क्रमो भवति । होतारोऽध्वर्यवो ब्रह्माण उद्गातार इतिसंज्ञाचतुष्टयकरणसाधारणं प्रयोजनं द्रष्टव्यम् । एतेनानुक्रमणेनेयत्ताऽप्यवधृता । चमसाध्वर्यूणामृत्विक्त्वमप्येतेन वारितं भवति । षोडशर्त्विजः क इत्याकाङ्क्षाऽप्येतेन पूर्यते । तृतीयाध्याये सप्तमे पादे जैमिनिरपि नियमस्तु दक्षिणाभिः श्रुतिसंयोगादिति । ऋत्विग्भ्यो दक्षिणां ददात्यग्नीचे

१ च. °नां लौ°। २ च. यदि प्र°।

ददाति ब्रह्मणे ददातीत्येवं दक्षिणाभिः सहाऽऽज्ञानेऽग्नीध ऋत्विजे ददाति ब्रह्मण ऋत्विज इत्यादिपर्यवसानात्सामानाधिकरण्यलक्षणो य ऋत्विक्शब्दरूपश्रुतिसंयोगस्तस्मादग्नीत्प्रभृतीनामेवर्त्विक्त्वमिति नियमः स्यादिति सूत्रार्थः।

सदस्यः सप्तदशः।

सप्तदशवचनमेतस्यापि होत्रादिवन्मुख्यमेवर्त्विक्त्वं न तु चमसाध्वर्युवन्मुख्यर्त्विक्त्वाभाव इतिप्रदर्शनार्थम्। समन्त्रकवरणविधायके सूत्र उद्गातृवरणोत्तरं सदस्यवरणस्य विहितत्वात्तत्क्रमेणैव वरणं न तु षोडशर्त्विग्वरणोत्तरम्। सदस्यं महर्त्विजं पञ्चमं कौषीतकिनः समामनन्तीति भरद्वाजः। ब्राह्मणानार्षेयानृत्विजः सप्तदशैकैकशो वृणीत इत्येतावतैव सदस्यसंग्रहे सिद्धे पृथक्सूत्रकरणमनित्यत्वमेतस्य ज्ञापयितुम्। उक्तं चैतदापस्तम्बाश्वलायनाभ्याम्—सदस्यं सप्तदशं कौषीतकिनः समामनन्तीति। सदस्यप्रयोजनमाहतुस्तावेव स कर्मणामुपद्रष्टा भवतीति। उपद्रष्टृत्वं साध्वसाध्वनुसंधातृत्वम्। आश्वलायनः सदस्यं सप्तदशं कौषीतकिनः समामनन्तीत्युक्त्वैतस्मिन्नर्थे प्रमाणीभूतां श्रुतिमुदाजहार तदुक्तमृग्भ्यां यमृत्विजो बहुधा कल्पयन्त इति। सदस्यसत्त्वे स्वशाखायामप्यस्ति लिङ्गं सदस्या ऋतवोऽभवन्निति। अत्र बहुवचनमृतुबहुत्वानुसारेण। बौधायनोक्तं सदस्यचतुष्ट्वं तु नाभिमतमाचार्यस्य। सदस्यः सप्तदशः प्रसदस्यस्येत्येकस्यैव प्रदर्शनात्, ध्रुवगोपनार्थं राजपुत्रस्य स्वतन्त्रतया विधानाल्लिङ्गाच्च।

अथर्त्विजो वृणीते।

मन्त्रैरिति शेषः। अथशब्दः सर्वर्त्विग्लौकिकवरणानन्तर्यार्थः। तेन होतुर्लौकिकं वरणं कृत्वा तस्यैव समन्त्रकं वरणमनन्तरमेव कर्तव्यम्। एवमध्वर्य्वादीनामित्येवंरूपः पदार्थानुसमयोऽत्र न भवति किंतु काण्डानुसमय एवेति सिद्धं भवति। मुख्यत्वद्योतनार्थश्च। तेन पितृभूतमनुष्यभूतर्त्विक्ष्वपि प्रतिऋतु समन्त्रकं वरणं भवत्येव मन्त्रसंस्कारलाभायेत्यपि सिद्धं भवति। मनुष्यभूतपितृभूतदेवभूतत्वभेदेन त्रैविध्यमृत्विजां शाट्यायनिनोक्तम्—स्वेनैव कर्मणि कर्मणि वृता ये ते मनुष्यभूताः पित्रादिभिर्वृतास्त एव स्वेनैवाङ्गीकृता ये ते पितृभूताः स्वेनैव यावज्जीवकमर्थं वृता ये ते देवभूता इति। एवं स्वरूपमपि तेनैवोक्तम्। अत्रर्त्विक्शब्दो गौणमुख्यसाधारण एवेत्यवश्यं स्वीकर्तव्यम्। अन्यथा तेषां व्रतचर्याभावः समन्त्रकवरणानुपपत्तिश्च स्यात्। मुख्यमृत्विक्त्वं तु षोडशसप्तदशान्यतरसंख्योपादानस्य विरुद्धत्वापत्तेर्नाङ्गीकर्तुं शक्यमित्युक्तमेव प्राक्। पूर्ववरणं लौकिकम्। इदं समन्त्रकं मन्त्रजन्यादृष्टसंस्कारसिध्यर्थम्। लौकिकसमन्त्रकवरणयोः क्रमस्तु भिन्नो भिन्न एव। होता मैत्रावरुणोऽच्छावाको ग्रावस्तुदित्यारभ्य सदस्यः सप्तदश इत्यन्तेन सूत्रेणोक्तो लौकिके वरणे क्रमः। मन्त्रक्रमानुरोधेन समन्त्रकवरणे क्रम इति द्रष्टव्यम्।

अग्निर्देवो दैव्यो होता स मे होताऽस्त्वित्युपाꣳशु दैव्यꣳ
होतारं वृणीतेऽसौ मानुषस्तꣳ होतारं वृण इत्युच्चैर्मानुषम्।

दैव्यं देवसंबन्धिनं, मानुषं मनुष्यसंबन्धिनम्। असाविति यः शब्दस्तस्य स्थाने होतुः पित्रादिभिर्व्यवहाराय नाम कृतं तद्गृह्णाति। तच्च शर्मान्तं शर्मान्तं ब्राह्मणस्येति बौधायनोक्तेः शर्मान्तं ब्राह्मणस्य येन व्यवह्रियत इति वासिष्ठसूत्राच्च। येन व्यवह्रियत इति नाक्षत्रादिनाम्नां शर्मान्तताया व्यावृत्त्यर्थम्। वरणं नाम संमाननाभ्यर्थनपूर्वकं स्वकर्तव्यकर्मणि आर्त्विज्यकरणानुकूलप्रवृत्तिसंपादनं, तत्र समन्त्रकत्वं संस्कारविशेषार्थम्। अग्निर्देवो दैव्यो होता स मे होताऽस्त्विति दैव्यहोतृवरणमन्त्रः। असौ मानुषस्तꣳ होतारं वृण इति मानुषहोतृवरणमन्त्रः। लिङ्गादेव दैव्यहोतृवरणार्थत्वे पूर्वमन्त्रस्य सेत्स्यति सति पुनर्वचनं हेतुप्रदर्शनार्थं यतो दैव्यो होताऽत उपांशु वृणीत इति। एवमुच्चैर्मानुषमित्यत्रापि। यद्यप्युपांशुशब्दस्य दैव्यहोतृवरणेऽन्वयः प्रतीयते तथाऽपि उपांशुशब्दस्य स्वरपरत्वात्तस्य च मन्त्रधर्मत्वाद्वरणरूपक्रियायामन्वयासंभवेन वरणरूपक्रियाकरणीभूते मन्त्रेऽन्वयो ज्ञेयः। तथा चैवं वाक्यं भवति अग्निर्देव इति मन्त्रमुपांशूक्त्वा दैव्यं होतारं वृणीत इति। एवमुत्तरत्रापि।

एवमितरेषूपाꣳशु दैव्यं वृणीत उच्चैर्मानुषम्।

एवमितरेष्वित्येतावतैव दैव्यमानुषवरणसिद्धौ दैव्यं वृणीते मानुषमिति पुनर्वचनं दर्शपूर्णमासादिष्वमन्त्रकवरणेऽयमेव दैव्योऽग्निर्होता मानुषश्चेत्यभिध्यानपूर्वकत्वमावश्यकमितिज्ञापनार्थम्। एवमितरेषु दैव्यं वृणीते मानुषं चेत्येतावत्युच्यमान उपांशुत्वोच्चैष्ट्वयोर्निवृत्तिः स्यात्तां वारयितुं तयोर्वचनम्। इतरेषु अध्वर्य्वादिषु ऋत्विक्षु।

आदित्यो देवो दैव्योऽध्वर्युः स मेऽध्वर्युरस्त्वसौ मानुषस्तमध्वर्युं वृण इत्यध्वर्युं चन्द्रमा देवो दैव्यो ब्रह्मा स मे ब्रह्माऽस्त्वसौ मानुषस्तं ब्रह्माणं वृण इति ब्रह्माणं पर्जन्यो देवो दैव्य उद्गाता स म उद्गाताऽस्त्वसौ मानुषस्तमुद्गातारं वृण इत्युद्गातारमाकाशो देवो दैव्यः सदस्यः स मे सदस्योऽस्त्वसौ मानुषस्तꣳ सदस्यं वृण इति सदस्यमापो देवीर्दैव्या होत्राशꣳसिन्यस्ता मे होत्राशꣳसिन्यः सन्त्वमी मानुषास्तान्होत्राशꣳसिनीर्वृण इति होत्रकान्रश्मयो देवा दैव्याश्चमसाध्वर्यवस्ते मे चमसाध्वर्यवः सन्त्वमी मानुषास्तान्चमसाध्वर्यून्वृण इति चमसाध्वर्यून् ॥ १ ॥

मन्त्रेषु तं वृण इति परोक्षनिर्देशाल्लिङ्गाद्वरणं किंचिद्वारकं न साक्षादिति गम्यते। स चोपस्थितत्वात्सोमप्रवाक एवेत्यभिप्रायेण भाष्यकारेण तदनुयायिभिः प्रयोगकारैश्च

सोमप्रवाकद्वारा वरणमुक्तं तद्दानवाचनान्वारम्भणवरवरणव्रतप्रमाणेषु यजमानं प्रतीयादितिकात्यायनसूत्रविरोधादुपेक्ष्यम्। नचैवं मन्त्रगतस्तच्छब्देन परोक्षनिर्देशोऽसंगतः स्यादिति वाच्यम्। तच्छब्देन दैव्यं होतारमग्निं परामृश्य युष्मच्छब्दार्थे मनस्यनुसंधाय तच्छब्दार्थयुष्मच्छब्दार्थयोरभेदेन तं दैव्यं होतारमग्निं त्वामेवाहं वृण इत्येतादृशार्थसिद्धावसंगतत्वपरिहारसंभवात्। एवं च कात्यायनसूत्रविरोधः परिहृतो भवति। अदःशब्दस्तु तत्तन्नामग्रहणार्थं प्रयुक्तः। विहितं चासाविति नाम गृह्णातीत्यावेदनप्रकरणस्थेन सूत्रेणादःशब्दस्थाने नामग्रहणम्। होत्रध्वर्युब्रह्मोद्गातृशब्दार्थः प्रागेव दर्शितः। सदसि भवः सदस्यः। अत्र भवनं सत्ता विद्यमानत्वमिति यावत्। योगरूढं पदम्। दिगादित्वाद्यत्प्रत्ययः। अनेन सदस्यशब्देन सदस्येवैतस्योपवेशनमिति बोध्यते। अथ वा सदसि साधुस्तस्यै हितो वा सदस्य इति। सदःशब्देनात्र सदोमण्डपवत्कृत्स्नं कर्म लक्ष्यते। तद्दृष्टत्वात्साधुत्वं हितत्वं वा द्रष्टव्यम्। होत्रं हवनसाधनं वषट्कारस्तमा उच्चैः शंसन्ति वदन्तीति होत्राशंसिनः। नच होतरि स्वयं निषद्य यजत इत्यस्मिन्पक्षे यजमानाध्वर्व्वोश्चातिप्रसङ्गः। होत्रकवरण एव होत्राशंसिवरणमन्त्रस्योक्तत्वेन मैत्रावरुणो ब्राह्मणाच्छंसी पोता नेष्टाऽच्छावाक आग्नीध्रश्च होत्रका इत्यनेन मैत्रावरुणादिषु षट्स्वेव होत्रकशब्दप्रवृत्तेर्दर्शितत्वेन होतरि यजमानाध्वर्व्वोश्चातिप्रसङ्गाभावात्। तथा च होतृयजमानाध्वर्यूणां न होत्राशंसिशब्देन ग्रहणम्। एतेन होतृयजमानाध्वर्यूणां स्वस्वमन्त्रेण वृतत्वेऽपि होत्राशंसिलिङ्गकमन्त्रसंस्कारसिद्ध्यर्थं पुनर्वरणमिति शङ्काऽपि निरस्ता भवति। अमी इतिशब्दोऽदःशब्दस्य प्रथमाबहुवचनम्। अमी इत्येतस्य शब्दस्य स्थाने समासेन प्रथमाबहुवचनेन शर्मान्तानि नामानि षण्णां होत्रकक्रमेण गृहीत्वा मानुषास्तान्होत्राशंसिनीर्वृण इति वृणुयात्। यथा केशवशर्मनारायणशर्ममाधवशर्मगोविन्दशर्मविष्णुशर्मकृष्णशर्माणो मानुषास्तान्होत्राशंसिनीर्वृण इति। सर्वान्ते वा शर्मशब्दः सकृदेव। मैत्रावरुणो ब्राह्मणाच्छंसी पोता नेष्टाऽच्छावाक आग्नीध इत्येवं क्रमोऽत्रानुसंधातव्यः। एवं च (व) इतिबहुवचनान्तो युष्मदर्थश्च। एवं चमसाध्वर्युवरणमन्त्रेऽपि द्रष्टव्यम्। अत्रापि होत्रध्वर्युब्रह्मोद्गातृयजमानसदस्यमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीधा इत्येवं चमसाध्वर्युवरणे क्रमो ग्राह्यः। चमससंबन्धिनोऽध्वर्यवश्चमसाध्वर्यवः। धार्यधारकभावरूपोऽत्र संबन्धः। तच्च धारणं होमाद्यर्थम्। प्रतिप्रस्थात्रादीनां तु तत्तन्मुख्यर्त्विङ्मन्त्रेण। तत्र प्रतिप्रस्थातुरध्वर्युमन्त्रेण, प्रस्तोतुरुद्गातृमन्त्रेण, प्रतिहर्तुरुद्गातृमन्त्रेण, प्रावस्तोतुर्होतृमन्त्रेण, उन्नेतुरध्वर्युमन्त्रेण, सुब्रह्मण्यस्योद्गातृमन्त्रेणेति प्रतिप्रस्थात्रादीनामध्वर्व्वादिशब्दैरेव वरणम्। नच प्रतिप्रस्थात्रादिपरिज्ञानार्थमध्वर्व्वादिशब्दोत्तरं प्रतिप्रस्थात्रादिशब्दप्रयोगोऽप्यस्त्विति वाच्यम्। प्रतिप्रस्थात्रादिपरिज्ञानस्य लौकिकवरणेनैव जातत्वेन मन्त्रस्वरूपविघटकाधिकशब्दप्रयोगस्याप्रयोजकत्वात्। होत्रकवरणानन्तरं

प्रतिप्रस्थात्रादीनां वरणम् । ततश्चमसाध्वर्यूणां, गौणचमसाध्वर्य्वृत्विगपेक्षया प्रतिप्रस्थात्रादीनां मुख्यर्त्विक्त्वेन तेषामेव पूर्ववरणस्य युक्तत्वात् । राज्ञः पूजनानन्तरमृत्विजां निमन्त्रणार्थं सोमप्रवाकोऽवश्यं वरणीयः । सोममृत्विग्भ्य आर्त्विज्यप्रवृत्त्यनुकूलव्यापारं निश्चेतुं वक्तीति सोमप्रवाकः । एतस्मादेव नाम्नः सोमप्रवाकप्रयोजनमवगतं भवति । साद्यस्केष्वश्वरथाः संक्षीरदक्षिणयः । ससोमप्रवाका विधावन्तीति लिङ्गमपि सोमप्रवाकसत्त्वे । लाट्यायनद्राह्यायणमरद्वाजाश्वलायनैर्नित्यमेवाम्नातश्चास्ति । अतः सोमप्रवाक ऋत्विजामामन्त्रणार्थमवश्यं वरणीयः । स च तूष्णीमेव मन्त्रानुपदेशात् । तस्य गन्धादिभिः पूजनं तस्मै यथाशक्ति दक्षिणादानं च । दक्षिणाकाले वा दक्षिणादानम् । सोमप्रवाकवरणादिप्रयोग इत्थम्—राजपूजनानन्तरमस्मिन्क्रतौ त्वं सोमप्रवाको भवेति वृत्वा बाढमिति तेनोक्ते तं गन्धवस्त्रादिभिः संपूज्य सोमप्रवाकाऽऽर्षेयेभ्य ऋत्विग्भ्यः सोमं प्रब्रूहीति यजमानस्तमाह । यजमानप्रहितः सोमप्रवाकस्तं तं यथोक्तगुणमुपेत्य सर्वान्यजमानगृहं प्रत्यानीय तत्राऽऽमन्त्रणं कुर्यात् । तत्राऽऽमन्त्रणवाक्यमित्थम्—अमुकशर्मणः सोमो भविष्यति तत्रभवता हौत्रं कर्तव्यमाध्वर्यवं कर्तव्यं ब्रह्मत्वं कर्तव्यमौद्गात्रं कर्तव्यं प्रशास्त्रीयं प्रतिप्रस्थात्रं ब्राह्मणाच्छंसीयं प्रास्तोश्रमच्छावाकीयं नेष्ट्रीयमाग्नीध्रीयं प्रातिहर्त्रं प्रावस्तुतीयमौन्नेत्रं पोत्रीयं सौब्रह्मण्यं कर्तव्यमिति सदस्यपक्षे सादस्यमिति । होत्राभ्यश्च इत्यस्मिन्सूत्रे होत्राशब्देन होत्रका एव गृह्यन्ते । तथा च प्रशास्तृब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्रेभ्य एव च्छप्रत्ययो न प्रतिप्रस्थातृप्रस्तोतृप्रतिहर्तृन्नेतृसुब्रह्मण्येभ्यः । प्रावस्तुच्छब्दात्तु वृद्धाच्छ इत्यनेन च्छप्रत्ययः । ब्रह्मशब्दात्तु ब्रह्मणस्त्व इति सूत्रेण त्वप्रत्ययः । होत्रध्वर्यूद्गातृशब्देभ्यस्तु सामान्यतोऽणेवेति द्रष्टव्यम् । तत्र को यज्ञः क ऋत्विजः का दक्षिणेत्येकः प्रश्नप्रकार आपस्तम्बाश्वलायनाद्युक्तः । प्रत्युत्तरवाक्येष्वाश्वलायनेन विशेष उक्तः कल्याणैः सह संप्रयोग इति । कल्याणोऽमुको यज्ञः कल्याणा अमुकशर्मादय ऋत्विजः कल्याण्यो गावो दक्षिणेति । अन्यः प्रश्नप्रकार आपस्तम्बेनोक्तः—तं पृच्छति क ऋत्विजः के याजयन्ति कच्चिन्नाहीनः कच्चिन्न न्यस्तमार्त्विज्यं कच्चित्कल्याण्यो दक्षिणा इति च्छन्दोगब्राह्मणं भवतीति । अत्र विकल्पं सूचयितुं छन्दोगब्राह्मणग्रहणम् । ऋत्विक्परीक्षा तावत्पतितयाजित्वादियजमानदोषशङ्कानिरासार्था । वर्तमानर्त्विक्परीक्षाऽपि संमक्षणानर्हत्वशङ्कानिरासार्था । अहीनदक्षिणापरीक्षा तु अल्पदक्षिणे क्रतावहीने च याजननिषेधादेव । यथोक्तमाश्वलायनेन न्यस्तमार्त्विज्यमकार्यमहीनस्य नीचदक्षिणस्येति । अप्रश्नपक्षेऽपि परीक्षाऽऽवश्यक्येव । आर्त्विज्याकरणे प्रत्याख्यानप्रकार उक्तो लाट्यायनद्राह्यायणाभ्यां सोमप्रवाकमकरिष्यन्नमः सोमाय राज्ञ इति प्रत्याचक्षीत महान्मेऽवोच

---

१ ख. सवार°।

इति करिष्यन्प्रतिमन्त्रयेतेति। भारद्वाजमतात्त्वयाजयिष्यतोऽपि नपो नित्यः। पशुपालः प्रेष्या धाता शमिता ध्रुवगोपो दोग्धा सोमविक्रयी हविष्येषणार्थैका स्त्री, अग्नीषोमीयार्थेध्मावहिर्नयनार्थे द्वे, प्रसर्पका उपगातारश्चेत्यत्रैवोपकल्पयितव्याः। आलब्धव्यानां पशूनां दक्षिणार्थगवादिप्राणिद्रव्याणां दोहार्थानां गवां राजवहनार्थानडुहोश्च संरक्षणकर्ता पशुपालः। वैश्योऽयम्। तद्वृत्तित्वात्। प्रेष्याः प्रेषार्थकर्तारः सनीहारादयो व्रतप्रदातारः परिकर्मिणश्च। सनिं याच्ञालब्धं धनं तद्ये हरन्ति ते सनीहाराः। एतेन ज्ञायते पूर्वमेव क्रत्वर्थं द्रव्यं याचितं भवति। ब्राह्मणाः क्षत्रिया वैश्या वैते। सनीहारविषये विशेष उक्तो द्वैधे बौधायनेन—अथ सनीहारान्प्रहिणोतीत्यन्यत्रोग्रशूद्रयोरिति बौधायनोऽन्यत्रोभैरिति शालीकिः सर्वान्यज्ञसिद्धय इत्यौपमन्यव इति। धाता यज्ञसामग्रीरक्षको ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा। शमिता पशुसंज्ञपनकर्ता। स च ब्राह्मणः शूद्रो वा। बाहुं शमित्रे तं स ब्राह्मणाय ददाति यद्यब्राह्मणो भवतीतिसूत्रात्। बाहुं शमित्रे यजमानो ददाति। तं बाहुं स शमिता ब्राह्मणाय ददाति यदि स्वयमब्राह्मणो भवतीति सूत्रार्थः। एतस्मादेव लिङ्गाद्दत्विग्व्यतिरिक्त एवायम्। पराङावर्तेतेऽध्वर्युः पशोः संज्ञप्यमानादिति वचनादध्वर्योरसामर्थ्यादध्वर्युपुरुषाणां मध्य एकस्य द्वयोः सर्वेषां वा कार्यानुसारेण पशुसंज्ञपनकर्तृत्वम्। तत्रैकश्चेत्प्रतिप्रस्थातैव संनिहितत्वाद्वौ चेत्प्रतिप्रस्थातृनेष्टारौ त्रयश्चेदुन्नेता चेति द्रष्टव्यमिति जैमिनिमतम्। तथा च तृतीयाध्याये सप्तमे पादे तत्सूत्रे शमिता च शब्दभेदात्। शमयति पशुं हिनस्तीति शमितृशब्दार्थः। अत्र यद्यपि शामित्रस्याऽऽध्वर्यवसमाख्यानादध्वर्योरेव शमितृत्वं युक्तं तथाऽपि संज्ञप्यमानात्पशोरध्वर्योः पराङावृत्तिवचनेन तस्य शमितृत्वानुपपत्तेस्तत्प्रत्यासन्नः प्रतिप्रस्थात्रादिः कश्चिच्छमिता भवतीति। नचैवं क्लोम चार्धं वैकर्तनं च शमितुस्तद्ब्राह्मणाय दद्याद्यद्यब्राह्मणः स्यादितिवचनविरोध इति वाच्यम्। यदि यजमानोऽब्राह्मणः क्षत्रियादिः स्यादित्यर्थकरणेन विरोधाभावात्। नचैवं शामित्रं चैव विप्राणामितिनिषेधकत्रैवर्णिकः शमितेति कुलालः शमितेतिविधायकवचनद्वयविरोध इति वाच्यम्। एतासां स्मृतीनामध्वर्युपुरुषासंभव एव प्रवृत्तिसंभवेन विरोधपरिहारस्य कर्तुं शक्यत्वात्। तत्र ऋत्विजः शमिता ध्रुवगोपो दोग्धा सोमविक्रयीति सूत्रकृतैव प्रदर्शितास्तेषामुपकल्पनं सिद्धमेव। आपस्तम्बभरद्वाजादिभिरुपगातृणामप्युक्तत्वात्तेषामप्युपकल्पनं सिद्धमेव। इतरेषां तूपकल्पने याज्ञिकमतेऽपि न नियम इति द्रष्टव्यम्। ध्रुवगोपस्तु मीमांसकमतेऽपि राजपुत्रो गोपायतीतिवचनादन्य एव। एवं च तस्योपकल्पनं नियतम्। शमितुस्तु याज्ञिकमत उपकल्पनं न मीमांसकमते। विहितत्वाद्दोग्धुरपि उपकल्पनम्। सोमविक्रयिणः कर्मान्तःपातित्वात्तस्य सर्वमतेऽन्यत्वाच्चोपकल्पनम्। पशुपालादीनामुपकल्पने विकल्पगात् (?) शमितुरध्वर्वादिवदुत्पत्तेरभावादुत्पत्तिकालिकसंज्ञासंबन्धाभावादिति। नहि संज्ञामात्रं भेदकं किंतूत्पत्तौ श्रुता।

नचेयं संज्ञोत्पत्तौ श्रूयते वरणाभावेन शमितुरध्वर्यादिवदुत्पत्तेरभावात्तस्मान्न केवलसंज्ञाऽत्र भेदिकेति भावः। सूत्रार्थस्तु शमिता चर्त्विग्भ्यो भिन्नः शमितेतिशब्दभेदात्प्रकरणाद्वा। वाशब्दः पूर्वपक्षव्यावर्तकः। प्रकरणमाध्वर्यवप्रकरणे शमिता पशुकण्ठे निगृह्णातीति। उत्पत्त्यसंयोग्यं च ब्राह्मणाभावे। कलौ तु शामित्रं चैव विप्राणामिति शामित्रकर्मकरणनिषेधाच्छूद्र एव। ध्रुवग्रहसंरक्षणकर्ता ध्रुवगोपः। स च राजपुत्र इति सूत्रकारेण प्रागेवोक्तम्। अतः क्षत्रियो दोग्धा व्रतप्रवर्ग्याद्यर्थं दोहनकर्ता। स च ब्राह्मणः शूद्रो वा। अग्निहोत्रमेव न दुह्याच्छूद्र इत्यग्निहोत्रसंबन्धिदोहन एव शूद्रनिषेधादन्यत्रानियमः। अयं च शूद्रो गोप एव। स्मृतौ सच्छूद्रौ गोपनापितावितितस्य सामान्यतः समीचीनत्वोक्तेस्तद्वृत्तित्वाच्च। ब्राह्मणो दोहकर्ता चेत्समीचीनतरमेव। सोमविक्रयी कौत्सः शूद्रो वेति सूत्रकारेण प्रागुक्तमेव। सोमविक्रयणं तथेति कलौ सोमविक्रयस्यापि निषेधाच्छूद्र एवेदानीम्। अयं च ऋत्विग्व्यतिरिक्त एवेत्युक्तमेव प्राक्। हविष्पेषणार्थी स्त्री ब्राह्मणी दासी वा। अग्नीषोमीयार्थेध्मवहनार्थाऽग्नीषोमीयार्थबर्हिर्वहनार्थी च रूयेव ब्राह्मणी। प्रसर्पन्तीति प्रसर्पका यज्ञेऽर्थसंशये निर्णायकाः। एते ब्राह्मणा एव दक्षिणाप्रतिग्रहीतृत्वात्। तेषामुपवेशनस्थानं तु यावत्पर्यन्तं प्राग्वंशे कर्म तावत्पर्यन्तं प्राग्वंश एव। अग्निप्रणयनप्रभृति तत्तत्समीपप्रदेश एव। यत्र यज्ञे शिष्टा विद्वांस उपविशन्ति सैव यज्ञसभेत्युच्यते। तदुक्तं राजधर्मेषु—

सभास्तु तिस्रो विज्ञेया धर्मस्यैका च कर्मणः।
तथा राजसभेत्येता विद्वद्भिः परिकीर्तिताः॥ इति।

धर्मशब्देन व्यवहारः प्रायश्चित्तं चोच्यते। तदर्थं या कल्पिता शाला सा धर्मस्य सभा। इयमेका सभा। च परं कर्मार्थं यज्ञादिकर्मार्थं या शाला सा कर्मसभेत्युच्यते। इयं द्वितीया। राजा यत्र विप्रैः परिचारकैर्भटादिभिश्च सहित उपविशति सा शाला राजसभेत्युच्यते। इयं तृतीया सभा। एतास्तिस्रः सभा विद्वद्भिर्ऋषिभिः परिकीर्तिताः कथिता इत्यर्थः। सभासत्संख्योक्ता बृहस्पतिना—

लोकवेदज्ञधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा॥ इति।

स्मृत्यन्तरेऽपि—यत्र धर्मं विनिर्णेतुं विद्वांसश्चतुरादयः।
उपविष्टा भवेयुश्चेत्तदा ज्ञेया सभेति सा॥ इति।

यज्ञार्थशालोपविष्टा विद्वांसः शिष्टा ब्राह्मणा अत्र प्रसर्पकशब्देनोच्यन्ते। ते च त्रिप्रभृतय इति द्रष्टव्यम्। यज्ञमारभ्याऽऽन्तं शालायां नियमेनैतैरुपवेशनं कर्तव्यं कर्मसाक्ष्या-

---

१ क. 'रणं श'।

र्थम्। उपगातार ऋत्विजां मध्ये ये केचन षडवराध्र्या इत्युक्तमेव प्राक्। अहोरात्रे पशुपाल्यौ, मुहूर्ताः प्रेष्या अभवन्, मृत्युस्तदभवद्धाता, शमितोग्रो विशां पतिः, ध्रुवगोपः सहोऽभवत्, आकूतिरपिनद्धवित्, इध्मꣳ ह क्षुच्चैम्य उग्रे तृष्णा चावहतामुभे इति विश्वसृन्नामयनेऽनुक्रमणाल्लिङ्गादेतेषां कल्पनमत्रैव। न चाऽऽर्त्वा उपगातार इति लिङ्गादेतेषामपि भिन्नत्वेनोपकल्पनमस्त्विति वाच्यम्। तेषां सर्वमत ऋत्विगभेदस्यैव सिद्धत्वेनोपकल्पनासंभवात्। मीमांसकमत आर्त्वा उपगातार इत्यस्या अर्थवादत्वेन वज्रहस्तः पुरंदर इत्यादिवत्स्वार्थे प्रामाण्याभावान्नोपगातॄणां भिन्नत्वं कल्पयितुं शक्नोति। याज्ञिकमते स्वार्थप्रामाण्यसत्त्वेऽपि वचनादभेद इति द्रष्टव्यम्। यजमानस्यर्त्विजां च यावत्कर्म व्रतं भवति। तदुक्तं बौधायनप्रायश्चित्तसूत्रे—सर्वत्र यजमानस्यर्त्विजां च यावत्कर्म व्रतमुपदिशन्तीति। तच्चोक्तमाश्वलायनेन—न मांसमश्नीयुर्न स्त्रियमुपेयुरा क्रतोरपवर्गादिति। ऋत्विगपेक्षं बहुवचनम्। अन्योऽपि विशेषनिषेधो बौधायनप्रायश्चित्तसूत्रे—नर्त्विजामार्त्विज्यमन्यत्र विद्यते न महर्त्विजां समासो न सर्वत्र यजमानस्याऽऽर्त्विज्यमन्यत्र सत्रादिति। यो होता सोऽध्वर्युरित्ययं समासः कुण्डपायिनामयने विहितः। स तस्य सत्रत्वात्तत्रैव नान्यत्राहीनैकाहादौ। एवं यजमानस्याऽऽर्त्विज्यमपीति। ऋत्विजां मधुपर्केण पूजा कार्या। तत्र विश्वामित्रः—

संपूज्य मधुपर्केण ऋत्विजः कर्म कारयेत्।
असंपूज्य कारयेच्चेत्किल्बिषेण स युज्यते॥ इति।

मधुपर्कार्हा धर्मसूत्रे—गोमधुपर्काहौ वेदाध्यायाचार्य ऋत्विक्स्नातकः श्वशुरो राजा वा धर्मयुक्त इति। गौश्च मधुपर्कश्च गोमधुपर्कौ ताभ्यामर्हो योग्य इत्यर्थः। एतादृशे समासे मधुपर्कान्तर्गतगोरपेक्षयाऽधिका गौर्देया भवति। वेदाध्यायीत्याचार्यादिविशेषणम्। यद्याचार्यादयः कृत्स्नवेदाध्यायिनस्तदैव मधुपर्कादधिका गौर्देया नान्यदेति। एतेन ज्ञायते वेदैकदेशाध्यायिनोऽप्याचार्यादयः स्युस्तेऽपि केवलेन मधुपर्केण पूज्या एवेति। अथवा गवा युक्तो मधुपर्को गोमधुपर्क इत्येवं समासः। अधिकगोदानाभावस्तु सुतराम्। अन्यश्च धर्मसूत्रे विशेषः—आचार्यायर्त्विजे स्नातकाय श्वशुराय राज्ञ इति। परिसंवत्सरादुपतिष्ठन्त्यो गौर्मधुपर्कश्चेतिपूर्वोक्तविशेषणविशिष्टानामाचार्यादीनां संवत्सरोत्तरं प्राप्तानामेतेषां गोयुक्तमधुपर्केण पूजा कार्येत्यर्थः। अनेन सूत्रेणावधिप्रदर्शनं क्रियते। विद्यास्नातकविद्याव्रतस्नातकाभ्यामेव गौर्देया न केवलव्रतस्नातकाय। एतस्मात्सूत्रादिदं ज्ञायते पूर्वसूत्रे धर्मोपदेष्टृत्वादिधर्मसंपत्तिप्रयुक्तो मधुपर्क इति। तत्र धर्मोपदेष्टुर्मधुपर्क उपनयनोत्तरम्, ऋत्विजो वरणोत्तरं, स्नातकस्य समावर्तनान्ते, श्वशुरस्य देवकोत्थापनान्ते, राज्ञोऽभिषेकान्त इति द्रष्टव्यम्। प्रतिनिमित्तं नैमित्तिकमिति न्यायात्, ऋत्विजौ कृत्वा मधुपर्कमाह-

रेदित्याश्वलायनसूत्रात्, पुनः पुनर्यज्ञ इति च्छन्दोगसूत्रात्, अथैतेऽर्घ्या ऋत्विक्श्वशुरपितृव्यमातुलाचार्या राजा स्नातकः प्रियागतोऽतिथिरिति संवत्सरं पर्यागतेभ्य एतेभ्य एव कुर्याद्विवाहे वरायार्त्विग्भ्यः कर्मणि कर्मणि ददातीति बौधायनसूत्रात्।

असंपूज्य कारयेच्चेत्किल्बिषेण स युज्यते।

इति विश्वामित्रेण मधुपर्कपूजाया अकरणे दोषश्रवणाच्च प्रतियज्ञम्। संवत्सरोत्तरं देवभूतपितृभूतानामेवर्त्विजां कर्मण्यतिरिक्तकाल उपस्थितिः संभवति न मनुष्यभूतानां कर्मण्यतिरिक्तकाल एतेषामृत्विक्त्वासंभवात्। वैजवापमते होत्रादिषु चतुर्ष्वार्त्विज्यसमावेशात्तद्दशवर्तिनां पुत्रादीनामाशौचपातेऽन्ये तदीया आगमयितव्या इति। इदं च देवभूतपितृभूतर्त्विक्पक्षे द्रष्टव्यम्। ऋत्विङ्मरणप्रयुक्तमाशौचं याज्ये यस्मृतावुक्तं तद्देवभूतपितृभूतविषयकमेव। एवं याज्यमरणप्रयुक्तमाशौचं देवभूतपितृभूतेष्वेवर्त्विक्षु इति द्रष्टव्यम्। ऋत्विजामाशौचाभावो मधुपर्कोत्तरमेव।

गृहीतमधुपर्कस्य यजमानात्तु ऋत्विजः।
पश्चादाशौचे पतिते न भवेदिति निश्चयः॥ इति ब्राह्मात्।

यत्र मधुपर्को नास्ति तत्राऽऽशौचमस्त्येवेति त्वर्थात्। तत्राऽऽधानेष्टिपशुबन्धादौ मधुपर्को नैव किंतु ज्योतिष्टोमादावेव स इति केचित्। समञ्जकवरणस्य ज्योतिष्टोमादावेव सत्त्वान्मधुपर्कः, आधानेष्टिपशुबन्धादौ समञ्जकवरणाभावान्न स इत्येतन्मताशयः। सर्वत्रापि मधुपर्क इति केषांचिन्मतम्। समञ्जकवरणस्यैव मधुपर्कनिमित्तत्वे प्रमाणाभाव इत्येतन्मताशयः। तुच्छमेतन्मतं समञ्जकवरणसंबद्ध एव मधुपर्क इति प्रदर्शयितुमेवर्त्विजो वृत्वेत्यनुवादकरणात्प्रयोजनान्तरस्य चासंभवात्। महादानादौ मधुपर्कस्तु वाचनिकः। वैखानसेनाऽऽधानेऽपि मधुपर्क उक्तः सोऽपि वाचनिक एव। किमिव वचनं न कुर्यान्नास्ति वचनस्यातिभार इति।

प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया॥

इति वचने यद्यपि वरणस्यैवं केवलमाशौचाभावहेतुत्वं प्रतीयते तथाऽपि वरणमधुपर्कयोः संबद्धत्वाद्वरणशब्देन मधुपर्कोऽपि गृह्यते। नातो गृहीतमधुपर्कस्येति ब्राह्मेण विरोधः। अयं चर्त्विजामाशौचाभावो यावत्कर्म तावदेव।

ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम्।
सत्त्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा॥
दाने विवाहे यज्ञे च सङ्ग्रामे देशविप्लवे।
आपद्यपि च कष्टायां सद्यः शौचं विधीयते। इति वचनात्।

प्रारम्भो वरणं यज्ञ इति वचने गृहीतमधुपर्कस्येतिवचनैकवाक्यत्वाय वरणं समभ्रकमेवेति ज्ञेयम्।

एतेन—व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे।

प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम्॥

इतिविष्णुवचनबोधितानारम्भहेतुकं सूतकं लौकिकवरणवृतानामप्यस्त्येव। सूतकग्रहणं मृतकोपलक्षणम्। गृहीतमधुपर्कस्य यजमानात्तु ऋत्विज इत्यत्रर्त्विक्शब्द ऋतुयजनविशेषनिमित्तक एव ग्राह्यः। तेन न चमसाध्वर्युभ्यो मधुपर्कः किंतु गन्धादिभिः पूजामात्रम्। यजमानस्यापि यावत्कर्म तावदेवाशौचाभावः। ऋत्विजां दीक्षितानां चेत्यनन्तरोदाहृतवाक्यात्।

न दीक्षिण्याः परं यज्ञे न कृच्छ्रादि तपश्चरन्॥ इतिवचनाच्च।

दीक्षिणी दीक्षणीया। दीक्षितानामिति बहुवचनं सत्राभिप्रायेण। इदमपि प्रारम्भोत्तरमेव।

प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम्॥ इतिवाक्यात्।

अत्रापि प्रारम्भशब्दार्थः प्रारम्भो वरणं यज्ञ इतिवचनसिद्धवरणात्मक एव। संकल्पोत्तरं वरणात्प्राक्चेत्तदा विराम एव। नान्दीश्राद्धं तु पूर्वकृतमेवैकविंशतिदिनपर्यन्तमुपयोगाय भवति।

एकविंशत्यहर्यज्ञे विवाहे दश वासराः।
त्रिषट्चौलोपनयने नान्दीश्राद्धं विधीयते॥ इतिवचनात्।

दीक्षितस्य त्ववभृथात्प्रागकर्मकालेऽप्याशौचाभाव एव।

तद्वद्गृहीतदीक्षस्य त्रैविद्यस्य महामखे।
स्नानं त्ववभृथे यावत्तावत्तस्य न सूतकम्॥ इतिवचनात्।

सत्त्रिव्रतिब्रह्मचार्यादिसद्यःशौचवदिति तद्वदित्यस्यार्थः। गृहीता दीक्षा येन स दीक्षित इति यावत्। दीक्षणीयायागोत्तरं दीक्षितत्वमिति प्रागुक्तमेव। त्रयवयवा विद्या त्रिविद्या तामधीते वेद वा स त्रैविद्यो वेदत्रयाध्यायी तत्प्रतिपाद्यकर्मत्रयज्ञानवान्वा। एतादृशो यजमानो भवेत्तस्य महामखेऽग्निष्टोमादिरूपेऽवभृथस्नानं यावत्पर्यन्तं न निर्वृत्तं तावत्पर्यन्तं तस्य यागकर्तुर्न सूतकमित्यर्थः। तद्वदित्यनेन सद्यःशौचमतिदिश्यते। तेनाकर्मकालेऽप्याशौचाभावः सिध्यति। गृहीतदीक्षत्वस्यावभृथस्नानकर्तृत्वस्य च चातुर्मास्यसौत्रामण्यादावपि सत्त्वादतिव्याप्तिः स्यात्तां वारयितुं महामख इति। गृहीतदीक्षस्येत्यनेन पूर्वावधिः प्रदर्श्यते। तेनैतन्मध्य एवाकर्मकालेऽपि आशौचाभावो नत्वेताभ्यां पूर्वम्। ननु गृहीतदीक्षस्येत्येतावदेवास्तु चातुर्मास्यसौत्रा-

मण्यादिषु दीक्षाया एवाभावेनापि प्रसक्तवारणसंभवान्महामख इति विशेषणं व्यर्थमिति चेन्न । दीक्षधातोरनेकार्थकत्वेनेज्यारूपधात्वर्थस्य तत्रापि सत्त्वेन तद्वारणार्थं महामख इत्येतस्याऽऽवश्यकत्वात् । त्रैविद्यस्येत्यनेन विशेषणेन केवलं श्रद्धानस्य महामखेऽपि अकर्मकाले दीक्षितस्यापि अवभृथात्प्रागाशौचमस्त्येव । तथा चाशौचनिमित्तकं स्नानं कर्मारम्भात्प्राक्कृत्वाऽङ्गेष्वेव घृतवस्त्रजातं शुष्कं कृत्वा भस्म धृत्वा कर्माऽऽरभेत । कर्मसमाप्त्युत्तरं पुनराशौची भवेत् । एवं प्रतिकर्मारम्भं स्नानं भवति । धारणाशक्तताया स्नानोत्तरं वस्त्रमेखलाकृष्णाजिनादीनि प्रक्षाल्य यावत्पर्यन्तं दीक्षार्थं वस्त्रं शुष्कं भवति तावदन्यत्परिधाय शुष्के तस्मिन्दीक्षाऽसि तनूरसि सोमस्य तनूरसीति मन्त्रैः परिधाय सूर्यस्य वासोऽसि नीविरिति नीविमनुपरिकल्प्य नवनीताभ्यञ्जनं कृत्वाऽक्षिणी अङ्क्त्वा प्रक्षालितया तयैव मेखलया परिव्ययणे कृते प्राप्तमग्निमं कर्म करोति । एवं पत्न्या अपि । एवं यावदाशौचनिवृत्ति । एतच्चान्यथानुपपत्त्या कल्प्यते । एतादृशकल्पनायां त्रैविद्यग्रहणमेव गमकम् । अन्यथैतस्य निरर्थकत्वापत्तेः ।

अपि वा होतारमध्वर्युं ब्रह्माणमुद्गातारं चैतानेव वृणीते ।

अपि वा मुख्यानेव चतुरो वृणीत इत्येतावतैव होत्रध्वर्युब्रह्मोद्गातृलाभे चतुर्णां ग्रहणमाश्वलायनोक्तब्रह्मपूर्वकत्वं चतुरः सर्वान्वा चतुरो वृणानो महर्त्विजो वृणीतेऽध्वर्युं ब्रह्माणं होतारमुद्गातारमितीतिभारद्वाजोक्ताध्वर्युपूर्वकत्वं च व्यावर्तयितुम् । तेनाऽऽमन्त्रणप्रकारादिकं तदुक्तं सर्वमुपसंहार्यमेवेति । एतच्छब्दश्चकारेण मुख्यत्वात्सदस्यस्यापि संग्रहः शङ्कितः स्यात्तद्व्यावर्तनाय । एवकार इतरेषां समञ्जकवरणव्यवच्छेदार्थः । अमञ्जकं वरणं स्वेतेषामपि भवति । चतुर्णां समञ्जकवरणपक्षे चतुर्णामेव मधुपर्कपूजा, इतरेषां तु वस्त्रालंकारगन्धादिभिः पूजनमात्रमिति ज्ञेयम् ।

अथ क्षत्रियं देवयजनं याचते ।

याजमानं व्याख्यास्याम इत्यधिकाराद्यजमान एव सर्वत्र कर्ता । अथशब्दो नित्यस्वार्थः । तेन विद्यमानेऽपि देवयजनदेशे याचनं नित्यमिति सिद्धं भवति । आपस्तम्बेन तद्भृतो राज्ञोऽपि याच्ञावचनात् । एवं प्रतिग्रहरहितस्य क्षत्रियस्य वैश्यस्य चापि याच्ञा नित्या । देवयजनयाचने मन्त्रमाहाऽऽपस्तम्बः—देव वरुण देवयजनं मे देहीति यजमानो राजानं याचेदिति ।

स चेद्ददाति देवयजनवान्भूया इत्येनमाह न चेद्ददाति देवयजनं वेद तस्मिꣳस्त्वा वृश्चामीत्येवमाह ।

चेद्ददीत्यर्थः । एनं *दातारम् । न चेदित्यनन्तरं ददातीत्यनुषङ्गः । यदि न ददातीत्येवापठदापस्तम्बः । चेद्ददातीत्येतावतैव सिद्धेऽपि तच्छब्दमुच्चरति तस्येदं

* अदातारमित्येवोपलभ्यते तत्प्रामादिकम् ।

१ ड. °य दे° । २ ड. ज. झ. ञ. चेदस्मै ददा° । ३ ड. ज. झ. ञ. °त्येवमा° ।

प्रयोजनं याचित एव सश्रद्धं ददाति तदैव देवयजनवान्मूया इत्याशीर्यदि निर्बन्धादिनाऽनुव्यवहारभयाद्वा तदा नाऽऽशीरिति। यदहं देवयजनं वेदेत्यनुव्याहरिष्यतः प्रतिज्ञा।

अथैनमभिव्याहारयन्ति।

अथशब्द आनन्तर्यार्थः। तेन यदहं देवयजनं वेद तस्मिन्नस्त्वा वृश्चामीत्येतदनन्तरमेव होत्राभिव्याहरणं कर्तव्यं न तु तेन सह तत्पूर्वं वेति। एनमदातारम्। अभिव्याहारोऽत्र शापः। वाचमुपावधीर्वाक्त्वा हास्यतीत्यादिवक्ष्यमाणमन्त्रलिङ्गात्। वक्ष्यमाणाभिव्याहरणमन्त्रप्रतिपाद्याभिर्वाग्गादिभिरित्यर्थः। बहुवचनं वक्ष्यमाणहोत्राद्यभिप्रायेण। सामान्यप्रतिज्ञेयम्। अथवाऽभिव्याहारयन्तीति स्वार्थे णिच्। वक्ष्यमाणा होत्रादयः। नचाऽत्रर्त्विजः प्रयोज्याः प्रयोजको यजमानस्तथा च नागतिका(क)गतिका णिचः स्वार्थपरत्वकल्पनेति वाच्यम्। अभिव्याहरणकर्तृत्वस्य होत्रादिनिष्ठत्वमिव यजमानस्यापि तत्कर्तृत्वस्याग्रे वक्ष्यमाणत्वेन स्वस्मिन्स्वप्रयोज्यत्वासंभवात्। अतः स्वार्थ एव णिच्।

तत्प्रकारमाह—

> वाचमुपावधीर्वाक्त्वा हास्यतीति होता प्राणमुपावधीः प्राणस्त्वा हास्यतीत्यध्वर्युर्मन उपावधीर्मनस्त्वा हास्यतीति ब्रह्मा चक्षुरुपावधीश्चक्षुस्त्वा हास्यतीत्युद्गाता श्रोत्रमुपावधीः श्रोत्रं त्वा हास्यतीति होत्रका आत्मानमुपावधीरात्मा त्वा हास्यतीति सदस्योऽङ्गान्युपावधीरङ्गानि त्वा हास्यन्तीति चमसाध्वर्यवः प्रजापतिमुपावधीः प्रजापतिस्त्वा हास्यतीति यजमानो भूतान्युपावधीर्भूतानि त्वा हास्यन्तीति सर्वे।

होत्रादीनामुपादानं तत्तन्मन्त्रसंबन्धपरिज्ञानार्थम्। अन्यथा प्रथमः कस्य मन्त्रो द्वितीयः कस्येत्यादिपरिज्ञानं न स्यात्। सर्व उक्ता होत्रादयोऽनुक्ता यजमानस्य प्रेष्याद्याश्च। क्रमेणैवाभिव्याहरणम्।

एवं शप्ते ततोऽन्यं याचते—

अथर्त्विजो देवयजनं याचते।

अथशब्दो यद्यपि स्वकीय एव देवयजनदेशस्तथाऽपि राजानुज्ञां विना नैवर्त्विजः प्रति याचनं भवतीति। ऋत्विज इति द्वितीयाबहुवचनम्। होत्रादीनामनुज्ञापनमेवात्र याचनशब्दार्थः। आपस्तम्बस्तु ऋत्विजः प्रति याचने राजकर्तृकतामाह—राजा देवयजनं याचत्यग्निर्मे होता स मे होता होतर्देवयजनं मे देहीत्यादिना। यत्र कश्चि-

दैवयजनस्य तत्र गच्छति याचनार्थम् । तत्रापि न लभ्यते चेत्, यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेतेति विहितां त्रैधातवीयेष्टिं कुर्यात् । वरणकाल एवर्त्विक्संपादनमिति पक्ष ऋत्विगलाभेऽपीति केचित् । वस्तुतः सामान्युपकल्पनं यथा संकल्पात्पूर्वं तथर्त्विग्देवयजनकल्पनमपि । तथा च न त्रैधातवीयेष्टिर्नच क्रत्वनारम्भरूपो विध्रेषः । बौधायनः स्पष्टमेतद्वैधसूत्र उक्त्वान्नादृष्ट्वा राजानं चर्त्विजश्च दीक्षेदिति । चकारो देवयजनपात्रादिसामग्रीसंग्रहार्थः ।

अग्निर्मे होता स मे दैवयजनं ददात्वित्युपाꣳशु होतर्दैवयजनं मे देहीत्युच्चैर्मानुषम् ।

उपांश्वित्यनन्तरं देवयजनं याचत इत्यनुवर्तते सामान्यप्रतिज्ञासूत्रात् । तत्तन्मन्त्रलिङ्गात्तं तं प्रति । मानुषमिति देवयजनविशेषणम् । ऋत्विग्विशेषणत्वे मन्त्रेषु मानुषनामनिर्देशाभावेन तत्त्वानुपपत्तेः । तेनार्थात्पूर्वतो दैव्यदेवयजनयाचनमिति सिध्यति । अदृष्टार्थमेतत् । उपांशुत्वस्य शब्दधर्मत्वाद्देवयजनयाचनमन्त्रेष्वेवान्वयो न तु याचने । तेन मन्त्रमुपांशूक्त्वा दैव्यं देवयजनं याचत इत्येवं वाक्यं भवति । एवं मानुषमित्यत्रापि । एवं सर्वत्र द्रष्टव्यम् ।

एवमितरेषूपाꣳशु देवतानामधेयमभिव्याहरत्युच्चैर्मानुषस्य ।

एवमितरेष्वित्येतावतैव सिद्धावुपांशु देवतानामधेयमभिव्याहरत्युच्चैर्मानुषस्येतिवचनं प्रकारान्तरमिदं पूर्वेण सह विकल्पार्थ इति प्रदर्शयितुम् । किं तत्पूर्वं किं तदुत्तरमिति चेदुच्यते—पूर्वमन्त्रयोरुपांशुत्वोच्चैस्त्वे अत्र तु नामधेययोरेवोपांशुत्वोच्चैस्त्वे इति पूर्वमन्त्रेषु देवतानामधेयानामेवोपांशुत्वेऽवशिष्टमन्त्रभागानामर्थादुच्चैस्त्वम् । उत्तरमन्त्रेषु मानुषनामधेयानामेवोच्चैस्त्वेऽवशिष्टमन्त्रभागानामर्थादुपांशुत्वमिति ज्ञेयम् । मानुषमित्येव लाघवाद्वक्तव्ये गुरुभूतः षष्ठ्यन्तत्वेन निर्देशोऽत्र ऋत्विङ्नामापि ग्राह्यमिति गमयति । यथाऽमुकशर्मन्मानुष होतर्दैवयजनं मे देहीत्यादि । नामैव नामधेयम् । भागरूपनामभ्यो धेय इति स्वार्थे धेयप्रत्ययः । अभिव्याहरणमुत्कीर्तनमेव देवतानामधेयशब्दसमभिव्याहारात् । होतेत्यादिनामानि तु न मानुषाणि किंतु आर्त्विज्यप्रयुक्तानि । मानुषस्येत्यनन्तरं देवतानामधेयमित्यत्रत्यसमासैकदेशनामधेयशब्दोऽनुवर्तते । देवतानामधेयमभिव्याहरतीत्यत्र देवताया नामधेयं देवतानामधेयमिति षष्ठीतत्पुरुष एव लाघवान्न तु देवताया नामधेयं यत्रेति व्यधिकरणबहुव्रीहिरिति । बहुव्रीहिसमासे तु देवतानामधेयशब्दस्य मन्त्रपरतायां पूर्वेण सहैकार्थत्वेन पुनरुक्तितादवस्थ्यापत्तेः । अतः षष्ठीतत्पुरुष एव युक्तः । अत उपांशु देवतानामधेयमभिव्याहरत्युच्चैर्मानुषस्येत्येतत्सूत्रं वक्षान्तराभिप्रायमेवेत्येवमवश्यं स्वीकार्यमित्यलं बहुना ।

आदित्यो मेऽध्वर्युः स मे देवयजनं ददात्वध्वर्यो देवयजनं मे देहीत्यध्वर्युं चन्द्रमा मे ब्रह्मा स मे देवयजनं ददातु ब्रह्मन्देवयजनं मे देहीति ब्रह्माणं पर्जन्यो म उद्गाता स मे देवयजनं ददातूद्गातर्देवयजनं मे देहीत्युद्गातारमाकाशो मे सदस्यः स मे देवयजनं ददातु सदस्य देवयजनं मे देहीति सदस्यमापो मे होत्राशꣳसिन्यस्ता मे देवयजनं ददतु होत्राशꣳसिन्यो मे देवयजनं मे दत्तेति होत्रकान्रश्मयो मे चमसाध्वर्यवस्ते मे देवयजनं ददतु चमसाध्वर्यवो देवयजनं मे दत्तेति चमसाध्वर्यून्॥ २॥

स्पष्टम्।

याचित्वेदमगन्म देवयजनं पृथिव्या इति देवयजनमध्यवस्यति।

देवा इज्यन्ते यस्मिंस्तद्देवयजनं देवानां यजनं यस्मिन्निति वा देवयजनं, तदध्यवस्यति सहाग्निभिरुपकल्पितसोमार्त्विक्संभारैश्चोदकुम्भपुरःसरं वासार्थं गच्छतीत्यर्थः। अनुप्रयायावस्येदित्यत्रावस्येतस्तथाऽर्थदर्शनात्। एदमगन्म देवयजनमिति मन्त्रलिङ्गाच्च। मदेमेति मन्त्रान्तः। अगन्मेति बहुवचनं पत्न्यमात्याभिप्रायम्। तेनामात्या अपि सह स्युः। इदं चामात्यसाहित्यं तत्सद्भावाभिप्रायेण। पत्न्यां तु नैवं तां विना क्रतोरेवाभावात्। तस्या देवयजनं प्रति गमनं तु अरण्यन्वारम्भस्य पत्न्या विहितत्वाच्चद्वारा सिद्धमेव। यजमानस्य मुरूपत्त्वादेवैतद्ब्राह्मणे देवयजनꣳ ह्येष पृथिव्या आगच्छति यो यजत इत्येकवचनं श्रूयते। याचित्वेत्युक्तानुवाद आपस्तम्बोक्तस्यापि वा न देवयजनं याचेद्देवता एवोपतिष्ठेत सक्षेदं पश्येत्येतस्य पक्षस्य निराकरणार्थः। क्त्वाप्रत्ययाद्देवयजनाध्यवसानाङ्गता। तेन देवयजनाध्यवसानोत्कर्षे एतस्याप्युत्कर्षः समारोपणादिकं देवयजनयाचनात्पूर्वमेव भवतीति। अत्र देवयजनाध्यवसानमरण्ये दीक्षतेऽरण्ये यजत इत्यस्मिन्पक्षे। अग्रे यद्विधास्यति तद्ग्रामे दीक्षतेऽरण्ये यजत इत्यस्मिन्पक्ष इति द्रष्टव्यम्।

देवयजनमध्यवस्यतीति पूर्वमुक्तं तत्र किंलक्षणं देवयजनमित्याकाङ्क्षायामाह—

यत्समं प्रतिष्ठितमोषधिवदनूषरमभङ्गुरमनुपहितमनिरिणमविस्रꣳदारि।

यत्समं समभूमिकं यद्देवयजनं भवति तद्देवयजनमध्यवस्यतीति पूर्वेणान्वयः। प्रतिष्ठितं सुशोभितं मृदुभूमित्वादिभिर्यत्र स्थितस्य मनोऽभिरुचितं भवति। तथा च बौधायनः—जुष्टे देवयजने शाला कारिता भवतीति। जुष्टेऽभिरुचित इत्यर्थः। सर्वेषामपि

* टीकानुरोधेनाविस्रꣳदारीत्यपि पाठो ज्ञेयः।

देवयजनविशेषणानां पूर्वेणान्वयः। ओषधिवत्, ओषध्यः फलपाकान्ता यत्र तादृशम्। वकारश्छान्दसः। ऊषा क्षारस्मृत्सा यत्र न विद्यते तदनूषरम्। तस्य स्वकृत ईरिणे नावस्येदिति निषेधात्। इरिणशब्देन सोषदेशस्यैवोक्तत्वात्। क्वचिदनूखरमित्यपि पाठः। धान्योत्पत्तिरहिता भूमिरूखरा तया रहितमिति अनूखरशब्दार्थः। अभक्कुरं यत्र नदी-प्रवाहादिभिर्भङ्गो न संभाव्यते तदभक्कुरम्। इदमसुषिरोपलक्षणम्। असुषिरमच्छिद्रम्। अनुपहतं यद्दहनचण्डालवासादिभिरुपहतं न भवति तदनुपहतम्। अनिरिणं यत्र तृणादिकं नोत्पद्यते तदिरिणं ततोऽन्यदनिरिणम्। अविसृग्दारि विसृग्विसर्गः शैथिल्यं दारि दारणं च वृक्षाणां यत्र न संभाव्यते तदविसृग्दारि। तदीयदारणनिषेधस्य स्वभङ्कुरमित्यनेनैव गतार्थत्वान्नात्र तन्निषेधापेक्षा। अविस्रग्दारीति पाठेऽपि अर्थस्तु स एव।

प्राचीनप्रवणमुदीचीनप्रवणं प्रागुदकप्रवणं वा।

पूर्वं समभित्युक्तं तत्रैतत्पक्षत्रयं विकल्पते। प्राचीनं प्रवणं क्रमनिम्नं स्थलं यत्र, उदीचीनं प्रवणं क्रमनिम्नं स्थलं यत्र, प्राक्चोदक्चानयोरन्तरालं प्रागुदक्। ईशानदिगित्यर्थः। प्रागुदक्प्रवणं क्रमनिम्नं स्थलं यस्य। प्रतिष्ठितत्वादिकं तु पक्षचतुष्टयसाधारणम्।

यस्मात्स्थलान्तरमभितो भवति।

यस्माद्देवयजनादन्यत्स्थलं स्थलान्तरमभितः समन्ततो भवति तादृशं देवयजनं स्वीकार्यमित्यर्थः।

न देवयजनमात्रं पुरस्तादतिशिनष्टि।

देवयजनस्य पुरस्तात्पुरोभागे। मात्रशब्दाद्देवयजनप्रमाणतो न्यूनाधिकस्थलातिशेषे न दोष इति गम्यते। देवयजनमात्रातिशेषनिषेधो दृष्टासंभवादृदृष्टार्थ एव।

पक्षान्तरमाह—

यावान्वा शम्यापातः।

यावति प्रदेशे शम्या प्रास्ता प्रक्षिप्ता भवति तावन्मात्रं वा नावशिनष्टीत्यर्थः। न देवयजनमात्रं पुरस्तादतिशिनष्टीत्यनेन विकल्पते।

यावत्समं प्रतिष्ठितं तद्धृतश्रीर्यजेतेति नित्ये काम्ये।

यावत्समभित्यत्र सर्वत इति शेषः। यत्सर्वतः समं प्रत्येव तिष्ठतीति श्रुतेः। यावत्समं स्थलं तावत्प्रतिष्ठितं देवयजनमित्यारूयायत इत्यर्थः। यावत्समं तावत्प्रतिष्ठितं देवयजनं तत्तत्र प्रतिष्ठिते देवयजने यजेतेति नित्ये विधौ काम्ये विधौ च यत्समं प्रतिष्ठितं तदेव देवयजनं गतश्रियो भवतीत्यर्थः। स्वभावतो यत्समं प्रतिष्ठित-

मित्यादिवान्वा शम्याप्रास इत्येतदन्तलक्षणलक्षितं तन्नित्यमगतश्रीगतश्रीसाधारणं देवयजनमिति निष्कृष्टोऽर्थः । शुश्रुवान्ग्रामणी राजन्यश्च गतश्रियः । शुश्रुवान्वेदत्रयाध्यायी । अहे बुध्निय मन्त्रं मे गोपायेति मन्त्रे वेदत्रयाध्यायिनः श्रीशब्दवाच्यता स्पष्टमाम्नाता । ग्रामं नयतीतिव्युत्पत्त्या ग्रामणीशब्देन ग्रामाधिकार्युच्यते । राजन्योऽभिषिक्तः क्षत्रियः । गता प्राप्ता श्रीर्यस्य स गतश्रीः । ये गत्यर्थास्ते प्राप्त्यर्था इति शास्त्रात् । देवयजने विशेषमाहाऽऽपस्तम्बः—यत्र वा बहवो ब्राह्मणाः सदस्यवत्साक्षिणः साधु ते कृत्यमत्रेति श्लाघयेरंस्तदुक्तलक्षणाभावेऽपि देवयजनं स्यात् । गरीयसोऽस्य गुणस्य लाभादिति भावः । तथा च देवयजनाधिकारे ब्राह्मणम्—विश्वे ह्येतद्देवा जोषयन्ते यद्ब्राह्मणा इति । यत्र क्व चाग्नीनाधायाग्न्याधानं कृत्वा यजते यागं करोति तद्देवयजनं नित्यमुक्तलक्षणाभावेऽपि । अयं कल्पः सोमपूर्वाधाने । अथ वा यत्र क्व चाग्नीनाधाय स्थापयित्वैव यजते तदेव देवयजनं नित्यमुक्तलक्षणाभावेऽपीति । अस्मिन्पक्षे देवयजनैकदेश एव प्राग्वंशाविरुद्धे स्थल एवाग्नीन्निधाय तत्रैव संकल्प्य राजपूजनादि मधुपर्कान्तं कृत्वा शालां प्रति गच्छेदिति प्रयोगः । अग्निसनाथदेशस्य का गुणापेक्षेति भावः । कल्याण्यो लक्षणवत्यो बह्व्यो गावश्चेत्स्युस्तदा दक्षिणाबाहुल्ये महागुणे सति देवयजनगुणाभावः क्रतोरकिंचित्कर इति भावः । यथोक्तलक्षणलक्षितदेवयजनालाभ एवैते पक्षा द्रष्टव्याः । उभयसत्त्वे त्वधिकगुणावहं भवतीत्यर्थतः ।

अतिप्रव्रश्च्येऽभिचरन्यजेत गुहाक्येऽभिशस्यमानः ।

अति अतिशयेन प्रवृश्च्य प्रवृश्च्य वृक्षांश्छित्त्वा छित्त्वैव देवयजनं कुर्युस्तदतिप्रव्रश्च्यम् । आपस्तम्बेन निर्व्रश्च्येऽभिचरन्यजेतेत्येतस्यैव निर्व्रश्च्यशब्देन व्यवहारः कृतः । एतत्स्वरूपमाह स एव—यस्मादृक्षान्वल्मीकानीति निर्हरेयुरथो अभिखनेयुरिति । वृक्षांश्छित्त्वा वल्मीकानि खात्वा देवयजनं कुर्युस्तान्निर्व्रश्च्यमिति तात्पर्यार्थः । गुहाक्ये गुहावने गुहाबहुले वन इति यावत् । यमकर्तारं पापस्य कर्तारमवदिशन्ति सोऽभिशस्यमानस्तस्य गुहावनं देवयजनं भवतीत्यर्थः । अत्राऽऽपस्तम्बो विशेषमाह—परोक्षं गुहावने याजयेदभिशस्यमानं परोक्षं पृष्ठान्युपेयुः सर्वमुपांशु क्रियेत स्थले यजेतेति । यथा लोका न पश्यन्ति तत्परोक्षमभिशस्यमानं याजयेत् । तस्य पृष्ठान्यपि परोक्षमुपेयुः । न स्वास्वृक्षु गायेयुः, सर्वं साङ्गं प्रधानमुपांशु क्रियेत, स्थल उच्छ्रितभूमौ यजेतेत्यर्थः । अन्यं विशेषमाहाऽऽपस्तम्बः—यत्रापो देवयजनं चान्तरेण पन्था अभिविधावेतस्मिन्याजयेद्यं कामयेत नैनमुत्तरो यज्ञ उपानमेदिति । बौधायनोऽपि कर्मा-

न्ते—अथातो देवयजनकल्पः स एतद्देवयजनं जोषयते पुरस्तादुदकमनूषरमनुपहतम-विल्लग्दार्यमङ्गुरं बहुलौषधि यत्रान्या अन्या ओषधयो व्यतिषक्ताः स्युः प्रागुदक्प्रवणं यथा चात्वालसारिणीरापः स्युर्नातिप्रवणं यस्मादन्यत्पुरस्तात्समन्तिकं देवयजनं न विन्देदिति । कात्यायनः—देवयजनं जोषयन्त उच्चतमꣳ समविभ्रꣳश्यभितो देवयजनमात्रदेशं पुरस्ताद्वर्जं प्राक्प्रवणमुदग्वा यत्किंचानूचानर्त्विज उद्धृतौषधिमूले परेते विमितं कुर्वन्तीति । लाट्यायनद्राह्यायणावाहतुः—प्रागुदक्प्रवणं देवयजनं लोमशमवृक्षꣳ समं पुरस्ताच्चास्याऽऽपः स्युस्तदभावे महावृक्ष उदपानो महापथो वा नचास्य स्थलतरमदूरे स्याद्देवयजनमात्रं च पुरस्ताद्विपर्यस्याभिचरणीयेषु स्थलादन्यद्देवयजनमात्रेति । लोमशं तृणौषधिबहुलम् । न यस्मिन्वृक्षाः स्युस्तदवृक्षम् । समं यत्राविषमा भूमिस्तादृशम् । अस्य देवयजनस्य पुरस्तादापः स्युर्भवेयुः । तदभावेऽपामभावे । उदपानं कूपः । देशान्तरगामी पन्था महापथः । यस्यातिशयितं स्थलं स्थलतरमदूरे समीपे समन्ततो न च स्यात्तद्देवयजनम् । चस्त्वर्थे । देवयजनमात्रं तु पुरस्तात्पुरोभागे देवयजनस्य न स्यात् । पूर्वमुक्तानि लक्षणानि तद्विपर्यस्तानि अभिचरणीयेषु ज्ञेयानि । न चास्य स्थलतरमदूरे स्याद्देवयजनमात्रं च पुरस्तादित्येतत्तु नैव विपर्यस्तं भवतीत्यर्थः ।

पुरोहविषि देवयजने याजयेदितिब्राह्मणव्याख्या-
तानि काम्यानि देवयजनानि तेषां याथाकामी ।

पुरोहविषि देवयजने याजयेदित्यारभ्य भवत्येवेत्येवमन्तं यद्ब्राह्मणं तेन व्याख्यातानि उक्तानि काम्यानि कामायार्हाणि तेषां मध्ये याथाकामी कामनानुरोधेन पक्षो भवतीत्यर्थः । आपस्तम्बोऽपि पुरोहविषीति काम्यानि देवयजनानीति । बौधायनोऽपि जुष्टे देवयजने शाला कारिता भवति पुरोहविषि देवयजने याजयेदित्येतेषां यज्जोषयत इति । यं कामयेतोपैनमुत्तरो यज्ञो नमेदभि सुवर्गं लोकं जयेदिति तं पुरोहविषि देवयजने याजयेत् । पुरोहविषि देवयजने याजयेदिति विधिः । यं कामयेतोपैनमुत्तरो यज्ञो नमेदभि सुवर्गं लोकं जयेदितीतिकामनावानधिकारी । यस्य होता प्रातरनुवाकमित्यारभ्य विपश्यतीत्यन्तेन पुरोहविषो देवयजनस्य लक्षणम् । उपैनमुत्तर इत्यारभ्य सुवर्गं लोकं जयतीत्यन्तेन फलम् । यस्य देवजनस्य मण्डपे प्रातरनुवाकमनुब्रुवन्होताऽग्निं पुरोवर्तिनमौत्तरवेदिकाग्निं ततः प्राग्वर्तिनं नदीतडागादिजलं ततोऽपि प्राग्दिश्युदितमादित्यं चाऽऽभिमुख्येन युगपत्पश्यति एतादृग्देवयजनं पुरोहविरित्युच्यते । उक्थ्यषोडश्यादिरुत्तरो यज्ञ एनं यजमानं प्रति उपनमेत्सुवर्गं लोकं चाभिजयेदित्यध्वर्युः कामयेत तदैतादृशे देवयजने याजयेदित्यर्थः । प्रातरनुवाकशब्देनाऽऽज्यप्रउगशस्त्रे ग्राह्ये नतु प्रातरनुवाको गृह्यते तस्य पुरोदयात्समाप्तेः । अन्यथाऽऽदित्यमभि

विपश्यतीत्येतद्विरुध्येत। अथ वाऽऽदित्यशब्देन तत्संबन्धिप्रकाशो ग्राह्यः। भ्रातृव्यवन्तमास्ते देवयजने याजयेत्। आस्ते देवयजने याजयेदिति विधिः। भ्रातृव्यवन्तमित्यनेनाधिकारी प्रदर्श्यते। पन्थां वाऽधिस्पर्शयेदित्यारभ्य न रथायैतद्वा आस्तं देवयजनमित्यन्तेन लक्षणम्। आप्नोत्येवेत्यारभ्याऽऽप्नोतीत्यन्तेन फलम्। प्रौढं राजमार्गं प्रौढं गतं वा विलोक्याऽऽधिक्येन तत्संस्पर्शो यथा भवति तथा देवयजनं निर्मातव्यम्। देवयजनगर्तयोर्मध्ये शकटस्य वा रथस्य वा यातवै गन्तुं यावदन्तरं पर्याप्तं तावदेवान्तरं कर्तव्यं सोऽयमधिस्पर्शः। एतदेवाऽऽप्तनामकं देवयजनमाप्नोति जयतीत्यर्थः। पशुकाममेकोन्नते देवयजने याजयेत्। एकोन्नते देवयजने याजयेदिति विधिः। पशुमानधिकारी। एकोन्नताद्वै देवयजनादङ्गिरसः पशूनसृजन्तेत्यर्थवादः। अन्तरा सदोहविर्धाने उन्नतꣳ स्यादेतद्वा एकोन्नतं देवयजनमिति लक्षणम्। पशुमानेव भवतीति फलम्। प्राचीनवंशात्पुरतः प्रत्यासन्नं सद उत्तरवेदेः पश्चात्प्रत्यासन्नं हविर्धानं तयोर्मध्यमुन्नतं यत्र तदेकोन्नतमित्यर्थः। सुवर्गकामं व्युन्नते देवयजने याजयेत्। व्युन्नते देवयजने याजयेदिति विधिः। सुवर्गकाम इत्यधिकारी। व्युन्नताद्वै देवयजनादङ्गिरसः सुवर्गं लोकमायन्नित्यर्थवादः। अन्तराऽऽहवनीयं चेत्यारभ्यैतद्वै व्युन्नतं देवयजनमित्यन्तेन लक्षणम्। सुवर्गमेव लोकमेतीति फलम्। उत्तरवेदिहविर्धानसदःप्राचीनवंशानां चतुर्णामन्तरालप्रदेशेषु त्रिषून्नतं यत्र तद्व्युन्नतमित्यर्थः। प्रतिष्ठाकामं प्रतिष्ठिते देवयजने याजयेत्। प्रतिष्ठिते देवयजने याजयेदिति विधिः। प्रतिष्ठाकाम इत्यधिकारी। एतद्वै प्रतिष्ठितमित्यारभ्य सममित्यन्तेन लक्षणम्। प्रत्येव तिष्ठतीति फलम्। एतस्यैव नित्यत्वमपीति सूत्रकृतैव प्रागुक्तम्। गतश्रियोऽप्येतदेव देवयजनमित्यपि प्रागुक्तम्। यत्सर्वतः सर्वप्रदेशे समं न तु कुत्रचिदपि उन्नतं कुत्रचिन्निम्नमित्यर्थः। यत्रान्या अन्या ओषधयो व्यतिषक्ताः स्युस्तद्याजयेदिति विधिः। अनेनैव लक्षणं चोच्यते। पशुकामोऽधिकारी। एतद्वै पशूनामित्यारभ्य पशुमानेव भवतीत्यन्तेन फलम्। यत्रगोधूमकोद्रवप्रियङ्ग्वादिबीजानि परस्परविलक्षणानि यस्मिन्प्रदेशे सहोप्यन्ते तत्र पशुकामं याजयेदित्यर्थः। एतस्य देवयजनस्य यद्यपि नाम नोक्तं तथाऽपि लक्षणत एव नामोन्नेयमन्यान्यव्यतिषक्तौषधि देवयजनमिति। नाम विना व्यवहारो न घटत इति हि प्रसिद्धम्। यं कामयेत निर्ऋत्याऽस्य यज्ञं ग्राहयेयमिति तं निर्ऋतिगृहीते देवयजने याजयेत्। निर्ऋतिगृहीते देवयजने याजयेदिति विधिः। यं कामयेत निर्ऋत्याऽस्य यज्ञं ग्राहयेयमिति कामनावानधिकारी। एतद्वै निर्ऋतिगृहीतं देवयजनं यत्सदृश्यै सत्या ऋक्षमित्येतेन निर्ऋतिगृहीतदेवयजनलक्षणम्। निर्ऋत्यैवास्य यज्ञं ग्राहयतीति फलम्। निर्ऋतिर्यज्ञविघाती राक्षसविशेषः। निम्नोन्नतत्वराहित्येन सदृश्याः सत्या भूमेः संबन्धि यदृक्षं तृणादिशून्यं स्थानं यत्र तन्निर्ऋतिगृहीतम्। व्यावृत्कामं व्यावृत्ते देवयजने याजयेत्। व्यावृत्ते देवयजने याजये-

दिति विधिः । व्यावृत्कामोऽधिकारी । यं पात्रे वा तल्पे वेत्यारभ्यैतद्वै व्यावृत्तं देवयजनमित्यन्तेन लक्षणम् । विपाप्मना भ्रातृव्येणेत्यारभ्य मीमांसन्त इत्यन्तेन फलम् । पात्रोपलक्षिते सहपङ्क्तिभोजने तल्पोपलक्षिते विवाहे बन्धुमित्रादयो यं पुरुषमुद्दिश्य मीमांसेरन्संदिह्येरन्स पुरुषः संदेहहेतोरपवादादेः पाप्मनो व्यावृत्तिं कामयते स व्यावृत्कामः । तं व्यावृत्तसंज्ञके देवयजने याजयेदित्यर्थः । औत्तरवेदिकादाहवनीयात्प्राचीनं स्थलं प्रवणं क्रमनिम्नं गार्हपत्यात्प्राजहितात्प्रतीचीनं स्थलं प्रवणं क्रमनिम्नं यत्र तद्व्यावृत्तसंज्ञकं देवयजनमित्यर्थः । पापेन वैरिणा च व्यावर्तते वियुज्यते । एनं यजमानं न पात्रोपलक्षिते सहपङ्क्तिभोजने न तल्पोपलक्षिते विवाहे च बन्धुमित्रादयो मीमांसन्ते संदिहन्ते । भूतिकामं कार्ये देवयजने याजयेत् । कार्ये देवयजने याजयेदिति विधिः । भूतिकामोऽधिकारी । कार्य इत्यनेनैव तल्लक्षणमप्युक्तं भवति । कार्यो वै पुरुषो भवत्येवेति फलम् । मृच्छिलादिभिरुन्नतीकरणीयं कार्यम् । उपनयनादिसंस्कारैरुन्नतीकरणीयः पुरुषस्तत्तस्यैदं योग्यं फलमिति दर्शयति भवत्येवेत्यनेन । भवत्येवेति ऐश्वर्यं प्राप्नोत्येवेत्यर्थः । तत्रैकोन्नतव्युन्नतव्यावृत्तेषु देवयजनेषून्नतत्वनिम्नत्वे अकृत्रिमे ज्ञेये । असंभवे कृत्रिमे अपि । एकोन्नते देवयजने स्वीक्रियमाणे प्राग्वंशमारभ्य यूपावटान्तं शौल्बेन मानेन तूष्णीमेव मानं कर्तव्यं सदोहविर्धानयोरन्तरौन्नत्यसंपादनाय । एवं व्युन्नतव्यावृत्तयोरपि यथालक्षणम् । कार्ये तु सर्वं मृच्छिलादिभिरुन्नतं स्थलं यावत्पर्याप्तं संपादनीयम् । निर्ऋतिगृहीतदेवयजनस्य निन्दितत्वादर्थादितरेषां प्रशस्तत्वं नहि निन्दा निन्दितुं प्रवर्ततेऽपि तु स्तुत्यं स्तोतुं प्रवर्तत इति न्यायेन । यजमानपरिक्रीतोऽध्वर्युः कथं यजमानायानिष्टं कामयेत । अथ वा याजयेदिति यावन्ति पदानि तेषु स्वार्थे णिच् । यं कामयेत नमेज्जयेत्, भ्रातृव्यवन्तं पशुकामं सुवर्गकामं प्रतिष्ठाकामं पशुकामं यं कामयेत निर्ऋत्याऽस्य यज्ञं ग्राहयेयं व्यावृत्कामं भूतिकाममित्येतेषु विभक्तिलकारव्यत्ययो ज्ञेयः । अस्मिन्पक्षे इच्छाया यजमानगतत्वं संपन्नं भवति । वैयधिकरण्यं च परिहृतं भवति । निर्ऋतिगृहीतदेवयजनस्याऽऽभिचारिके कर्मणि उपयोगश्च सिद्धो भवति । यजमानानिच्छायामध्वर्योरेवेच्छा कथं कर्माङ्गकाम्यदेवयजनप्रयोजिका भवेदित्यापत्तिरपि निरस्ता भवति । अत्र प्रतिग्रहप्रतिषेधार्थं तीर्थगर्भादि कथ्यते । तत्र ब्रह्मपुराणं—

प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ।
तत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥
तत्र न प्रतिगृह्णीयात्प्राणैः कण्ठगतैरपि । इति ।

अत्र प्रवाहमिति जलावध्युपलक्षणम् । तेन पुष्करादौ तडागवाप्यादिरूपे तीर्थे सर्वत्रैव जलमवधीकृत्य हस्तचतुष्टयाभ्यन्तरे निषेधः ।

दानधर्मे—भाद्रशुक्लचतुर्दश्यां यावदाक्रमते जलम् ।
तावद्भूमे विजानीयात्तदूर्ध्वं तीरमुच्यते ॥ इति ।

अत्र भाद्रशुक्लचतुर्दश्यां कदाचिद्वृष्टयभावे जलवृद्ध्यभावेऽपि तावत्पर्यन्तं देश उपलक्षणीयः । यदन्वक्षौ पुरोडाशावुपाश्शुयाजमन्तरा यजतीत्यत्र पुरोडाशद्वयाभावेऽपि यथा देश उपलक्ष्यते तथा । तीरावधिश्च ब्रह्मपुराणे—

सार्धं हस्तशतं यावद्भूमेस्तीरमुच्यते । इति ।

स्कान्दे—तीराद्गव्यूतिमात्रं तु परितः क्षेत्रमुच्यते ।
अत्र दानं जपो होमो गङ्गायां नात्र संशयः । इति ।

तटद्वये प्रत्येकं क्रोशद्वयाख्यगव्यूतिमात्रं क्षेत्रम् । अत एवोक्तं भविष्ये—

गङ्गासीमां न लङ्घन्ति सर्वपापान्यशेषतः ।
दिशो दश पलायन्ते सिंहं दृष्ट्वा यथा मृगाः ।
एकयोजनविस्तीर्णा क्षेत्रसीमा तटद्वयम् ॥ इति ।

गर्भे प्रतिग्रहनिषेधः प्रसिद्धनदीषु । प्रसिद्धतरगण्डक्यादिनदीषु तूभयतः सार्धहस्तशतमिति तीरेऽपि निषेध इति शिष्टाः । क्षेत्रे तु निषेधो गङ्गाविषयः । तत्रैव क्षेत्रकथनात् । यत्तु ब्रह्मपुराणे—

यत्र गङ्गा महादेवः स्वयंभूश्च तपोवनम् ।
सिद्धिक्षेत्रं तु तज्ज्ञेयं समन्तात्तु त्रियोजनम् ॥ इति ।

एकैकस्मिन्पार्श्वे सार्धयोजनमिति समन्तात्त्रियोजनमित्यर्थः । एतन्मरणेऽतिशयार्थं न तु प्रतिग्रहप्रतिषेधार्थम् । यदा तु समन्तादर्धयोजनमिति पाठस्तदा स्कान्देन तुल्यार्थतैव । गर्भतीरक्षेत्रेषु यागकरणे यष्टुर्महाफलमृत्विजां तु दोषोऽस्त्येव ।

न तीर्थे प्रतिगृह्णीयात्प्राणैः कण्ठगतैरपि ।
अपि कामातुरो जन्तुरेकां रक्षति मातरम् ॥
तीर्थे प्रतिग्रहो यस्तु तीर्थविक्रय एव सः ।
विक्रीतायां तु गङ्गायां विक्रीतः स्याज्जनार्दनः ॥
जनार्दने तु विक्रीते विक्रीतं भुवनत्रयम् ।
यस्तु लौल्याद्द्विजः क्षेत्रे प्रतिग्रहरुचिर्भवेत् ।
नैव तस्य परो लोको नायं लोको दुरात्मनः ॥ इति पाद्मे,

प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ।
तत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥
तत्र न प्रतिगृह्णीयात्प्राणैः कण्ठगतैरपि ।

इति ब्राह्मे च ऋत्विजां दक्षिणाप्रतिग्रहे दोषश्रवणात्। लौल्यं लोलुपता। आपत्तावत्रापि प्रतिग्रहो न दोषाय। तथा च वह्निपुराणम्—

हस्त्यश्वरथयानानि मृतशय्यासनादि यः।
कृष्णाजिनं च गृह्णाति अनापत्सु गतो द्विजः॥
तथोभयमुखीं गां च सशैलां मेदिनीं द्विजः।
कुरुक्षेत्रे च यद्दानं चण्डालात्पतितात्तथा॥
मासिके च नवश्राद्धे भुञ्जन्प्रेतत्वमाप्नुयात्। इति।

पाद्मे—प्रतिगृह्णीयाद्वृत्त्यर्थं ब्राह्मणः साधुतः सदा।
अश्वं च मणिमातङ्गतिललोहानि वर्जयेत्॥ इति।

वृत्तिर्जीवनम्। अथैतत्प्रायश्चित्तं प्रसङ्गादुच्यते। तत्र योगीश्वरः—

गोष्ठे वसन्ब्रह्मचारी मासमेकं पयोव्रतः।
गायत्रीजाप्यनिरतः शुध्यतेऽसत्प्रतिग्रहात्॥ इति।

मनुः—जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः।
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात्॥ इति।

असत्प्रतिग्रहादिति वचनद्वये पदच्छेदः। मासमित्यत्यन्तसंयोगवाचिन्या द्वितीयया त्रिसहस्रजपस्य प्रतिदिनव्यापित्वं गम्यते। जपः पयोव्रतं च दोषगुरु(गौरव)लाघवानुसारेण प्रत्येकं प्रत्येकं समुच्चितं वा कल्प्यम्। यत्तु षट्त्रिंशन्मते—

पवित्रेष्ट्या विशुध्यन्ति सर्वे घोराः प्रतिग्रहाः।
ऐन्द्रेण मृगारेष्ट्या कदाचिन्मित्रविन्दया।
देव्या लक्षजपेनैव शुध्यन्ते दुष्प्रतिग्रहात्॥

इति, तद्देशकालद्रव्यकर्तृणामन्यतरदुष्टत्वे ज्ञेयम्। अनयैव दिशा त्रिचतुःसंनिपाते प्रायश्चित्तगौरवं कल्प्यम्। पूर्वोक्तगायत्रीलक्षजपो वेति केचित्। तीर्थे प्रतिग्रहस्य सतोऽपि निषिद्धत्वादसत्प्रतिग्रहत्वमेव। तथा चेदमेव प्रायश्चित्तं भवति। तत्र तीर्थे कर्माङ्गदक्षिणाप्रतिग्रहस्य निषेधेऽपि वैधत्वात्प्रायश्चित्तलाघवं कल्प्यमिति ज्ञेयम्। प्रायणीयादिवसे प्रयाणकर्तव्यतायामरणीसमारोपस्यैव नियमेन विधानादत्रानियमः सूचितो भवति। तत्र बौधायनोऽरण्योः समारोपणमाह—आमावास्येन वा हविष्येष्ट्वा नक्षत्रे वाऽरण्योरग्नीन्समारोप्य शालाममिप्रेत्युत्तरेण शालां परीत्य पूर्वया द्वारा शालां प्रपाद्य गार्हपत्यस्याऽऽयतने मथित्वाऽग्नीन्विहृत्य मध्यमे वंशे राजानं प्रग्रथ्नन्तीति। कात्यायनः—समारोप्याग्नीञ्शालास्तम्भे पूर्वार्धे गृहीत्वाऽरणीपाणिराहेदमगन्मेति। द्वैधेऽपि—अग्नीनां हरणमित्यजस्रान्हरेदिति बौधायनोऽरण्योः समारोप्येति शाली-

किरिति। वाधूलोऽपि—अरण्योरात्मनि वाऽग्नीन्समारोह्य शकटेन प्रत्यक्षान्वा नयञ्छालामभिप्रैतीति। शकटेन हरणेऽनुच्छ्वासादि न। संनिधौ चेच्छकटं विनाऽपि प्रत्यक्षाणां नयनं, त्रिभिरुच्छ्वासैर्गमनं चेद्भवति तदैव शकटं विनाऽपि प्रत्यक्षाणां नयनम्। चतुर्थोच्छ्वासगमने पुनराधानमेव, कर्मार्थहरणेऽनुच्छ्वासचोदनाऽने (?)न चात्र वास्तोष्पतीयावसितहोमौ, एतस्य प्रयाणस्य कर्मार्थत्वात्। अत्रापि भवत इति केचित्। शालां प्रति गमने विशेषो द्वैधे—शालाया अध्यवसान इति स ह स्माऽऽह बौधायनो मध्यंदिने शालामध्यवस्येदापः पूर्वा गच्छेयुरन्वग्यजमानो राज्ञा चारणीभ्यां चेत्यत्रो ह स्माऽऽह शालीकिः कामं पूर्वाह्णे वाऽपराह्णे वा शालामध्यवस्येत्प्रोक्त्वस्तमयाद्दीक्षणीयां संतिष्ठापयियेदितीति। देवयजनाध्यवसानानन्तरं गोमयोपलिप्तेषु संस्कृतेष्वायतनेषु अग्नीन्विहरति।

अपराह्णे दीक्षते।

द्वादशसंभारयजुर्होमादि अपराह्ण एव केवलदीक्षाङ्गत्वात्। संभारयजुर्होमादेर्दीक्षाङ्गत्वे दीक्षिष्यमाणवचनं साधकमिति दर्शितमेव प्राक्। कूश्माण्डहोमस्तु पूर्वाह्ण एव तस्य तन्मात्राङ्गत्वाभावात्। स्वे दक्ष इत्यस्य सत्यमस्मीत्यन्तस्य पुरस्ताद्दीक्षणीयाया जपः प्रत्यगाशीर्भिन्नानकर्मकरणाज्जपतीति सूत्रात्। आपस्तम्बेन पुरस्ताद्दीक्षणीयाया आहवनीयमुपतिष्ठत इत्युपस्थाने विनियुक्तत्वादुपस्थानस्यापि जपरूपत्वस्योपोद्घाते दर्शितत्वादुपस्थाने विनियोगेऽपि न विरोधः। सूत्रस्य स्पष्टोऽर्थः।

यः कामयेत तपस्वी स्यामिति स पूर्वाह्णे।

काम्यः पक्षोऽयम्। अथ वा नेयं स्वतन्त्रा कामना किंतु तद्दिवसे दीक्षितनियमेषु कालाधिक्यात्पूर्वाह्णदीक्षाप्रशंसामात्रम्। स यजमानो वाग्यतस्तपस्तप्यमान आस्त इति शास्त्रान्तरदर्शनात्। पूर्वाह्णापराह्णदीक्षाविधिभ्यामिदं ज्ञायते यस्मिन्विभागे पूर्वाह्णापराह्णशब्दाभ्यामंशौ गृह्येते सोऽत्र विभागो ग्राह्य इति। स च द्वेधा विभागस्त्रेधा विभाग एव वा। पूर्वाह्णो वै देवानामपराह्णः पितृणामिति द्वेधाविभागे पूर्वाह्णापराह्णशब्दाभ्यामंशद्वयग्रहणमस्ति। अतो द्वेधाविभागस्य ग्रहणम्। एवं पूर्वाह्णो वै देवानां मध्याह्नो मनुष्याणामपराह्णः पितृणामिति त्रेधाविभागेऽपि पूर्वाह्णापराह्णशब्दाभ्यामंशद्वयग्रहणमस्ति। अतस्त्रेधाविभागस्य वाऽपि ग्रहणम्। प्रातःसंगवमध्याह्नापराह्णसायाह्नात्मकेपञ्चधाविभागे तु अपराह्णशब्देनैकांशस्यैव व्यवहारोऽस्ति न तु पूर्वाह्णशब्देनान्यांशस्यापि व्यवहारोऽस्ति। अतः सोऽत्र न गृह्यते।

---

१ च. °प्रागस्त°।

यदस्य यज्ञार्थं तन्निरादिश्य शेषाद्भुञ्जतेऽनि-
रादिश्य वा तस्य न भुञ्जते प्रागग्नीषोमीयात्।

अस्य दीक्षितस्य यद्द्रव्यमाज्यपशुपुरोडाशीयादि यज्ञार्थं कल्पितं तन्निरादिश्य निर्दिश्याऽऽज्ये पशवः पुरोडाशीयादि यज्ञार्थमेतद्द्रव्यं तन्मध्य एतावद्यज्ञ उपयोक्ष्यन्त एतावद्यज्ञार्थं शेषाद्ब्राह्मणा भुञ्जीरन्निति निरादिश्य, अन्तर्भावितण्यर्थोऽत्र विवक्षितो निरादेश्येति निरादेशनं कारयित्वेति तदर्थः। अत्र प्रयोज्यो यजमानः प्रयोजका ऋत्विजः। तेनर्त्विग्भिः स्वार्थं निरादेशनं कारणीयमित्यर्थः सिद्धो भवति। अन्यथा निरादिश्य भुञ्जत इत्यनयोः समानकर्तृकत्वानुपपत्तेः। अनिरादिश्येत्यत्रापि अन्तर्भावितो णिच्, अनिरादेश्येति निरादेशनमकारयित्वेति तदर्थः। यदि सर्वैरत्र भोक्तव्यमिति सर्वेषामृत्विगादीनामिच्छा तदा निरादेशनं कारयितव्यं भोक्तव्यं च। यदि नेच्छा तदा तु निरादेशनं न कारयितव्यं न च भोक्तव्यम्। निरादिश्य शेषाद्भुञ्जत इत्येतावाने(वतै)वानिरादिश्य न भुञ्जत इत्यार्थिकव्यतिरेकार्थसिद्धौ तस्योपादानमिच्छाधीनं स्वतन्त्रं तुल्यमेतत्पक्षद्वयमिति ज्ञापयितुम्। अन्यथा वैयर्थ्यं दुष्परिहरं स्यात्। यज्ञार्थमेतावद्द्रव्यमिति निश्चितद्रव्यादवशिष्टोंऽशः शेषशब्देनोच्यते। भोजननिषेधावधिमाह—प्रागग्नीषोमीयादिति। अग्नीषोमीयाद्यागादित्यर्थः। स च पत्नीसंयाजान्तो वपायागान्तो वा। तथा च धर्मसूत्रम्—अग्नीषोमीयसंस्थाया-मेव दीक्षितस्य भोक्तुः हुतायां वपायां क्रीते वा राजनि यज्ञार्थं वा निर्दिष्टे शेषाद्भुञ्जीरन्निति ब्राह्मणमिति। क्रीते वा राजनीति भोक्तुरापत्तावयं पक्षः। अग्नीषोमीयस्य पशोः संस्था समाप्तिस्तस्यां सत्यामेव दीक्षितस्य दीक्षितसंबन्ध्यन्नं भोक्तव्यमनिरादेशेऽपि न तु निरादेशं विनैतत्पूर्वम्। अथ वाऽग्नीषोमीयस्य पशोर्वपायां हुतायां सत्यां वा। राजनि क्रीते वा। एते पक्षा आपदनापदनुसारेण व्यवस्थापनीयाः। यज्ञार्थं निर्दिष्ट एतेभ्यः पूर्वमपि भोक्तव्यम्। अत्र वचनमृत्विगर्थं तत्रेयान्परमेद ऋत्विगर्थनिरादेशने यजमानस्य प्रयोज्यत्वम्। इतरार्थनिरादेशने प्रयोज्यत्वं तु आज्यं पशवः पुरोडाशीयादि यज्ञार्थमेतद्द्रव्यं तन्मध्य एतावद्यज्ञ उपयोक्ष्यत एतावदेव यज्ञार्थं शेषादृत्विजो भुञ्जीरन्निति। देशने प्रयोज्यत्वं नरा(?)आज्यं पशवः पुरोडाशीयादि यज्ञार्थमेतद्द्रव्यं तन्मध्य एतावद्यज्ञ उपयोक्ष्यत एतावदेव यज्ञार्थं शेषाद्ब्राह्मणाः सर्वे भुञ्जीरन्निति निरादेशनवाक्यद्वयम्। ऋत्विगर्थनिरादेशनमृत्विक्कर्तृकप्रकरणाधीनमित्येतदनित्यम्। द्वितीयं तु स्वकर्तृकत्वाद्ब्राह्मणार्थमावश्यकत्वाच्च नित्यमेव। एवंरीत्यैवोभयत्र विधानं सप्रयोजनं भवति नान्यथेति द्रष्टव्यम्। अपराह्णे दीक्षत इत्यन-

---

१ क. ड. ंश्य न। २ ञ्च° म्। आ°।

न्तरं विधानादिदं ज्ञायते दीक्षाप्रभृतिकर्मोपयोगिद्रव्यनिरादेशनमावश्यकम् । संभारय-जुर्होमादेरपि दीक्षार्थत्वात्तदर्थस्यापीति । तथा च कूश्माण्डहोमावशिष्टाज्यस्य स्थापितस्य दीक्षोत्तरमशने निरादेशनाभावेऽपि न दोष इति । अनिरादेशने भोजनं तु स्वस्वान्नस्यर्त्विजाम् । अनिर्दिष्टदीक्षितान्नभोजनप्रायश्चित्तमुक्तमापस्तम्बस्मृतौ—

यज्ञियान्नं नवश्राद्धं संग्रहे चैव भोजनम् ।
स्त्रीणां प्रथमगर्भे च द्विजश्चान्द्रायणं चरेत् ॥ इति ।

यज्ञियान्नं यज्ञसंबन्ध्यन्नम् । यज्ञसंबन्ध्यन्नस्याभोज्यता सूत्रैकवाक्यत्वायाग्नीषोमीयसमाप्तिपर्यन्तमग्नीषोमीयवपायागपर्यन्तं वा द्रष्टव्या । संग्रहो विवाहः ।

स्वस्त्युत्तराण्यशीयेति सर्वत्र केशेषूप्यमानेषु जपति ।

सर्वत्रेतिवचनं समावर्तनचौलगोदानसंबन्धिकेशवपनेष्वप्येतज्जपप्राप्त्यर्थमनूबन्ध्यावपायाः हुतायां दक्षिणस्यां वेदिश्रोण्यां परिश्रिते यजमानस्य केशश्मश्रूणि वापयत इत्यस्मिन्नमन्त्रकेऽपि वपन आश्वमेधिके केशश्मश्रूणि वापयते नखानि निकृन्तते दतो धावते स्नात्यहतं वासः परिधत्ते इत्येतस्मिंश्चामन्त्रकेऽपि वपने च स्वस्त्युत्तराण्यशीयेति जपप्रापणार्थं वा । उप्यमानेष्वितिवर्तमाननिर्देशाद्वपने क्रियमाण एव जपो न तु तत्पूर्वं न चानन्तरम् । अशुचित्वेऽपि वचनान्मन्त्रजपः । एतावानेव मन्त्रः ।

कृते नापितकृत्य औन्दुम्बरेण दतो धावते लोहितमनागमयन् ।

नापितस्य कृत्यं नापितकृत्यं तस्मिन्नापितकृत्ये । नापितकृत्य इत्यनेनाध्वर्युकर्तृकमिदं वपनकृत्यमित्यवगम्यते । नापितकर्तृकत्वे नापितकृत्ये कृत इत्येवं प्रयोगोऽसंगतः स्यात् । नापितकर्तृकत्वं चेदिष्टमभविष्यत्तदा जाते नापितकृत्य इत्येवावक्ष्यत् । नहि-तथा सूत्रकृतोक्तम् । अतोऽध्वर्युकर्तृकमेवेदं वपनमिति । औदुम्बरग्रहणमितरवृक्षव्यावृत्त्यर्थं ताम्रव्यावृत्त्यर्थं च । अविशेषात्काष्ठं पर्ण वा ग्राह्यम् । दतो दन्तान् । धावते शोधयति । इदं च दन्तधावनं कर्माङ्गं न तु मुखदौर्गन्ध्यादिनाशार्थम् । तस्य प्रातः कृतेन दन्तधावनेन निषिद्धतिथ्यादिवशेन दन्तधावनकाष्ठस्थानीयद्वादशगण्डूषैर्वा तस्य जातत्वात् । एतस्य दन्तधावनस्य वैधत्वान्न स्मार्तनन्दादिनिषेधस्यात्र प्रवृत्तिः ।

यत्तु—दीक्षितो ब्रह्मचारी च यतिश्च विधवाऽङ्गना ।
नित्यमद्याद्दन्तकाष्ठममायां तु विवर्जयेत् ॥

इति स्मृतिवचनं तन्मन्त्रदीक्षापरं ।

गृहीतमन्त्रदीक्षस्तु दन्तानां धावनं चरेत् ।
नित्यं वेदाङ्गुलैः काष्ठैरमायां तु विवर्जयेत् ।

इतिमन्त्रवचनसंवादान्न तु यज्ञसंबन्धिदीक्षापरत्वे(त्व) । दतो धावत इति श्रौतविधिना साकं विरोधापत्तेः । तथा चामायां दीक्षायां दन्तधावनं भवत्येव । दन्तधावने विशेषमाहाङ्गिराः—

तत ऊर्ध्वक्रमेणैव धावयेच्छाखया दतः ॥ इति ।

पूर्वमूर्ध्वदन्तान्संशोध्य पश्चादधोदन्तांश्शोधयेदित्यर्थः ।

दन्तधावनकाष्ठप्रमाणं कौर्मे—

मध्याङ्गुलिसमं स्थूलं द्वादशाङ्गुलसंमितम् ।
सत्वक्कं दन्तकाष्ठं स्यात्तदग्रेण तु धावयेत् ॥ इति ।

इदं विषमदन्तस्य, इतरस्य तु कनिष्ठिकाग्रसमं स्थूलम् ।

सूक्ष्मं तु हीनदन्तस्य समदन्तस्य मध्यमम् ।
स्थूलं विषमदन्तस्य त्रिविधं दन्तधावनम् ॥ इति विष्णूक्तेः ।

विष्णुः—द्वादशाङ्गुलिकं विप्रे काष्ठमाहुर्मनीषिणः ।
क्षत्रविट्शूद्रजातीनां नवषट्चतुरङ्गुलम् ॥ इति ।

गर्गः—चतुरङ्गुलमानं तु नारीणां नात्र संशयः ॥ इति ।

इदं पत्न्या दन्तधावन उपयुज्यते । दन्तधावनं प्रकृत्य व्यासः—

प्रक्षाल्य पादौ हस्तौ च मुखं च सुसमाहितः ।
दक्षिणं बाहुमुद्धृत्य कुर्याज्जान्वन्तरा तु तत् ॥ इति ।

आश्वलायनः—राक्षस्यामुत्सृजेत्काष्ठं दिशि संमृज्य वा शुचौ ॥ इति ।

संमृज्य प्रक्षाल्य ।

विष्णुः—प्राच्यां सौख्यं दन्तधावे शरीरारोग्यमेव च ।
दक्षिणे तु तथा कष्टं पश्चिमे तु पराजयः ॥
उत्तरे तु गवां नाशः स्त्रीणां परिजनस्य च ।
पूर्वोत्तरे तु दिग्भागे सर्वान्कामानवाप्नुयात् ॥ इति ।

अङ्गिराः—प्रक्षाल्य भक्षयेत्काष्ठं प्रक्षाल्यैव तु संत्यजेत् ।
आयुरित्यादिमन्त्रोऽयमुक्तः शाखामिमन्त्रणे ॥ इति ।

स च मन्त्रः पुराणे—आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ इति ।

दन्तधावनमन्त्रस्तु—मुखदुर्गन्धिनाशाय दन्तानां च विशुद्धये ।
ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥ इति पुराणोक्तः ।

तूष्णीं वा दन्तधावनम् । मुखदौर्गन्ध्यसंभावनायामयं मन्त्रोऽन्यथा तूष्णीमेवेति ।

शौनको दन्तधावनोत्तरकृत्यमाह—

प्रश्चाद्द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥ इति ।

लोहितं रक्तम् । अनाममयन्निर्गमयन् । दद्भ्य इति शेषः । तेषामेव संनिहितत्वात् । पूर्वत्र दीक्षणीयायां कृतायां यदि लोहितं बहिर्निर्गतं चक्षुर्विषयं स्यात्तदा

सर्वेषां दीक्षितधर्माणां प्रवृत्तत्वेन नमो रुद्रियाभ्योऽद्भ्यः स्वाहेति जपो भवति। तस्यामकृतायां दीक्षितधर्माणामप्रवृत्तत्वेन न जपः। यदि दन्तेभ्यो बहिर्निर्गतं जठरे गच्छति तदा प्रायश्चित्तं कृत्वाऽग्रिमं कर्म कार्यं तस्मिन्नकृते तद्विनाऽधिकारामावात्। तस्माद्यथा लोहितं न निर्गच्छति तथैव दन्तधावनं कर्तव्यम्। तच्च प्रायश्चित्तं षट्त्रिंशन्मत उक्तम्। केशनखरुधिराशने मतिपूर्वे त्रिरात्रमज्ञानादुपवास इति।

हिरण्यवर्णाः शुचयः पावका इत्येषा हिरण्यवर्णाः शुचयः पावका
वृत्रं भित्त्वा प्रचक्रमुर्हित्वाऽवद्यमापः। शतं पवित्रा विततास
तासां ताभिर्नो देवः सविता पुनातु। आपो अस्मान्मातरः
शुधन्त्विति च शङ्खिनि ह्रदे हिरण्यमवधाय स्थावरासु स्नाति।

स्नानमन्त्रानाह एते। मन्त्रत्रयान्ते सकृदेव स्नानम्। इत्येषेतिवचनमन्यत्र प्रसिद्धस्य मन्त्रचतुष्टयग्रहणस्यानुवाकग्रहणस्य वाऽत्र प्राप्तिरितिशङ्कावारणार्थम्। तृतीयस्य रिप्रमित्यन्तः। शङ्खिनि ह्रदे स्नाति केवलं स्थावरासु चेत्स्नाति तदा तासु हिरण्यमन्तर्धायैव स्नातीति। अथवा शङ्खिनि ह्रदे याः स्थावरा आपस्तास्वेव हिरण्यमन्तर्धायैव स्नातीति। स्थावरा अशोष्याः। ह्रदशब्दसांनिध्यात्। स्थावरा निवृत्तगतय इत्यस्मिन्कल्पे तटाके सरसि वाऽपि स्नानम्। अस्मिन्पक्षे पूर्वव्याख्यानार्थ एवात्रानुकूलो भवति। स्मृतौ दीक्षार्थस्नानं देवखाते नद्यां गङ्गायां संगमे वा महाफलमित्युक्तं—

देवखातेऽथवा नद्यां गङ्गायां संगमेऽपि वा।
स्नानं दीक्षार्थं कुर्वीत महाफलमुदाहृतम्॥ इति।

नद्यो महानद्यो गोदावरीभीमाद्या द्वादश। तथा च महानदीः प्रकृत्य ब्रह्मपुराणम्—

गोदावरी भीमरथी तुङ्गभद्रा च वेणिका।
तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः॥
भागीरथी नर्मदा च यमुना च सरस्वती।
विशोका च वितस्ता च विन्ध्यस्योत्तरतः स्थिताः॥ इति।

भागीरथीगोदावरीवेणा इति तिस्रो गङ्गाः। तथा च ब्रह्मपुराणम्—

तिस्रो नद्यो महापुण्या वेणा गोदाऽथ जाह्नवी।
गां हरीशाङ्घ्रितः प्राप्ता गङ्गा इति हि कीर्तिताः॥ इति।

गां हरीशाङ्घ्रिकात्प्राप्ता इति पाठान्तरम्। हरेश्चरण ईशस्य शिरस्तस्माद्गां पृथिवीं प्राप्ता इत्यर्थः। शङ्खशब्दः स्वच्छं जलं लक्षयति। शङ्खशब्दान्मत्वर्थीय इनिः। शङ्खः शङ्ख इव स्वच्छं जलमस्मिन्नस्तीति शङ्खी तस्मिन्नित्यर्थः। अगाधं जलं यत्र स ह्रद इत्युच्यते। ह्रदस्यैव विशेषणं शङ्खिनीति।

प्रकारान्तरमाह—

यल्लोमशमवकाशं तीर्थं तस्मिन्स्नाति कुण्डे स्नातीत्येकेषाम्।

यज्जलं लोमशं यत्र तृणानि भवन्ति तल्लोमशं लोमानि विद्यन्ते यस्मिंस्तीर्थे तल्लोमशं, लोमशब्दस्तृणपरः। लोमभ्योऽधिस्तम्बयजुर्हरतीतिदर्शनात्। लोमादिपामादीत्यनेन मत्वर्थीयः शः। अवकाशमवकाः शेवालाः। केचिच्छरोऽवका इति अपाः शरोऽवका इति लिङ्गाद्व्याचक्षते। अवकाभिराशो व्याप्तिर्यस्य तदवकाशम्। अथवाऽवकाशोऽस्यास्तीत्यवकाशः। अर्शआदिस्वान्मत्वर्थीयोऽच्प्रत्ययः। सुखेनावतर्तुमवकाशो यस्मिन्भवति तादृशमिति यावत्। एतादृशं सत्तीर्थं यत्र लोकः स्नाति तस्मिन्वा स्नायादित्यर्थः। न तु महामहिमास्वप्स्वेव स्नायादिति नियमः। तासां संभवे तु तास्वेव स्नानमधिकम्। कुण्डं तल्लक्षणद्रोणी तस्यां वा स्नातीत्यर्थः। स्नातीत्यस्या मध्ये पुनरावृत्तिः पक्षान्तरं स्वतन्त्रमिदमितिप्रदर्शनार्थम्। कुण्डे स्नातीत्यत्र मण्डूकप्लुत्या हिरण्यमवधायेत्यनुवर्तते। तथा चाऽऽपस्तम्बः—कुण्डे हिरण्यमवधाय तस्मिन्स्नातीति वाजसनेयकमिति कूपे नैवैतत्स्नानं वाजसनेयेमतात्। तीर्थं प्रति गमने विशेष उक्तो द्वैधे—तीर्थगमन इति स ह स्माऽऽह बौधायनः प्रदक्षिणमावृत्येतरत्तीर्थं गच्छेदथामुतोऽपसलैरावर्ततेत्यत्रो ह स्माऽऽह शालीकिरपसलैरावृत्येतस्तीर्थं गच्छेदथामुतः प्रदक्षिणमावर्ततेतीति। इतो वपनप्रदेशात्। अमुतस्तीर्थप्रदेशात्। यदि तीर्थं दूरे भवति तदोपाय उक्तो बौधायनेन—अथ यदि दूरे तीर्थं भवत्युत्तरेण शालां द्वौ कटपरिवारौ कुर्वन्ति पूर्वं यजमानायापरं द्वितीयं पत्न्यै तयोः प्राचीद्वारौ कुर्वन्ति तदुदकुम्भौ निधापयतीति। तत्तयोः कटपरिवारयोरुदकुम्भौ निधापयति परिकर्मभिः स्नानार्थमित्यर्थः। अस्मिन्स्नाने यत्राऽऽपः सुखाः सुखावगाहा इत्यारभ्य पवमानः सुवर्जन इति चैतेनानुवाकेन स्नात्वेत्यन्तं सर्वं स्नानतन्त्रं भवति। यत्राऽऽपः सुखाः सुस्वावमाहास्तदवगाह्येत्यस्मिन्नवगाहशब्दवाच्ये स्नाने हिरण्यवर्णा इत्यादिमन्त्रत्रयं दीक्षार्थत्वेन विधीयते। अवगाह्येत्यस्य स्नात्वेत्यर्थः। एतेनानुवाकेन स्नात्वेत्यत्रत्यस्नानशब्दस्य मार्जयित्वेत्यर्थ इति पदद्वयस्य स्नानप्रतिपादके सूत्रे संस्काररत्नमालायामर्थः कृतोऽस्ति स तत्र द्रष्टव्यः। मध्याह्नस्नानदीक्षार्थस्नानयोः कालैक्ये प्रसङ्गसिद्धिर्मध्याह्नस्नानस्येति।

उदाभ्यः शुचिरापूत एमीति स्नात्वोद्राहते।

पुनः स्नात्वेतिवचनं स्नानाङ्गतर्पणव्यावृत्त्यर्थम्। एमीतिलिङ्गादुद्राहने मन्त्रः। उद्राहनं तीरं प्रत्यागमनम्। ततो यन्मया दूषितं तोयमिति यक्ष्मोद्देशेन तीरे जलं निक्षिपति। पूर्वत्र दीक्षणीयाकरणपक्षे तु माध्याह्निकस्नानाभाव एव। ततः स्मार्तं शिराचमनम्।

उपस्पृश्याऽऽचम्य ॥ ३ ॥

कुत्रचिदप इति नोच्यते कुत्रचिदुच्यते यत्र नोच्यते तत्रापामुत्पवनं कृत्वोपयोक्तव्या यत्रोच्यते तत्र नेतीति सार्वत्रिकम्। प्रकृतेऽप्शब्दाभावात्पात्रे जलं गृहीत्वा तासां पवित्राभ्यामुत्पवनं कृत्वा ता हस्तेनोपस्पृश्येति सिद्धं भवति। आचम्येत्यत्राऽऽ आचम्येति पदच्छेदः।स्मृत्युक्तप्रमाणसिद्धजलमाचमने न विवक्षितं किंतु अधिकमपि भवतीत्याज्ञा बोध्यते। तथा च चुलुकमात्रं जलं पात्रे गृहीतं हस्तेनैव सकृत्प्राश्नातीत्यर्थः सिद्धो भवति। अनेनाऽन्तरतो मेध्यो भवति। तथा च श्रुतिः—अपोऽश्नात्यन्तरत एव मेध्यो भवतीति। वसनस्याऽन्तेन प्रतिच्छाद्येति बौधायनः। जलान्तःस्थितस्यैव चेदिदमाचमनं तदाऽत्र माध्याह्निकं कर्म, यदि बहिरागत्याऽऽचमनं तदा वक्ष्यमाणनीविपरिकल्पनान्ते माध्याह्निकं कर्मेति ज्ञेयम्। ब्रह्मयज्ञस्तु कृत्वारम्मात्प्राक्प्रातरेव कर्तव्यः।

दीक्षाऽसि तनूरसि तां त्वा शिवाꣳ स्योनां
परिधिषीयेति क्षौमं वासोऽहतं महत्परिधत्ते
सोमस्य तनूरसि तनुवं मे पाहीति च।

क्षौमाहतशब्दौ व्याख्यातौ। महच्छब्देनात्र वाससः स्थौल्यमुच्यते। दैर्घ्यस्यार्थादेव सिद्धेः। तेन वासोऽत्र स्थूलं भवति दृढमिति यावत्। एतेन सूक्ष्मस्याहृदत्वाद्व्यावृत्तिः कृता भवति। दीक्षाऽसीति दीक्षाऽसि तपसो योनिरित्याच्छिद्रिकप्रपाठकपठितस्य सन्त्वित्यन्तस्य प्रतीकमिदम्। उक्तश्चाऽऽपस्तम्बेनाप्ययं मन्त्रः परिधाने। तनूरसि तां त्वामिति सौत्रो द्वितीयः। सोमस्य तनूरसि तनुवं मे पाहीति संहितास्थस्तृतीय इत्येवं मन्त्रत्रयं परिधाने। प्रादक्षिण्यं परिभाषासिद्धम्। प्रदक्षिणमहतं वासः परिधत्त इत्येवापठद्बौधायनः। चकारः पूर्वाभ्यां सह समुच्चयार्थः। अथवा चकारो दीक्षाऽसि तपसो योनिरित्याच्छिद्रिकमन्त्रसमुच्चयार्थः। अस्मिन्पक्षे प्रथममन्त्रो दीक्षाऽसि तनूरसीत्ययमेक एव। दीक्षाऽसि तपस इत्यन्तं मन्त्रस्तृतीयः। सोमस्य तनूरसि तनुवं मे पाहीति च क्षौमं वासोऽहतं महत्परिधत्त इत्यन्वयः।

सूर्यस्य वासोऽसि नीविर्नामोर्जमस्मासु
धेहीति तस्य नीविमनुपरिकल्पयते।

सूर्यस्य वास इव वासोऽसीत्यर्थः। एतेन वाससः सोमदेवत्यत्वात्कथं सूर्यदेवत्यत्वमिति शङ्का निरस्ता भवति। तस्य परिहितवाससः। वासोन्ताप्रकाशनार्थोऽभ्यन्तरगोपनाय वेष्टितवसनग्रन्थिर्नीविस्तामनु पश्चात्कल्पयत इत्यर्थः। परिशब्दो दार्ढ्यार्थः। नीविमित्येकवचनं जातौ। तत्र कच्छचतुष्टये द्वौ नीविशब्दवाच्यौ कच्छौ। तत्र पश्चात्कच्छ एव मुख्यत्वात्पूर्वम्।

---

१ क. ङ. °ति नी°।

मुक्तकच्छो यदा कुर्यात्कर्म काम्यं क्वचिन्नरः ।
वृथा भवति तत्सर्वं गुह्यस्थानप्रदर्शनात् ॥ इति गोभिलोक्तेः ।

नचात्राग्रकच्छस्य मुख्यत्वमस्त्विति वाच्यम्। गुह्यस्थानप्रदर्शनादिति हेतुना तस्यैव मुख्यताया अवगमात्। काम्यग्रहणान्नित्यनैमित्तिकयोर्नायं नियम इति द्रष्टव्यम्। एकवचनात्सकृदेव मन्त्रः। स चाऽऽद्यायां नीव्याम्। परिधानीयवस्त्रं परिधानाय दक्षिणतो न प्रसार्य, प्राङ्मुख उदङ्मुखो वा परिदधीत नीविकल्पनं प्राक्संस्थोदक्संस्थभावेनेत्यादि स्मार्तं सर्वमुपसंहार्यम्। आचम्येति ह्यपा वासःपरिधानस्याप्सु दीक्षासंबद्धत्वं बोध्यते। तेन दशपेयेऽपराह्णे दशपेयाय दीक्षतेऽप्सु दीक्षायाः स्थाने षट्पुण्डरीकां द्वादशपुण्डरीकां वा हिरण्यस्रजं यजमानः प्रतिमुञ्चत इत्यत्राशनान्तायां अप्सु दीक्षायाः पुण्डरीकस्रक्प्रतिमोचनेन वासोनिवृत्तिमिव वासोदीक्षाया अपि निवृत्तिः सिद्धा भवति।

ऊर्जे त्वेत्यश्नात्यूर्जमस्मासु धेहीति वा यदस्य मनसः
प्रियं सर्पिर्मिश्रं दधि मधु वाऽभ्युपसेकम्।

यदस्य मनसः प्रियं सर्पिर्मिश्रं दधि मधु वाऽभ्युपसेकं तदूर्जे त्वेत्यश्नातीत्यन्वयः। यत्तद्योर्नित्यसंबन्धादार्थिकस्तच्छब्दान्वयः। यदन्नमस्याशनीयपदार्थसमूहस्य मध्ये मनस आत्मनः प्रियं तदश्नातीत्यर्थः। न तु यजमानस्येतीदमोऽर्थः स्वस्मिंस्तस्य प्रयोगाभावात्, मन शब्दस्य वैयर्थ्यापत्तेश्च। मनस आत्मवाचित्वमात्मानमात्मना वेत्सीत्यादौ दृष्टम्। मनसः प्रियं हविष्यमेवेति केचित्। सर्वस्याहविष्यस्यापि अन्नाशनमित्येतदर्थप्राप्त्यर्थं यदस्य मनसः प्रियमितिवचनमित्यन्ये। यस्याहविष्यस्यापि मसूरवृन्ताकादेस्तिथिविशेषपरिनिषेधेनेतरकाले रागप्राप्ते भोजनेऽशनाभ्यनुज्ञा यथा तथैतस्य भोजनस्य रागप्राप्तस्य कर्माङ्गत्वस्यापि सत्वात्तिथिविशेषनिषेधेनेतरकालेऽभ्यनुज्ञाया अप्रवृत्तौ तत्प्राप्त्यर्थं यदस्य मनसः प्रियमितिवचनमित्येवमेव व्याख्यातव्यम्। सर्वा हविष्याशनकल्पना तु पलाण्ड्वादिष्वतिप्रसक्तत्वेनाप्रयोजिकैव। इष्टापत्तौ तु पलाण्ड्वाद्यशनस्य पुनरुपनयननिमित्तत्वेन मध्ये तदापत्तिः। नचैतद्व्यतिरिक्तसर्वाहविष्याशनबोधनार्थमेतद्वचनमिति वाच्यम्। एतदपेक्षया स्वरूपाहविष्याशनपरत्वस्यैव युक्तत्वात्। न च दोषाभाव एवात्र वचनात्कल्पनीय इति वाच्यम्। स्पष्टवचनाभावेन बहुषु दोषाभावकल्पनापेक्षया यदशने प्रायश्चित्तप्रसक्त्यभावस्तावत्स्वेवाहविष्येषु

* अत्राऽऽत्मशब्दस्य मनोवाचित्वेऽपि मनःशब्दस्याऽऽत्मवाचित्वं कथमिति चिन्त्यं नामधेयशब्दस्थले हरिशब्दस्याश्ववाचित्वेऽपि अश्वशब्दस्य हरिवाचित्वाभावात्।

१ च. °भाव्य। २ च. अप्राप्तौ।

पदार्थेषु दोषाभावप्रतिपादनस्य युक्तत्वात् । मसूरवृन्ताकादीनामशने तिथिविशेषपरत्वेन निषेधस्तु अत्रापि अस्त्येव । रागप्राप्ते भोजने कालो मन्त्रविशेषश्चानेन विधीयते । सर्पिःशब्दो लौकिकाज्यमाचष्टे । अत एव सूत्रकृता सायंदोहाभिधारणे तूष्णीकेनेति संस्कारार्थसर्पिषि विशेषणं दत्तम् । दधि मधु वाऽभ्युपसिच्य सर्पिर्मिश्रं स्वस्य यदन्नं भवति तदश्नातीत्यर्थः । दधि मधु चेति पाठ उभयोः समुच्चयः । समासाभावान्नानयोः सहभावः । येषु पदार्थेषु यदतीव मनसः प्रियमेतेष्वेकं तस्याशनमावश्यकमिति अनेन सूत्रेण प्रदर्श्यते । मनसः प्रियमितिवचनं मनसः प्रियानशने श्रौतप्रायश्चित्तप्राप्त्यर्थं, तच्च सर्वप्रायश्चित्तमेव विशेषानुक्तेः । अत्र दधि गव्यं माहिषं चापि । अत्र मधु क्षौद्रमेव न तु मद्यं तस्याशने महापातकित्वादिदोषश्रवणात् । दधि मधु वैवाभ्युपसेकमिति नियमः । तेन दधिमधुनोरेवाभ्युपसेकार्थता न तु पयसः । तस्य तु स्वातन्त्र्येणाशनम् । अथ वा दधि मधु वाऽभ्युपसेकमेवेति नियमः । तेन दधिमधुनोरभ्युपसेकार्थतैव । पयसस्तूभयथाऽपीति ज्ञेयम् । पूर्वकल्पे दधिमधुनोरभ्युपसेकेन स्वातन्त्र्येण चेत्युभयथाऽपि । सर्पिषस्तु मिश्रणेनैवेति द्रष्टव्यम् ।

आशितो भवति ।

आशित इति णिच्प्रयोगात्प्रयोजका अमात्येष्टबन्ध्वादयः प्रयोज्यो यजमानः । तथा चायमर्थो भवति अमात्येष्टबन्ध्वादिभिः प्रेरितो यावत्तृप्ति बहु भुञ्जीतेति । न तु आ, अशित इति पदद्वयं तथा पदकारैरपाठात् । यावत्तृप्ति बहु भुञ्जीतेति अयमर्थो यावानेवास्य प्राणस्तेन सह मेधमुपैतीति श्रुत्या लभ्यते । ननु इदं वचनं व्यर्थम् ।

अष्टौ ग्रासा मुनेः प्रोक्ताः षोडशारण्यवासिनः ।
द्वात्रिंशत्तु गृहस्थस्यापरिमितं ब्रह्मचारिणः ॥

इति धर्मसूत्रोक्तगृहस्थविषयकद्वात्रिंशद्ग्रासंख्यानियमबाधनार्थं कृतेन ।

आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम् ॥

इति धर्मसूत्रवचनेनैव तत्सिद्धेरिति चेत्सत्यम् ।

भुजिप्रमाणं निर्दिष्टं सुखं यावद्विजीर्यति ।
भोजनं हीनमात्रं तु न बलोपचयौजसे ।
सर्वेषां वातरोगाणां हेतुतां च प्रपद्यते ।
अतिमात्रं पुनः सर्वानाशु दोषान्प्रकोपयेत् ॥

इतिवैद्यकग्रन्थे वाग्भट्टोये भोजनस्य न्यूनाधिक्ये दोषमुक्त्वा

अन्नेन कुक्षेर्द्वावंशौ पानेनैकं प्रपूरयेत् ।
आश्रयं पवनादीनां चतुर्थमवशेषयेत् ॥

इत्यनेन भोजनप्रमाणमुक्तम् । तथा च जठर एकमंशं पवनाद्यर्थमवशेष्यैव भोजनं कर्तव्यमिति आयुर्वेदसिद्धभोजनतः पवनाद्यर्थतुरीयभागचतुर्थांशपरिमितमधिकमत्र भोजनं कर्तव्यमित्येतादृशार्थज्ञापनार्थत्वेन सार्थक्यात् । इतोऽप्यधिकभोजनं शरीरपीडाप्रसङ्गाद्विरुद्धमेव । अतः पवनाद्यर्थं किंचित्स्थलं संरक्ष्यैव भोक्तव्यम् । भुजिप्रमाणं निर्दिष्टमित्यत्र मात्राप्रमाणं निर्दिष्टमित्यपि पाठः । अस्मिन्पाठेऽपि मात्राशब्देन भोजनमेव गृह्यते । दीक्षणीयायां पूर्वत्र कृतायां दीक्षितधर्माणां प्रवृत्तत्वेन न कांचनाऽऽहुतिं जुहोत्यन्यत्र क्रतुसंयुक्ताभ्य इतिसूत्रोपात्तो वैश्वदेवप्राणाहुतीनां निषेधोऽपि प्रवर्तते । दीक्षितस्य वैश्वदेवे मुख्यकर्तृत्वे तदनुज्ञयाऽन्यैः स्वार्थपाकेन कर्तव्य एव वैश्वदेवः । प्राग्वंशप्रपादनोत्तरं दीक्षणीयायाः कर्तव्यतायां दीक्षितधर्माणामप्रवृत्तत्वेन निषेधस्याप्रवृत्तेर्वैश्वदेवः स्वेनापि कर्तव्यः । एवं प्राणाहुतयोऽपि भवन्ति । ऊर्जे त्वेति मन्त्रोऽशनार्थ एव निषेधप्रवृत्त्यप्रवृत्तिसाधारण्येन न तु प्राणाहुत्यर्थः । प्रथमप्राणाहुतिमन्त्रेणोर्जे त्वेत्ययं मन्त्रः समुच्चीयते तस्य पुरुषार्थत्वात् । अस्य क्रत्वर्थत्वात्प्रयोजनभेदान्नैवोर्जे त्वेत्यस्य प्राणाहुतिमन्त्रप्रत्याम्नायत्वमिति केचित् । अन्ये तु पञ्चानां स्थानेऽयमेव वा न कांचनाऽऽहुतिं जुहोत्यन्यत्र क्रतुसंयुक्ताभ्य इत्यनेन पुरुषार्थाहुतीनां प्रतिषेधात्क्रत्वर्थ एव स्यादिति प्राहुः । तत्र पूर्वं मतं तुच्छम् । प्रथमेन प्राणाहुतिमन्त्रेण समुच्चयेऽन्यतरस्य व्यवहितत्वेन क्रियासंनिपातामावेनाकर्मकरणत्वप्रसङ्गात्, भिन्नशास्त्रार्थत्वेन द्वाभ्यां त्रिभिरित्यादिवदेककरणत्वोपदेशाभावाच्च । प्राणाहुतीनां पुरुषार्थत्वान्निषेधे प्राणाहुतीनामेवाभावेन प्राणाहुतीनां सर्वासां स्थानेऽयमेव मन्त्र इत्युक्तिरसंगतैवेति द्वितीयमपि मतं तुच्छमेव । अतः केवलमशनार्थमेव मन्त्रो न तु प्राणाहुतिस्थानिक इत्येव समञ्जसम् । बलयो नैव भवन्ति । देवतोद्देशेन त्यज्यमानत्वेनाऽऽहुतिरूपत्वान्न कांचनाऽऽहुतिं जुहोतीत्येतस्य निषेधस्यात्रापि प्रवृत्तेर्निराबाधात् । परिषेकाभिमन्त्रणे तु भवत एव तयोर्देवतोद्देशेन त्यज्यमानत्वाभावात् । यत्रैकस्मिन्द्रव्य इति सूत्रात्सकृन्मन्त्रः ।

कनीयः कनीयोऽत ऊर्ध्वं व्रतयति ।

दीक्षास्विति शेषः । कनीयः कनीयोऽल्पमल्पमत ऊर्ध्वं दीक्षामारभ्य यावद्दीक्षासमाप्ति व्रतमुपैतीत्यर्थः । स्पष्टमेतदुक्तमापस्तम्बेन—तथाऽऽशितः स्याद्यथा ततो दीक्षासु कनीयः कनीयो व्रतमुपेयादिति । शरीरे कार्श्यसंपादनायैतत् । यथा यथा च शरीरे कार्श्याधिक्यं तथा तथा मेध्यता । तथा चाऽऽपस्तम्बः—यदा वै दीक्षितः कृशो भवत्यथ स मेध्यो भवति यदाऽस्मिन्नन्तरं किंचिन्न भवत्यथ स मेध्यो भवति यदाऽस्य कृष्णचक्षुषोर्नश्यत्यथ स मेध्यो भवति यदाऽस्य त्वचाऽस्थि संधीयतेऽथ स मेध्यो भवति पीवा दीक्षेत कृशो यजते यदस्याङ्गानां मीयते जुहोत्येव तदिति विज्ञायत इति । तृतीयाध्यायेऽष्टमे पादे जैमिनिरपि—तपश्च फलसिद्धत्वाल्लोकवदिति-

वाक्यशेषश्च तद्वदिति। तद्दीक्षासु निवर्तत इत्येतत्सूत्रव्याख्यानावसरे व्याख्यातमेतत्सूत्रद्वयम्। मेध्यो मेधो यज्ञस्तदर्हः। दीक्षादशायामपि कृशस्य दीक्षाव्रतैर्यदङ्गानां मध्येऽङ्गं क्षीयते तदभावेव हुतं भवति। अतः कर्शिताङ्गेनैव यष्टव्यम्। एतेनापि ज्ञायते दीक्षाधिक्यपक्षोऽत्यन्त प्रशस्त इति। इदमप्यताऽवगम्यत आशितो भवतीति विधिरनेकदीक्षापर एव न त्वेकदीक्षापरः। तत्र तु किंचित्कृशसंपादनाय स्वरूपमेव भोक्तव्यमिति। अत्र व्याध्याद्यकृतं व्रतह्रासनिमित्तककृशत्वं गृह्यते। पीवा दीक्षेतेति दर्शनात्। एतद्भोजनार्थः पाकोऽन्येनैव कारयितव्यो नतु स्वेन नच पत्न्या। तथा च बौधायनः—अथाऽऽभ्यां स्रुवोपायनीयं पाचयति तस्याऽऽशितौ भवत इति। ईश्वराय निवेद्यैव भोक्तव्यमिति सुप्रसिद्धमेव। एतच्च दंपतिभ्यां केवलाभ्यामेव भोक्तव्यं नतु ब्राह्मणोऽप्यत्र भोजयितव्य इति। एतस्य भोजनस्य दीक्षितसंस्कारार्थत्वेनेतरभोजनस्य प्रसक्तेरेवाभावात्। अत एवैकाकी न भुञ्जीतेति निषेधस्यात्राप्रसरः।

महीनां पयोऽसीति दर्भपुञ्जीलाभ्यां गव्यं नवनीतꣳ
समुद्यौति वर्चोधा असि वर्चो मयि धेहीति तेनाभ्यङ्क्ते
मुखमग्रेऽनुलोममितराण्यङ्गानि स्वभ्यक्तो भवति ।

गव्यग्रहणं माहिषादिव्यावृत्त्यर्थम्। संशब्दः सम्यगित्यर्थे। तच्च सम्यक्त्वमुद्यवनक्रियायामन्वेति। उद्यौतीत्यत्र शोधनार्थमिति शेषः। शोधनार्थमेवोदशरावे निधानमाह बौधायनः—अथास्यैतन्नवनीतं विचितमुदशराव उपशेरत इति युधातोर्मिश्रणार्थकत्वेऽपि तस्य पदार्थद्वयसाध्यत्वेन प्रकृते पदार्थान्तरासंभवेन तदर्थासंभवादालोडनार्थकत्वमेव युधातोरिति अर्थविशेषं प्रदर्शयितुमेवोच्छब्द उपात्तः। उद्यवने प्रादक्षिण्यं परिभाषासिद्धम्। तेनेति वचनं नियमार्थम्। तेन यथा तेनैव सर्वाङ्गाणामभ्यङ्गो भवति तावत्पर्याप्तमेवाऽऽलोडनात्प्रागुपादातव्यं न पुनरन्यदुपादातव्यमित्येषोऽर्थः सिद्धो भवति। आलोडनं दैवाद्विस्मृत्य कृतेऽभ्यङ्गे तदनन्तरं स्मरणे पुनरन्यद्गृहीत्वाऽऽलोड्य तेन पुनरभ्यङ्गः कर्तव्य इत्येतदर्थं वा तेनेतिवचनम्। अभ्यङ्गः पाणिभ्यामेव सामर्थ्यात्, न दर्भपुञ्जीलाभ्यां सामर्थ्याभावात्। तस्य पाणिभ्यां संप्रलाव्य मुखमेव प्रथममभ्यङ्क्त इति बोधायनः स्पष्टमेवाऽऽह। अग्र इति सप्तमी पञ्चम्यर्थे। तेन मुखमग्रादारभ्याभ्यङ्क्त इत्यर्थो भवति। मुखस्याग्रं शिरस्तदारभ्य मुखमभ्यङ्क्त इति। एतेन पराचीनताऽभ्यङ्गे प्रदर्शिता भवति। तथा चाऽऽपस्तम्बः—पराचीनं त्रिरभ्यङ्क्ते मुखमग्र इति ग्रीवाऽपि मुखसंबन्धिन्येव तदाधारभूतत्वात्। उत्तरत्रानुलोमग्रहणादपि शिरःप्रभृतिग्रीवान्तानामवयवानां मुख्यवृत्त्या मुखपदवाच्यत्वाभावेऽपि गौण्या वृत्त्या तत्पदवाच्यत्वम्। अन्यथा ग्रीवायां लोमाभावेन कुत्रापि तत्संग्रह एव न स्यात्। अनुलोमं यन्मुखानि

लोमानि तदभिमुखतयेतराङ्गाणामभ्यङ्क्त इत्यर्थः । अथवा मुखशब्देन केवलस्य मुख्यस्य मुखस्यैव ग्रहणम् । अग्रशब्दः क्रमार्थः । शिरःप्रभृतिग्रीवान्तानामवयवानामनुलोममितराण्यङ्गानीत्यत्र समावेशः । अनुलोमशब्दस्यानुक्रमेणेत्यर्थः । तेन शिरःप्रभृतिपादान्तक्रमेणाभ्यङ्क्तः कर्तव्य इति सिद्धं भवति । इतराणि मुखादितराणि, पूर्वकल्पे हस्तादीनि उत्तरकल्पे शिरआदीनि । मुखमग्रेऽनुलोममितराण्यङ्गानीति पार्थक्येन निर्देशान्मुखाभ्यञ्जने पृथग्मन्त्रः । इतराभ्यञ्जने संभवतां सकृन्मन्त्रः, असंभवतां मन्त्रावृत्तिः । स्वभ्यक्तो भवति, तथाऽभ्यङ्क्ते यथा स्वभ्यक्तो भवति । सुशब्दो यथा सर्वावयवसंबन्धो नवनीतस्य भवेत्तथेति सूचयति । अभिपूर्वकोऽञ्जूधातुरभ्यङ्करूपमर्थमाचष्टे । आङ्पूर्वकोऽञ्जनमाचष्टे । सर्वावयवावच्छेदेन नवनीतसंबन्धोऽभ्यङ्कपदार्थः । नेत्रावच्छेदेन कज्जलसंबन्धोऽञ्जनपदार्थः । एतावर्थावुपसर्गबलाल्लभ्येते प्रहारादिशब्दवत् । स्वकीयकृत्स्नपृष्ठाभ्यङ्गस्य सुष्ठु स्वेन कर्तुमशक्यत्वात्सुशब्देनान्यकर्तृकताऽपि प्रापिता भवति। तत्र कर्तुरनियमप्राप्तौ नियममाह बौधायनः—अन्योन्यस्य पृष्ठमभ्यनक्तीति ।

द्वयस्य कनीनिकाऽसीति त्रैककुदेनाऽञ्जनेनाऽञ्जे ।

त्रिककुदि पर्वते भवं त्रैककुदं तेन त्रैककुदेन। एतादृशेनाऽञ्जनेनाऽञ्जे इत्यर्थः। अक्षिणी इति शेषः । आञ्जनक्रियासांनिध्यात् । पाहीति मन्त्रान्तः ।

तस्मिन्नविद्यमाने येनैव केनचित् ।

त्रैककुदेन येन केनाप्यन्येन वाऽञ्जनेनाऽञ्जे इत्येतावत्येव लाघवेन वक्तव्ये तस्मिन्नविद्यमान इति वचनं त्रैककुदाञ्जनतद्व्यतिरिक्तयत्किंचिदन्याञ्जनयोस्तुल्यविकल्पोऽपि कदाचित्स्यात्तद्वारणार्थम् । नन्वेवं तस्मिन्नविद्यमानेऽन्येनेत्येतावदेव वक्तव्यं तथा च व्यर्थं येनैव केनचिदिति सूत्रमिति चेत्सत्यम् । अस्मिन्प्रतिनिधावत्यन्तसजातीयस्यैव प्रथमं ग्रहणमनन्तरमितरस्येत्येतस्य नियमस्याप्रवृत्तिरित्येतादृशार्थज्ञापनार्थत्वेन वैयर्थ्याभावात् । तथा च शैलजमेवाऽञ्जनान्तरमादावत्यन्तसजातीयत्वात्प्रतिनिधित्वेन ग्राह्यम् । एतस्याप्यभावे कज्जलमित्येतस्य नियमस्याप्राप्तावः सिद्धो भवति ।

सतूलया शरेषीकया दर्भेषीकया वा दर्भपुञ्जीलेन वाऽभ्यन्तरमनिधावयन्[1]स्त्रिरेकैकं दक्षिणं पूर्वमाङ्क्ते ।

तूलमग्रं मूलेभ्यः स्वाहेति मूलसाहचर्यात् । पुष्पमिति केचित् । तन्न, ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा काण्डेभ्यः स्वाहा वल्शेभ्यः स्वाहा पुष्पेभ्यः स्वाहेत्यश्वमेध ओषधिहोममन्त्रेषु पुष्पस्य पृथङ्निर्देशानुपपत्तेः । तेन साग्रयेत्यर्थो

---

१ ङ. ज. ञ. ट. 'या द'।

भवति। शरारूयतृणशलाका शरेषीका तया, दर्भेषीका दर्शशलाका तया वा। दर्भपुञ्जीलं दर्भकाण्डं तेन वा। दर्भकाण्डाग्रस्याञ्जनक्रियायां सामर्थ्याभावान्मूलेनैवाञ्जनम्। सतूलत्वं शरेषीकादर्भेषीकयोरेव। एतज्ज्ञापयितुमेव वाशब्दोपादानं मध्ये कृतम्। अथ वा तूलः कार्पासस्तत्सहितयेत्यर्थः। मध्ये वाशब्दोपादानं श्रुतौ सतूलयेतिस्त्रीलिङ्गनिर्देशाच्छरेषीकादर्भेषीकयोरेव तुल्यकल्पत्वं, दर्भपुञ्जीलस्य तु गौणकल्पत्वं, फलं शरेषीकाया अभावे दर्भेषीकाया ग्रहणं मुख्यत्वेनैव, दर्भपुञ्जीलसत्त्वेऽपि नतु तस्य ग्रहणं तथात्वाभावादिति द्रष्टव्यम्। अभ्यन्तरं यथाऽक्षितो बहिर्न भवति। अपाङ्गमारभ्याऽऽन्तमिति यावत्। अनिधावयन्नप्रतिनिवर्तयन्नेकैकं त्रिराङ्क्ते दक्षिणं त्रिरुत्तरं त्रिरित्यर्थः। सकृत्सकृदेव मन्त्र उभयोरक्ष्णोः। तत्र क्रममाह—दक्षिणं पूर्वमिति।

द्विर्वा सव्यम्।

सर्वेषु पक्षेषु सकृन्मन्त्र एवोभयत्र। सव्ये त्रिराञ्जनं पूर्वसूत्रात्प्राप्तं तत्र वैकल्पिकं द्वित्वमनेन विधीयते।

द्विर्दक्षिणꣳ सकृत्सव्यमित्येकेषाम्।

उभयं त्रिस्त्रिर्दक्षिणं त्रिः सव्यं द्विरिति वेत्येवं पूर्वमुक्तं तत्र स्वतन्त्रं पक्षान्तरमनेनोच्यते।

न पुनर्निषेचयति।

एकेन प्रयत्नेन संततमञ्जनं कर्तव्यं तथा कर्तुमशक्यत्वे सांतत्यार्थं पुनरञ्जनं न निषेचयति न नेत्रयोर्योजयतीत्यर्थः। अथवा पुनःशब्दो बहिरित्यर्थे। निषेचयतीत्यस्य निर्गमयतीत्यर्थः। तथा चायमर्थो भवति न बहु निर्गमयतीति। अर्थान्नेत्रतो बहिरिति। आञ्जनक्रियायां विशेषमाह बौधायनः—अथास्यैतदाञ्जनं पिष्टं हरण्युपशेते सतूलया च शरेषीकया तस्य प्राङ्मुखस्य प्रत्यङ्मुख उपविश्य सव्येन पाणिना दक्षिणमक्ष्यनक्तीति।

तस्य ते पवित्रपते पवित्रेणेति पाव्यमानो जपति चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्विति च पवमानः सुवर्जन इति चैतमनुवाकम् ॥ ४ ॥

इति हिरण्यकेशिसूत्रे दशमप्रश्ने प्रथमः पटलः।

आद्यश्चकारोऽर्थैकत्वेऽपि मन्त्रत्रित्वद्योतनार्थः। आध्वर्यवे भेददर्शनाद्युक्तमेतत्त्रित्वम्। एकत्र निर्णीतः शास्त्रार्थोऽसति बाधकेऽन्यत्रापीति जैमिनिनाऽपि स्वीकृतम्। यथाऽऽद्रित्यः प्रायणीयश्चरुरिति विधौ स्थालीवचनस्यापि चरुशब्दस्यादिति-

मोदनेनेतिवाक्यशेषवशादोदनार्थकत्वे निर्णीते सौर्ये चरुमित्यादौ वाक्यशेषाभावेऽप्योदनार्थकत्वं तथाऽत्रेति । अच्छिद्रेण पवित्रेणेति सर्वत्रानुषजतीत्याध्वर्यवसूत्रे सर्वत्रेतिग्रहणाज्ज्ञापकात्त्रिष्वच्छिद्रेणेत्यादिरनुषङ्गः । पवमानः सुवर्जन इति चैतमनुवाकमित्यत्रत्यश्चकारोऽनुवाकशब्दोत्तरं योज्यः । रहस्यपातकान्यप्ययमनुवाको नाशयतीत्यत्यन्तं पावित्र्यमेतस्येति प्रसिद्धमिति प्रदर्शयितुमेतच्छब्दः । उक्तश्चायमर्थश्चतुर्विंशतिमते—

पावमानीस्तथा कौत्सं पौरुषं सूक्तमेव च ।
जप्त्वा प्रत्यहमेतानि सर्वपापैः प्रमुच्यते ॥ इति ।

पावमानीः पवमानानुवाकगता ऋचः । पावित्र्यार्थं प्रत्यहमपि पाठः कार्यः । तथा च स्मृतिः—

रुद्राध्यायं पावमानं पूर्वनारायणं तथा ।
यो जपेत्प्रत्यहं ह्येतान्सर्वैः पापैः प्रमुच्यते ॥ इति ।

चकारः पूर्वमन्त्रैः सह समुच्चयार्थः । अध्वर्युणा पावमानं सावकाशतया कर्तव्यं यथा पवनक्रये तत्तन्मन्त्राणां सर्वेषां पाठो भवेत् । पवमानानुवाकस्य वाक्यशेष एव पाठः ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-
शामिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्रश्नस्य प्रथमः पटलः ॥ १ ॥

अथ दशमप्रश्ने द्वितीयः पटलः ।

आ वो देवास ईमह इति पूर्वेण द्वारेण प्राग्वंशं प्रविशञ्जपति ।

द्वारग्रहणं वातायनव्यावृत्त्यर्थम् । प्रविशन्निति शत्रा प्रवेशसमकालं जप इति बोध्यते । यज्ञियासो हवामह इति मन्त्रान्तः ।

विद्युदसीत्यप उपस्पृश्यापरेणाऽऽहवनीयं
दक्षिणाऽतिक्रम्य दक्षिणत उपविशति ।

दर्शपूर्णमासादौ दृष्टस्य प्रतीकस्य ग्रहणम् । तेन मयि श्रद्धेति मन्त्रान्तो भवति ।

दक्षिणत उदङ्मुखतयोपवेशनमन्यथा दक्षिणाग्नेः पृष्ठतःकरणापत्तेः। बौधायनोऽपि स्पष्टमेवाऽऽह-दक्षिणत उदङ्मुखमुपवेश्येति। एकद्वारत्वे तु तेनैव प्रवेशः सामर्थ्यात्।

तस्यैष एव संचर आ सुत्यायाः।

संचरो मार्गः। आ सुत्याया इत्यत्राऽऽङभिव्याप्तौ। नासश्स्थिते सोमेऽध्वर्युः पूर्वेण द्वारेण हविर्धाने प्रविश्यापरेण निष्क्रामेदित्यत्राप्रभृथान्ता सुत्येत्यस्यार्थस्य निर्णीतत्वादत्रापि स एव निर्णयः। इदं कर्मार्थसंचरे, लौकिके तु अग्रेणाऽऽहवनीयं जघनेन गार्हपत्यं वेत्यादि अव्यवायानुसारेण संचरः। आ सुत्याया इति अवधिविशेषविधिबलात्सुत्यासमाप्त्युत्तरमुदयनीयादिषु अग्रेणाऽऽहवनीयमेव कर्मार्थोऽपि संचरो न तु अतिदेशप्राप्तोऽपरेणाऽऽहवनीयम्। अन्यथा वैशेषिकातिदेशप्राप्तयोः संचरयोर्भेदाभावेनावधिविशेषविधिवैयर्थ्यापत्तेः। याजमानं व्याख्यास्याम इत्यधिकारादेव यजमानलाभे तत्परामर्शकतच्छब्दोपादानमेतस्मात्पूर्वतनानि यजमानकर्माणि पत्न्या अपि भवन्तीतिज्ञापनार्थम्। तत्र वपनं पत्न्या नास्तीति आध्वर्यवसूत्रव्याख्यान उक्तमेव। वपनाभावात्स्वस्त्युत्तराण्यशीयेति जपोऽपि न। उद्वाहने पूतैमीत्यूहः। तूष्णीमिति बौधायनः।

इन्द्राग्नी आवापृथिवी इत्याहवनीयमभिमन्त्रयते।

सन्तं पाहीति मन्त्रान्तः। प्राग्वंशप्रपादनोत्तरं दीक्षणीयापक्षे तां कृत्वाऽनन्तरमेवाऽऽहवनीयाभिमन्त्रणम्। अत्र साधिका पुक्तिस्तं प्राग्वंशं प्रपाद्यात्र दीक्षणीयामेके समामनन्तीत्यस्मिन्सूत्रे प्रदर्शिता। एतदनन्तरं दीक्षाहुतयः। दीक्षाहुतिहोमानन्तरं वातं प्राणं मनसाऽन्वारभामह इत्यस्य मन्त्रस्य जपो यजमानस्य। प्रत्यगाशिषो मन्त्रानकर्मकरणाङ्गपतीति सूत्रात्। आपस्तम्बेन पूर्णाहुतिसंज्ञकायाः षष्ठ्या दीक्षाहुतेरनुमन्त्रणे विनियुक्तत्वादनुमन्त्रणमेव वा षष्ठ्या दीक्षाहुतेर्हूयमानाया अनेन कर्तव्यम्। अनुमन्त्रणस्यापि जपत्वमस्तीत्युपोद्घाते प्रदर्शितमेव।

अन्तर्वेदि कृष्णाजिनस्याऽऽस्तीर्णस्यक्सामयोः
शिल्पे स्थ इति शुक्लकृष्णे राजी आलभते।

अन्तर्वेदिग्रहणं शयनार्थकृष्णाजिनास्तरणादौ सर्वत्र राज्यालम्भनं स्यात्तन्मा भूदित्येतदर्थम्। कृष्णग्रहणं व्याघ्राजिने राज्यालम्भनव्यावृत्त्यर्थम्। राजी पङ्क्ती। शुक्लकृष्णराज्योः सहैवाऽऽलम्भनम्। शिल्पे स्थ इति लिङ्गात्। आलम्भनं स्पर्शनम्। अत्र बौधायनः-शुक्लेऽङ्गुष्ठो भवति कृष्णेऽङ्गुलिरिति। द्वैधेऽन्योऽपि विशेषः-शुक्लकृष्णयोः संस्पर्श इति शुक्लेऽङ्गुष्ठो भवति कृष्णेऽङ्गुलिरित्येवं शुक्लकृष्णे संमृशैदिति बौधायनः पृथेनैवैतꣳ संधिꣳ संमृशेदिति शालीकिरप्येनेकाङ्गुल्यैव संमृशेदित्यौपमन्यव इति। पृथं त्रयोदशाङ्गुलम्। यज्ञस्योदञ्च इति मन्त्रान्तः।

सुशर्माऽसीति दक्षिणतो भसत्त आरोहतीमां
धियꣳ शिक्षमाणस्य देवेति च सुत्रामाणं पृथिवीं
द्यामनेहसमिति चेमाꣳ सुनावमारुहामिति वा ।

सुशर्माऽसीत्येतावानेवायं मन्त्रः । पूर्वश्चकार उत्तरमन्त्रेण सह संधानार्थः । उत्तरश्चकारः प्रथमेन मन्त्रेण समुच्चयार्थः । इमाꣳ सुनावमारुहमिति सुत्रामाणमित्यनेन विकल्पते । दक्षिणतो दक्षिणप्रदेशात्तः पञ्चम्यर्थकस्तसिः । भसत् कटिप्रदेशो गुदप्रदेशो वा तृतीयार्थे तसिः । दक्षिणं जान्वाच्यामिसर्पतीति बौधायनः ।

आऽहं दीक्षामदहमृतस्य पत्नी गायत्रेण छन्दसा
ब्रह्मणा चर्तꣳ सत्येऽधायि सत्यमृतेऽध्यूतं च मे
सत्यं चाभूतां ज्योतिरभूवꣳ सुवरगमꣳ सुवर्गं
लोकं नाकस्य पृष्ठं ब्रध्नस्य विष्टपमगमामित्यारुह्य जपति ।

आरुहेतिवचनमारोहणजपयोः कालाव्यवधानार्थं, तेन पत्न्याः शिरसि जानुं प्रतिमुञ्चतीत्येतदादि जपानन्तरं भवतीति सिद्धं भवति ।

विष्णोः शर्मासीति कृष्णाजिनेन दक्षिणमꣳसं प्रच्छादयति ।

कृष्णग्रहणप्रयोजनं पूर्ववत् । दक्षिणग्रहणप्रयोजनं प्रागुक्तमेव । प्रशब्दोऽसस्य सर्वावयवावच्छेदेन च्छादनं यथा भवति तथा कर्तव्यमिति बोधयति । कृष्णाजिनग्रहणमापस्तम्बोक्तवासोन्यावृत्त्यर्थम् । वच्छेति मन्त्रान्तः ।

नक्षत्राणां माऽतीकाशात्पाहीति वाससा शिरः प्रवेष्टयते ।

वासोऽत्रोष्णीषरूपं शिरोवेष्टने तस्यैव लोकतः सिद्धेः । प्रादक्षिण्यं परिभाषासिद्धम् । बौधायनापस्तम्बौ स्पष्टमाहतुः—प्रदक्षिणमुष्णीषेण शिरो वेष्टयत इति । उष्णीषरूपवस्त्रालाभ इतरदपि । अत एवाऽऽपस्तम्बेन वाससनेयकग्रहणं विकल्पार्थं कृतं द्रष्टव्यम् । द्वैधे स्पष्टमेव विकल्प उक्तः—अथास्य प्रदक्षिणमुष्णीषेण शिरो वेष्टयतीति सूत्रं बौधायनस्य वाससैव प्रच्छन्नः स्यादिति शालीकिरिति । आचार्यस्य तूभयमप्यभिमतमिति विशेषानुक्तेर्गम्यते । उष्णीषशब्दो दीर्घशाटके प्रसिद्ध एव । वेष्टनं व्यापनम् । न पुरा सोमस्य क्रयादपोर्णीतेति प्राक्क्रयाद्वासोपसारणे श्रुतौ दोषश्रवणात्, गर्भो वा एषयद्दीक्षित उल्बं वासः प्रोर्णुते तस्माद्गर्भाः प्रावृता जायन्त इति गर्भरूपदीक्षितोल्बरूपत्वेन वाससः संस्तवनात्प्रत्यपोर्णुते शिरोऽग्रेऽनुपूर्वमितराण्यङ्गानीतिवक्ष्यमाणसूत्राच्छिङ्गात्, अथ यजमानं वाससा प्रोर्णोतीति यजमानस्य वाससा प्रोर्णवनस्य स्वतन्त्रतया विधानाच्च वाससा सशिरस्कसर्वावयवप्रोर्णवनमादौ कृत्वाऽनन्तरमुष्णीषेण शिरोवेष्टनमिति सिद्धं भवति । शिरोगतवासोवयवसंकोच उक्तो बौधाय-

नेन—प्रतिकृष्य वसनस्यान्तान्प्रदक्षिणमुष्णीषेण शिरो वेष्टयतीति। प्रोर्णवनं प्रावरणम्। वाससा प्रोर्णवनात्प्राग्दक्षिणांसगतं कृष्णाजिनं निष्कासनीयम्। अन्यथा दक्षिणांसस्य प्रावरणासंभवात्। दीक्षितस्य गर्भरूपत्वं बह्वृचब्राह्मणे प्रपञ्चितं—पुनर्वा एतमृत्विजो गर्भं कुर्वन्ति यं दीक्षयन्तीति। पट्टसदृशं गर्भवेष्टनमुल्बं, जरायु तु एतस्यापि वेष्टनं येन क्रियते स पदार्थः। सोऽत्र कृष्णाजिनरूपः। तेन वाससा प्रावरणोत्तरं कृष्णाजिनेनाऽऽच्छादनं शरीरस्य कर्तव्यम्। उक्तं च सूत्रान्तरे—वाससा शिरः प्रवेष्टयते कृष्णाजिनेन शरीरमाच्छाद्य कृष्णै त्वा सुप्तस्याया इति वेदेः कृष्णविषाणया लोष्टमुद्धन्तीति। एवं च दीक्षिते गर्भत्वं संपन्नं भवति। सोमक्रयात्पुराऽपोर्णवने दोषः श्रुतौ—यत्पुरा सोमस्य क्रयादपोर्णीत गर्भाः प्रजानां परापातुकाः स्युरिति। परापातुकाः परापतनशीलाः। एतस्य सोमक्रयोत्तरं जननं ततो वस्त्रापनयनं युक्तमेव। तथा च श्रुतिः—क्रीते सोमेऽपोर्णुते जायत एव तदिति। अपोर्णवनमुद्घाटनम्। किं चात्यन्तं राजादिकं प्रति जनानां प्रतिदिदृक्षायां पार्श्वस्थैः पार्ष्णिकादिभिः समाया आवरणपट्टो यथाऽपनीयते तादृगेवैतद्भवति। तथा च श्रुतिः—अथो यथा वसीयाꣳसं प्रत्यपोर्णुते तादृगेव तदिति। अनेन प्रच्छादनेनाऽस्मिन्काले तत उत्थानं बोध्यते।

प्रत्तया कृष्णविषाणया कृष्यै त्वा सुप्तस्याया इति वेदेर्लोष्टमुद्धन्ति।

प्रत्तवचनं कृष्णविषाणान्तरनिवृत्त्यर्थम्। प्रत्तवचनेनेदमपि गम्यते कृष्णविषाणाप्रदानं वाससा शिरोवेष्टनोत्तरमेव कर्तव्यमिति। मन्त्रपाठक्रमान्मेखलापरिव्ययणादिपत्नीसंनहनान्तस्य दक्षिणांसप्रच्छादनपूर्वभावित्वमेव। वेदेर्वेदिसंबन्धि लोष्टं मृद्गोलकं यं कंचनोद्धन्ति विदीर्णं करोति। अत्र वेदिशब्दो लक्षणया वेदिदेशपरः। लोष्टमित्येव युक्तः पाठ इति लोष्टैर्घ्नन्तीत्यस्मिन्सूत्रे प्रदर्शितमेव। अथवा लोष्टमिवोद्धन्तीत्यर्थः, यथा लोष्टस्य प्रहारेण विदारणं तथेति। अर्थान्मृदः। मृदो विदारणं तूल्किरणेनेति लोकप्रसिद्धितः प्राप्तं तत्र प्रहारेण विदारणं विधीयते। नन्वेवं वेदिमुद्धन्तीत्येव वक्तव्यं लाघवादिति चेत्, सत्यं, वेदिमुद्धन्तीत्येवमुच्यमाने वेद्याः सर्वावयवावच्छेदेनोद्धननं वेदेर्मृदमुद्धन्तीत्युक्तौ तु कस्मिंश्चित्प्रदेश उद्धननमिति स्वरूपमेदेऽत्रैकदेशोद्धननस्यैव विवक्षितत्वेन लाघवस्यात्राप्रयोजकत्वात्। एतादृशकुसृष्टिकल्पनया व्याख्यानं लोष्टाभावे लोपापत्त्या। न चेष्टापत्तिः। यथाकथंचिदलोपानुगुण्यव्याख्यानसंभवे लोपकल्पनाया अनुचितत्वात्। तथा च निदानसूत्रम्—अलोपो लोपान्न्याय्यतर इति। इदं चाहष्टार्थविषये द्रष्टव्यम्। नच वक्ष्यमाणस्य शिरसि कण्डूयत इत्यस्य यथाऽर्थाभाव लोपस्तथाऽत्राप्यस्त्विति वाच्यम्। तत्रार्थे प्राप्ते शिरसि

कण्डूयत इत्यत्र लोपकल्पकापस्तम्बीयस्पष्टवचनमिव प्रकृते *तादृशस्पष्टवचनाभावेन तथाकल्पनाया असंभवात्। बौधायनसूत्रस्वरसतः कण्डूत्यभावेऽपि कर्तव्यताप्रतीतेश्च।

सुपिप्पलाभ्यस्त्वौषधीभ्य इति शिरसि कण्डूयते।

एतस्यादृष्टार्थत्वपक्षे शिरसि यस्मिन्कस्मिंश्चिदवयवे घर्षणं कुरुत इत्यर्थः। बोधायनेन दक्षिणं गोदानं कण्डूयत इति कण्डूयने नियतदेशोक्त्याऽर्थप्राप्त्यभावेऽपि कण्डूयनं कर्तव्यमेवेति सूच्यते। अर्थे प्राप्ते कण्डूयत इत्यापस्तम्बोक्तदृष्टार्थत्वपक्षे तु अर्थाभावे लोप एव। सूत्रकारस्योभयमपि संमतम्। नचादृष्टार्थत्वपक्ष इतरेषु कण्डूयनेषु एतन्मन्त्रप्राप्तिः कथं भवेत्प्रापकाभावादिति वाच्यम्। अर्थपृथक्त्वात्कण्डूयनमन्त्रोऽभ्यावर्तत इतिपरिभाषासूत्रस्यैव प्रापकस्य सत्त्वात्। शिर इति सप्तम्यन्तवचनं शिरसि यत्र कुत्रचित्, यत्र कण्डूतिस्तत्र वा कण्डूयनं न तु शिरसः सर्वस्य कण्डूयनमित्यर्थं बोधयति। अदृष्टार्थत्वपक्ष एतन्मन्त्रकरणकशिरोधिकरणककण्डूयनविधिः। दृष्टार्थत्वपक्षे मन्त्रमात्रांशे विधिः कण्डूयनविधिस्त्वनुवाद एव। यदा शिरसि कण्डूयते तदा सुपिप्पलाभ्य इत्यनेनैव मन्त्रेण कण्डूयते। इतराङ्गेषु यदा कण्डूयते तदा विषाण इत्यनेनैव। उभयपक्षेऽपि शिरस्येव कण्डूयनमादौ तत इतराङ्गेष्विति। अनेकेषु अर्थेषु कालव्यवधानेन जायमानेषु मन्त्रावृत्तिः। तथा च सूत्रम्—अर्थपृथक्त्वात्कण्डूयनमन्त्रोऽभ्यावर्तत इति। कालव्यवधानकृतमेवात्रार्थपृथक्त्वम्। जैमिनेस्तु मते कालव्यवधानेऽपि नाऽऽवृत्तिः। तथा च तत्सूत्रमेकादशाध्याये चतुर्थपादे कण्डूयने प्रत्यङ्गं कर्म भेदात्, अपि वा चोदनैक्यमेककर्म्यात्स्यादिति। कण्डूयनक्रियायां कण्डूयनकर्मापनेयस्य दुःखस्य दुःखापनयनसंस्कार्याणामङ्गानां च भिन्नत्वात्प्रत्यङ्गमावृत्तिः। अत्र कर्मशब्दः क्रियाजन्यफलशालित्वरूपपारिभाषिककर्मपरो धात्वर्थक्रियापरश्च। तथा च क्रियाजन्यफलशालित्वरूपकर्मपरत्वस्वीकारे कर्मणां क्रियाजन्यफलशालिनां शिरआदिरूपाणां भेदात्कण्डूयने प्रत्यङ्गं मन्त्रावृत्तिरित्यन्वयः। धात्वर्थरूपक्रियापरत्वे तु प्रत्यङ्गं कण्डूयने कर्मभेदान्मन्त्रावृत्तिरित्यन्वयः। अयं पूर्वसूत्रार्थः। उत्तरसूत्रार्थस्तु ऐककर्म्यात्, एकमेव कर्म यत्र तस्य भावस्तस्माद्धेतोश्चोदना कण्डूयेतेति चोदना तस्या ऐक्यमेव न भेद इति। अयं निष्कृष्टोऽर्थः—दुःखानि न भिन्नानि न तु दुःखापनयनं स्वरूपेण चिकीर्षितं, नाप्यङ्गसंस्कारः। येन तद्भेदाद्भेदः स्यात्। किं त्वात्मानं कण्डूतिदुःखाक्षिप्तचित्तमपनीतकण्डूदुःखं कर्तुं कण्डूयनं क्रियते। तेन यावता दुःखेनानपनीतेनाऽऽत्मनि दुःखं भवति तावतः सर्वस्य दुःखस्यापनयनमत्र क्रियाजन्यफलतच्छाल्यात्मैव। तथा चैक आत्मैव

* तादृशेत्यधिकम्।

१ क. छ. °नि भि°।

कर्म यत्र तदेककर्म तस्य भाव ऐककर्म्यं तस्माद्धेतोः। एककर्मेति कण्डूयनविशेषणम्। कण्डूयनान्यङ्गभेदेन भिन्नानि न भवन्ति। यदाऽङ्गसंस्कारः कण्डूयनं भवेत्तदा तद्भेदाद्भेदः स्यादतोऽङ्गसंस्कारोऽपि न भवति, किं तु आत्मगतस्य दुःखस्यापनयेनाऽऽत्मन्येव संस्कार उत्पद्यते। अङ्गगतकण्डूनिवृत्तिस्तु द्वारमात्रं, यावता दुःखेनापनीतेनाऽऽत्मनि दुःखं भवति तावत्सर्वमपनेतुमभिसंधाय कण्डूयनोपक्रमो दृश्यते हि अत ऐककर्म्यं कण्डूयने सिद्धं भवति। अस्मादेव हेतोश्चोद्दनैक्यमेव भवति नत्वङ्गकृतो भेदः कण्डूयने। अतोऽगृह्यमाणविशेषत्वात्तन्त्रं भवतीति।

विषाणे विष्यै तं ग्रन्थि यदस्य गुल्फदꣳ हृदि
मनो यदस्य गुल्फदमित्यवशिष्टान्यङ्गानि।

अवशिष्टेष्वङ्गेष्वित्यर्थः। तेन हस्ताद्यवयवेषु एकदेश एव कण्डूयनं नतु कृत्स्नानां कण्डूयनमिति पूर्ववदर्थो भवति। शिरःशब्देन केवलशिरस एव ग्रहणं, तेन ललाटादिषु विषाणे विष्या इत्येव मन्त्रो न तु सुपिप्पलाभ्य इति। चक्षुषोरर्थप्राप्तौ कृष्णविषाणया कण्डूयनं न, अयोग्यत्वात्। हस्तेनापि कण्डूयनं न, पामनंमावुकाः प्रजाः स्युरिति दोषश्रवणात्। तर्हि कथं कर्तव्यमिति चेत्। कृष्णविषाणाग्रे पोटलिकां दृढतया बद्ध्वा तया कण्डूयनमित्येवं कण्डूयनं कर्तव्यमित्यवेहि। अङ्गग्रहणं शिरसोऽङ्गत्वेऽपि प्राधान्यं द्योतयितुम्। तेन स्नापनीयेनोत्साद्येत्यनेन विहित उद्वर्तने प्राधान्यात्प्रथमं शिरस उद्वर्तनं तत इतरेषामिति सिद्धं भवति।

सूपस्था देवो वनस्पतिरूर्ध्वो मा
पाह्योदत्व इति दण्डं प्रतिगृह्णाति॥ ९॥

प्रतिग्रहणं यावत्पर्यन्तं न कृतं तावत्पर्यन्तं दानशब्दार्थः सिद्धो न भवति। दानं विना प्रतिग्रहशब्दार्थोऽप्येवम्। एवं च दण्डदानप्रतिग्रहयोः समानकालिकताऽऽर्थिक्येव। तत्करणमन्त्रः पूर्वमेव वक्तव्य इत्यप्यर्थात्।

अग्निर्दीक्षितः पृथिवी दीक्षा तयाऽग्निर्दीक्षया दीक्षितो ययाऽग्निर्दीक्षया दीक्षितः सा मा दीक्षा दीक्षयतु तया दीक्षया दीक्षे वायुर्दीक्षितोऽन्तरिक्षं दीक्षा तया वायुर्दीक्षया दीक्षितो यया वायुर्दीक्षया दीक्षितः सा मा दीक्षा दीक्षायतु तया दीक्षया दीक्षे आदित्यो दीक्षितो द्यौर्दीक्षा तयाऽऽदित्यो दीक्षया दीक्षितो ययाऽऽदित्यो दीक्षया दीक्षितः सा मा दीक्षा दीक्षयतु तया दीक्षया दीक्षे चन्द्रमा दीक्षितो नक्षत्राणि दीक्षा तया

---

१ क. च. छ. ञदाऽऽस्थ। २ ङ. च. ज. झ. ञ. °सिरिति।

चन्द्रमा दीक्षया दीक्षितो यया चन्द्रमा दीक्षया दीक्षितः सा मा दीक्षा दीक्षयतु तया दीक्षया दिक्षे वरुणो राजा दीक्षित आपो दीक्षा तया वरुणो राजा दीक्षया दीक्षितो यया वरुणो राजा दीक्षया दीक्षितः सा मा दीक्षा दीक्षयतु तया दीक्षया दीक्षे सोमो राजा दीक्षित ओषधयो दीक्षा तया सोमो राजा दीक्षया दीक्षितो यया सोमो राजा दीक्षया दीक्षितः सा मा दीक्षा दीक्षयतु तया दीक्षया दीक्षे प्राणो दीक्षितो वाग्दीक्षा तया प्राणो दीक्षया दीक्षितो यया प्राणो दीक्षया दीक्षितः सा मा दीक्षा दीक्षयतु तया दीक्षया दीक्षे प्रजापतिर्दीक्षितो मनो दीक्षा तया प्रजापतिर्दीक्षया दीक्षितो यया प्रजापतिर्दीक्षया दीक्षितः सा मा दीक्षा दीक्षयतु तया दीक्षया दीक्षे वाचा मे वाग्दीक्षतामग्नये समष्टवा उ प्राणेन मे प्राणो दीक्षतां वायवे समष्टवा उ चक्षुषा मे चक्षुर्दीक्षतां सूर्याय समष्टवा उ मनसा मे मनो दीक्षतां प्रजापतये समष्टवा उ द्यौश्च पृथिवी चाहश्च रात्रिश्च कृषिश्च वृष्टिश्च त्विषिश्चापचितिश्चाऽऽपश्चौषधयश्चोर्क्च सूनृता च ता मा दीक्षमाणमनु दीक्षन्तां भूर्भुवः सुवः सत्यं म आत्मा श्रद्धा मे क्षितिस्तपो मे प्रतिष्ठा श्रद्धा सत्यं गृहपतिरिति केशिनीं दीक्षां जपित्वा स्वाहा यज्ञं मनसेति द्वे अङ्गुली निर्भुजति स्वाहा द्यावापृथिवीभ्यामिति द्वे स्वाहोरोरन्तरिक्षादिति द्वे स्वाहा यज्ञं वातादारभ इति मुष्टी कृत्वेष्ट्रीः[1] स्थेति चतस्रोऽङ्गुलीरुत्सृजति ताभिर्यथासुखं चरति वाचं[2] च यच्छति ।

संभारयजुर्होमोत्तरमयं जपः । केशिनीये तस्य शब्दस्योपादानं ज्ञानार्थम् । ज्ञानाभावे यजुर्भेषप्रायश्चित्तं भुवः स्वाहेति दक्षिणाग्नौ होतव्यम् । दीक्षाशब्देन दीक्षापदवन्तो मन्त्रा लक्षणयोच्यन्ते । दीक्षाग्राहिणोऽग्न्यादयो देवविशेषा एव केशशब्दवाच्याः । केशिनीति दीक्षाविशेषणम् । विशेष्ये लक्षणया मन्त्रपदवाच्यतायां विशेषणस्यापि लक्षणया तत्पदवाच्यत्वम् । कः स्वर्गस्तस्येशाः केशा इति व्युत्पत्त्या केशशब्दस्य देववाचित्वम् । तस्मान्मत्वर्थीय इति विशेष्यस्य दीक्षाशब्दस्य स्त्रीलिङ्गत्वाद्विशेषणीभूतात्केशिशब्दाद्विशेष्यलिङ्गानुरोधेन ङीप् । कशब्दस्य स्वर्गवाचित्वं हैमकोशे—

---

१ ह्म. कृत्वेष्ट्रीः २ ड. ज. ह्म. म. °चं य°।

को ब्रह्मात्मानिलार्काग्निचित्रारियमकेतुषु ।
विष्णुवाहनशब्देऽब्धौ सितकर्णे वसौ घृतौ ।
कलहे कः समाख्यातः प्रश्नेऽर्थेऽपि च को मतः ।
स्वर्गे चक्रे तथा मित्रे शुद्धचर्थे स्मरकालयोः ॥ इति ।

सर्वेषु देवेषु स्वर्गेशत्वं तु त्रिदिवेशपदादिव केशपदादपि सिध्यति । एकवचनं जात्यभिप्रायम् । दीक्षायां नियमव्रतादिरूपायां जपत्वासंभवेन तत्साधनीभूतमन्त्रवाचित्वं लक्षणया स्वीकार्यम् । केशा दीक्षाग्राहिणोऽग्न्यादयो देवा यस्यां सन्ति यत्साधनीभूतमन्त्रेषु प्रतिपाद्यत्वेन सन्तीति यावत्सा केशिनीति निष्कृष्टोऽर्थः । केशिनीदीक्षाजपात्पूर्वमध्वर्युः पृथिवी दीक्षा तयाऽग्निर्दीक्षया दीक्षितो ययाऽग्निर्दीक्षया दीक्षितस्तया त्वा दीक्षया दीक्षयामीत्यारभ्य तास्त्वा दीक्षमाणमनु दीक्षन्तामित्यन्तं यजमानमीक्षमाण आच्छिद्रिकप्रपाठकस्थमन्त्रजातं जपति । युष्मच्छब्दप्रयोगादध्वर्योर्जपोऽयम् । केशिनीं दीक्षां जपित्वेति ल्यप्समानकर्तृकत्वार्थो यो मुष्टिकरणकर्ता स एव जपकर्तेति । तेन मुष्टिकरणस्य यजमानेनैव कर्तव्यत्वाज्जपोऽपि तेनैव कर्तव्य इति सिद्धं भवति । तथा च पत्न्याः कर्तृत्वं वारितं भवति । मुष्टिकरणं यजमानकर्तृकमेवेत्यत्र मूलं ताभिर्यथासुखं चरति वाचं च यच्छतीत्यत्रत्यश्चकार इत्यग्रे वक्ष्यते । द्वे अङ्गुली निर्भुनतीति सामान्यतो यद्यप्युक्तं तथाऽप्यङ्गुलिद्वयं द्वयोर्द्वयोर्हस्तयोर्द्रष्टव्यम् । एवमुत्तरास्वपि । आदौ कनिष्ठिकाद्वयं ततोऽनामिकाद्वयं ततो मध्यमाद्वयं ततो द्वयोर्हस्तयोर्मुष्टीकरणमित्येवं क्रमः । न च दक्षिणस्य हस्तस्यैव द्वे अङ्गुली कनिष्ठिकानामिके प्रथमं ततो मध्यमातर्जन्यौ ततः सव्यस्य हस्तस्य कनिष्ठिकानामिके ततो द्वयोर्हस्तयोर्मुष्टीकरणमित्येवमेवास्त्विति वाच्यम् । समं स्यादश्रुतत्वादितिन्यायविरुद्धस्यैतादृशानुष्ठानस्यानुचितत्वात् । निर्भुनति संभुग्ने करोतीति यावत् । संभुग्नता द्वयोर्द्वयोरङ्गुल्योर्युगपद्युगपदेव । संभुग्नाभिः सर्वाभिरङ्गुलिभिः सहाङ्गुष्ठसंयोगो मुष्टिस्तत्करणं तत्संपादनम् । एतेनार्थात्तर्जन्योरपि संभुग्नता प्रदर्शिता भवति । अन्यथा तद्विना मुष्टिकरणविधिरनुपपन्नः स्यात् । मुष्टी इति द्विवचनम् । पदकारैः प्रग्रहत्वबोधकेतिकरणात् । तेन द्वयोर्हस्तयोर्मुष्टिकरणम् । एष्ट्रीः स्थेति सौत्रो मन्त्रः । द्वयोर्हस्तयोर्द्वे द्वे एवं चतस्रो न तु एकस्यैव । अन्यथा मुष्टी वाचं च विसर्जयित्वेत्यग्रे मुष्टिद्वयविसर्जनविधानानुपपत्तेः । आपस्तम्बेन द्वे अन्यतरतो द्वे अन्यतरत इति स्पष्टमभिधानाच्च । उत्सर्गोऽपि युगपदेव । एष्ट्रीः स्थेति बहुवचनात् । ताभिरुत्सृष्टाभिः । यथासुखमिति वचनाद्याभिरुत्सृष्टाभिः सुखेनाऽऽचमनादि कार्यं कर्तुं शक्यते ता उत्सृष्टव्या इति । तास्तु कनिष्ठिके अनामिके चैव । कनिष्ठानामिकयोरनुत्सर्ग एताभ्यां साकमङ्गुष्ठसंयोगः पीडावह इत्यनुभवसिद्धम् । अतः कनिष्ठे अनामिके इत्येतासामेव चतसृणामुत्सर्गः । अङ्गुलीरुत्सृ-

जतीत्यत्र चतस्र इति स्त्रीलिङ्गात्। एष्ट्रीः स्थेतिमन्त्रगतस्त्रीलिङ्गाच्चैवाङ्गुलिग्रहणे सिद्धेऽङ्गुलिग्रहणं दश हस्त्या अङ्गुलयो दश पाद्या इति श्रुतावङ्गुलित्वेनाङ्गुष्ठग्रहणेऽपि यदि कामयेतोभयं जनयेयमित्यभीव लोमान्यङ्गुष्ठं सहाङ्गुलिभिर्गृह्णीयादित्यत्राङ्गुष्ठस्य पृथग्ग्रहणदर्शनान्नाङ्गुलिष्वङ्गुष्ठग्रहणमिति प्रदर्शयितुम्। एतेनाङ्गुष्ठतर्जन्योरुत्सर्गो वाजसनेय्युक्तो निरस्तो द्रष्टव्यः। वाचं च यच्छतीत्यत्रत्यश्चकारोऽङ्गुलिकरणेन सह संनियोगशिष्टत्वार्थः। तेन मुष्टिकरणकर्तुरेव वाङ्नियम इति तथा च पत्न्या न वाग्यमनम्।

वाग्यमलोपप्रायश्चित्तमाह—

यदि प्रमत्तो व्याहरेद्वैष्णवीमाग्नावैष्णवीꣳ सारस्वतीं बार्हस्पत्यामित्यनूच्य व्याहृतीश्च पुनर्वाचं यच्छति।

यदीत्यनेन नैमित्तिकत्वं प्रदर्श्यते। प्रमत्तः प्रमादतो व्याहरेद्वाचमुच्चारयेत्। बुद्ध्या प्रमत्ततावशेन व्याहरणे तु द्विवारं त्रिवारं वैतेषां मन्त्राणां जप इति स्वार्थिकम्। यदा तु प्रमत्त इत्यस्य उन्मत्त इत्येवार्थ इत्युच्यते तदैतेषां मन्त्राणां सकृदेव जपः। प्रमादेन व्याहरणे तु—

यदि वाग्यमलोपः स्याज्जपादिषु कथंचन।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम्॥

इतिस्मृत्युक्तं ग्राह्यमिति। अयं च वागुच्चारणनिषेधो यज्ञसाधनव्यतिरिक्तविषये। तथा चाऽऽश्वलायनः—आपद्यातो देवा अवन्तु न इति जपेदपि वाऽन्यां वैष्णवीमिति। अन्यद्यज्ञस्य साधनादिति चाऽऽह। आपद्य नियममतिक्रम्य। यज्ञसाधनमिति वचसो विशेषणम्। यज्ञसाधनं वचो यद्यज्ञसंपादनार्थं तद्भ्रेषपरिहारार्थं च तत्। एतद्व्यतिरिक्तवचसो यमनमित्यर्थः। वैष्णवी, इदं विष्णुरिति प्रसिद्धा। अग्नाविष्णू महि तद्वामित्यनुवाकस्याऽऽद्ययोरन्यतराऽऽग्नावैष्णवी। ततः परयोः प्र णो देवी, आ नो दिव इत्यनयोरन्यतरा सारस्वती। ततः परासां बृहस्पते जुषस्व न एवा पित्रे बृहस्पते अतीत्येतासां तिसृणामन्यतरा बार्हस्पत्या। इतिशब्दः प्रकारार्थः। तेनानाज्ञातादिमन्त्रत्रयपाठः सिद्धो भवति। अनुरत्र मन्त्रपाठात्पूर्वमेव वाग्यमलोपप्रायश्चित्तार्था एते मन्त्रा इत्यनुसंधानार्थः। नचैतदनुसंधानं मन्त्रपाठकाल एवास्त्विति वाच्यम्। मन्त्रार्थानुसंधानावरुद्धत्वेनैतदनुसंधानासंभवात्। अनुसंधानस्य ज्ञानरूपत्वेनैककाले ज्ञानद्वयानुत्पादात्। अथवाऽनुरत्रैतेषां मन्त्राणामनुवचनरूपतां दर्शयितुम्। तेनैकश्रुत्यमेव भवति। जपित्वेत्येवं वचनाभावान्न चातुस्वर्यनियमः। चातुस्वर्यनियमाभावार्थमेव जपित्वेतिवचनं परित्यज्यानूच्येतिवचनम्। व्याहृतीः समस्ता व्यस्ता वा। एकैकशः समस्ताभिश्चेति

समुच्चयबोधकवचनस्यात्राभावात्। इष्टिपशुबन्धब्रह्मत्वसूत्रे यदि प्रमत्तो व्याहरेद्वैष्णवीमृचं जपित्वा व्याहृतीश्च पुनर्वाचं यच्छतीति उक्त्वाद्ब्रह्मविषयकमेव। अग्निष्टोमब्रह्मत्वसूत्रे यद्वक्ष्यमाणं तद्ब्रह्मपरमेव। अत्र विहितं यजमानविषयकमेव। अध्वर्व्वादीनां तु वैष्णव्यृब्ब्रह्मत्वेनैव विष्णुस्मरणमिति न नियमः किंतु नामोच्चारणेनापीत्येतादृशोपायान्तरमपीति। एतदभिप्रेत्यैवाऽऽध्वर्यवसूत्र एतस्यावचनम्। तच्चोपायान्तरं स्मृतावुक्तम् —

यदि वाग्यमलोपः स्याज्जपादिषु कथंचन।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम्॥ इति।

प्रसङ्गादिदमुक्तम्।

नानृतं वदति।

सामान्यनिषेधेनाऽऽधानप्रभृति यावज्जीवं नानृतं वदेदितिविशेषनिषेधेन चैवानृतवादनिषेधे सिद्धे पुनर्निषेधः कर्माङ्गत्वार्थः। तेन प्रायश्चित्तत्रयमत्र भवति। एकं सर्वाधिकारकसामान्यनिषेधापरिपालननिमित्तकं प्रायश्चित्तम्। द्वितीयमाहिताग्न्यधिकारकसामान्याकारकविशेषनिषेधापरिपालननिमित्तकम्। तृतीयमेतत्कर्माङ्गभूतनिषेधापरिपालननिमित्तकमिति। आद्ये स्मार्तं प्रायश्चित्तम्। अन्त्ययोः श्रौतं, तच्च द्विगुणम्। एतत्त्रितयमाचरणीयम्। तत्र स्मार्तप्रायश्चित्तमुच्यते। वृद्धपराशरः—

विप्रः क्षुत्कृत्य निष्ठीव्य कृत्वा चानृतभाषणम्।
वचनं पतितैः कृत्वा दक्षिणं श्रवणं स्पृशेत्॥
प्रेक्षणं शशिनोऽर्कस्य ब्रह्मविष्णुशिवस्मृतिः। इति।

वृद्धशातातपः—

क्षुत्वा निष्ठीव्य वासस्तु परिधायाऽऽचमेद्बुधः।
कुर्यादाचमनं स्पर्शं गोपृष्ठस्य च दर्शनम्।
यथासंभवतो ह्येतत्पूर्वाभावे ततः परम्। इति।

पूर्वं जलाभावे कर्मणि व्यापृतौ वा द्रष्टव्यम्। शङ्खलिखितौ—आक्रोशनानृतवादे त्रिरात्रमेकरात्रं वोपवास इति। एवं स्मृतिषु प्रायश्चित्तान्तरमप्युक्तं तत्ततो द्रष्टव्यम्। तत्र शक्ताशक्तकामाकामाभ्यासानभ्यासस्वरूपास्वरूपत्वेन व्यवस्था ज्ञेया। श्रौतप्रायश्चित्तं शब्दानृतार्थानृतभेदेन भिन्नम्। तत्र शब्दानृते सारस्वतीष्टिर्भगवता पतञ्जलिनोक्ता। अर्थानृते व्रातपत्येव। स्मार्ते तु अनृतद्वयेऽपि साधारणमेव। यद्यपि श्रौतेनैकेनैव प्रायश्चित्तेन द्वितीयप्रायश्चित्तस्य प्रसङ्गतः सिद्धिस्तथाऽपि पुनरत्र श्रौतनिषेधकरणादावृत्तिरेव सिद्धा भवति। इदमेवैतन्निषेधस्य फलम्।

न मांसमश्नाति ।

मांसग्रहणं मध्वादीनामुपलक्षणम् । आपस्तम्बेन निषेध्यपदार्थेषु तद्ग्रहणात् । राग-प्राप्तस्य मांसाशनस्य प्रतिषेधः । पश्विडाभक्षणं वैधमिति कृत्वा तस्य न निषेधः । न हिंस्यात्सर्वभूतानीतिशास्त्रेण हिंसा निषिध्यते यागीया तु न निषिध्यते वैधत्वादित्यत्र यथा तथाऽत्रेति द्रष्टव्यम् । अयं वैधव्यतिरिक्तमांसाशनप्रतिषेधो युगान्तर उपयुज्यते । कलौ तु मांसाशनस्य सर्वथैव निषेधेन तदप्राप्तिरेव । कलौ तु यागनिषेधस्यैवाभावेन तत्संबन्धिमांसभक्षणस्याप्यनिषेध एव ।

सत्रस्तेयान्यदीक्षा च नरमेधाश्वमेधकौ ।

सौत्रामण्यां सुराग्रहः ।

अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु ।

इत्यादिभिः कलिवर्ज्यविषयकवचनैर्विशेषनिषेधेनाग्निष्टोमादीनां गोव्यतिरिक्तछाग-गादिपशूनां च निषेधाभावस्यार्थादेव प्रदर्शनात् ।

न स्त्रियमुपैति ।

ऋतावपि । यदि दीक्षितोऽवकिरेदिति रेतःसेके प्रायश्चित्तश्रवणात् । मर्तारं प्रति पत्न्या गमनमर्थादेव निवृत्तं भवति । तच्च बुद्धिपूर्वस्कन्दने यदि दीक्षितोऽवकिरेदिति वक्ष्यमाणप्रायश्चित्तम् । अबुद्धिपूर्वे तु यन्मेऽत्र पयसः परितोषात्तदर्पिथ । अग्निहोत्रमिव सोमेन तदहं पुनरादद इति रेतः स्कन्नमनुमन्त्रयत इत्यापस्तम्बोक्तं प्रायश्चित्तं द्रष्टव्यम् । इदमनुमन्त्रणमाचान्तेन कर्तव्यम् । तथा च सूत्रान्तरम्—आचान्तो रेतःस्कन्नमनुमन्त्रयत इति । यदि दीक्षितोऽवकिरेदिति स्वस्त्रियामेव नान्यस्त्रियाम् । तत्र तु यो ब्रह्मचारी स्त्रियमुपेयादित्येतत्प्रायश्चित्तं स्मृत्युक्तं च भवति । रागप्राप्तस्य प्रतिषेधः ।

नोपर्यास्ते ।

नोपरि पीठमञ्चादावास्ते शयीत च । प्रदर्शनार्थं चाऽऽसनवचनम् । अथ शयीतेत्येवाऽऽश्वलायनः ।

न निष्ठीवते ।

ष्ठीवनं लालाविसर्जनम् ।

न दतो धावते ।

दतो दन्तान् । दन्तधावननिषेधे तत्स्थाने द्वादश गण्डूषाः कार्यास्तेनैव मुखशुद्धिरिति स्मृतितो ज्ञेयम् ।

नाऽऽविष्कुरुते ।

दत इत्यनुवर्तते । आविष्करणं प्रकटीकरणम् ।

नाऽऽनतौ स्मयेतापिगृह्य स्मयेत।

आनतौ केनचिद्धास्यकारणेन हास्यप्राप्तावपि नैव स्मयेत नेषद्धास्यमपि कुर्यात्। स्मिङ्, ईषद्धसन इत्यस्माद्धातोर्निष्पन्नः स्मयशब्दः। ईषद्धास्यनिषेधेन कैमुतिकन्यायेन कखरूपस्य हास्यस्यापि सुतरां निषेधः। अकारणहास्यस्य तु धर्मशास्त्रादेव निषेधसिद्धिः। यदीषद्धास्यमपि निरोद्धुं न शक्यते तदा स्मयेतैव परं तु अपिगृह्य वस्त्रेण मुखमाच्छाद्यैव स्मयेत। एतत्फलं श्रुतौ कृष्णविषाणया कण्डूयतेऽपिगृह्य स्मयते प्रजानां गोपीथायेति। गोपीथा रक्षणम्। उणादिसूत्रेषु निपातनात्साधुः। प्रवर्ग्यब्राह्मणे फलान्तरमपि—तस्माद्दीक्षितेनापिगृह्य स्मेतव्यम्। तेजसो धृत्या इति। एते निषेधाः पत्न्या अपि। तस्येति ज्ञापकात्। पत्न्या वाग्यमनलोपे विष्णुस्मरणमेव प्रायश्चित्तम्।

यदि वाग्यमलोप स्याज्जपादिषु कथंचन।

ऽयाहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम्। इति सामान्यवचनात्।

उपायान्तरसत्त्वे मन्त्रपाठकल्पनायोगात्। अबद्धं मन उन्दतीर्बलं धत्तेति जपौ तु न भवतः। यावदुक्तं पत्न्याः कर्माणि ब्रह्मचर्यं जपाश्चेति सूत्रात्। नचैवं नखनिकृन्तनदन्तधावनस्नानवासःपरिधानाशनाभ्यङ्गाञ्जनपावनादीनामप्यभावोऽस्त्विति वाच्यम्। तस्यैष एव संचर आसुत्याया इत्यत्रत्यतच्छब्दस्यैतेषां धर्माणां प्रापणार्थमेव कृतत्वात्। अन्यथा तद्वैयर्थ्यस्य दुष्परिहार्यत्वापत्तेः। नच वैयर्थ्यपरिहारार्थमुपायान्तरमेव किंचित्कल्पनीयमिति वाच्यम्। एतत्कल्पनातिरिक्तायाः सूत्रान्तरानुगुणार्थकल्पनाया एवासंभवात्। तूष्णींपक्ष इदम्। ऊहपक्षे तु स्नानमन्त्रे पूतैमीत्यूहः। ऊहपक्ष एतावपि जपौ भवत एव। जपाभावपक्षे प्रायश्चित्तं तु विष्णुस्मरणमिति द्रष्टव्यम्।

अबद्धं मन इत्यमेध्यं दृष्ट्वा जपति।

अमेध्यमशुचि मलमूत्रादि पतितचण्डालरजस्वलादि च दृष्ट्वा जपति कालाव्यवाये सत्यसकृद्दृष्ट्वाऽपि सकृदेव जपति। कालव्यवाये तु पृथगेव मन्त्रः। सर्वेषामेकस्मिन्नेव काले युगपद्दर्शने सकृदेव जपति। स्वप्ननदीतरणाभिवर्षणाभिमेध्यप्रतिमन्त्रणेषु चैवमिति एकादशाध्यायचतुर्थपादगते सूत्रे स्वप्ननदीतरणाभिवर्षणेषु कालभेदेऽपि नाऽऽवृत्तिः। अमेध्यप्रतिमन्त्रणे तु एकस्मिन्काल एव युगपदनेकामेध्यदर्शने कालभेदाभावाद्विस्पष्ट आवृत्तेरभाव इति विशेषो द्रष्टव्यः। अमेध्यप्रतिमन्त्रणे दर्शनस्यैव निमित्तत्वात्कालभेदेनामेध्यदर्शन आवृत्तिरेव मीमांसकमतेऽपि। एवमित्यनेन कण्डूयनाधिकरणसिद्धान्तार्थोऽतिदिश्यते। सूत्रार्थस्तु स्पष्ट एव। आचमनादित्यावेक्षणयोः स्मृतिप्राप्तयोः समुच्चय इति केचित्। मा मा हासीरिति मन्त्रान्तः।

उन्दन्तीर्बलं धत्तेत्यभिवृष्यमाणो जपति ।

अभिशब्दात्तंमुखं वृष्यमाणस्य जपः । वृष्यमाण इति शानचा वर्षणसमकालं जपः । कालाव्यवाये सकृदेव जप इति याज्ञिकमते । मीमांसकमते तु काला(ल)व्यवायेऽपि नाऽऽवृत्तिरिति द्रष्टव्यम् । निर्वेधिष्टेति मन्त्रान्तः ।

दक्षिणेन विहारं दीक्षितागारे विहरति ॥ ६ ॥

विह्रियन्तेऽग्नयो यस्मिन्स विहारः प्राग्वंशादिरूपस्तं दक्षिणेनादूर एव दीक्षितागारे कृते विहरति । एतस्मादेव ज्ञायते विहारस्य दक्षिणतो दीक्षितागारं विहारार्थं कर्तव्यमिति । विहारोऽत्र सत्कथावादपुराणश्रवणवेदार्थविचारादिस्तं कालातिवाहनार्थं करोतीत्यर्थः । दक्षिणेन विहारमित्यनेन स्वायतनोपवेशनं व्यावर्त्यते । एनपा दूरत्वं व्यावर्त्यते । दीक्षितागारवचनं बाह्यशालायां यत्रकुत्रचिद्विहरणं व्यावर्तयितुम् । सूत्रान्तरे दीक्षितधर्मान्प्रकृत्य न लौकिकीः कथाः कुर्यात्काव्यरसान्वर्जयेन्न गायेन्न रोदेन्न नृत्यदर्शी भवेदिति । कवेः कर्म काव्यं तच्च नाटकमाणिमप्रहसनादिभेदादनेकविधमित्यग्निपुराणादौ प्रदर्शितं तद्वर्जयेत् । रसाञ्शृङ्गारादिभेदेन दशविधान्रसान्वर्जयेत् ।

नान्यत्र कृष्णाजिनादास्ते शेते वा ।

स्पष्टम् ।

नैनमन्यत्र दीक्षितविमितात्सूर्योऽभिनिम्रोचेन्नाभ्युदियात् ।

दीक्षितार्थं विमितं दीक्षितविमितं तच्च प्राग्वंश इति प्रागेव दर्शितं तस्मादन्यत्रान्यस्मिन्देश एनं दीक्षितं सन्तं सूर्योऽभिनिम्रोचेदस्तमियान्नचाभ्युदियात् । सूर्यास्तमयोदययोर्दीक्षितविमिताद्बहिर्न गच्छेत्किंतु तत्रैव स्यादिति तात्पर्यार्थः । एतत्प्रायश्चित्तमापस्तम्ब आह—वारुणीरभिनिम्रुक्तो जपेत्सौरीरभ्युदित इति । यच्चिद्धि ते यत्किंचेदं कितवास इति वारुण्योऽस्तमित उद्वयं तमसस्परि उदु त्यं चित्रमिति तिस्रः सौरीरभ्युदिते । उदुत्तमं वरुणास्तभ्नाद्यां यत्किंचेदं कितवास इति वारुण्यः, उदु त्यं चित्रं देवानां मत्त स्वा हरितस्तरणिर्विश्वदर्शत इति सौर्य इति वा । भारद्वाजमते तरणिर्विश्वदर्शत इति नास्ति । आपस्तम्बः—मधु मांसं स्त्रियमनृतमुपरिशय्यां क्षौरं विकाले निष्क्रमणं दीक्षितविमितात्प्रवासमिति वर्जयेदिति । विकालो निष्क्रमणायोग्यसंध्यादिः । प्रवासोऽन्यत्र रात्रिवासः । दीक्षितविमितादिति काकाक्षिन्यायेनोभयत्र संबध्यते । विकाले दीक्षितविमितान्न निष्क्रामेन्न च ततोऽन्यत्र रात्रिं वसेदित्यर्थः । सर्वत्र व्रतातिक्रमे व्रातपती । यथाविहितानि तु वैशेषिकाणि । छर्दनादिप्रायश्चित्तमापस्तम्बेनोक्तम्—यदन्नाविरसस्य मे निरष्टविषमः स्मृतः । अग्निष्टत्सोमः पृथिवी पुनरात्मन्दधातु म इति च्छर्दयित्वा क्षुत्वा वा यदन्नमद्यते नक्तं न तत्पातः क्षुधोऽवति । सर्वं

तदस्मान्मा हिꣳसीर्नेहि तद्दृशे दिवेति स्वप्नेऽन्नं भुक्त्वा रुद्रियाभ्योऽध्यः स्वाहेति लोहितमुत्पतितं दृष्ट्वा बीभत्सा नाम स्थाऽऽपः स्वाहाकृताः पृथिवीमाविशतेति स्तूहानं कृपाणा नाम०त्यश्रु तपस्या ना० स्वेदमिति। जपतीत्येव शेषो न त्वनुमन्त्रयत इत्यस्यानुवृत्तिः। स्वप्नेऽन्नं भुक्त्वेत्यत्र स्वाग्निकस्य पदार्थस्य जाग्रद्दशायामसंभवे तदनुमन्त्रणासंभवात्। एकत्र व्यभिचारेण सर्वत्रापि जपतीत्ययमेव शेषः। स्तूहानमित्यादिष्वपि दृष्ट्वेतिपदस्याप्यन्वयः। अश्रु दुःखजमानन्दजं चेत्युभयमपि गृह्यते। अविशेषात्। अग्नये व्रतभृतेऽष्टाकपालं य आहिताग्निरार्तिजमश्रु कुर्यादित्यस्यानैमित्तिकत्वान्नैमित्तिकस्य नित्यतुल्यत्वान्न कांचनाऽऽहुतिं जुहोत्यन्यत्र क्रतुसंयुक्ताभ्य इत्यनेन क्रतूपयोगिव्यतिरिक्ताहुतेर्निषेधाद्व्रातभृतीष्टेर्निषेध इति केचित्। नैतद्युक्तम्। एतस्याः प्रायश्चित्तप्रकरणे पाठात्पाथिकृतीष्टिवद्दोषनिर्घातार्थत्वेन क्रतुसंयुक्तत्वात्। नहि दोषनिर्हरणं विनाऽग्रिमं कर्म संभवति। अत इयमिष्टिर्भवत्येव पूर्णाहुतिर्वेति। स्तूहानं नासास्रुते जले श्लेष्मादि। अश्रु नेत्रस्रुतं जलं, स्वेदः शरीरजं जलम्। भरद्वाजः—नापरया द्वारा निष्क्रामेद्यदि निष्क्रामेत्तेनैव प्रविश्येदं विष्णुरिति जपेदिति। आपस्तम्बः—न पुरा नक्षत्रेभ्यो वाचं विसृजेद्यदि विसृजेदिदं विष्णुस्त्वमग्ने व्रतपा असीति जपित्वा वाचं यच्छतीति। न पुरा नक्षत्रेभ्यो वाचं विसृजेदित्यनुवादः प्रायश्चित्तविधानार्थः। वाग्यतस्तपस्तप्यमान आस्त आ नक्षत्रस्योदेतोरिति पूर्वमवोक्तत्वात्। श्रुतौ तु न पुरा नक्षत्रेभ्यो वाचं विसृजेद्यत्पुरा नक्षत्रेभ्यो वाचं विसृजेद्यज्ञं विच्छिन्द्यादिति दोषं प्रदर्श्य नक्षत्रोदयोत्तरं वाग्विसर्गं कर्तुं तद्विधिमुक्त्वा यदि विसृजेद्वैष्णवीमृचमनुब्रूयाद्यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ संतनोतीति केवलं वैष्णव्यृग्जपमात्रं प्रायश्चित्तमुक्तम्। प्रातस्तु त्वमग्ने व्रतपा असीत्यनुब्रूयाद्यदीक्षितवादं वदेन्मुष्टी वाचं च विसर्जयित्वेति वक्ष्यमाणं प्रायश्चित्तं द्रष्टव्यम्। आपस्तम्बः—न दीक्षितवसनं परिदधीत नास्य पापं कीर्तयेदिति। अदीक्षितानामपि निषेधाद्दीक्षार्थवाससस्तेन त्यक्तं न परिदधीत कश्चिदपि, नास्य सन्तमसन्तं वा दोषं कीर्तयेदित्यर्थः।

नक्तमेव मूत्रपुरीषे कुर्यादिवा वा छायायाम्।

नक्तं रात्रावेव मूत्रपुरीषोत्सर्गं कुर्यात्। न दिवा। यदि निरोद्धुं न शक्नुयात्तदा दिवाऽपि कुर्यात्। परं तु छायायां कुर्यात्। अत्रेदं धर्मसूत्रम्—आराच्चाऽऽवसथान्मूत्रपुरीषे कुर्याद्दक्षिणां दिशं दक्षिणापरां वा ग्रामादावसथाद्वाऽस्तमिते च बहिर्ग्रामान्मूत्रपुरीषयोः कर्म वर्जयेदश्मानं लोष्टमार्द्रानोषधिवनस्पतीनूर्ध्वान्नाच्छिद्य मूत्रपुरीषयोः शुन्धने वर्जयेद्देवतानामभिधानं चाप्रयत इति।

पराशरः—ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव च।

नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः॥

दूरादावसथान्मूत्रं पुरीषं च समाचरेत् । इति ।

दूरादिति दिनपरं न रात्रिपरं भयसंभवात् । तथा चैतदभिप्रेत्यैव देवलः—

रात्रौ दूरं नैव गच्छेद्विण्मूत्रार्थं कदाचन । इति ।

शौनकोऽपि—प्राणबाधामयाद्रात्रौ गृहेऽप्युत्सर्गमाचरेत् ॥ इति ।

विण्मूत्रे संध्ययोर्नैव कुर्यात् । तथा च देवलः—

विण्मूत्रे आचरेन्नित्यं संध्यासु परिवर्जयेत् । इति ।

धर्मसूत्रे—दिवा च शिरसः प्रावरणं वर्जयेन्मूत्रपुरीषयोः कर्म परिहाप्य शिरस्तु प्रावृत्य मूत्रपुरीषे कुर्यादिति । अन्यच्च—न सोपानन्मूत्रपुरीषे कुर्यात्कष्टे पथ्यप्सु च तथा ष्ठीवनमैथुनयोः कर्माप्सु वर्जयेदग्निमादित्यमपो ब्राह्मणं गा देवताश्चाभिमुखो मूत्रपुरीषयोः कर्म वर्जयेदिति ।

अन्यच्च—प्राङ्मुखोऽन्नानि भुञ्जीत उच्चारे दक्षिणामुखः ।

उदङ्मुखो मूत्रं कुर्यात्प्रत्यक्पादावनेजनम् ॥ इति ।

उच्चारः पुरीषकर्म । मूत्रपुरीषोत्सर्गप्रयुक्ता धर्माः स्मृतितो ज्ञेयाः । अत्राऽऽवसथाद्दक्षिणां दिशं दक्षिणापरं वेत्ययमेव पक्ष आश्रयणीयः । अन्तर्ग्रामेऽपि गृहस्य द्वारतो न कुर्यात् । यद्यपि च्छायायां मूत्रपुरीषयोः कर्म वर्जयेदिति सामान्यतः सर्वच्छायानिषेधस्तथाऽपि स्मृतिषु नचोपजीव्यच्छायास्विति विशेषतः श्रवणात्तस्या एव निषेधो न तु च्छत्रादिच्छायाप्रतिषेधः । अप्रतिषिद्धा या छाया सैवात्र ग्राह्या । तस्यां छायायामेव मूत्रपुरीषयोः कर्मात्र नियतमिति दिवा वा छायायामित्यनेन प्रदर्श्यते । उपजीव्यच्छाया नाम यस्यां पथिकादयो विश्राम्यन्ति सा । एतस्यास्तु निषेध एवात्रापि मेघच्छायादेरप्रतिषेधस्त्ववर्जनीयत्वादेवेत्यस्त्वप्रस्तुतम् ।

मूत्रं चिकीर्षन्नियं ते यज्ञिया तनूरिति विषाणया लोष्टं किंचिद्वोपहत्य तदादायापो मुञ्चामि न प्रजामरुहोमुचः स्वाहाकृताः पृथिवीमाविशतेति प्रस्रावयत्यप उपस्पृश्याऽऽचम्य पृथिव्याꣳ संभवेति तत्प्रतिनिदधाति पृथिव्याः संभवेति वा ।

मूत्रं चिकीर्षन्कर्तुमिच्छन् । अपो मुञ्चामीति मन्त्रालिङ्गादेव मूत्रोत्सर्गमात्रसंबन्धित्व एतस्य विधेः सिद्धे मूत्रं चिकीर्षन्नितिवचनं नियमार्थं मूत्रमेव केवलं कर्तुमिच्छन्न तु पुरीषमपि तेन पुरीषोत्सर्गकालिकमूत्रप्रस्रावे नायं विधिरिति । विषाणया प्रत्तयाऽन्यया वाऽपि । न तु प्रत्तयैवेति नियमः । लोष्टोद्धननवत्प्रत्तवचनाभावात् । लोष्टं मृत्पिण्डः । किंचिदित्यनेन लोष्टादन्यत्तृणादिकमुच्यते तद्वा । तृणं लोष्टं वाऽपादाये-

त्येवापठदापस्तम्बः। उपहत्योद्धत्य खनित्वेति यावत्। तेन पतितस्य लोष्टस्य तृणादिकस्य वा न ग्रहणम्। तदुपहतम्। उत्तरत्र प्रतिनिधानादेवाऽऽदाने सिद्धे आदायेतिवचनं तदादायैव मूत्रप्रस्रावः कर्तव्य इति। प्रस्रावयति मूत्रं चिकीर्षन्निति पूर्वत्र तस्यैवोपक्रमात्, योग्यत्वाच्च मूत्रस्यैव प्रस्रावणम्। प्रस्रावणेन्द्रियशुद्धिं कृत्वा हस्तपादप्रक्षालनाचमनानि कार्याणीति स्मृतिसिद्धम्। अप उपस्पृश्य, अपः स्पृष्ट्वा, आचम्य श्रौतमाचमनं कृत्वेत्यर्थः। अप उपस्पृश्याऽऽचम्येति द्वयोर्भेदं विना पृथग्ग्रहणानुपपत्तेरुपस्पर्शशब्देन स्पर्शमात्रं न तु उपस्पर्शस्त्वाचमनमितिकोशोक्त आचमनशब्दार्थो ग्राह्य इति। उदककार्ये प्रोक्षणाचमनादौ कुत्रचिदप्शब्द उपादीयते कुत्रचिन्नोपादीयते तत्र बीजमिदं यत्रोपादीयते तत्रोत्पवनादिसंस्काराभावो यत्र नोपादीयते तत्र संस्कारसत्त्वमिति। पृथिव्याः संभवेति तदपात्तं लोष्टं तृणादिकं च यतोऽपात्तं तत्रैव पुनर्निदधाति पृथिव्याः संभवेति वा। अनुनासिकविसर्गकृतो मन्त्रभेदोऽत्र। लोष्टादानोत्तरमेव कर्णे यज्ञोपवीतधारणादि। आदानात्पूर्वं धारणं तु यज्ञोपवीती कर्म कुर्वीतेतिशास्त्रविरोधापत्तेर्न युक्तम्। नचैवमादायेतिल्यब्बोधितादानमूत्रप्रस्रावयोरव्यवहितानन्तर्यबाधापत्तिः। अत्राव्यवहितत्वस्याविवक्षणात्। कर्णे यज्ञोपवीतधारणस्यापि मूत्रपुरीषोत्सर्गानुगुणत्वेनाव्यवधायकत्वाच्च। आचमनं तु मुष्टयनुरोधेन कथचिदाचमनविधानात्। आचमनार्थे मुष्टिविसर्गे दोषो नेति केचित्। अस्तीत्यन्ये। शौचविधिस्तु मुष्टिं विसृज्यैव कर्तव्यः। तत्र न प्रायश्चित्तमिति केचित्। तदनन्तरं मुष्टिविसर्गप्रायश्चित्तं कृत्वा पुनर्मन्त्रेण मुष्टिकरणमित्यन्ये। दण्डकृष्णाजिने निधायैव मूत्रपुरीषे कर्तव्ये। तथाचाऽऽपस्तम्बः—न दण्डात्कृष्णाजिनादिति विप्रच्छिद्येतोभे निधाय मूत्रपुरीषे कुर्यादिति।

नैनꣳ शूद्रोऽनुप्रविशति।

एनं दीक्षितं प्रति शूद्रो नानुप्रविशति न प्रतिपद्यते। अनुरत्रानुलक्षीकरणपूर्वकप्रवेशनिषेधार्थः। तेन साहजि(सि)कप्रवेशे निषेधो नेत्यर्थादवगतं भवति।

ब्राह्मणेन राजन्येन वैश्येन वा संभाषेत।

एतैः सम्यगपि भाषेतेत्यर्थः। परिगणनात्स्त्रीशूद्राभ्यां सह संभाषणस्यार्थान्निषेधः सिद्धो भवति। सर्वमेतत्स्पष्टमाहाऽऽपस्तम्बः—न स्त्रिया शूद्रेण संभाषेत नैनमनुप्रपद्येतेति। स्त्रिया त्वशूद्रयाऽपि न संभाषेत। बहूपकारमोहादपि नैनं शूद्रमनुगच्छेत्। एनं यजमानं शूद्रो नानुप्रपद्येतेत्यर्थो वेत्यापस्तम्बसूत्रार्थः। नैनमनुप्रपद्येतेत्यस्य द्वितीयोऽर्थोऽस्मत्सूत्रानुगुणः। मात्रादिभिर्मान्याभिः सह सम्यग्भाषणेऽपि न दोषः। भारतादिषु दर्शनात्। संशब्दात्सम्यग्भाषणस्यैव निषेधः। तेन कार्यार्थं स्वल्पभाषणे न दोष इति सिद्धं भवति। शूद्र इत्येकवचनं लिङ्गं चाविवक्षितमुद्देश्यगतत्वात्। तेन

बहवः शूद्राः स्त्रियश्चापि न प्रपद्येयुरिति । शूद्रसंभाषणविषये कंचित्प्रतिप्रसवमाहाऽऽपस्तम्बः—कामं शूद्रेण संभाषेत यः पापेन कर्मणाऽनभिलषितः स्यादिति शाट्यायनकमिति । यस्त्वगम्यागमनस्तेयादिदोषाश्रयतया न श्रुतो निश्चित इति यावत्तेन कामं संभाषेतेत्यर्थः । शूद्रग्रहणं स्त्र्युपलक्षणम् । प्रतिलोमानां तु जन्मनैव पापाभिलषितत्वान्नैभिः सह भाषणम् । लघुपापाभिलषितेन न संभाषणं निषिद्धम् । ननु ब्राह्मणादिभिरप्यशुचिभिः संभाषणं स्मृतिनिषिद्धं शूद्रस्य को विशेष इति चेत् । उच्यते—पापानभिलषितैः सद्भिर्ब्राह्मणादिभिः संभाषणं कर्मान्तराले विहितं यथा भारतादिश्रवणम् ,

अहःशेषं समासीत शिष्टैरिष्टैश्च संयुतः । इति च, तथा न शूद्रेण शिष्टेन चापि विधीयते ।

न कंचन प्रत्युत्तिष्ठति ।

कमपि शिष्टं पित्रादिं गुरुं वृद्धं ज्ञानिनं चापि समागतं दृष्ट्वा न प्रत्युत्थानं कुर्यात् । स्मृतितः प्राप्तस्य निषेधः क्रियते ।

नाभिवादयते ।

पितरं मातरं चैव पितामहं पितामहीम् ।
प्रपितामहतत्पत्न्यौ मातामहं च तत्स्त्रियम् ॥
पितृव्यं मातुलं चैव भ्रातरं श्वशुरं तथा ।
आचार्यमुपनेतारमन्नदातारमेव च ॥
उपाध्यायं नीतिशास्त्रप्रवक्तारं तथैव च ।
भयत्रातारमाप्तं च ऋत्विजं वृद्धमेव च ॥
विद्याविनयसंपन्नं ज्ञानिनं चाभिवादयेत् ।

इत्यादिस्मृतिप्राप्तानभिवाद्यान्नमस्कार्यान्नाभिवादयेन्न नमस्कुर्यादित्यर्थः । आपस्तम्बः—अभिवदति नाभिवादयतेऽप्याचार्यं श्वशुरं राजानमिति शाट्यायनकमिति । अन्यैरभिवादितस्तेभ्य आशिषं वदति न स्वयम्, आचार्यादीन्समागतानपि नाभिवादयते किं पुनरन्यान् । राजाभिवादननिषेधो राज्ञो ब्राह्मणस्याप्रसक्तेः । आपस्तम्बोक्ताचार्यादिपदसमभिव्याहारान्नमस्कार एवात्राभिवादनशब्दार्थः ।

सर्व एवैनमभिवादयेरन्सर्वानेवाभिवदेत् ।

एनं दीक्षितं सर्व एतस्याभिवाद्याः पित्राद्या अन्ये चाभिवादयेरन् । अनभिवाद्यत्वेऽपि तस्य सर्वांस्तानभिवदेत्सर्वान्प्रति आशिषम् ।

आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरे प्लुतः ॥

इतिलक्षणलक्षितां वदेत्। नमस्कारं वा कुर्याद्यथायोग्यम्। नाभिवादयत इत्ययं निषेधो वृद्धत्वेऽपि स्वेन प्रथममभिवादनं न कर्तव्यं तैः कृते पश्चात्कर्तव्यमिति पिण्डितोऽर्थः। एवकारस्याभिवदेदित्यनन्तरमन्वयः। आपस्तम्बः—अग्निर्वै दीक्षितस्तस्मादेनं नोपस्पृशेन्नचास्य नाम गृह्णीयादिति। अन्यस्य विधिरयम्। अस्य दीक्षितस्य न नाम गृह्णीयात्किं तु भो इत्यादिभिः पूजाशब्दैरामन्त्रणमात्रं कर्तव्यमिति। स्पर्शने प्रत्यक्षदोषो न नामग्रहणे। अग्निसंस्तवो न स्पर्शनमात्रे हेतुः किंतु अभिवाद्यैरप्ययमभिवाद्यस्तेभ्योऽभिवाद्येभ्योऽपि स्वेनाऽऽशिषो देया इत्यत्रापि। अत एवाभिवदति नाभिवादयतेऽप्याचार्यꣳ श्वशुरꣳ राजानमिति शाट्यायनकमित्यस्यानन्तरमुपादानम्। अयं निषेध ऋत्विजामपि विधिव्यतिरिक्तस्पर्शविषये।

यद्येनꣳ शूद्रेण संभाषोपेयादेतेषां वर्णानामेकं ब्रूयादिममित्थं विचक्ष्वेति।

एनं दीक्षितं प्रति शूद्रेण सह संभाषा संवाद उपेयादुपपद्येत। एतेषां शूद्रव्यतिरिक्तानामनन्तरोपात्तानां ब्राह्मणराजन्यवैश्यानाम्। यद्यपि वर्णशब्दो ब्राह्मणक्षत्रियवैश्यशूद्रेषु वर्तते

ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः।

इति याज्ञवल्क्योक्तेः, [तथाऽपि] शूद्रात्मकवर्णस्य निषेधकोटिकत्वेनैतच्छब्देन तस्य ग्रहणासंभवाद्ब्राह्मणक्षत्रियवैश्यानामेव ग्रहणम्। यद्यावश्यकः संवाद उपपद्येत तदा ब्राह्मणराजन्यवैश्यानां मध्य एकमन्यतमं यं कंचन वर्णं पुरस्कृत्य संवादयेत्, इममित्थं विचक्ष्वेतीमं शूद्रं प्रतीत्थमनेन प्रकारेण विचक्ष्व ब्रूहीति।

लौकिकीं वाचं वदन्नामधेयेषु विचक्षणं चनासितं चान्ततो दधाति।

लौकिकीं भाषारूपां वाचं वदन्वदिष्यन्वक्तुमुद्युक्त इत्यर्थः। वर्तमानसामीप्ये वर्तमानवदपि कदाचिद्भवतीति तदर्थं यानि आह्वानाद्यर्थानि नामधेयानि तेषु विचक्षणचनासितेत्येतद्वयमन्ततो नामधेयान्ते दधाति योजयति। चकारादुभयोः प्रतिनामधेयं समुच्चयो यथा देवदत्त विचक्षणचनासितेति। विशेषमाहाऽऽपस्तम्बः—चनासितविचक्षणेति राजन्यवैश्याविति। यथायथं राजन्यवैश्ययोरेतौ भवत इत्यर्थः। ब्राह्मणस्य तूभयोः समुच्चय एव। लौकिकीं वाचं वदन्नित्यनेन लौकिकवाग्भाषणस्य गौणता गम्यते। तेन मुख्यत्वेन संस्कृतवागेव वक्तव्या, तस्या वक्तुमशक्यत्वे लौकिकीति सिद्धं भवति। तथा चाऽऽपस्तम्बः—परिणयेन मानुषीं वाचं वदतीति। परितः सर्वेषु देशेष्वेकरूपो नीयत इति परिणयः साधुशब्दस्तेन लौकिकार्थामपि वाचं वदन्ति।

साधुशब्दैरेव भाषेत नान्यैरित्यर्थः। श्रुतिरप्यत्रास्ति प्रमाणं—तस्माद्ब्राह्मणेन न म्लेच्छवाचा भाषितव्यं म्लेच्छो ह वा एष यदपशब्द इति। अपशब्दरूपाभिर्देशभाषाभिर्दीक्षितेन न भाषितव्यमिति निष्कृष्टोऽर्थः। लौकिकवाग्वदने प्रायश्चित्तं सामान्यमेव व्रातपत्यात्मकम्। देवतानामधेयेषु न विचक्षणचनसितशब्दौ किंतु मानुषनामधेयेष्वेव। तथा च बौधायनः—यानि देवतानामानि यथाख्यातं तान्याचक्ष्वाथ यान्यदेवतानामानि यथाख्यातं तान्याचक्षाण उपरिष्टाद्विचक्षणं धेहीति। अदेवतानामानि मनुष्याणां डित्थादीनि न तु कृष्णगणेशशिवभास्करादीनि तेषां देवतानामधेयत्वात्। बौधायनेन लौकिकवाग्भाषणेऽपि चनसितविचक्षणप्रयोग उक्तः—चनसितवतीं विचक्षणवतीं वाचं वदे[दि]ति। मतुब्द्वयाद्यथायथं प्रयोगः प्रथमस्याऽऽदौ द्वितीयस्योत्तरमिति। अथवाऽयमर्थः सूत्रस्य लौकिकीं मानुषीं वाचं वदिष्यन्नामधेयेषु च विचक्षणमन्ततश्चनसितं दधाति यथाक्रमं लौकिकीं वाचं वदिष्यन्विचक्षणशब्दमादौ दधाति नामधेयेषु अन्ततोऽन्ते चनसितं दधातीत्येवमिति। अथवोभयत्रापि उभयस्य समुच्चयः। तत्र वाग्विषय आदावुभयोः समुच्चयो नामधेयविषयेऽन्तत उभयोः समुच्चय इति। विचक्षणं चनसितमिति प्रातिपदिकनिर्देशो न विभक्तिर्विवक्षिता। लौकिकं भाषणं कर्तुमादौ विचक्षणचनसितेत्युक्त्वा लौकिकं भाषणं यथास्वेच्छं कुर्यात्। डित्थविचक्षणचनसितेत्याह्वानार्थं संबोधनवाक्यप्रयोगः। चनसितविचक्षणेत्यामन्त्रयेतेति भारद्वाजः।

न पचति न ददाति न कांचनाऽऽ-
हुतिं जुहोत्यन्यत्र क्रतुसंयुक्ताभ्यः।

अक्रतुसंयुक्तं पाकं न करोतीत्यर्थः। तच्चाऽऽतिथ्याद्यर्थम्। अन्येन पाचने न दोषः। नास्य ब्राह्मणोऽनाश्वान्गृहे वसेदित्यनेन निषेधेन वसत्यर्थं ब्राह्मण आगते तस्य सत्यां भोजनेच्छायामन्नं दद्यादेवेति तदर्थं पाकः प्राप्तः। तत्र स्वयं पाकं कृत्वाऽतिथये भोजने दत्त आयासविशेषेण फलेऽतिशयात्स्वस्यापि पाककर्तृत्वं प्राप्तं तदनेन निषिध्यते। न ददाति अक्रतुसंयुक्तं दानं न करोतीत्यर्थः।

ईजे यज्ञैश्चन्द्रसेनो भूर्यन्नैर्भूरिदक्षिणैः।

इति पुराणेऽन्नदानदर्शनात्, अनिरादिश्य न भुञ्जत इत्येतस्मात्सूत्रालिङ्गाच्चान्नदानं भवत्येव। न कांचनाऽऽहुतिं जुहोति कामपि आहुतिं न जुहोति। कथंभूतां क्रतुसंयुक्ताभ्योऽन्यत्र विहिताम्। क्रतुसंयुक्ताभ्य इत्यत्रैकशेषः। क्रतुसंयुक्तश्च क्रतुसंयुक्तं च क्रतुसंयुक्ता च क्रतुसंयुक्ताः। तल्लक्षणविशेषत्वाभावान्नात्र पुंशेषः। नपुं-

---

१ च °होत्यन्यत्र क्रतुसंयुक्ताभ्यः का°।

सकमनपुंसकेनेत्येकवद्भावस्य वैकल्पिकत्वादभावः। तेन पाकदानयोरपि संग्रहः। आवश्यकश्चायं संग्रहः। अन्यथा क्रतुसंयुक्तपाकदानयोरपि निषेधापत्तेः। पाकेऽक्रतुसंयुक्तत्वं निषेधे प्रयोजकमेवं दानहोमयोरपि। क्रत्वर्थाभ्य इति क्रतुविहिताभ्य इति वा परित्यज्य क्रतुसंयुक्ताभ्य इतिवचनं प्रायश्चित्तार्थपाकदानहोमानामयं निषेधो न भवति, तेषामपि विनष्टसंधानद्वारा क्रतुसंयुक्तत्वादितिज्ञापनार्थम्। क्रतुविहिताभ्यः क्रत्वर्थाभ्य इति चैषमुच्यमाने क्रत्वर्थानां पाकदानहोमानां निषेधे क्रतोरेवासंभवेन तद्व्यतिरिक्तविषयत्वस्यैवावश्यमर्थादेवाङ्गीकर्तव्ये पर्युदासवैयर्थ्यापत्तेः, प्रायश्चित्तार्थपाकदानहोमेषु क्रत्वर्थत्वक्रतुविहितत्वासंभवेनैतेषां क्रतुसंधानार्थत्वेनाऽऽवश्यकानामसंग्रहापत्तेश्च। अतः प्रायश्चित्तार्थानामेतेषां संग्रहार्थमेवैतादृशं वचनमित्यवश्यं स्वीकर्तव्यमेव। संशब्दः पाकदानहोमात्मकेषु विहितेषु प्रायश्चित्तेषु एतेषु एतत्त्रितयान्यतमं विना येन नैव निर्वाहस्तदेव भवति। यस्य तु निर्वाहोऽस्ति तन्नैव भवतीति। यथा यत्र प्रायश्चित्ते पाकात्मकं दानात्मकं होमात्मकं वा जपाद्यात्मकप्रकारान्तरेण वा विकल्पितं तत्र प्रकारान्तरेणापि दोषनिर्हरणसंभवान्नैतानि भवन्तीति। प्रात्यहिकं देवतार्चनं तु होमसहितं क्रियते चेत्तदा न कांचनाऽऽहुतिं जुहोतीति निषेधाद्धोमरहितमेव भवति न तु होमसहितम्। आहुतिग्रहणं देवतोद्देशेन द्रव्यप्रक्षेपमात्रस्योपलक्षकम्। तेन तर्पणस्य वैश्वदेवस्य चापि निवृत्तिः। आहुतिग्रहणात्समिदाधानस्याप्रायश्चित्तार्थस्यापि न निषेधः। देवेभ्यः स्वाहा पितृभ्यः स्वधाऽस्तु भूतेभ्यो नम इत्येते एव देवयज्ञपितृयज्ञभूतयज्ञा न तु वैश्वदेवान्तर्भूता एवेति पक्षेऽपि एतेषामपि अक्रतुसंयुक्तत्वान्निषेधः। मनुष्येभ्यो हन्तेति मनुष्ययज्ञोऽपि न भवति। अक्रतुसंयुक्ताहुतिरूपत्वात्। एतदाज्ञयाऽन्यस्य तु भवत्येव। बौधायनप्रायश्चित्तसूत्रेऽन्येऽपि निषेधाः—न दद्यान्न जुहुयान्न पचेन्न जपेदित्यादित एव विभजेदित्याहुर्नापोऽवगाहेत न वासो मल्यान्न वासः प्रक्षालयेदिति। नापोऽवगाहेत्यनेन वारुणस्नानं व्यावर्त्यते न तु आग्नेयादिस्नानानि व्यावर्त्यन्ते। ब्रह्मयज्ञोऽपि न भवति। यदृचोऽधीते पयआहुतिभिरेव तद्देवाꣳस्तर्पयतीत्याद्यर्थवादेनाध्ययनरूपत्वेऽपि आहुतिरूपत्वप्रतिपादनात्, यज्ञशब्दाच्च। धारणाध्ययनमपि न हेमाद्रौ स्मृत्यन्तरे यज्ञे चानूबन्ध्यान्तं दीक्षितस्यर्त्विजां चेति अनध्यायोक्तेः। औपासनहोमस्थालीपाकपार्वणश्राद्धाष्टकाश्रवणाकर्मप्रत्यवरोहणादीनां नित्यानां नैमित्तिकानां मासिकादीनां चौलोपनयनादीनां संस्काराणां च निवृत्तिः। न गर्भिणीं दीक्षेतेतिनिषेधादेव पुंसवनसीमन्तादीनां जातेष्टेश्च निवृत्तिः सिद्धैव। यत्तु बौधायनप्रायश्चित्तसूत्रे—अथ सूतिकायां दशाहे पर्यवेते यथाम्नातꣳ शौचं कृत्वा पत्नीं कर्मसु योजयेत्तत्कर्म पुत्रो ब्रह्मचारी वा कुर्यात्तन्मन्त्रान्यजमानो जपेदिति, तत्कर्मणि सूतिकात्वे द्रष्टव्यम्। एतस्य संवत्सरसाध्यसत्रे संभवो ज्ञेयः। न कांचनाऽऽहुतिं जुहोत्यन्यत्र क्रतुसंयुक्ताभ्य इत्यनेनाग्निहो-

अहोमदर्शपूर्णमासतद्विकारपशुपिण्डपितृयज्ञाग्रयणानामभ्यासपक्षे चातुर्मास्यानां च निषेधः। एवं क्षामवतीहिरण्यनाशेष्ट्यादीनां चापि। यद्यपि दानं निषिद्धं तथाऽपि वस्त्रालंकरणानुलेपनानि देयान्येव। रामायणादौ दर्शनात्। कन्यादानमपि भवतीति स्वग्रे वक्ष्यते। पाकदानहोमादिनिषेधोऽयमवभृथपर्यन्तं, संध्योपास्तिस्तोत्रपाठादि तु भवत्येव। पाकदानहोमरूपत्वाभावात्। संवत्सरसाध्यसत्रे सूतिकायां सत्यां पुंसवनादयः संस्कारा उत्कृष्यैव कर्तव्याः। होमो वैतेषु न कर्तव्यः। सर्वलोपापेक्षयैकदेशलोपस्योचितत्वात्। अत्र यदुक्तं तदग्राह्यं सुधीभिः। गर्भिणीपत्युरग्न्याधानादिनिषेधस्तु षण्मासोत्तरमेव। तथा च दक्षो गर्भिणीपतिधर्मान्प्रकृत्य—

मासषट्के व्यतीते तु न कुर्यान्मौञ्जिबन्धनम्।
अग्न्याधानं गयाश्राद्धं वपनं च विवर्जयेत्॥ इति।

अग्न्याधानग्रहणं नित्यानां सोमादिकर्मणामुपलक्षणम्। तथा च गालवः—

प्रव्यक्तगर्भापतिरब्धियानं मृतस्य वाहं क्षुरकर्म सङ्गम्।
तथैव यत्नेन गयादितीर्थं यागादिकं वास्तुविधिं न कुर्यात्॥

इति स्पष्टमेव यागनिषेधमाह। यागोऽत्र सोमादिरेव। इदमपि व्यक्तमाह स्मृत्यन्तरं गर्भिणीपतिधर्मान्प्रकृत्य—

मासषट्के व्यतीते तु न कुर्यादनलाहितिम्।
यागदीक्षां तीर्थयात्रां गयाश्राद्धं च वर्जयेत्॥ इति।

मासषट्के व्यतीते न कुर्यादित्युक्त्या मासषट्कमध्ये करणे न दोष इति। अत्र केचित्—षण्मासोत्तरं योऽन्याधानादिनिषेधः स दोषातिशयार्थः। तेन तत्पूर्वमपि सति संभवे निषेधपरिपालनमस्त्येवेत्याहुः।

तदहर्दीक्षितो रात्रिं जागर्ति।

यस्मिन्नहि दीक्षितस्तस्मिन्नह्नि रात्रिं जागर्तीत्यर्थः।

न व्रतं भवति।

पयःपानरूपम्। अन्यत्स्पष्टम्।

नक्षत्रं दृष्ट्वा तूष्णीमेव वाचं विसृजते।

नक्षत्रमित्येकवचनं श्रुतौ बहुवचनश्रवणेऽप्येकमपि दृष्टं चेत्तेनैव श्रुत्यर्थः सिद्धो भवतीति बोधयितुम्। व्रतं कृणुतेत्यस्य परप्रेषणार्थत्वं वाग्विसर्गार्थित्वं चेत्युभयार्थत्वेऽपि तत्र परप्रेषणार्थत्वस्यास्मिन्नह्न्यभावेऽपि वाग्विसर्गस्य सत्त्वात्तदर्थं व्रतं कृणुतेति प्राप्तेः शङ्कायां तद्वारणार्थं तूष्णीमिति। कालार्थ एव संयोगो नाङ्गाङ्गिभाव इति भावः। तथा च जैमिनिः—तथोत्थानविसर्जने इति। एवकारो बौधायनोक्तव्याद्ध-

तिनिरासार्थः। बौधायनोक्तोऽथोदितेषु नक्षत्रेषु यजमानः कृष्णाजिनमासज्य पूर्वया द्वारोपनिष्क्रम्याग्रेण शालां तिष्ठन्भूर्भुवः सुवर्व्रतं कृणुतेति त्रिर्वाचं विसृजत इति विशेषोऽन्योऽत्र नियमेन स्वीकार्य इत्येवकारेण गम्यते। तूष्णीमित्यनेनोपस्थितस्य व्रतं कृणुतेत्यस्यैव निवृत्तिः। प्रथमदिने न व्रतं भवति तूष्णीमेव वाचं विसृजते व्याहृतिभिर्वेति बाधूलादिप्रोक्तपाक्षिकव्याहृतिनिवृत्तिरेवकारेण। कृष्णाजिनेनोर्ध्वग्रीवेण शरीरं प्रावृत्य तदुक्तोऽयमपि विधिः स्वीकार्यः।

यत्रैनं व्रतप्रदः संप्रेष्यति तस्मिन्काले वाचं यच्छति ॥ ७ ॥

यत्र यस्मिन्काले दीक्षित वाचं यच्छेति दीक्षितं संप्रेष्यति तस्मिन्नेव काले पत्न्यपि वाचं यच्छति। अत्र तस्मिन्नित्यस्याव्यवहितसमीपकाल इत्यर्थः। तथा च दीक्षित वाचं यच्छेत्येतत्प्रैषाव्यवहितोत्तरकालिकपत्निशब्दश्रवणमात्रे जाते वाचं यच्छति न तु पत्नि वाचं यच्छेतिश्रवणानन्तरं वाचं यच्छतीतिज्ञापनार्थम्। एतेनेदमपि अवगतं भवति यजमानस्य स्वप्रैषसमकालमेव वाग्यमनमिति। तस्मिन्काल इत्यत्र कालवचनं देशव्यावृत्त्यर्थं, तेन यस्मिन्देशे प्राग्वंशे प्रैषो दत्तस्तस्मिन्देश एव वाग्यमनमिति नियमो व्यावृत्तो भवति। नन्विदं सूत्रमेव व्यर्थं प्रैषसंबन्धिकालस्यापि पुरोदयमधिवृक्षसूर्ये च व्रतप्रदः संप्रेष्यतीत्यनेनैव प्राप्तत्वादिति चेत्सत्यम्। कालान्तरमप्यत्रास्तीतिज्ञापनार्थत्वेन सार्थक्यात्। तच्च कालान्तरं बौधायनसूत्रे—अथ पुरा नक्षत्राणामन्तर्धानात्संप्रेष्य वाचंयमयोर्व्रते दोहयत इति। अथोषसमिन्धनवेलायामुत्तरेणाऽऽहवनीयं तिष्ठन्संप्रैषमाहाग्नीज्योतिष्मतः कुरुत दीक्षित वाचं यच्छ पत्नि वाचं यच्छेति संप्रेष्य वाचंयमयोर्व्रते दोहयत इति च। उपव्युषमिति सूत्रान्तरे।

याः पशूनामृषभे वाचस्ताः सूर्यो अग्रे शुक्रो अग्रे
ताः प्रहिण्यो यथाभागं वो अत्र शिवा नस्ताः
पुनरायन्तु वाच इत्युद्यन्तमादित्यमुपतिष्ठते।

नेक्षेतोद्यन्तमादित्यमित्यस्य निषेधशास्त्रस्यात्र बाधः। आदित्यग्रहणं रश्म्यरुणव्यावृत्त्यर्थम्।

उदित आदित्ये व्रतं कृणुतेति संप्रेष्यति।

संप्रैषान्ते वाग्विसर्गः।

एवमस्तमिते।

एवमित्यनेन व्रतं कृणुतेति प्रैषोऽतिदिश्यते वाग्विसर्गश्च।

मध्यंदिने मध्यरात्रे च व्रतयति।

त्रेधा विभक्तस्य पञ्चधा विभक्तस्य वा दिवसस्य मध्यमो भागो मध्यंदिनः। रात्रेस्त्रेधा विभक्तायाः पञ्चधा विभक्तायाः वा मध्यमो भागो मध्यरात्रम्। सूर्यपरिवर्त-

नकाले यस्य कस्यचिदप्यशनस्य स्मृतौ निषेधात्तद्व्यतिरिक्तकालव्रतम्। तत्र दिवसपूर्वार्धान्त्यघटिकाद्वयात्प्राक्प्रथममागोत्तरो यः कालः स व्रतकाल इति भागत्रयपक्षे। भागपञ्चकपक्षे रात्रिपूर्वार्धान्त्यघटिकाद्वयात्प्राग्भागद्वयोत्तरो यः कालः स व्रतकाल इति। एवं रात्रावपीति निष्कृष्टोऽर्थः। अत्राऽऽपस्तम्बः पक्षान्तरमाह—अतिनीय वा मानुषं कालं सायं दुग्धमपररात्रे प्रातर्दुग्धमपराह्ण इत्येक इति। यस्मिन्काले दिवा नक्तं च प्रायशो मनुष्या भुञ्जते स मध्यंदिनादिर्मानुषः कालस्तस्मिन्नतीते वा व्रतयति। सायंदुग्धं रात्रिव्रतं प्रातर्दुग्धमहर्व्रतम्।

नैनमदीक्षिता व्रतयन्तं पश्यन्ति।

परिश्रित्य व्रतयतीति बौधायनः।

पयो ब्राह्मणस्य यवागू राजन्यस्याऽऽमिक्षा वैश्यस्य।

पयः क्षीरं, यवागूः शिथिलौदनः। आमिक्षा प्रसिद्धा। यथावर्णमेतानि व्रतान्यनुसंघातव्यानीत्यर्थः। नचेदं व्रतं पुरुषार्थमेव दृष्टार्थत्वादिति वाच्यम्। प्राप्तनियमस्य दृष्टासंभवेन क्रत्वपूर्वार्थताया एव युक्तत्वात्। तथा च चतुर्थाध्याये तृतीयपादे जैमिनिः—द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्मः स्यादिति। सूत्रार्थस्तु क्रियाया अर्थः क्रियार्थः। अर्थशब्देनार्थ्यत इत्यर्थमिति व्युत्पत्त्या फलमुच्यते। क्रियार्थ एवार्थो येषां पुरुषाणां ते क्रियार्थास्तेषां क्रियार्थानाम्। तेषां कथंभूतानां द्रव्याणां द्रव्यवताम्। द्रव्याणामित्यत्रार्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः। तेषां द्रव्यवत्त्वं तु पयो ब्राह्मणस्य व्रतं यवागू राजन्यस्याऽऽमिक्षा वैश्यस्येतिश्रुतिसिद्धम्। तेषां संस्कारः पयआदिव्रतरूपः संस्कार इति क्रतुधर्मः स्यादिति। एतच्छेषभूतं द्वितीयं सूत्रं पृथक्त्वाद्व्यवतिष्ठेरन्निति। पयो ब्राह्मणस्य व्रतं यवागू राजन्यस्याऽऽमिक्षा वैश्यस्येतिविधिबोधितपुरुषपृथक्त्वाद्व्यवतिष्ठेरन्व्यवस्थिततां गच्छेरन्निति। अत्र राजन्यशब्दः सर्वक्षत्रियपरो न त्वभिषिक्तक्षत्रियमात्रपरः। अवेष्ट्यधिकरणे तथादर्शनात्, ब्राह्मणवैश्ययोर्मध्ये पाठाच्च। इममर्थं द्वितीयाध्याये तृतीयपादे—अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यत इति सूत्रेण जैमिनिरप्याह। राजसूये राजकर्तृक आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा मैत्रावरुणीमामिक्षां वशा दक्षिणा बार्हस्पत्यं चरुꣳ शितिपृष्ठो दक्षिणेत्यवेष्टिनामेष्टिर्विहिता। पिशङ्गी पिशङ्गवर्णा। पष्ठौही बालगर्भिणी गौः। चतुर्वर्षेति केचित्। वशा वन्ध्या गौः। शितिपृष्ठः श्यामपृष्ठो गौः। सर्वत्र निर्वपतीत्यनुषङ्गः। यद्यपि(?)दिशामवेष्टयो भवन्तीत्यर्थवादादवेष्टिसंज्ञैतस्या इष्टेः। अर्थवादे बहुवचनं प्रत्येकयागाभिप्रायम्। अत्र तु अवेष्टिसंज्ञकहविःसमुदायवत्कर्मपरमित्यविरोधः। जात्यभिप्रायं वैकवचनम्। एतस्यामवेष्टौ यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाऽऽहुतिमाहुतिं हुत्वा

तमभिधारयेद्यदि राजन्य ऐन्द्रं यदि वैश्यो वैश्वदेवमिति तत्संबन्धिब्राह्मणादिवाक्ये ब्राह्मणादिश्रवणं क्रतुर्यागान्तरं तत्प्रधानमुच्यते। कुतः—यज्ञसंयोगात्, क्षत्रियस्यैवेति सूत्रार्थः। विस्तरस्त्वाकरतो ज्ञेयः। पयआदीन्येतानि द्रव्याणि द्रव्यान्तरसद्भावेऽपि नित्यान्येव। तथा च षष्ठाध्यायेऽष्टमे पादे जैमिनिः—तथा भक्षप्रैषाच्छादनसंज्ञप्तहोमद्वेषमिति। पयो व्रतं ब्राह्मणस्येति भक्षोदाहरणं, द्रव्यान्तरसद्भावेऽपि पयआदीन्येव व्रतेषु। अग्नीदग्नीन्विहरेत्यादिः प्रैषोऽन्यतोऽवगमेऽपि प्रैषार्थस्य। अहतं वासः परिधत्त इति वासोन्तरसत्त्वेऽपि। यत्पशुर्मायुमकृतेति संज्ञप्तहोमो मायुकरणाभावेऽपि। योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति मन्त्रो द्वेष्यासद्भावेऽपीत्युदाहरणानि द्रष्टव्यानि। निमित्ताश्रवणात्सत्यपि चान्यस्मिन्नियमादृष्टसिद्धेरनन्योपायत्वान्नियतमिति। सूत्रे तथाशब्दो नियतं वाऽर्थवत्त्वात्स्यादितिपूर्वसूत्रगतनियतशब्दानुवृत्त्यर्थः। अन्यत्स्पष्टम्। आमिक्षा लौकिकेन दध्ना कर्तव्या कठिनत्वात्। पाकयज्ञस्य रूपमिति व्रतविषयकामिक्षाविषये पाकयज्ञसंस्तवादेवाऽऽमिक्षाधर्माणामप्राप्तिः।

सर्ववर्णसाधारणं द्रव्यमाह—

एकदुग्धं यवागूं वैकदुग्धे।

एकस्या व्रतदुहो दुग्धमेकदुग्धं तद्व्रतयेत्। एकस्या व्रतदुहो दुग्धे यवागूं श्रपयित्वा तां वा व्रतयेत्। शाखान्तरीयोऽयं विधिः। स्पष्टमेतमाहाऽऽपस्तम्बः—यवागूमेकदुग्धं वा व्रतयेदित्यवर्णसंयोगेनैक उपदिशन्ति तद्धैतदेके पयो व्रतयन्ति तदु यथा न कुर्यात्पयस्येव यवागूं श्रपयित्वा व्रतयेदिति। अत्रैकदुग्धग्रहणात्केवलपयोव्रते बहु दुग्धमपीष्यते यदि बह्वृचस्तासामाशिरं कर्तव्यमिति। अत्रान्यमपि विशेषमाहाऽऽपस्तम्बः—यदि व्रतधुगल्पं दुहीतान्यां दुह्याद्यद्यन्या न स्यादद्भिः सꣳसृज्य श्रपयेद्यदि पयो न स्यादप्स्वेव यवागूं श्रपयित्वा व्रतयेदप्यन्ततः पिप्पलानि नत्वेव न व्रतयेदग्निहोत्रस्याविच्छेदायेतीति। पिप्पलानि फलानि व्रीहयो वा। सर्वाभावे फलान्यपि व्रतयेत्, न तु लोपयेत्, व्रतस्याग्निहोत्रसंस्तवादिति भावः। इतिः श्रुतिसूचनार्थः। तथाऽग्निहोत्रस्याविच्छेदायेति विज्ञायत इति भारद्वाजः।

यदि दधीयादेतदस्मै दधि कुर्युः।

दधीयाद्धीच्छेत्, एतदेवाऽऽतञ्च्यास्मै यजमानाय यजमानार्थं दधि कुर्युः। बहुवचनं परिकर्म्यृत्विजामन्यतमप्राप्त्यर्थम्।

यद्यग्नीयाद्धाना अस्मा अन्वावपेयुः सक्तून्वाऽस्मा अन्वावपेयुर्धृतं वाऽस्मा अन्वावपेयुः।

यदि तीक्ष्णबलोऽन्नमदनीयमिच्छेत्तदा तस्यानुपदासार्थं व्रतकाले व्रत एव धानाद्यन्यतमद्रव्यं निवपेयुः प्रक्षिपेयुरित्यर्थः। एते समविकल्पा इतिप्रदर्शनार्थं वाशब्दद्वयो-

पादानम्। अनुर्यावता प्राणसंरक्षणं भवति तावदेवानुलक्षीकृत्य धानादिकस्यान्वावापो न त्वधिकस्येतिद्योतनाय। धानाः सक्तून्घृतं वाऽस्मा अन्वावपेयुरित्येतावत्येव सूत्रे लाघवात्कर्तव्येऽस्मा अन्वावपेयुरित्यस्य पृथक्पृथग्वचनं यदादौ स्वीकृतं द्रव्यं तदेवाऽऽन्तं ग्राह्यं, तदभावे तत्प्रतिनिधिरेव ग्राह्यो न तु विहितं द्रव्यान्तरं व्रीहियववदितिज्ञापनार्थम्। धानाः भृष्टयवाः। सक्तवो भृष्टयवपिष्टानि। अत्यन्ताशक्तावोदनोऽपि। तथा च ब्राह्मणम्—यदि मन्येतोपदस्यामीत्योदनं धानाः सक्तून्घृतमित्यनुव्रतयेदात्मनोऽनुपदासायेति।

अपि वाऽग्निहोत्रहविषामेकं व्रतयेत्।

अग्निहोत्रहविषां मध्य एकं द्रव्यं व्रतयेत्। उपदस्यन्नोदनाद्यपि व्रतयेत्। एतन्मध्य ओदनोऽपि संगृहीतो भवतीति। न मांसमश्नातीतिनिषेधान्मांसमेतेषु वर्ज्यम्। स्पष्टमाहाऽऽपस्तम्बः—अप्यग्निहोत्रं हविषामेकं व्रतयेन्मांसवर्जमिति। एकग्रहणं मिश्रणप्रतिषेधार्थम्।

सार्ववर्णिका एते व्रतकल्पाः।

सर्ववर्णसाधारणा एते व्रतकल्पा भवन्तीत्यर्थः।

सर्वेषामुपसत्सु स्तनकल्पाः।

पयो ब्राह्मणस्य यवागू राजन्यास्याऽऽमिक्षा वैश्यस्येत्यादिविधिः स दीक्षार्थः। उपसत्सु तु सर्ववर्णानामविशेषेण पयोव्रतस्यैव चतुःस्तनादिकल्पा आम्नातत्वात्। ते चोपसत्स्वेव दर्शयिष्यन्ते। यदा पुनर्व्रत्यमानं पयआदि न जीर्यतीत्याशङ्क्यते तदाऽपि किमवश्यं व्रतयितव्यमुत नेति संशये सिद्धान्तमाह षष्ठाध्यायेऽष्टमे पादे जैमिनिः—अनर्थकं त्वनित्यं स्यादिति। तदा हि यजमानस्य रोगोत्पत्त्या क्रतुविरोध एव संभाव्येत तेन प्रधानविरोधान्न व्रतयितव्यमिति। सूत्रार्थस्तु यत्तु प्रधानलोपप्रसङ्गादनर्थकं व्रतं तदनित्यं स्यादिति।

उरुव्यचा असि जनधाः स्वभक्षो मा
पाहीति कंसं व्रतप्रदानमनुमन्त्रयते।

कंसग्रहणं सूत्रान्तरोक्तचमसनिवृत्त्यर्थम्। प्रदीयतेऽनेनेति प्रदानं व्रतस्य प्रदानं व्रतप्रदानम्।

दैवीं धियं मनामह इति हस्तावनेनिक्ते।

अवनेजनं प्रक्षालनम्। असद्वश इति मन्त्रान्तः।

ये देवा मनोजाता मनोयुज इति व्रतयति।

नमस्तेभ्यः स्वाहेति मन्त्रान्तः। अत्र बौधायनः—परिश्रित्य व्रतयतीति, यावन्मात्रं

व्रतयित्वा तूष्णीं भूयो व्रतयतीति च । एतस्मिन्काले प्रतिप्रस्थाता पत्न्यै पात्रे निषिच्य व्रतं प्रयच्छति तत्सा परिश्रित्य व्रतयति तूष्णीं निर्णिज्य पात्रे प्रयच्छत इति च । ओदनानुव्रतपक्षे व्रतस्य संस्कारत्वेन तदर्थस्यौदनस्य परिषेकानुमन्त्रणे भवत एव संस्कारत्वात्पाकदानहोमरूपत्वाभावाच्च भवत एवम(मा)पोशा(शा)नमपि भवत्येव ।

शिवाः पीता भवथ यज्ञियासो यूयमापोऽस्माकं
योनावुदरे सुशेवाः । इरावतीः पुरुरूपा
अनागसः शिवा नो भवथ पीतय इत्युदकं
पिबति यदाऽ*पीतं भवति यदा पिपासति ।

यदोदकं पी(वी)तं विशेषेणेतं प्राप्तं केनचिद्भक्त्याऽऽहृत्य दत्तं तदप्रत्याख्येयमिति कृत्वा स्वल्पमपि तावदनेन मन्त्रेण पेयमेव ।

क्षीरं जलं च ताम्बूलमप्रत्याख्येयमुच्यते ।
प्रत्याख्यानकृदेतेषां पापीयाञ्जायते द्विजः ॥

इति स्मृतौ प्रत्याख्याने दोषश्रवणात् । यदाऽपीतं भवतीत्येव पाठ इत्याग्रहस्तदाऽपीतं संमुखमितं प्राप्तं केनचिदानीतं पानार्थं भवतीत्यर्थो ज्ञेयः । दुग्धपानाव्यवहितोत्तरं जलपानस्य वैद्यकशास्त्रे निषिद्धत्वात्पिपासायां सत्यामपि कंचित्कालं विरम्यैव जलं पेयमिति ज्ञेयम् । व्रतकालिकोदकपान एवैष मन्त्र इति न किंतु सर्वेष्वपि पानेषु इति । शिवाः पीता भवथ यूयमापोऽस्माकं योनावुदरे सुशेवाः । इरावतीरनमीवा अनागसः शिवा नो भवथ जीवस इति व्रतयित्वा नाभिदेशमभिमृशत्यपश्च पीत्वा जपतीत्यापस्तम्बः । पत्नी तूष्णीमेव व्रतयति । तथा चाऽऽपस्तम्बः--तूष्णीं पत्नी स्व आयतने व्रतयतीति । तत्सा परिश्रित्य तूष्णीं व्रतयतीति बौधायनोऽपि । हस्तावनेजनमुदकपानमपि तत्संबन्धात्तूष्णीमेव ।

दक्षिणेनाऽऽहवनीयं प्राङ् शेते ।

प्राक्शिराः शेते ।

दक्षिणेन पार्श्वेन ।

शेत इत्यनुषज्यते ।

नोत्तानः शयीत ।

स्पष्टम् । न न्यङ्ङित्यप्यापस्तम्बः ।

नाग्नेः पराङ्पर्यावर्तेत ।

पराङ् अग्नेः सकाशात्पराङ्मुखतया पर्यावर्तनं न कुर्यात् । परिशब्दोऽत्र सामीप्यार्थे ।

---

* अत्र प्रथमव्याख्यानुसारी यदा वीतमिति पाठो ज्ञेयः ।

अग्ने त्वꣳ सुजागृहीति स्वप्स्यन्नाहवनीयमुपतिष्ठते ।

स्वप्स्यन्स्वापं करिष्यन् । यत्र जागरणं नोक्तं तत्रायं नियमः । याज्ञिकमते पुनः पुनः प्रतिबुध्य स्वाप आहवनीयोपस्थानस्याऽऽवृत्तिः । मीमांसकमते सर्वां रात्रिं स्वापमनुसंधायोपस्थानमिति कृत्वा नाऽऽवृत्तिः । एतत्करणीभूतमन्त्रविषयकत्वस्य तैरुक्तत्वान्मन्त्रमात्रनिवृत्तिपरमेवैतन्नतु तदङ्गपरमपीति यद्युच्यते तदा तन्मतेऽप्युपस्थानस्याऽऽवृत्तिरस्त्येवेति द्रष्टव्यम् ।

विश्वे देवा अभि मामाऽवव्रुत्रन्नित्युपपर्यावर्तते यद्यपपर्यावर्तेत ।

अपपर्यावर्तनमग्नेः पृष्ठतः करणं, यदीत्यनेन समन्त्रकमुपपर्यावर्तनं कर्तव्यमिदमेव प्रायश्चित्तमिति बोध्यते । उपपर्यावर्तनमग्न्याभिमुखतया भवनम् । राधसेति मन्त्रान्तः ।

पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः पुनः श्रोत्रं म आगात्पुनः प्राणः पुनराकूतं म आगात्पुनश्चित्तं पुनराधीतं म आगाद्वैश्वानरो मेऽदब्धस्तनूपा अन्तस्तिष्ठतु दुरितानि विश्वा । वैश्वानरो विश्वभृद्विश्वशंभूरवबाधतां दुरितानि विश्वा स नो दिवा स रिषः पातु नक्तं त्वमग्ने व्रतपा असीति प्रतिबुध्य जपति ।

यद्यु(द्य)पपर्यावर्ततेत्यस्यात्रान्वयो वा न पूर्वत्र । नक्तमित्येतदनन्तरमिति जपतीति अध्याहार्यम् । अस्मिन्पक्षे विश्वे देवा अभि मामाऽवव्रुत्रन्नित्यन्तं समन्त्रकमुपपर्यावर्तनं नित्यमेव । नच त्वमग्ने व्रतपा असीति प्रबुध्य जपतीत्यस्याप्यत्रैवान्वयोऽस्त्विति वाच्यम् । समुच्चयोपकाराभावात् । पूर्वत्रान्वये तु लोप एव । प्रतिबुध्य जपतीतिवचनं प्रतिबोधाङ्गभूतो जप इति बोधनार्थं, तेन जागरणदिवसे स्वापाभावान्नायं रात्रौ जप इति सिद्धं भवति । प्रतीत्युपसर्गोऽत्यन्तजाग्रद्दशायामेवायं जप इति सूचयितुम् । ईड्य इति मन्त्रान्तः ।

त्वमग्ने व्रतपा असीत्यनुब्रूयाद्यद्यदीक्षितवादं वदेत् ।

पुनस्त्वमग्ने व्रतपा असीतिवचनं पुनर्मन इत्यस्य वैष्णव्या ऋचश्च परिसंख्यानार्थम् । अनुब्रूयादितिवचनाज्जपत्वाभावः । तेन चातुःस्वर्यानियमोऽत्र सिद्धो भवति । म्लेच्छाभिभाषणविचक्षणचनसितादिवर्जनं चादीक्षितवादः ।

मुष्टी वाचं च विसर्जयित्वा ।

त्वमग्ने व्रतपा असीत्यनुब्रूयादिति पूर्वेणान्वयः ।

दीक्षणीयाप्रभृतीयं वृत्तिः ।

यदि प्रमत्तो व्याहरेदित्यारभ्य मुष्टी वाचं च विसर्जयित्वेत्येतदन्ता धर्मा वृत्तिशब्देनोच्यन्ते । इयमेतदन्ता ।

---

१ क. ङ. छ. झ. ञ. ढ. यद्युप° । २ क. छ. ञ. ढ. °राधी° ।

दण्डान्न च्छिद्यते न प्रतिमुच्य कृष्णाजिनं चंक्रम्यते कृष्णविषाणया कण्डूयतेऽपिगृह्य स्मयत इत्युपयोगप्रभृतीन्येतानि व्रतानि भवन्ति ॥ ८ ॥
इति हिरण्यकेशिसूत्रे दशमप्रश्ने द्वितीयः पटलः ।

दण्डदानेन दण्डस्य कृष्णाजिनारोहणेन कृष्णाजिनस्य कृष्णविषाणायाः प्रदानेन वस्त्रप्रावरणेन वासउपयोगः । एतत्प्रभृतीनि एतदुत्तराणि । दण्डान्न च्छिद्यते कृष्णाजिनं प्रतिमुच्य न चंक्रम्यत इत्येतद्वयं निषेधरूपम् । उत्तरं द्वयं विधिरूपम् । एतानि व्रतानि तस्य तस्योपयोगमारभ्य तत्तद्विसर्गपर्यन्तं भवन्ति । दण्डान्न च्छिद्यते दण्डान्न वियुज्यते । कृष्णाजिनं विमृज्य पादविक्षेपणमपि न कुर्यात् । कण्डूयनं कृष्णविषाणयैव कुर्यान्न नखादिभिः । दैक्षवाससा मुखमाच्छाद्यैव हास्यं कुर्यादित्यर्थः ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्रश्नस्य द्वितीयः पटलः ॥ २ ॥

अथ दशमप्रश्ने तृतीयः पटलः ।

पूषा सन्येति सनीहारान्सꣳशास्ति ।

सनिं याच्ञालब्धं धनं तद्यस्माद्यस्माद्याचितं द्रव्यं ततस्ततो ये हरन्ति ते सनीहारास्तान्संशास्ति प्रेरयति अमुं चामुं च गच्छतेति । अनेन ज्ञायते पूर्वमेव क्रत्वर्थं द्रव्यं याचितं भवतीति । दीर्घश्छान्दसः । सनीहारजातिविषयविशेषप्रदर्शकं द्वैधसूत्रं पशुपालप्रेष्याद्युपकल्पनावसर उक्तमेव ।

द्वादशाहं भिक्षाचर्यं चरत्यपरिमिते दीक्षाकल्पे परिमिते यथाकामी ।

यदि असंभृतद्रव्यस्यायं निश्चयः क्रतुदीक्षामध्ये याच्ञयाऽपि द्रव्यप्राप्तिर्भविष्यत्येवेति तदाऽप्यमेव प्रकारः । अत्र बौधायनः—अथ सनीहारान्प्राहिणोति स यं

---

१ क. च. छ. ट °नि भ° ।

मन्यते न मा प्रत्याख्यास्यति तं प्रति प्रथममभिप्रहिणोतीति । तत्र प्रकारद्वयम्— अपरिमिते दीक्षाकल्पे द्वादशाहं भिक्षाचर्यचरणम्, एकद्यादिदीक्षाकल्पे यथेच्छं कालानुरोधेन । एकदीक्षादिकल्पेऽपि भिक्षाचर्यचरणं कर्तव्यमेव । इदं भिक्षाचर्यचरणं दक्षिणाद्यर्थम् । तथा च भरद्वाजः—द्वादशाहं दक्षिणार्थं भिक्षेतेति । द्रव्यसत्त्वेऽपि याच्ञा नित्यैव । तथा च षष्ठाध्यायेऽष्टमे पादे जैमिनिः—याच्ञाक्रयणमविद्यमाने लोकवत् । नियतं वाऽर्थवत्वात्स्यादिति सूत्राभ्याम् । अधिकरणार्थस्तु सोमक्रये प्रदर्शित एव ।

याचनीयानि द्रव्याण्याह—

हिरण्यं वासो गामश्वं छागं मेषं च यावत्परिमिता गाव एकैकमितरेषां जातीनाम् ।

यावद्यावत्पर्यन्तं परिमिताः पर्याप्ताः संख्यापर्याप्तास्तावत्यो भवन्तीत्यर्थः । इतरेषां हिरण्यवासोश्वच्छागमेषाणाम् । इतरेषामिति जातिविशेषणमन्येऽपि पदार्थाः सन्ति तेषां चापि प्रतिग्रहणमितिज्ञापनार्थम् । ते च हिरण्यं वासोऽविरजा च नियुक्तान्येतानि भवन्त्यनो रथोऽधीवासोऽश्वः पुरुषो हस्ती वाऽनियुक्तानीति वक्ष्यमाणा अन्यजानोरथोधीवासपुरुषहस्त्यात्मका वक्ष्यमाणा अत्र गृह्यन्ते ।

तानि प्रतिगृह्णाति चन्द्रमसीत्येतैर्यथारूपम् ।

चन्द्रमसीत्यादिभिः षड्भिः षण्णां प्रतिग्रहणम् । सर्वेषां हिरण्यादीनां षण्णामुपस्थितौ सत्यामेवैतेन मन्त्रेण तदन्तर्गततत्तल्लिङ्गकावयवोच्चारणकाले तत्तद्द्रव्यं प्रतिगृह्णीयात् । एतेषां मध्ये यस्य कस्यचिदनुपस्थितौ तूष्णीमेव, सर्वद्रव्यप्रतिग्रहकरणत्वस्यासंभवादित्याशङ्क्यं निराकर्तुमेतैरितिवचनं, तेनैते मन्त्रा भिन्ना एव । यस्य द्रव्यस्योपस्थितिस्तत्प्रतिग्रहणकमन्त्रमात्रेण तावन्मात्रस्य प्रतिग्रहः । अत्रशिष्टानां लोप इति । अथवैतैरिति सनीहारपरामर्शकमाहृतानीति अध्याहृत्य तेनान्वयः । तानि हिरण्यादीनि । एतैर्मन्त्रैः । यथारूपं यथालिङ्गम् । चन्द्रमसीत्येतेन हिरण्यं, हेम चन्द्रं रुक्ममिति वैदिकनिघण्टौ चन्द्रशब्दस्य हिरण्यनामसु पाठात् । चन्द्रꣳ हिरण्यमिति दर्शनाच्चन्द्रशब्दो हिरण्यपरोऽत्र । वस्त्रमसीति वस्त्रम् । उस्राऽसीत्युस्राम् । उस्रशब्दो गोवाची । स्त्रीलिङ्गनिर्देशात्स्त्रियामेव गवि मन्त्रः । पुंगोस्तु तूष्णीमेव प्रतिग्रहः । प्रकृत ऊहाभावात् । अद्य सुत्यामित्यालेखन इति द्वादशाहे प्रकृतावूहदर्शनादुस्रोऽसीत्यूहो वा । एवमश्वच्छागमेषस्त्र्युपस्थितावूहोऽनूहो वेति पक्षद्वयं ज्ञेयम् । मम भोगाय भवेत्यन्ता मन्त्राः ।

देवः सवितेति सर्वत्रानुषजति ।

सर्वत्र सर्वेषु मन्त्रेष्वित्यर्थः । आयुषेति अनुषङ्गमन्त्रान्तः । इतरेषां द्रव्याणां मन्त्रानुपदेशात्तूष्णीमेव प्रतिग्रहः । अथ यद्ब्राह्मणेनानादिष्टं भवति प्राजापत्यमसि मम

भोगाय भवेत्येवमेतत्प्रतिगृह्णातीति तु बौधायनः। देवः सवितेत्यस्य प्राजापत्यमा मम भोगाय भवेत्यस्मिन्मन्त्रेऽनुषङ्गे विकल्पः।

वायवे त्वेति तासां या नश्येत्तामनुदिशेत्।

तासां प्रतिग्रहलब्धानां मध्ये या गौर्नश्येत्तामनुदिशेत्। नाशो द्विविधः—अपहार दिकरणकदृष्ट्यगोचरत्वरूपो मरणकरणकः सर्वथा स्वानुपयोगित्वरूपश्चेति। उभयमप्य गृह्यते। स्पष्टमाह बौधायनः—ताः समुदायीकृत्य रक्षन्ति तासां या नश्यति या म्रियते वायवे त्वेति तामनुदिशतीति। मन्त्रसमवेतदेवतार्थतया संकल्पनमनुदेशनम्।

अप्सु मज्जनेन मृतायां मन्त्रविशेषमाह—

***वरुणाय त्वेत्यप्सु मग्नाम्।**

मग्नां सतीं मृतामित्यर्थः। मज्जनेनोदकप्रयुक्तं मरणं लक्ष्यते। ननु अप्सु मृतामित्ये वचनं परित्यज्याप्सु मग्नामित्येवंवचनमप्सु प्रवहन्त्याः केनचिदविज्ञातकारणेऽप्यर्थं मन्त्र स्यात्स मा मूर्त्कि तु मृत्यवे त्वेत्ययमेव मन्त्रो भवेदित्येतादृशार्थज्ञापनार्थम्। अनुदिशे दिति शेषः। याऽप्सु वा पाशे वा वरुणाय त्वेति तामिति बौधायनः। अनुदिश तीति सर्वत्रान्वयः।

निर्ऋत्यै त्वेत्यवसन्नाम्।

दौर्बल्यात्संचाराक्षमां संशीर्णां वा। या शिथिलसंधिरुत्थातुमपि न पारयते या वा शीर्यते गर्तं वा पतति निर्ऋत्यै त्वेति तामिति बौधायनः।

रुद्राय त्वेति सर्पदष्टां मरुद्भ्यस्त्वेति ह्रादुनिह-
तामशनिहतां वेन्द्राय त्वेति मेष्कहतां यमाय
त्वेति महादेवहतां मृत्यवे त्वेत्यविज्ञातेन मृत्युना।

ह्रादुनिर्मेहाशब्दयुतः सधूलिको वातस्तेन हताम्। अशनिर्विद्युत्। वाशब्दश्चार्थेऽ प्यर्थे वाऽनास्थायां वा। मेष्को हिंस्रः प्राणी व्याघ्रादिः। महादेवहतां ज्वरहताम् अविज्ञातेन मृत्युनेत्यत्र लक्षणया मृत्युहेतुभूतः कश्चनाविज्ञातो रोगविशेषो ग्राह्यः तथा चाऽऽपस्तम्बः—यमाय त्वेत्यविज्ञातेन यक्ष्मणा मृतामिति। अविज्ञातेन यक्ष्मण मृताया मृत्यवे त्वेत्यनेनानुदेशनमस्मदाचार्यमते, यमाय त्वेत्यापस्तम्बमत इतीयान्भेदः

अनुदिष्टामधिगम्य यजमानो गोषु न चारयेत्।

कृतेऽनुदेशे पुनर्यदि तां लभेत यजमानो गोषु तां न चारयेत्, तां देवतार्थमनु दिष्टां नाऽऽत्मार्थं गृह्णीयादित्यर्थः। यजमानग्रहणमन्येनाऽऽत्मार्थं गृहीतायां न दोषः

---

* सर्वपुस्तकेषु इदं सूत्रं न वर्तते।

---

१ सर्वपुस्तकेषु °षः। वरुणाय त्वेत्यप्सु मग्नाम्। आ°।

एतेनाग्न्यस्मै दानमपि सूचितं भवति । तथा च बौधायनः—अथ येयं नष्टा तां यदि विन्देयुः कथं स्यादित्येषाऽनुदिष्टैव स्यादित्येतदेकं कर्मणोऽन्ते श्रेयांसं प्रतिग्रहीतारं लभेत दक्षिणाभिरेवैनां सह दद्यादित्येतदेकं वायव्ययैवैनया यजेतेत्येतदपरमिति । कर्मणोऽन्ते समाप्तौ श्रेयांसं श्रेष्ठं प्रतिग्रहीतारं लभेत तस्मा एनामनुदिष्टां दक्षिणाभिः सह दद्यादित्यर्थः । दक्षिणाभिरिति बहुवचनात्त्रिप्रभृतिविजातिव्यक्तयो देया इति गम्यते । कलौ गोपशोर्निषेधाद्वायव्यायागो न भवति । सनीहारप्रस्थापनान्ते दिवसपरिसमाप्तिः ।

यदि प्रयायात्पृथगरणीष्वग्नीन्समारोप्य रथेन प्रयाति ।

अथ यदि अत्र प्रयायात्प्रयाणं कुर्यात्पृथगरणीष्वग्नीन्समारोप्य रथेन प्रयाति गच्छति । अत्र प्रयाणविधानेनेदं ज्ञायते गृहदीक्षापक्षोऽप्यस्तीति । तत्र समारोपणविधिः प्रागेव दर्शितः । ननु रथविधानार्थं रथेन प्रयातीत्येतावदेव वक्तव्यं पृथगरणीष्वग्नीन्समारोप्येति न वक्तव्यम् । पूर्वोक्तसमारोपणविधिनैव तत्सिद्धेः । तथा च पृथगरणीष्वग्नीन्समारोप्येतिवचनं व्यर्थमिति चेत्सत्यम् । वास्तोष्पतिहोमादिपरिसंख्यार्थत्वेन वैयर्थ्याभावात् । नित्यधार्यौ द्वौ सभ्यावसथ्यपक्षे चतुरो वाऽऽहवनीयस्य नित्यधार्यत्वपक्षे त्रीन्पञ्च वा पृथगरणी द्वये द्वये मन्त्रेण समारोप्य गृह्याग्नौ सति तमपि समारोप्य प्रयाति । गार्हपत्यस्य संस्कृते अरण्यावन्येषां लौकिक्यः । पृथगितिवचनात्प्रत्यग्नि द्वयोर्द्वयोररण्योराधानक्रमेण समारोपणम् । अरणीवचनमात्मसमारोपणव्यावृत्त्यर्थम् । समारोपणमरण्योः प्रतपनेनाग्नेर्निवेशनं, तच्च निवेशनं भावनामात्रेणाऽऽत्मन्यग्निग्रहणमिव । मुख्यस्यासंभवात् । प्रत्यग्नि मन्त्रावृत्तिः । संशब्दो यथाऽरण्यन्तर्गताग्न्यधिकरणीभूतावयवपर्यन्तं तपनं भवति तथाऽऽरोपणं कर्तव्यमिति सूचयति । समारोपविधानादेव प्रत्यक्षनयनं व्यावर्त्यते । रथवचनं शकटव्यावृत्त्यर्थम् । पत्न्याऽन्वारब्धः समारोपणं कुर्यात् । सीमातिक्रमणे नद्यतिक्रमणे चान्वारम्भ उभयोः । अवरोपेऽपि पत्न्यन्वारम्भः । समारोपणमारभ्याऽऽवरोपमन्वारम्भ इति मुख्यः कल्पः । अयं ते योनिरिति समारोपणमन्त्रः ।

रथेऽविद्यमाने रथाङ्गेन सह ।

अविद्यमान इति पदच्छेदः । रथाभावे रथाङ्गं किंचिद्गृहीत्वा तेन सह प्रयाति । सर्वभाण्डादिसामग्रीवाहनार्थं शकटानि अन्यानि भवन्त्येव । तत्र शकट एव स्वस्याप्यारोहणं प्राप्तं तद्रथेन बाध्यते । अथ वा रथेन प्रयातीत्यत्र रथेनेति तृतीयाऽध्याहार्यसहशब्दयोगित्वात्, न तु करणार्थिकेति । अस्मिन्कल्पे रथेन सह गमनं पादाभ्यामेवोभयोः । रथेऽरणीनां स्थापनम् ।

यद्यपो नाव्यास्तरत्यरणी रथं चाऽऽधाय सह तरति ।

नावा तार्या नाव्या अपो यदि तरति अरणी रथं चाऽऽदाय यस्यां नावि स्वयं तरति तस्यामेवाऽऽधाय तत्सहित एव तरति । आदायेति पाठोऽपपाठ एव । सर्वथा रथेन रथाङ्गेन वा वियोगो नैव कर्तव्य इति । तथा चाऽऽपस्तम्बः—अरणीभ्यामरणीभिरित्येके रथेन रथाङ्गेन वा न विप्रच्छिद्येतेति । अरणीशब्दोऽत्र द्वितीयाबहुवचनान्तः ।

यद्यपोऽनाव्या रथेन तरति हरति चैनाः ।

अनाव्या नावा तार्या यदि न भवन्ति तदा रथेनैव तरति हरति चारणीः स्वयमेव। अत्रापि अरणीरथरथाङ्गानां न विप्रच्छेदः ।

यद्यवगाहेत देवीराप इत्यवगाहेत ।

यदि पथ्यापः पादाभ्यामेव तरणीयाः स्युस्तदा जलावलोडनं प्राप्तं तज्जलप्रवेशसमये देवीरापो अपांनपादित्यादावेव कुर्यात्ततो गच्छेत् । ऋमिषमिति मन्त्रान्तः ।

अच्छिन्नं तन्तुं पृथिव्या अनुगेषमपाꣳ सेतुरसीति लोष्टं विमृद्नन्नापाराद्नन्तोस्तरति ।

लोष्टं मृत्पिण्डस्तं विमृद्नन्विमर्दयन्पारपर्यन्तं गमनार्थं चूर्णीकुर्वंस्तरतीत्यर्थः । लोष्टमिति जातावेकवचनं, तेनान्येषां प्रयोजनसत्त्वेऽन्यान्यपि ग्राह्याणीत्युक्तं भवति । विमर्दनं सांतत्येन क्षेपणार्थम् । विशब्दः संततक्षेपणानुगुण्यार्थः । सेतुमेव कृत्वाऽत्येतीति ब्राह्मणम् ।

पृथिव्याः संभवेति ॥ ९ ॥ सिकता लोष्टान्वा मध्ये तीरयोश्च न्यस्यति पृथिव्या संभवेन्ति वा ।

सिकता मृत्पांसवः । लोष्टा मृत्पिण्डाः । मध्ये मध्यभागे तीरयोश्च न्यस्यति क्षिपति सिकता मृत्पिण्डत्रयं वा स्थानत्रये प्रक्षिपतीत्यर्थः । स्थानभेदान्मन्त्रावृत्तिः । पुनरबन्तरप्राप्तौ देवीराप इत्यवगाहादीनामावृत्तिः । तथा च मरद्वाजः—मन्त्रव्यवाये मन्त्राभ्यासो द्रव्यपृथक्त्वेऽर्थपृथक्त्वे देशपृथक्त्वे च यथा कण्डूयनस्वप्नदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणानीति । जैमिनिमते तु नाऽऽवृत्तिः । तथा चैकादशाध्याये चतुर्थपादे तत्सूत्रम्—स्वप्नदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवमिति । व्याख्यातमेतत्सूत्रमबद्धं मन इत्यमेध्यं दृष्ट्वा जपतीतिसूत्रव्याख्यावसरे । सविसर्गाविसर्गकृतो मन्त्रभेदः । एतेषां प्रयाणधर्माणां दीक्षितधर्माधिकारे वचनाददीक्षितप्रयाणे नेष्यन्ते । बौधायनः—सꣳस(सृ)जन्ति व्रते संबध्नन्ति व्रतदुघयोर्वत्सावादधाति यदाधेयं भवतीति । स एव—

---

१ ङ. ज. झ. ञ. ढ. चाऽऽदाय ।

अथाद्येनं यान्तं व्रतनवेलोपाधि गच्छत्युत्तरतोऽरणी निधाय दक्षिणतः परिश्रित्य व्रतयति तूष्णीं तृणोदकायावस्यतीति । द्वैधे—अथाद्येनं प्रयान्तं व्रतनवेलोपाधि गच्छतीति मथित्वाऽग्नीन्विहृत्य व्रतयेदिति बौधायन उत्तरतोऽरणी निधाय दक्षिणतः परिश्रित्य व्रतयेदिति शालीकिरिति । स एव—अथ यत्रावत्स्यन्भवति तदवस्यतीति । स एव—अथ यत्र यक्ष्यमाणो भवति तदवस्यत्येदमगन्म देवयजनं पृथिव्या इत्यान्तादनुवाकस्येति । अस्मिन्प्रयाणेऽन्यं विशेषमाह भरद्वाजः—अभ्यः पवतेऽपोऽभिपवत इत्यहरहः प्रस्थितो जपतीति । अहरहरिति दीर्घाध्वाभिप्रायेण वीप्सा । दिशोऽभिसंपवत इत्यन्तः ।

अत्र देवयजनाध्यवसानमेके समामनन्ति ।

य इहाध्यवस्येत्स प्रयायात् । य आदितो न स प्रयाति योऽन्यत्र दीक्षित्वा ततो देवयजनमध्यवस्येत्स एव प्रयायात् । यस्त्वादावेव प्रयात्यध्यवसितदेवयजनस्तत्र दीक्षितो न ततः प्रयाति । देवयजनाध्यवसानार्थत्वात्प्रयाणस्य तस्य च कृतत्वादिति भावः । बौधायनस्तु देवयजनदीक्षायामपि तत्र योगक्षेमाकल्पौ देवयजनान्तराध्यवसानार्थं प्रयाणमनुमन्यते । तथा च तत्सूत्रम्—अथातः प्रयाणस्यैव मीमांसा दीक्षितं वाऽयोगक्षेमे विन्दत्यन्यत्र वा देवयजनाद्दीक्षित इति । पूर्वत्र यद्देवयजनाध्यवसानमुक्तं तत्तत्र न कार्यं किंतु अत्रास्मिन्काले कर्तव्यमित्येक आचार्या वदन्तीत्यर्थः । अर्थात्प्रयाणोत्तरमेव देवयजनाध्यवसानमित्यस्मिन्नर्थे सिद्धे वचनमत्र देवयजनाध्यवसाने कर्तव्य एवैते प्रयाणधर्माः स्युर्न पूर्वत्रेतिज्ञापनार्थम् ।

प्राग्वꣳशस्य मध्यमꣳ स्थूणाराजमालभ्यैनं मन्त्रं जपति ।

अस्मिन्काले देवयजनाध्यवसानेऽयं विशेषोऽनेनोच्यते । स्थूणानां राजेति स्थूणाराजस्तं स्थूणानां मध्ये श्रेष्ठां स्थूणामित्यर्थः । राजशब्दः श्रैष्ठ्यार्थवाची । राजाहःसखिभ्यष्टजितिसमासान्तष्टच्प्रत्ययः । मेढीभूतस्थूणानां बहुत्वान्मध्यममिति विशेषणम् । एनमिति मन्त्रविशेषणमपवृत्ते दीक्षापरिमाणेऽपेत वीतेति देवयजनमध्यवस्यतीति वक्ष्यमाण आग्निवेश्य देवयजनाध्यवसानेऽयं धर्मो न भवतीतिप्रदर्शनार्थम् । जपसाहचर्यादेव मन्त्ररूपविशेष्यलाभे मन्त्रग्रहणमयं मन्त्रो देवयजनाध्यवसानार्थ इत्यनुसंधानं जपात्पूर्वं कर्तव्यमित्येतादृशार्थज्ञापनार्थम् ।

एकरात्रं[1] दीक्षितो राजानं क्रीणाति
द्व्हे त्र्यहे चतुरहेऽपरिमिते वा ।

द्व्हेऽतीत इत्यर्थः । एवं त्र्यहादिषु । चतुरहातिरिक्ताः पञ्चाहादयोऽपरिमितशब्देन संग्राह्याः । द्व्हत्र्यहचतुरहपक्षास्तु मुख्याः । अमुख्या इतर इति प्रदर्शयितुं

---

१ च. ज. ञ. ञ. °रात्रि दी° ।

व्यहऽव्यहचतुरहशब्दैर्ग्रहणं व्यहऽव्यहदीक्षापक्षाणाम्। इतरेषां पञ्चाहादीनामपरिमितशब्देन। द्वादशाहदीक्षापक्षस्तु एकाद्वित्रिचतुरहदीक्षापक्षतोऽपि मुख्यः। अपरिमितदीक्षापक्षस्तु द्वादशाहदीक्षापक्षतोऽपि तपस आधिक्यान्मुख्य इति व्यवस्था द्रष्टव्या। यदि त्वेका दीक्षा द्वे तिस्रश्चतस्रोऽपरिमिता वेत्यनेनैव सिद्ध इदं वचनं प्रायणीयाप्रभृति आतिथ्यासंबन्ध्याप्यायननिह्नवनान्तमुपसद्दिवस एव न तु दीक्षादिवस इतिप्रदर्शनार्थम्। अहं तदस्मि आजुह्वान इत्येतौ मन्त्रौ पुरस्तात्प्रायणीयाया जपति। प्रत्यगाशिषो मन्त्रानिति सूत्रात्। आपस्तम्बेन तूपस्थानमुक्तं तथा वाऽपि विनियोगः। एकमिष इत्यस्य सोमक्रयण्याः पदानुनिक्रमणेषु जपः। यथारूपमितर इति सूत्रात्। अच्छिद्रा उपहोमाश्च लिङ्गान्नियम्यन्त इति भरद्वाजसूत्रात्। एकमिषे विष्णुस्त्वाऽन्वेतु० होत्राभ्यो विष्णुस्त्वाऽन्वेत्विति निष्क्रम्यमाणेषु यजमानोऽनुवर्तयित्वा(र्त्य) सस्रायः सस्रय० मायोष्टा इति सप्तमे पदे जपतीत्यापस्तम्बसूत्राच्च सप्तमे पद इत्यत्र वचनविपरिणामेन निष्क्रम्यमाणपदं सप्तम्येकवचनान्तमनुवर्तते। प्रत्यगाशिषो मन्त्रानकर्मका(क)रणाञ्जपतीत्यनेन सूत्रकृता याजमानत्वं प्रदर्शितम्। आद्यानां षण्णां विष्णुस्त्वाऽन्वेत्विति लिङ्गादनुवर्तने विनियोगः। अन्तिमस्य तु प्रत्यगाशीष्टात्सूत्रकृद्वीत्याऽपि जप एव। अयं च विनियोगः स्पष्टतया सूत्रेऽनुक्तत्वात्कृताकृतः।

प्रत्तं पदं तोते राय इति पत्न्यै प्रयच्छति तव ते राय इति वा।

इदं सूत्रं तृतीयं पत्न्यै प्रयच्छति तत्सा गृहेषु निधत्त इति सूत्र एव प्रसङ्गाद्व्याख्यातम्।

क्रीयमाणस्य राज्ञो दक्षिणत आस्ते।

अन्यत्र कर्मसु सांनिध्यमात्रं न दक्षिणतउपवेशननियम इति अत्र वचनाज्ज्ञायते। एवं यत्र यत्र वचनं तत्रापि द्रष्टव्यं सर्वत्र।

क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति।

क्रीते वा राजन्याहवनीये यूपाहुतिꣳ हुत्वा यूपं छिनत्तीत्यस्मिन्सूत्रे कालनिर्णयः प्रदर्शित एवास्ति। अनेन दण्डदानेन निरूढपशुतोऽतिदेशप्राप्ताऽध्वर्युकर्तृकता मैत्रावरुणप्रैषकालता वाऽनेन बाध्यते। अविक्षुरो विखुरो भूयासमिति मैत्रावरुणः प्रतिगृह्णाति। इदं च दण्डस्य दानं दण्डप्रतिपत्तिर्न भवति किं तु चतुर्थ्या मैत्रावरुणस्याभिप्रेतत्वेन प्रधानमेव। दण्डमिति तु द्वितीयाऽनीप्सितकर्मणि। अवलम्बनार्थत्वेन च स्वार्थत्वमेव दानस्येति। तथा च चतुर्थाध्याये द्वितीयपादे जैमिनिः—प्रासनवन्मैत्रावरुणस्य दण्डप्रदानं कृतार्थत्वात्। अर्थकर्म वा कर्तृसंयोगात्प्राग्वत्। कर्मयुक्तं च दर्शनादिति। प्रासनवत्कृष्णविषाणाप्रासनवत्। कृतार्थत्वात्कृतप्रयोजनत्वा-

ज्ञातप्रयोजनत्वादिति यावत्। तच्च प्रयोजनं दण्डेन दीक्षयतीत्येतद्विधिसिद्धं तस्य ज्ञातत्वान्मैत्रावरुणस्य दण्डप्रदानं प्रतिपत्तिरेवेति प्रथमसूत्रार्थः। मैत्रावरुणस्य दण्डप्रदानं प्रतिपत्तिर्न भवति किं तु अर्थकर्म प्रयोजकमेव कर्म दृष्टार्थमेव कर्मेति यावत्। अत्र हेतुमाह—कर्तृसंयोगादिति। स्थित्वा प्रैषानुवचनकर्त्रा प्रशास्त्रा संयोगात्। संयोगः संबन्धः। स्थित्वा प्रैषानुवचने कुर्वत आलम्बनं भवन्दृष्टार्थ एव दण्डो भवति। प्राग्वत्संयवनार्थत्ववत्। इदमपि मैत्रावरुणार्थदण्डदानं प्रयोजकं दण्डस्येति द्वितीयसूत्रार्थः। कर्मयुक्तमालम्बनरूपं कर्म तद्युक्तं च दर्शनात्, दण्डो प्रैषानन्वाहेति दर्शनात्। दृश्यते ज्ञायतेऽनेनेति दर्शनं विधिवाक्यं तस्मात्तु कर्मयुक्तं भवतीति तृतीयसूत्रार्थः।

श्वः सुत्यायां वा क्रियमाणायाम्।

इदमपि यजमानकर्तृकमेव। अविक्षुर इत्यनेनैव प्रतिग्रहो मैत्रावरुणस्य। अग्नीषोमीयदिवससंबन्ध्यनुष्ठानमारभ्य मैत्रावरुणकार्यसमयात्प्राग्यत्र कुत्रचिद्दण्डदानं कर्तव्यमित्यनेन विधीयते।

वयः सुपर्णा इति प्रत्यपोर्णुते शिरोऽग्रेऽनुपूर्वमितराण्यङ्गानि।

प्रत्यपोर्णुत उद्घाटयति। अग्र इति क्रमार्थम्। अनुपूर्वमनुक्रमम्। तेन स्कन्धप्रभृत्यवयवा ये वाससा संछादितास्ते क्रमेणोद्घाटनीया इत्यर्थः। अत्र शिरःशब्देन मुख्यया वृत्त्या शिरस एव ग्रहणं तस्यैव च्छादनयोग्यत्वान्न तु गौण्या वृत्त्या मुखनेत्रनासिकानामपि। छादनासंभवात्, अनुष्ठानविरुद्धत्वाच्च। नहि मुखे नेत्रद्वये च च्छादिते मन्त्रपठनमीक्षणं च कर्तुं शक्यं, नेत्रद्वयान्तर्गतत्वात्केवलनासिकाया अपि च्छादनं कर्तुं न शक्यम्। पादयोरपि च्छादनं गमनविरुद्धत्वान्न कर्तुं शक्यम्। तथा चैतद्व्यतिरिक्तान्येवाङ्गानीतरशब्देन विवक्षितानि। यजमानोऽद्भिरभ्युक्ष्य कौत्साय वा पारिक्रमिणे वोष्णीषं प्रयच्छतीति बौधायनः। दण्डप्रदाने मन्त्र उक्त आपस्तम्बेन दीक्षितदण्डं च मैत्रावरुणाय प्रयच्छति मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रयच्छाम्यवक्रो विधुरो भूयासमिति। बद्धानिति मन्त्रान्तः।

मित्रो न एहि सुमित्रधा इत्यूरावासन्नꣳ राजानमुपस्वजे उपैव गृह्णीते।

अध्वर्युणेन्द्रस्योरुमाविशेत्यूरावासन्नꣳ राजनमुपस्वजे वक्षस्येवोपगृह्णीत इत्यर्थः। स्वजधातुरालिङ्गने तच्चाऽऽलिङ्गनं वक्षसीति लोकप्रसिद्धमेव। उपस्वज इति सप्तम्यन्तं पदं वक्षोवाचकम्। उपस्वज इत्यत्रोपेत्युपसर्गोऽतिशयार्थः। अतिशयेन स्वजनं वक्षसैव। एवकार उपस्वज इत्यनन्तरमन्वेति। अत्राप्युपेत्युपसर्गः सम्यक्श्लेषणार्थः।

---

१ च. ज. ञ. ञ. ढ, °जत उ°।

ग्रहणं श्लेषणमत्र । उपसर्गक्रिययोर्मध्य एवशब्दस्य पाठादियं श्रुतिरेवानूदितेत्यनुमीयते । एतावानेव मन्त्रः । अध्वर्यवाशक्तवा इति अध्वर्युं प्रति प्रश्नः । आशकामेत्यध्वर्युणोत्तरे दत्ते कथमाशकतेति पुनः प्रश्नः । एतौ द्वौ प्रश्नावध्वर्युसूत्रोपात्तौ गिरौ क्रयणमिति पक्षे नान्यदा ।

उदायुषेत्युत्तिष्ठति ।

अमृताꣳ अन्विति मन्त्रान्तः ।

उर्वन्तरिक्षमिति गच्छति ।

अन्विहीति मन्त्रान्तः ।

शकटं प्राप्याध्वर्यवे राजानं प्रददाति ।

शकटं प्राप्येतिवचनादिदं ज्ञायतेऽध्वर्युणा कृष्णाजिनास्तरणे कृते तत्रैव स्थितायाध्वर्यवे राज्ञः प्रदानं न तु तस्मात्स्वसमीपमागतायेति । उत्थानदेशात्किंचिद्देशमतिक्रम्य गच्छति आस्तरणोत्तरं ततोऽपि तूष्णीमेव गच्छति यावच्छकटमिति च । साऽसि सुब्रह्मण्य इत्यस्य मन्त्रस्य जपः सुब्रह्मण्याह्वाने । तथा चाऽऽपस्तम्बः—सर्वासु सुब्रह्मण्यासु सुब्रह्मण्यमन्वारभ्य यजमानो जपति साऽसि सुब्रह्मण्ये तस्यास्ते पृथिवी पादः साऽसि सुब्रह्मण्ये तस्यास्तेऽन्तरिक्षं पादः साऽसि सुब्रह्मण्ये तस्यास्ते द्यौः पादः साऽसि सुब्रह्मण्ये तस्यास्ते दिशः पादः परोरजास्ते पञ्चमः पादः सा न इषमूर्जे धुक्ष्व तेज इन्द्रियं ब्रह्मवर्चसमन्नाद्यमिति । सर्वासु कालभेदाद्भिन्नासु सुब्रह्मण्योमित्याह याजमाने साऽसि सुब्रह्मण्य इति यजमानो जपतीत्यर्थः । यथारूपमितर इत्यनेन सूत्रकृताऽपि विनियोग उक्तोऽस्ति । प्रत्यगाशिषो मन्त्रानकर्मकरणाञ्जपतीतिदर्शपूर्णमासयाजमानसूत्राद्याजमानत्वमुक्तं भवति । लिङ्गात्सुब्रह्मण्याह्वाने विनियोगः सिध्यति ।

नमो मित्रस्य वरुणस्य चक्षस इति प्राग्वꣳशमोह्यमानं प्रतीक्षते ।

प्राग्वंशं प्रति ओह्यमानं प्राप्यमाणं राजानमीक्षत आभिमुख्येन । प्रतिशब्दादाभिमुख्यं लभ्यते । सूर्याय शꣳसतेति मन्त्रान्तः ।

अनु मे दीक्षां दीक्षापतिर्मन्यतामिति तानूनप्रꣳ समवमृशति ।

संशब्द ऋत्विग्भिः सहैवाभिमर्शार्थः । अवेत्युपसर्गः स्पर्शनकालेऽवनमनार्थः । मा धा इति मन्त्रान्तः ।

तत्रिषु व्रतेषु प्रतिपन्नो भक्षयति यदध्वर्युर्नावजिघ्रति ।

त्रिषु औपसदेषु व्रतेषु प्रतिपन्नः प्रतिपत्तिं कुर्वाणो विभज्य[1] विभज्य निक्षिप्य भक्षयति यदि अध्वर्योरवजिघ्रणेच्छाया अभावः । अस्मिन्पक्षे प्रतिव्रतमावृत्तिर्मन्त्रस्य ।

---

१ च. छ. °ज्य नि° ।

उभयोः समुच्चयः। +अवजिघ्रणेच्छायां तु नैतद्भक्षणम्। अत्र कात्यायनो विशेषमाह तानूनप्त्रं प्रकृत्य—अपिधायामृन्मयेनापराह्णे व्रतमिश्रं दीक्षिताय प्रयच्छति बहुषु गृहपतय इति। अमृन्मयेन कांस्याद्यन्यतमेन व्रतमिश्रं यथा भवति तथा कृत्वा दीक्षिताय प्रयच्छतीत्यर्थः। अत्र दीक्षितग्रहणात्पत्न्या व्यावृत्तिः। सत्रे सर्वेषामपि दीक्षितत्वात्सर्वेभ्योऽपि दानप्राप्तावाह—बहुषु गृहपतय इति।

अग्ने व्रतपत इत्यवान्तरदीक्षामुपैति।

सह नौ व्रतपते व्रतिनोर्व्रतानीति मन्त्रान्तः। अप्सु दीक्षाप्रभृतिप्रायणीयादिवसप्रयाणात्प्राग्विहिता वर्तमाना धर्मा दीक्षाशब्दवाच्यास्तेषां विसर्गः। अवभृथे तन्मध्ये संतरां मेखलामित्यारभ्य येऽधिका धर्मास्ते मध्य उत्पन्नत्वादे(द)वान्तरदीक्षाशब्दवाच्यास्तानुपैति स्वी करोतीति सामान्यप्रतिज्ञेयम्।

संतरां मेखलाꣳ समायच्छते संतरां मुष्टी कुरुते
तप्तव्रतो भवति मदन्तीभिरुदकार्यान्कुरुते॥ १०॥

संतरां संहततरां मेखलां गाढतरामिति तदर्थः। मदन्तीरुपस्पृश्य गाढतरं मुष्टिमेखलं कुरुत इति कात्यायनसूत्रात्। सम्यक्, आयच्छत आश्लेषयति। संतरा मुष्टी कुरुत इत्यत्र संतरा संतरे इत्यर्थः। सुपां सुलुगिति सूत्रेण द्विवचनविभक्तेराकारः। संतरामिति पाठ एकवचनं छान्दसं द्रष्टव्यम्। संतरामित्यव्ययं वा। तप्तव्रतो भवतीत्यत्र वचनाद्दैक्षेषु व्रतेषु किंचिच्छीतमेव व्रतं ग्राह्यमिति गम्यते। मदन्त्यस्तप्ता आपस्ताभिरेवोदकार्थानुदककार्याणि लौकिकानि शौचाचमनादीनि लौकिकीभिर्गार्हपत्ये तप्तामिः कर्मान्तर्गतानि कुरुत इत्यर्थः। मदन्तीभिर्मार्जयत इतिश्रुतिगतो मदन्तीभिर्मार्जनस्य विधिरुपलक्षणमिति भावः। आत्मानमेव दीक्षया पाति प्रजामवान्तरदीक्षया संतरां मेखलाꣳ समायच्छते प्रजा ह्यात्मनोऽन्तरतरा तप्तव्रतो भवति मदन्तीभिर्मार्जयत इति ब्राह्मणेऽवान्तरदीक्षायाः प्रजारक्षणं फलं ज्ञेयम्। संतरां मुष्टी कुरुत इति शाखान्तरीयो विधिः।

व्याख्यातं पाणिप्रक्षालनमाप्यायनं निह्नवनं च।

मदन्तीभिः पाणीन्प्रक्षालयन्त इत्येतेन सूत्रेण पाणिप्रक्षालनं व्याख्यातमुक्तम्। अꣳशुरꣳशुरिति तꣳ सर्वे सहिरण्यैः पाणिभिराप्याययन्तीत्यनेनाऽऽप्यायनं व्याख्यातम्। प्रत्युपनद्धेऽप उपस्पृश्येष्टा राय इति प्रस्तरे निह्नवते सव्यान्नीचः पाणीन्कृत्वा दक्षिणानुत्तानानित्यनेन निह्नवनं व्याख्यातम्। उदकोपस्पर्शस्य निह्नवनाङ्गत्वात्सोऽपि भवति।

+ अवघ्राणेच्छायामिति वक्तुं युक्तम्।

या ते अग्ने रुद्रिया तनूरिति व्रतयति ।

ये देवा मनोजाता इत्येतस्य स्थानेऽस्मिन्व्रतेऽयं मन्त्रो भवतीत्यर्थः । तस्यास्ते स्वाहेति मन्त्रान्तः ।

दैक्षमेतदहर्व्रतपरिमाणं भवति ।

एतस्याह्नो यद्व्रतं दिवससंबन्धिव्रतं तस्य परिमाणं दैक्षं दीक्षाया इदं दैक्षं वत्सस्यैकꣳ स्तनमवशेष्येत्यनेन याद्विहितं तदेव भवत्युपसद्दिवससंबन्धित्वेऽपि उपसत्प्रवृत्तिपूर्वकालभवत्वादिति भावः ।

औपसदोऽत ऊर्ध्वं व्रतकल्पः ।

उपसदोऽयमौपसदः । अतः सायंकालिकव्रताद्ऊर्ध्वमारभ्य व्रतकल्पो व्रतप्रकारो भवति । अत ऊर्ध्वमस्याह्नः सायंव्रतप्रभृत्यौपसदव्रतान्येतेनैव व्रतयति न पूर्वेण मन्त्रेण सहाधिनिविशत इत्येवार्थः । यत्त्वद्यतनमहर्व्रतं तत्त्ववान्तरदीक्षोपायेनोत्तरकालमाप्यपि दैक्षमेतदहर्व्रतपरिमाणं भवतीति दैक्षव्रतत्वस्योक्तैर्दैक्षमेव भवति । मन्त्रस्तु दैक्षमेतदहर्व्रतपरिमाणं भवतीत्येतस्मात्प्राग्या ते अग्ने रुद्रिया तनूरित्युपदेशाद्दैक्षस्वेऽपि या ते अग्न इत्ययमेव मन्त्रो व्रते । बौधायनेन संतरां मेखलां समायच्छस्व संतरां मुष्टी कुरुष्व तप्तव्रत एधि मदन्तीभिर्मार्जयित्वोत्पूर्वव्रतमꣳ सृज या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहेत्येतेनातोऽधि व्रतयेति संशासनवाक्ये स्पष्टमेवोक्तम् । पूर्व(र्व)व्रतार्थो मन्त्रः पूर्वव्रतनस्तमुत्सृजेत्यर्थः । तर्हि को मन्त्र इत्याकाङ्क्षायामाह—या ते अग्न इत्यादि । एतेनातोऽधि अत आरभ्य व्रतय व्रतं स्वी कुरु इत्यर्थः । निह्नवनोत्तरं पाठादिदं व्रतं निह्नवनोत्तरमेव भवति । यजमानश्चतुःस्तनमेतां रात्रिं व्रतं व्रतयति । पत्नी च व्रतं व्रतयति चतुःस्तनमेव । स्पष्टमयमर्थो मानवसूत्रे—चतुःस्तने प्रथमेऽहनि त्रिस्तने द्विस्तने मध्यम एकस्तन उत्तम इति । चतुःस्तने इति द्विवचनात्प्रथम औपसदेऽहनि यजमानपत्न्योर्द्वे व्रते भवत इत्यर्थः । चत्वारश्चत्वारः स्तना ययोस्ते चतुःस्तने । संख्याशब्दानां वृत्तिविषये बीप्सार्थत्वं सप्तपर्णादिवदिति कैयटः । तथा चतुःस्तनपरिमितं यजमानस्य व्रतमेतावदेव पत्न्याश्चेत्यर्थः । यजमानपत्न्योर्व्रतमित्येतावन्मात्रविषय इदं सूत्रमुपयुज्यते संमतित्वेन ।

यजमानपत्न्योरौपसदव्रतपरिमाणान्याह —

चतुःस्तनमेताꣳ रात्रिं व्रतं व्रतयति त्रिस्तनं
मध्यमेऽहनि द्विस्तनꣳरात्रावेकस्तनमुत्तमेऽहनि ।

एतां यस्मिन्दिने या ते अग्ने रुद्रिया तनूरित्येतेन प्रथमं व्रतं गृहीतं तां रात्रिमेतस्यां रात्रावित्यर्थः । त्रिःस्तनं मध्यम औपसदेऽहनि, द्विस्तनं रात्रौ तस्यां रात्रौ-एकस्तनमुत्तमेऽन्तिम औपसदेऽहनीत्यर्थः । मध्यमोत्तमत्वमुपसत्कृतं द्रष्टव्यम् ।

आराग्रामवान्तरदीक्षामुपेयादिति ब्राह्मणव्याख्या-
तानि काम्यानि व्रतपरिमाणानि तेषां यथाकामी ।

आराग्रामवान्तरदीक्षामुपेयाद्यः कामयेतास्मिन्मे लोकेऽर्धुकꣳ स्यादित्येकं काम्यं व्रतपरिमाणम् । परोवरीयसीमवान्तरदीक्षामुपेयाद्यः कामयेतामुष्मिन्मे लोकेऽर्धुकꣳ स्यादित्येकम् । एकमग्रेऽथ द्वावथ त्रीनथ चतुर एषा वा आराग्रावान्तरदीक्षाऽस्मिन्ने-वास्मै लोकेऽर्धुकं भवतीति, चतुरोऽग्रेऽथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवान्तरदी-क्षाऽमुष्मिन्नेवास्मै लोकेऽर्धुकं भवतीति क्रमेण तयोः स्वरूपं ब्राह्मणे प्रदर्शितम् । तत्राऽऽद्याऽऽराग्राऽवान्तरदीक्षा द्वितीया परोवरीयसी । बलीवर्दप्रतोदनं लौहमारं तद्वदल्पमग्रं मुखं यस्याः साऽऽराग्रा । परोवरीय इत्यत्र परःशब्देनात्र श्रेष्ठत्वादुप-क्रमो विवक्षितः[1] । उपक्रमे वरीयोऽधिकं यस्याः सा परोवरीयसी । अर्धुकं समृद्धि-शीलम् । इदमेतयोः फलम् । एतद्दीक्षासंबन्ध्यौपसदव्रतपरिमाणद्वयं काम्यम् । वत्स-स्यैकः स्तनो भागी हि सोऽथैकꣳ स्तनं व्रतमुपैत्यथ द्वावथ त्रीनथ चतुर इति एकं व्रतम् । एतस्य संज्ञा फलं चोक्तं ब्राह्मण एव—एतद्वै क्षुरपवि नाम व्रतं येन प्रजातान्भ्रातृव्यान्नुदते प्रतिजनिष्यमाणानथो कनीयसैव भूय उपैतीति । चतुरोऽग्रे स्तनान्व्रतमुपैत्यथ त्रीनथ द्वावथैकमित्येतदेकम् । एतस्यापि संज्ञा फलं चोक्तं ब्राह्मण एव—एतद्वै सुजघनं नाम व्रतं तपस्यꣳ सुवर्ग्यमथो प्रैव जायते प्रजया पशु-भिरिति । एतद्वयं चापि काम्यम् । एतानि चत्वारि ब्राह्मणेन व्याख्यातानि काम्यानि कामसंपादकानि व्रतस्य परिमाणानि क्रममेदेन व्रतस्वरूपाणि तेषां यथाकामस्तद्व्रत-परिमाणमङ्गी कुर्यादित्यर्थः ।

प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥

संमिताद्विमितात् । अनेन ह्यपेदं ज्ञायते—एतावत्पर्यन्तं हविर्धान एवोप-विष्टो भवेत्, औदुम्बर्यभिहोमसंबन्धित्यागस्तत्रैवोपविष्टेन कार्य इति । यैर्मन्त्रैरध्वर्युणा निवपनं कृतं तैरेव मन्त्रैरित्यर्थः । यथान्युप्तं न्युप्तमनतिक्रम्य यथान्युप्तं धिष्णियानाय-तनानि उपतिष्ठत इत्यर्थः । अनेनैच्छिकत्वं व्यावर्त्यते । यदध्वर्युणा न्युप्तं तत्तदनन्तर-मेवोपतिष्ठत इत्येतादृशार्थप्रापणार्थं वा । उपतिष्ठत इत्येतावतैव समन्त्रकत्वं सिद्धमु-पस्थानस्य विना मन्त्रैरसंभवात् । ते च मन्त्रा धिष्णियप्रकरणोपस्थितत्वाद्विभूरसी-त्याद्या एव । तथा चार्थादेव विभूरसीत्यादीनां मन्त्राणां प्राप्ताविदं वचनमेतानेवोप-स्थानान्व्याचारणाꣳश्चैके समामनन्तीत्यापस्तम्बोक्तं पाक्षिकत्वमुपस्थानस्य व्यावर्तयि-तुम् । एवशब्दस्योपतिष्ठत इत्यनन्तरमन्वयः ।

---

१ च. छ. °क्रमो व° । २ ङ. ज. झ. ञ. ट. °त्प्राङुप° ।

सम्राडसि कृशानुरित्याहवनीयं परिषद्योऽसि पवमान इति यत्र बहिष्पवमानेन स्तुवते प्रतक्काऽसि नभस्वानिति चात्वालमसंमृष्टोऽसि हव्यसूद इति पशुश्रपणमृतधामासि सुवर्ज्योतिरित्यौदुम्बरीं ब्रह्मज्योतिरसि सुवर्धामेति ब्रह्मसदनमजोऽस्येकपादिति प्राजिहितं गार्हपत्यमहिरसि बुध्निय इति शालामुखीयं कव्योऽसि कव्यवाहन इति दक्षिणाग्निꣳ समूह्योऽसि विश्वव्यचा इत्युत्करꣳ समुद्रोऽसि विश्वभरा इति सदः सदस्योऽसि मलिम्लुच इति सदस्यायतनꣳ रौद्रमनीकꣳ सर्वत्रानुषजति ॥ ११ ॥

इति हिरण्यकेशिसूत्रे दशमप्रश्ने तृतीयः पटलः।

आहवनीय औत्तरवेदिकः। शालामुखीयस्याग्रे पृथग्ग्रहणात्। यत्र बहिष्पवमानेन स्तुवत इत्यनन्तरं यत्तदोर्नित्यसंबन्धादुपतिष्ठत इतिसकर्मकधातुयोगाद्द्वितीयान्तो देशविशेषणत्वात्पुंलिङ्गस्तच्छब्दोऽध्याहार्यः। ननु परिषद्योऽसि पवमान इत्यास्तावमित्येव लाघवाद्वक्तव्यं नचैतावताऽऽस्तावशब्दार्थप्रसिद्धिः कथमिति चेत्। यत्र बहिष्पवमानेन स्तुवत इत्याध्वर्यवसूत्रादेव सिद्धे व्यर्थमेतदिति चेत्सत्यम्। पूर्वोपात्तास्तावशब्दार्थतोऽत्राऽऽस्तावशब्दार्थे किंचिदधिकं वैलक्षण्यमस्तीति ज्ञापनार्थत्वेनैतस्योपादानस्य सार्थक्यात्। तथा हि पूर्वत्राऽऽस्तावशब्देनैक एव पदार्थः सर्वक्रतुषु समानः। अग्निष्टोमाद्येकाहेषु चात्वालसमीपप्रदेशरूप एवाहीनेषु द्वादशाहादिषु प्रथमे सौत्येऽहनि चात्वालसमीपप्रदेशरूपः, द्वितीयादिषु सौत्याहेषु सदोरूप इत्येकैक एव। उपस्थानविषयेणैतेनाऽऽस्तावशब्देन तु द्वादशाहाद्यहीनक्रतुषु चात्वालसदआत्मकं देशद्वयमपि ग्राह्यं न तु चात्वाल एव। अन्यथोपस्थानजन्यसंस्कारश्चात्वालसमीपप्रदेश एव स्यात्सदसि न स्यात्। इष्टश्च संस्कार उभयत्रापीतीष्टं वैलक्षण्यं ज्ञेयम्। देशभेदात्परिषद्योऽसि पवमान इत्यस्याऽऽवृत्तिः। प्रथमे सौत्येऽहनि चात्वाले समीपप्रदेशे बहिष्पवमानस्तवनमितरेष्वहःसु सदस्येवेति। अयमर्थो लाट्यानद्राह्यायणाभ्यां प्रदर्शितः— अहीनबहिष्पवमानैः सदसि स्तुवीरन्प्रथमादह्नोऽन्यत्रेति। चात्वालः प्रसिद्धः। पशोः श्रपणं यस्मिन्देशे स देशः पशुश्रपणः। प्राजिहितशब्दार्थो वसतीवरीपरिहरणसूत्रे प्रदर्शितः। गार्हपत्यग्रहणं प्राजिहितशब्दः पुराणगार्हपत्यपर एवेति प्रदर्शयितुम्। अन्यथा कस्येयं संज्ञेति शङ्काया निराकरणं न स्यात्। तथा च यत्र यत्र प्राजिहितशब्दस्तत्र तत्र पुराणगार्हपत्य एव ग्राह्य इति सिद्धं भवति। शाला प्राग्वंशरूपा

तस्या मुखेऽग्रभागे भवः शालामुखीयस्तम्। अन्यत्स्पष्टम्। रौद्रमनीकम् सर्वत्रानुषजतीति पूर्ववदूह्यारूयेयम्।

इत्योकोवाहश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-शामिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्रश्नस्य तृतीयः पटलः ॥ ३ ॥

अथ दशमप्रश्ने चतुर्थः पटलः।

यत्र हविर्धाने ब्रह्मा राजानं प्रपादयति तस्मिन्काले पूर्वेण द्वारेण हविर्धाने प्रविश्यैष वो देव सवितः सोम इति शकटे राजानमासन्नमभिमन्त्रयते।

यत्र यस्मिन्काले तस्मिन्काले तस्मिन्नेव काले प्रपादनं, राजानं प्रत्यादाय सोमे जिगाति गातुविदिति सौम्यर्चोऽपरेण द्वारेण हविर्धाने प्रविश्याध्वर्यवे राजानं प्रदायेतिब्रह्मसूत्रोक्तस्योपलक्षणम्। आसन्नमध्वर्युणा। अनासन्नस्य राज्ञोऽभिमन्त्रणं व्यावर्तयितुमासन्नमिति। शकटग्रहणं मण्डपव्यावृत्त्यर्थम्। शकटस्योत्तरतः प्राङ्मुखः सन्नेवाभिमन्त्रणं कुर्यात्। न चात्रोदङ्मुखताऽपि। प्राङ्मुखतयैव शास्त्राविरोधपूर्वकासन्नाभिमन्त्रणरूपकार्यनिर्वाह उदङ्मुखतायाः शास्त्राविरुद्धाया निर्युक्तिकत्वात्। राज्ञे वामतः करणमेव शास्त्रविरोधोऽत्र। उपगा इति मन्त्रान्तः।

इदमहं मनुष्यो मनुष्यानिति प्रदक्षिणमावर्तते।

एतच्च शकटस्योत्तरत एव राज्ञः पृष्ठतः करणस्य परिहर्तुमशक्यत्वान्न दोषः[1] सह रायस्पोषेणेति मन्त्रान्तः।

नमो देवेभ्य इति प्राचीनमञ्जलिं करोति स्वधा पितृभ्य इति दक्षिणा।

प्राचीनं प्रागग्रमञ्जलिम्। अग्रेण जुहूपभृतौ देवेभ्यः प्राचीनमञ्जलिं करोतीति प्रकृतं जुहूपभृतावग्रेण देवेभ्यः करोतीति दर्शनात्। अत्रापि अग्रेण देवेभ्य इति अध्याहार्यम्। अर्थात्सोममग्रेण स्वधा पितृभ्य इत्यनेन मन्त्रेण, दक्षिणा दक्षिणमित्यर्थः

---

१ क. °त्वादोषः।

दक्षिणादाच्, इत्याजन्तता । दक्षिणं दक्षिणाग्रमित्यर्थः । अञ्जलिं करोतीत्यनुवर्तते । न्यञ्चीति बौधायनः । शकटाक्ष्यञ्चीत्यर्थः ।

इदमहं निर्वरुणस्य पाशादित्युपनिष्क्रामति ।

हविर्धानाद्बहिरिति शेषोऽर्थात् ।

सुवरभिविख्येषमिति सर्वं यज्ञमनुवीक्षते
वैश्वानरं ज्योतिरित्याहवनीयं परेक्षते ।

सर्वयज्ञानुवीक्षणाहवनीयपरेक्षणे दर्शपूर्णमासवदित्येतावतैव सिद्धे गुरुभूतमेवं वचनं स्वशाखायामेतयोर्ब्राह्मणाभावेऽपि शाखान्तर एतद्ब्राह्मणं स्पष्टमेवेतिज्ञापनार्थम् । फलं ज्ञानावश्यकता । यज्ञशब्देन विहारोऽत्र ग्राह्यः । तथा चाऽऽपस्तम्बः—सर्वं विहारमनुवीक्षत इति । तत्रैव तिष्ठन्निति परेत्यस्यार्थः । तथा च तिष्ठता कर्तव्यं यदीक्षणं तत्परेक्षणमित्यर्थो भवति ।

अग्ने व्रतपत इत्यवान्तरदीक्षां विसृजते ।

संतरां मेखलां समायच्छते संतरां मुष्टी कुरुत इत्याद्या अवान्तरधर्माः पूर्वं ये स्वीकृतास्तान्वक्ष्यमाणरीत्या परित्यजेदित्यर्थः । अयमेवावान्तरदीक्षाविसर्गो नाम । यथायथं नौ व्रतपते व्रतिनोर्व्रतानीति मन्त्रान्तः ।

तत्प्रकारमाह—

वितरां मेखलाꣳ समायच्छते वितरां मुष्टी कुरुते ।

वितरां शिथिला यथा भवति तथा समायच्छते समाकर्षेन्मेखलामित्यर्थः । वितरां शिथिले मुष्टी कुरुते । संतरामितिवद्वितरामिति व्याख्येयम् ।

स्वाहा यज्ञं वाचि वाते विसृज इति मुष्टी वाचं च
विसर्जयित्वा यथासुखमत ऊर्ध्वꣳ हस्ताभ्यां चरति ।

स्वाहा यज्ञमित्यनन्तरमितिशब्दाध्याहारेण च्छेदः । वाचि वाते विसृज इति भिन्न एव मन्त्रः । तथा च प्रथमेन तु मुष्टिविसर्गः । द्वितीयेन वाग्विसर्गः । चकारो मुष्टिविसर्गेण समुच्चयार्थः । स्वाहा यज्ञमिति मन्त्रः स्वाहा यज्ञं मनसेत्यारभ्य वातादारभ इत्यन्तः । एतादृशमर्थमापस्तम्ब आह—वितरां मेखलां विस्रꣳसते वितरां मुष्टी कर्षतेऽत्र दण्डप्रदानमेके समामनन्ति स्वाहा यज्ञं मनसा स्वाहा द्यावापृथिवीभ्याꣳ स्वाहोरोरन्तरिक्षात्स्वाहा यज्ञं वातादारभ इति मुष्टी विसृजते स्वाहा वाचि वाते विसृज इति वाचमिति । अथवैकेतिकरणात्स्वाहा यज्ञं वाचि वाते विसृज इत्येक एव मन्त्रः । अस्मिन्पक्षे मुष्टिद्वयविसर्गे वाग्विसर्गे च मन्त्र आवर्तनीयः । द्रव्यपृथक्त्वात् । या नित्यं संध्ययोर्नियम्यते वाक्तामतः परं विसृजते । यथासुखं स्वेच्छम् । अत ऊर्ध्वमतोऽवान्तरदीक्षाविसर्गादूर्ध्वमारभ्येत्यर्थः । अन्यत्स्पष्टम् । इदं सूत्रमवान्तरदीक्षावि-

सर्गार्थमात्रमेतन्मुष्टिविसर्जनं तदनन्तरं तूष्णीमेव पुनर्मुष्टिकरणं यज्ञधारणार्थं कर्तव्यं तत्सहितैवान्या दीक्षितवृत्तिरिति कदाचित्स्यात्तद्वारयितुम् ।

वर्ततेऽन्या दीक्षितवृत्तिः ।

दीक्षणीयाप्रभृतीयं वृत्तिरिति सूत्रे यदि प्रमत्तो व्याहरेदित्यारभ्य यद्यदीक्षितवादं वदेन्मुष्टी वाचं च विसर्जयित्वेत्येतदन्ता धर्मा वृत्तिपदेनोच्यन्ते । सैव वृत्तिरत्रान्यशब्देन गृह्यते । साऽन्या दीक्षितवृत्तिर्वर्तत एव न त्ववान्तरदीक्षाविसर्गकाले दीक्षणीयेष्टिमारभ्य प्रवृत्ता या वृत्तिस्तस्या अपि विसर्ग इति ।

जागर्त्येताꣳ रात्रिम् ।

एतच्छब्दस्य सर्वनामत्वात्सर्वनाम्नो याऽग्नीषोमीयपशुसंबन्ध्यनूयाजवती रात्रिः सैतच्छब्देन गृह्यते । तेनैतस्यामेव रात्रौ जागरणं न द्वादशाहाद्यहीनेषु द्वितीयादिरात्रिषु अन्यथा प्रत्यहं जागरणे द्वितीयसौत्यदिवसाद्यनुष्ठानेऽतीव शरीरे वैकल्यं स्यात् । नच राजसंरक्षणानुपपत्तिः । तस्यान्यद्वाराऽपि संभवात् । अस्मिन्नर्थे साधकं व्याख्यानं हविर्धाने यजमानो राजानं गोपायतीत्येतत्सूत्र एव प्रदर्शितमेव ।

न व्रतं भवति दैक्षोऽत ऊर्ध्वं व्रतकल्पः ।

एतां रात्रिमिति वचनविपरिणामेनानुवर्तते । तथा चैतस्यां रात्रौ व्रतं न भवतीत्यर्थो भवति । अत ऊर्ध्वं चेद्व्रतं प्रसक्तं तदा दैक्षो दीक्षाया अयं दैक्षो दीक्षासंबन्धी व्रतकल्पो दीक्षासंबन्धिव्रतप्रकारो भवतीत्यर्थः । एतच्च प्रतिबन्धवशेन यद्यवभृथं न जातं तदा द्रष्टव्यम् । एवमहीनेषु द्वितीयप्रभृतिषु सुत्यारात्रिषु च ।

सप्तहोत्रा ग्रावस्वासन्नꣳ राजानमभिमृशति ।

ग्रावस्वासन्नमित्यत्राध्वर्युणेति शेषः । अध्वर्योरेवाऽऽसादनस्य विहितत्वात् । अहोमार्थत्वादग्रहोऽत्र सप्तहोता । स च महाहविर्होतेति । अयास्य उद्गातेति होतृमन्त्रान्तः ।

यत्र हविर्धानमपः प्रपादयीत ता अनु
प्रपद्यते यश एनमुपनामुकं भवति ।

यत्र यस्मिन्काले ताः प्रपादिता अपोऽनु पश्चात्प्रपद्यते हविर्धाने प्रविशतीत्यर्थः । पूर्वेण द्वारेणैव ता अन्वितिवचनात् । यत्रेति पूर्वत्रोक्तेस्तदेत्यस्याध्याहार आर्थिकः । तथा चायमर्थो भवति—यस्मिन्काले हविर्धानमपः प्रपादयति तस्मिन्काले ता अनु प्रविशतीति । एनं यजमानं प्रति यश उपनामुकं भवति । उपशब्दः सामीप्यार्थकः संस्तद्वारा नैरन्तर्यं लक्षयति । नामुकमित्यत्र णम प्रह्वत्वे शब्दे चेतिधातुसूत्रप्रदर्शितप्रह्वतार्थकाद्धातोरुकञ्प्रत्ययः । ञित्वादादिवृद्धिः । चकारेण ख्यात्यर्थकत्वमपि समु-

---

१ च. छ. °हाहो° ।

श्चेतव्यं सर्वदा नामुकं रूयातं यशसो विशेषणम् । एनं यजमानं प्रति निरन्तरं रूयातं यशो भवति प्राप्नोतीत्यर्थः । सत्तारूपार्थनिर्देशस्तूपलक्षणं यागात्स्वर्गो भवतीत्यादावुत्पद्यत इत्याद्यर्थदर्शनात् । प्रकृते द्वितीयायोगेन प्रापणार्थकत्वस्यैव कल्पनात् । यद्यप्युणादिसूत्रेषूकञ्प्रत्ययो नोपात्तस्तथाऽपि

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥

इतिशास्त्रबलादविहितोऽप्युकञ् ऊहितुं शक्यः । इयं शाखान्तरीया श्रुतिरेवानूद्यते । अयमनुप्रपदनस्तावकोऽर्थवादः । अत्रार्थवादप्रदर्शनमर्थवादज्ञानावश्यकत्वं प्रदर्शयितुम् । तदज्ञाने यजुर्भेषप्रायश्चितं भुव इति दक्षिणाग्नौ होतव्यं भवति ।

द्वादश धेनूः पष्ठौहीर्वा गर्भिणीः कृत्यधी-
वासं चांशावध्वर्यवे ददात्येवमदाभ्ये ।

धेनवो नवप्रसूताः । पष्ठौह्यः पञ्चवर्षाः । गर्भिणीरिति पष्ठौहीनां विशेषणम् । प्रथमगर्भाः पष्ठौहीर्ददातीत्यापस्तम्बः । कृत्यधीवासः शय्यासनार्थश्चर्मपटः । गजचर्ममय एवायमिति केचित् । अंशावंशुग्रहे । सूत्रान्तरे ब्रह्मणोऽपि दानदर्शनाद्ब्रह्मव्यावृत्तयेऽध्वर्युग्रहणम् । अंशावदाभ्ये च ददातीत्येतावतैव सिद्ध एवमित्यतिदेशवचनं द्वादशधेनुदानपष्ठौहीदानयोर्मध्ये यदंशौ दत्तं तथैवादाभ्येऽपि देयं नानयोर्वैरूप्यमितिज्ञापनार्थम् । चकारः परस्परसमुच्चयार्थः सूत्रान्तरोक्तहिरण्यसमुच्चयार्थो वा ।

ध्रुवे गृहीते न मूत्रं करोत्यावनयनात् ।

मूत्रावरोधस्य न कुर्याद्वेगधारणमिति स्मृतौ निषेधात्तस्यावर्जनीयत्वाच्च निषेधपरिपालनमत्यन्तदीर्घकालसाध्यमिति कृत्वा कर्तुमशक्यं तथा चाशक्यस्य किमर्थं निषेध इति चेत्सत्यं, मध्ये मूत्रकरणे प्रायश्चित्तप्रापणार्थत्वात् । तच्च व्रातपतीष्ट्यात्मकं क्रतुसमाप्तौ । एतेनान्यत्र कर्मसु मूत्रकरणे प्रायश्चित्तं नेत्यवेहि ।

वस्व्यै हिं कुरु तस्यै प्रस्तुहि तस्यै मेऽवरुद्ध्या इति
पुरस्ताद्बर्हिष्पवमानाव्याहृतीर्दशहोतारं च जपति ।

व्याहृतीर्व्यस्ताः समस्ता वा । चित्तिः स्रुगिति दशहोता । अहोमार्थत्वादग्रहः । चकारः परस्परसमुच्चयार्थ एवात्र । अन्यस्यासंभवात् ।

इयेनोऽसि गायत्रछन्दा अनु त्वाऽऽरभे स्वस्तिमा
संपारयेति ॥ १२ ॥ स्तूयमानमन्वारभते ।

स्तूयमानं बर्हिष्पवमानमनुलक्षयन्नुद्गातृनारभत आलभते स्पृशति उद्गात्राऽऽरम्भ एव ।

---

१ च. °श्चेज्ञा° ।

बहिष्पवमानालम्भरूपत्वमनुसंदधन्नुद्गात्रालम्भं करोतीति यावत् । स्तूयमानमितिवर्तमाननिर्देशगतस्तवनकर्तृनुद्गातृप्रस्तोतृप्रतिहर्तृनारभत इति गम्यते । तत्तद्भक्त्युच्चारणकाले तत्तद्भक्तिसमाप्तिपर्यन्तं तं तमन्वारभत इति । निधनात्मकभक्तौ तु सर्वानवश्यमेकदैव येन केनाप्युपायेनान्वारभते । सर्वैर्हस्ता एकत्र संयोज्या यजमानस्यैकदान्वारम्भसिद्धये । उत्तरत्र मध्यमायां वेति वैकल्पिकमध्यमस्तोत्रीयाग्रहणादत्रोपस्थितत्वेन प्रथमाया एव ग्रहणमिति गम्यते । स्तूयमानमिति बहिष्पवमानविशेषणम् । एतस्य मन्त्रस्यान्वारोह इति नाम । तथा चात्र श्रुतिः—यो वै पवमानानामन्वारोहानित्यादि ।

*मध्यमायां स्तोत्रीयायां वा ।

स्तूयमानपदं लिङ्गविपरिणामेनानुवर्तते । एवमन्वारभत इति पदमपि । तथा चायमन्वयो भवति—मध्यमायां स्तोत्रीयायां बहिष्पवमानमनुलक्षयन्नुद्गातृनालभत इति । अन्वारोहं जपतीत्येवाऽऽपस्तम्बः ।

स्तुतस्य स्तुतमसीति सर्वाणि स्तोत्राणि स्तुतꣳ स्तुतमनुमन्त्रयते ।

सर्वाणि स्तोत्राण्यनुमन्त्रयते स्तुतं स्तुतमित्यन्वयः । स्तुतं स्तुतमितिवचनं स्तूयमानशब्दाधिकारनिवृत्त्यर्थम् । सर्वाणि स्तोत्राणि स्तुतान्यनुमन्त्रयत इत्येवमुच्यमाने सर्वस्तोत्रसमाप्त्यनन्तरमनुमन्त्रणं सर्वस्तोत्राणां सकृदेवेत्यपि शङ्कितं स्यात्तद्वारणायैवमुक्तम् । स्तुतꣳ स्तुतꣳ स्तोत्रमनुमन्त्रयत इत्येतावतैव सेत्स्यति सत्येवंवचनस्यैवं व्याख्यानं तु पूर्वसूत्रव्याख्यावन्न स्तूयमानान्वारम्भाधिकारलाभार्थम् । तेन स्तुतस्य स्तुतमसीत्यनेन सर्वाणि स्तूयमानान्यनुलक्षयन्नुद्गातृनन्वारभत इति पूर्वोक्तमत्रापि सिद्धं भवति । स चान्वारम्भः प्रथमायां मध्यमायां वा न संभवति । पूर्वेणावरुद्धत्वात् । तत्र पवमानसंबन्धी इयेनोऽसि गायत्रछन्दा इत्यन्वारम्भः । प्रथमायामिति पक्षे प्रथमायां न संभवत्ययमन्वारम्भः । मध्यमायामिति पक्षे मध्यमायामपि न तदितरास्वृक्षु यस्यां कस्यांचिदृचयन्वारम्भ इति । स्तूयमानमितिवर्तमानशानच्प्रत्ययात्प्रतिस्तोत्रम् । स्तुतं स्तुतमनुमन्त्रयत इत्यत्रापि स्तुतस्य स्तुतमसीत्यस्यानुवृत्तिरर्थत एव सिद्धा । अनुमन्त्रणस्य मन्त्रोच्चारणप्रधानत्वादितरमन्त्रस्यात्रानुपदेशादिति । अथवा स्तोत्रेषु पवमानानां ग्रहणं भवतीतिशङ्कानिराकरणार्थं वा ।

शस्त्रस्य शस्त्रमसीति सर्वाणि शस्त्राणि ।

शस्त्रं शस्त्रमनुमन्त्रयत इति योग्यतया शेषो ज्ञेयः ।

---

* अस्य सूत्रपुस्तकेष्वनुपलम्भादिदं सूत्रं विद्यते वा न वेति विवेचनीयम् ।

इन्द्रियावन्तो वनामह इति सर्वत्रानु*षजति।

सर्वेषु शस्त्रानुमन्त्रणेषु चेत्यर्थः। ननु अत्र स्तोत्रानुमन्त्रणमन्त्रस्यैकत्वात्तत्रानुषङ्गार्थं पूर्वत्रेत्येवं वक्तव्यं सर्वत्रेत्येवं तु न वक्तव्यम्। मन्त्रावाहुल्यामावात्। प्रथमस्तोत्रानुमन्त्रणवद्द्वितीयादिष्वपि अनुषङ्गो भविष्यति एवं शस्त्रानुमन्त्रणेष्वपि द्वितीयादिषु। तथा च किमर्थं सर्वत्रेत्येवं वचनमिति चेत्सत्यं, प्रथमद्वितीयादिष्वप्यनुषङ्ग इत्येतन्नियमाभावज्ञापनार्थत्वेनैतादृशवचनवैयर्थ्याभावात्। कुत्रैतज्ज्ञापनस्य फलमिति चेत्प्रातःसवनसंबन्धिधिष्ण्यविहरणव्याघारणयोरनुषङ्गस्वीकारेऽपि न माध्यंदिनसवनतृतीयसवनसंबन्धिधिष्ण्यविहरणव्याघारणयोरनुषङ्गस्वीकारावश्यकतेति। एवमन्यत्रापि द्रष्टव्यम्। एतेनैवेदमपि ज्ञायते यत्रानुषङ्गवचनं नास्ति तत्रानुषङ्गः कृताकृत इति।

भूरसि श्रेष्ठो रश्मीनामित्यैन्द्रवायवे हूयमान आदित्यमुपतिष्ठते।

हूयमान इति वर्तमानशानच्प्रत्ययाद्धोमे वर्तमान आदित्योपस्थानम्। भूरसीत्यस्यापि ऐन्द्रवायव एव विनियोगः। आचार्येणाऽऽपस्तम्बबौधायनाभ्यां मैत्रावरुणग्रहे विनियोगमि(इ)व विनियोगानुक्तेः। अपानं मे पाहीति मन्त्रान्तो भवति।

यो न इन्द्रवायू इत्यैन्द्रवायवे हुतेऽङ्कुष्ठमवबाधेत
यदि श्रेयसा स्पर्धेताङ्कुष्ठेनाङ्कुलीं यदि पापीयसा।

यो न इन्द्रवायू इत्यत्र तावतोऽशस्य निराकाङ्क्षत्वाभावादभिदासतीत्यादिरनुषङ्ग आर्थिकः। अत एवावचनम्। एवं यो नो मित्रावरुणावित्यत्रापि। यो नोऽश्विनावित्यत्र पठित एव। पुनरैन्द्रवायवग्रहणं यो न इन्द्रवायू इत्यारभ्य यदि पापीयसेत्यन्तं नैमित्तिकं न तु यो न इन्द्रवायू इत्यैन्द्रवायवे हुत इत्येतदन्तं भिन्नमेव सूत्रं कृत्वाऽऽदित्यमुपतिष्ठत इति पूर्वसूत्रादनुवर्त्य क्रियानिराकाङ्क्षं कर्तव्यं, तथा च होमोत्तरं यो न इन्द्रवायू इत्यनेनाऽऽदित्योपस्थानं नित्यमेवावबाधनमात्रं नैमित्तिकं तच्च तूष्णीमेव मन्त्रानुपदेशादिति शङ्कां व्यावर्तयितुम्। अवबाधनं निपीडनम्। अवशब्दोऽवनमनार्थः। यदीत्यनेन नैमित्तिकत्वं प्रदर्श्यते। श्रेयसा धनादिना श्रेष्ठेन। स्पर्धा संघर्षो द्वेष इति यावत्। पापीयसा दारिद्र्यादिनाऽल्पेन।

यो नो मित्रावरुणाविति मैत्रावरुणे यो नोऽश्विनाविति आश्विने।

हुतेऽङ्कुल्याऽङ्कुष्ठमवबाधेत यदि श्रेयसा स्पर्धेताङ्कुष्ठेनाङ्कुलीं यदि पापीयसेति पूर्वसूत्रादुभयत्रानुवर्तते।

---

* ट. संज्ञकसूत्रपुस्तकेऽनुषजतीति न विद्यते।

---

१ क. छ. र्वत्र सं°।

अच्छिन्नस्य ते रयिपते सुवीर्यस्येन्द्रेण
सयुजो वयमिति शुक्रꣳ हूयमान*मन्वारभते।

शुक्रं शुक्रमहम्।

यत्रास्मै चमसमाहरति तं भक्षयति।

यत्रेतियच्छब्दादुत्तरत्र तच्छब्दाध्याहारोऽर्थात्। यत्रास्मै चमसमाहरति तदा तं भक्षयतीति। यत्र यस्मिन्काले। अस्मै, इति पञ्चम्यर्थे चतुर्थी। अस्माद्धोष्टर्तुः सकाशात्स्वसमीपं चमसं स्वचमसं चमसाध्वर्युर्भक्षणार्थमाहरति यदा तदा तं चमसं भक्षयति भक्षेहीत्यादिविधिना हिन्व म इत्यन्तेन। वसुमद्रुणस्य सोमदेवते मतिविदः प्रातःसवनस्य गायत्रछन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति प्रातःसवने भक्षमन्त्रः। नराशꣳसपीतस्य सोमदेवते मतिविदः प्रातःसवनस्य गायत्रछन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति प्रातःसवने नाराशंसभक्षणे मन्त्रः। अन्तिमनाराशंसवर्जमाप्यायनं, समाख्यानिमित्तक एव भक्षो नान्यः। यत्र प्रतिभक्षितुरभावस्तत्रोपाह्वानमध्वर्योः। रुद्रवद्रुणस्य सोमदेवते मतिविदो माध्यंदिनस्य सवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति माध्यंदिने सवने भक्षणमन्त्रः। नराशꣳसपीतस्य सोमदेवते मतिविदो माध्यंदिनस्य सवनस्य त्रिष्टुप्छन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति माध्यंदिने सवने नाराशंसभक्षणमन्त्रः। आदित्यवद्रुणस्य सोमदेवते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति तृतीयसवने भक्षणमन्त्रः। नराशꣳसपीतस्य सोमदेवते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति तृतीयसवने नाराशंसभक्षमन्त्रः। इत्येवंप्रकारेण तं तं स्वचमसं भक्षयतीत्यर्थः। चमसे विद्यमानं सोममित्यर्थश्चमसशब्दस्य। तस्यैव तच्छब्देन परामर्शः। भक्षणसमभिव्याहारात्।

यथेतरे चमसाः।

इतरे चमसा ब्रह्मादिभिर्भक्षिता भवन्ति यथा येन प्रकारेण तथा तं चमसं भक्षयतीति पूर्वेणान्वयः।

गृहपते यजेत्युच्यमाने होतरेतद्यजेति
संप्रेष्यति स्वयं वा निषद्य यजति।

उच्यमान इतिवर्तमानप्रत्ययादेव तद्वचनकाल एव प्रैषोऽयं, स्वयमेव वा निषद्य स्वदेश एव निषद्य प्राङ्मुख उपविश्य यजति। निषदनमुपवेशनं, यजमानस्योपविष्ट-

* ङ. ज. ञ. ट. पुस्तकेषु अन्वारभेतेति पाठः।

त्वादेवोपवेशनसिद्धौ निषद्येतिवचनं समन्त्रकं निरसनं कृत्वा समन्त्रमेवोपविशतीत्येतादृशार्थलाभार्थम् । तौ च दर्शपूर्णमासयाजुषहौत्रसंबन्धिनावेव ग्राह्यौ । तयोरेवास्मिन्कर्मसंबन्धित्वात् । अत एव यजतीतिपरस्मैपदनिर्देशः । प्राङ्मुखताऽत्र यागाभिमुख्यायार्थसिद्धा । याज्या चर्तुप्रैषान्तिमैकैवात्र ।

ज्योतिषे हिं कुरु तस्यै प्रस्तुहि तस्यै मेऽवरुद्ध्या इति पुरस्तादाज्यानामेकैकस्य स्तोत्रस्य व्याहृतीश्चतुर्होतारं पञ्चहोतारं च जपति ।

प्रातःसवनसंबन्ध्यावर्तिस्तोत्राण्याज्यानि यैर्देवा असुराञ्जेतुमाजिमीयुः । तथा च छन्दोगश्रुतिः—यदाजिमीयुस्तदाज्यानामाज्यत्वमिति । आजिं सङ्ग्रामं तेषामाज्यानां मध्य एकमेकमित्येकैकं तस्यैकैकस्य । अत्राऽऽज्यशब्दस्य स्तोत्रपरत्वं दर्शयितुं स्तोत्रस्येति । आज्यानां चतुर्णामेकैकस्य स्तोत्रस्य पुरस्तादित्यन्वयः । व्याहृतीर्व्यस्ताः समस्ता वा । अहोमार्थत्वादग्रहावस्वाहाकारौ चतुर्होतृपञ्चहोतारौ । चकारः पूर्वेण समुच्चयार्थः । जपत्वान्नियतमेव चातुःस्वर्यम् ।

इडायै हिं कुरु तस्यै प्रस्तुहि तस्यै मेऽवरुद्ध्या इति पुरस्तान्माध्यंदिनात्पवमानाद्व्याहृतीश्चतुर्होतारं पञ्चहोतारं च जपति।

पुरस्तान्माध्यंदिनात्पवमानादित्येतावत्युच्यमाने व्याहृत्यादीनां निवृत्तिः स्यात्सा मा भूदित्येतदर्थं व्याहृतीरित्यादिवचनम् ।

सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वा रभे स्वस्ति मा संपारयेति स्तूयमानमन्वारभते ॥ १३ ॥

स्तूयमानमित्यनन्तरं वचनविपरिणामेन पवमानमित्यनुषज्यते । अन्यत्पूर्ववद्व्याख्येयम् ।

व्याख्यातꣳ शुक्रस्यान्वारम्भणम् ।

अच्छिन्नस्य ते रयिपते सुवीर्यस्येन्द्रेण सयुजो वयमिति शुक्रꣳ हूयमानमन्वारभत इत्येतेन सूत्रेण व्याख्यातमुक्तमन्वारम्भणमित्यर्थः ।

सप्तेषु नाराशꣳसेषु दक्षिणेन वेदिमवस्थिता दक्षिणा ददाति ।

वेदिं महावेदिम् । दक्षिणेनेत्येनपा समीपेऽवस्थिता गा दक्षिणा ददाति ।

ता दक्षिणा आह—

गवाꣳ सप्तैकविꣳशतिश्चतुर्विꣳशतिः षष्टिः शतꣳ सहस्रं द्वादशशतꣳ सर्ववेदसमपरिमिता वा ।

द्वादशशतं द्वादशाधिकं शतं, वेद इति धननाम सान्तः शब्दः । सर्ववेदसं सर्वस्वमिति यावत् । तत्तु भूमिपुरुषवर्जमिति न्यायविदः । तत्र जैमिनिसूत्रद्वयं षष्ठाध्याये

१ ड. ज. ञ. ञ. शतं द्वादशशतꣳ सहस्रꣳ सर्व°।

सप्तमे पादे—स्वदाने सर्वमविशेषात्, यस्य वा प्रभुः स्यादितरस्याशक्यत्वादिति। न भूमिः स्यात्सर्वान्प्रत्यविशिष्टत्वादिति च। अग्निष्टोमेऽपि सर्वस्वदानं पक्षे विहितं तत्र पितापुत्रादिकं सर्वमपि देयमविशेषात्पितुरात्मीयत्वेन स्वशब्दवाच्यत्वात्। पुत्रादिषु तु सत्तयैव स्वत्वं, धनेऽपि स्वत्वस्य सत्वात्तदपि देयम्। एवं चैतेषु विशेषाभावात्सर्वं देयमिति पूर्वपक्षसूत्रार्थः। यस्य पदार्थस्य स्वत्वरूपपदार्थस्य षष्ठ्यर्थो निरूपितत्वं यन्निरूपितं प्रभुत्वं त्यागसामर्थ्यं स पदार्थोऽत्र स्वशब्देनोच्यते। तच्च धनमेव तस्यैव दानयोग्यत्वाद्धनेतरपदार्थस्याशक्यत्वाद्दातुमशक्यत्वादिति सिद्धान्तसूत्रार्थः। स्वशब्देन भूमेरपि दानयोग्यत्वात्तस्या अपि दानप्रसक्तावाह—न भूमिर्देया सर्वान्स्वीयपुरुषान्प्रत्यविशिष्टत्वात्। न केवलं स्वस्यैवेति सार्वभौमस्य न महापृथ्वीस्वामित्वं किंतु देशपालनं करादानं च शासनं चेति राज्यतया संबन्धः। अतोऽसौ महापृथिवीमाण्डलिकोऽपि मण्डलं न दद्यादित्युत्तरसूत्रार्थः। वक्ष्यति च यदन्यद्भूमेः पुरुषेभ्यश्चेति। अत्राऽऽपस्तम्बो विशेषमाह—ज्येष्ठं वा पुत्रमपभज्य सर्ववेदसं ददातीति। अस्यार्थः—सर्ववेदसं ददज्ज्येष्ठाय पुत्राय भागं दत्त्वा शेषं ददातीति। अन्यश्च विशेषस्तेनोक्तः—अश्वतरं सहस्रे सर्ववेदसे च ददातीति। गर्दभाद्वडवायां जातोऽश्वतरः सर्वत्र देयः। साहस्रसर्ववेदसयोस्तु नित्यम्। तथा च ब्राह्मणम्—तस्माद्बहिष्पवमानकृतः सर्ववेदसे वा सहस्रे वाऽश्वतरकृत इति। अत्र सहस्रशतादिदक्षिणापक्षा एव मुख्याः सप्तादयोऽर्वाचीनसंख्याः पक्षा गौणा अनाढ्यपराः। शक्तस्य गौणपक्षाश्रयणे दोषः। तथा च वाधूलः—दशगुः सप्तगुना सोमेन यजते शतगुः सप्तगुनेष्ट्वा पापीयान्भवतीति। द्वादशशतं दक्षिणा नित्यः कल्पः प्रकृताविति सूत्रान्तरे। आथर्वणे वैतानसूत्रेऽपि—अल्पस्व एकगुना यजेतेति। अल्पस्वोऽल्पधनः। सप्त गा दत्त्वा शतसहस्रद्वादशशतान्यतमसंख्यापूर्त्यर्थं मौल्यं दद्यादिति केचित्। वस्तुतस्तु सप्तापि सर्वेभ्य ऋत्विग्भ्यः कालसंकेतव्यवस्थाकृतोपभोगमात्रमुद्दिश्य देयाः। ते तु हिंसां वर्जयित्वा परस्परकालसंकेतव्यवस्थाकृतोपभोगमात्रेण विभज्य गृह्णीयुः, इष्टिसंबन्धिगोप्रतिग्रहवत्। एवमेकविंशतिचतुर्विंशतिषष्टिपक्षेऽपि द्रष्टव्यम्। शतपक्षसहस्रदक्षिणापक्षसर्ववेदसपक्षापरिमितपक्षेषु विभागोपपत्तिः स्वरूपत एवोपपद्यते। अपरिमितशब्दार्थो यावता साम्यमुपपद्येत तावानेव कल्पनीयः। चन्द्रमसि मम भोगाय भवेति प्रतिग्रहमन्त्राद्धनयाचनमपि कर्तव्यमृत्विग्भ्यो दानार्थम्। अत्र विशेष उक्त आपस्तम्बेन—सत्रेषु नाराशंसेषु दक्षिणा ददाति बहुपरिमितमिति। बहु प्रभूतं तच्चापरिमितमनवधृतपरिमाणं धनमिति शेषः।

मन्थौदनतिलमाषा हिरण्यं वासोऽविरजा च नियुक्तान्येतानि भवन्ति।

नियुक्तान्येतानि लब्धुं शक्यानि। मन्थौदनतिलमाषा इत्यत्र समासकरणाद्येतेषां दानं तदा चतुर्णामेव दानं नैकस्येति सूच्यते। इदं मन्थौदनतिलमाषाणां दानं स्वरू-

पेण शतधा विभज्य संभवात्। शक्तौ सत्यां हिरण्यवासोव्यजानां तावतामेव दानं विभागानुरोधेन। यदि तावतामलाभस्तदा यावल्लब्धं तावदेव देयम्। अवशिष्ट-संख्यापूरणार्थं मौल्यद्वारा विभजनीयमिति केचित्। पूर्ववदुपभोगमात्रेणेत्येव युक्तम्।

अनो रथोऽधीवासोऽश्वः पुरुषो हस्ती वाऽनियुक्तानि।

अनियुक्तानीति पदच्छेदः। अनः शकटं, रथः प्रसिद्धः। अधीवासः शयनासनार्थो बहुमूल्यश्चर्मपटः। पुरुषो दासः। इदमुपलक्षणं दास्याः। अत्र वाकारश्रवणेनैतेषां समुच्चयाभावः सूच्यते। अत्र कन्यादानमपि यस्मै कस्मैचिद्दत्विज उक्तं धर्मसूत्रे—दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेदिति। अष्टौ विवाहा धर्मसूत्र उक्तास्तत्रार्षं तृतीयो विवाहप्रकार उक्तः। देवैर्दृष्टे विवाहे यज्ञतन्त्रे वितत ऋत्विजे कर्म कुर्वते यस्मै कस्मैचित्सपिण्डत्वसप्रवरत्वे परिहाप्य कन्यां दद्यात्। एष एव दैवो विवाह इत्यर्थः। दैवे यज्ञ ऋत्विजे प्रतिपादयेदित्येतावतैव सिद्धौ तन्त्रशब्दस्तावन्महतः सौमिककर्मण एवात्र ग्रहणं नैष्टिकपाशुकयोरल्पयोरिति सूचयति। प्रतिपादयेदिति वचनात्, ऋत्विज इत्येकवचनेनैकस्मा एव प्रतिपादनाच्च नेयं तन्त्रसंबन्धिदक्षिणा। एतच्च प्रतिपादनं प्रधानदक्षिणादानानन्तरम्। तथा च बौधायनः—दक्षिणासु नीयमानास्वन्तर्वेद्यृत्विजे दद्यादिति। दद्यात्प्रतिपादयेदित्यर्थः। अत्र प्रतिग्रहे मन्त्रविशेष उक्तस्तेनैव गृह्णे—अथ यदि दक्षिणाभिः सह दत्ता स्यात्तां प्रतिगृह्णीयात्प्रजापतिः स्त्रियां यश इत्येताभिः षड्भिरनुछन्दसमिति। दक्षिणाभिः सह दत्तेतिवचनमपि कन्याप्रतिपादनस्य यागदक्षिणात्वं नेत्यत्र लिङ्गम्। अयं च प्रतिग्रहमन्त्रोऽस्माकमप्यविरुद्धः। नच ताभ्रीणां दक्षिणानां दर्शयतीतिसूत्रविरोध इति वाच्यम्। एतस्य प्रतिग्रहमन्त्रविशेषस्य दक्षिणाप्रतिग्रहप्रकरणे सूत्रकारेणापठितस्य ताभ्रीणां दक्षिणानां दर्शयतीतिसूत्रविषयकत्वासंभवेन विरोधाभावात्। दीक्षितो न ददातीतिनिषेधो यज्ञतन्त्रान्तर्गतकन्याप्रतिपादने न प्रवर्तते वचनबलात्। प्रतिपादनं तु कृत्स्नकन्याप्रतिपादनोक्तविधिना कार्यम्। कन्याप्रतिपादनाङ्गभूतहिरण्यादिदानस्य तु ददातिविहितस्वान्निषेधोऽस्त्येव। पुण्याहवाचनादिकं कन्यावरणं वाग्दानं मधुपर्कश्च निवर्तते। एतस्य विवाहविशेषस्य फलविशेषोऽप्याश्वलायनेनोक्तः—ऋत्विजे विततेकर्मणि दद्यादलंकृत्य स दैवो दशावरान्दश परान्पुरुषान्पुनात्युभयत इति। इदं प्रसङ्गादागतमुक्तं प्रकृतमनुसरामः। अन्यादिविषये विशेष आपस्तम्बेनोक्तः—अविमजां गामश्वं पुरुषं हस्तिनं वासोऽनो रथमोदनं मन्थं माषांस्तिलान्व्रीहीन्यवान्गर्दभमित्यधिकान्यनियतानीति। पूर्वाभिर्दक्षिणाभिः सह विकल्पशङ्कानिवृत्त्यर्थमुक्तमधिकानीति। नित्यवत्समुच्चयशङ्कानिवृत्त्यर्थमुक्तमनियतानीति। एतानि द्रव्याणि यथोक्ताभ्यो दक्षिणाभ्योऽधिकानि शक्तौ सत्यां ददाति। एतावतां दाने क्रतुर्गुणवत्तरो भवतीति भावः।

ता रूपेण वो रूपमभ्यैमीति हिरण्यमाज्यं चाऽऽदायाभ्येति ।

ता दक्षिणा अभ्येति अभिमुखो भूत्वा ता दक्षिणा एतीत्यर्थः ।

तुथो वो विश्ववेदा विभजत्विति मध्यमवक्रम्य विभजति ।

तासां मध्यमवक्रम्य मध्ये प्रविश्य विभजति । कृष्णाजिनेन व्युन्नास्येत्यापस्तम्बः । पुच्छेनेति बौधायनः । यथा चतुर्धा विभक्ता भवेयुस्तथा कृष्णाजिनस्य पुच्छेन व्युन्नासयतीत्यर्थः ।

द्वादश द्वादश मध्यतःकारिभ्यः षट् षडर्धिभ्य-
श्चतस्रश्चतस्रस्तृतीयिभ्यस्तिस्रस्तिस्रः पादिभ्यः ।

मध्यतःकारिभ्योऽर्धो भागो येषामस्तीत्यर्धिनः । एवं द्वितीयिपादिशब्दयोरपि द्रष्टव्यम् । अत्राऽऽपस्तम्बः—यावदध्वर्यवे ददाति तस्यार्धं प्रतिप्रस्थात्रे तृतीयं नेष्ट्रे चतुर्थमुन्नेत्र एतेनैवेतरेषां दानमुक्तमिति ।

एवꣳ शेषम् ।

शेषशब्देन मन्थादिकमनआदिकं चोच्यते । इदं चैतेषां सत्त्वे द्रष्टव्यम् । अनआदीनां विभागसंभवे गोवद्विभागः । असंभवे मौल्यद्वारेति केचित् । उपभोगमात्रेणेति युक्तम् ।

होताऽध्वर्युर्ब्रह्मोद्गाता च मध्यतःकारिणः ।

सदस्यव्यावृत्तय एतेषामुत्कीर्तनम् । ननु यथाश्रद्धं सदस्यायेतिवक्ष्यमाणपृथग्विधानादेव सिद्ध एतत्परित्यागार्थकैतत्सूत्रप्रणयनं व्यर्थमिति चेत्सत्यं, यथाश्रद्धं सदस्यायेत्येतत्सूत्रस्य दक्षिणाधिक्यशङ्काव्यावृत्त्यर्थत्वेन सार्थक्यात् ।

मैत्रावरुणः प्रतिप्रस्थाता ब्राह्मणाच्छꣳसी प्रस्तोता चार्धिनोऽच्छा-
वाको नेष्टाऽऽग्नीध्रः प्रतिहर्ता च तृतीयिनः शेषाः पादिनः ।

के तेऽर्धिनस्तृतीयिनः पादिन इत्याकाङ्क्षायामिदं सूत्रम् । शेषशब्देन प्रावस्तोन्नेतृपोतृसुब्रह्मण्या उच्यन्ते । पादशब्देन चतुर्थोऽश उच्यते ।

एतत्ते अग्ने राध ऐति सोमच्युतमिति विभक्ता आनयति ।

विभक्ता दक्षिणाः । अन्यत्स्पष्टम् ।

आनयनप्रयोजनमाह—

अग्रेण प्राग्वꣳशमपरेण सदो दक्षिणेनाग्नीध्री-
यमन्तरेण चात्वालोत्करावुदीचीरुत्सृजति ।

उत्सर्गोऽत्र प्रयोजनम् । उदीचीः, उदङ्मुखाः ।

ऋतस्य पथा प्रेत चन्द्रदक्षिणा इति गच्छन्तीरनुमन्त्रयते ।

गच्छन्तीर्गाः । अन्यत्स्पष्टम् ।

ब्राह्मणमद्य राध्यासमृषिमार्षेयमिति हिरण्यं
दक्षिणाभागं चाऽऽदायाऽऽग्नीध्रमभ्येति ।

आग्नीध्राभिमुखगमनार्थो मन्त्रः । ऋषिर्वेदस्तस्याध्येता । आर्षेयस्तदर्थवेत्ता । एष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवानितिश्रुतेः ।

एतेनैव मन्त्रेण हिरण्यं दक्षिणाभागं चाऽऽग्नीध्रे ददाति ।

एतेनैव मन्त्रेण, आग्नीध्राभिमुखगमनार्थेनैव मन्त्रेण । अन्यत्स्पष्टम् । प्रतिप्रतिग्रहं मन्त्रावृत्तिराग्नीध्रस्य ।

वि सुवः पश्य व्यन्तरिक्षमिति सदः प्रेक्षते ।

सदस्यैरिति मन्त्रान्तः ।

अस्मद्दात्रा देवत्रा गच्छतेति दक्षिणाः ।

प्रेक्षत इति पूर्वसूत्रादनुवर्तते । सदस्कृतमिति मन्त्रान्तः ।

पूर्वेण द्वारेण सदः प्रविश्य ॥ १४ ॥ आत्रेयाय
हिरण्यमुत्तमं ददाति तेनैव मन्त्रेण येनाऽऽग्नीध्रे ।

आत्रेयोऽत्रिगोत्रोत्पन्नः । शुद्धात्रेयालाभे गविष्ठिरवाद्भुतकमुद्गलात्मकतदीयगणचतुष्टयोत्पन्नः । तस्मै हिरण्यमुत्तममुत्कृष्टमितरदत्तहिरण्यापेक्षया जातितो मानतश्चोत्कृष्टम् । तेनैव मन्त्रेण येन मन्त्रेणाऽऽग्नीध्रे दत्तं तेनैवेत्यर्थः ।

तस्मिन्नविद्यमाने य आर्षेयोऽनूचानोऽ-
नूचानपुत्रस्तस्मै तां दक्षिणां दद्यात् ।

तस्मिन्नत्रिगोत्रोत्पन्ने तदीयगणचतुष्टयोत्पन्ने चाविद्यमाने तदलाभे यः कश्चनाऽऽर्षेयोऽनूचानोऽनूचानपुत्रश्च ऋषिर्वेदस्तं चार्थं च यो वेद स आर्षेयः । एष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवानिति श्रुतेः । अनूचानः, मार्गादनपगतोऽनूचान इति भारद्वाजः । यः स्वयमनूचानोऽनूचानपुत्रोऽपि यस्य लिङ्गं चात्र भवति पितृमन्तं पैतृमत्यमिति तस्मै तामात्रेयार्थकल्पितां दक्षिणां दद्यादित्यर्थः । अत्राऽऽपस्तम्बो विशेषमाह—तदभावे य आर्षेयः संहितस्तस्मै दद्यादिति । संहितः पित्रादीनामार्षेयेण संतत इत्यर्थः ।

अथर्त्विग्भ्यो दक्षिणाभागान्ब्रह्मन्मनस्ते
ददामि तदनेन निष्क्रीणामीति ब्रह्मणे
ब्रह्मसदन आसीनायेदं ददामीति
यद्दास्यन्भवति तदनुदिशति ब्रह्मणे ।

ब्रह्मन्मनस्ते ददामि तदनेन निष्क्रीणामीति मन्त्रेण ब्रह्मसदन आसीनाय ब्रह्मणे मन एव दत्त्वा दत्तस्य मनसो ब्रह्मणः सकाशान्मोचनायेदं ददामीत्यनेन तस्य निष्क्र-

यणं यद्दास्यन्भवति गोरूपं द्रव्यं दास्यन्भवति तद्ब्रह्मणे मनोनिष्क्रयणत्वेनानुदिशति संकल्पयतीत्यर्थः । इत्येवं ब्रह्मणे दानम् ।

एवमितरेभ्यः ।

तत्तद्ब्रह्मनिष्क्रयणानुदेश इत्यर्थः ।

होतर्वाचं ते ददामि तामनेन निष्क्रीणा-
मीति होत्रे होतृषदन आसीनाय ।

इदं ते ददामीत्येवमेव सर्वत्रानुदेशः । वक्ष्यति चेदं ददामीति सर्वत्रानुषजतीति ।

अध्वर्यो प्राणं ते ददामि तमनेन निष्क्री-
णामीत्यध्वर्यवे हविर्धान आसीनाय ।

स्पष्टम् ।

उद्गातश्चक्षुस्ते ददामि तदनेन निष्क्री-
णामीत्युद्गात्र औदुम्बर्यामासीनाय ।

स्पष्टम् ।

होत्रकाः श्रोत्रं वो ददामि तदनेन निष्क्रीणामीति
होत्रकेभ्योऽन्तःसदसं यथाधिष्ण्यमासीनेभ्यः ।

यथाधिष्ण्यमासीनेभ्य इत्येतावतैव सदस्यन्तरुपवेशने सिद्धेऽन्तःसदसमितिवचनं धिष्ण्यसमीप उपवेशनं सदस्यन्तरुपवेशनमात्रं वेतिपक्षद्वयसूचनार्थम् । इदमाग्नीध्रस्य न भवत्यन्तःसदसमिति । तस्य तत्रोपवेशनस्यैवाभावात् । होत्रका मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीधः । यथाधिष्ण्यमासीनेभ्य इति सूत्रात् । प्रतिप्रस्थात्रादीनां तु तत्तन्मुख्यर्त्विङ्नामसमाख्यानात्स स एव तेषां मन्त्रो यो गणमुख्यस्य क्रमस्त्वेषामर्धितृतीयिपादिक्रमाद्धोतृवर्गक्रमाच्च द्रष्टव्यः । तद्यथाऽध्वर्यो प्राणं ते ददामि तमनेन निष्क्रीणामीति प्रतिप्रस्थात्रे । उद्गातश्चक्षुस्ते ददामि तदनेन निष्क्रीणामीति प्रस्तोत्रे, होतर्वाचं ते ददामि तामनेन निष्क्रीणामीति प्रावस्तुते, अध्वर्यो प्राणं ते ददामि तमनेन निष्क्रीणामीत्युन्नेत्रे, उद्गातश्चक्षुस्ते ददामि तदनेन निष्क्रीणामीति सुब्रह्मण्याय, उद्गातश्चक्षुस्ते ददामि तदनेन निष्क्रीणामीत्यन्ततः प्रतिहर्त्रे ।

प्रतिप्रस्थात्रे च हविर्धान आसीनाय ।

चकारादुन्नेत्रेऽपि । सुब्रह्मण्यायोद्गातृसमीपे सदस्यन्तरेवाऽऽसीनाय । प्रावस्तुतेऽपि होतृसमीपे सदस्यन्तरेवाऽऽसीनाय । प्रस्तोत्रादिभ्यः स्वस्वस्थान आसीनेभ्यः । अमुमर्थं स्पष्टमाहाऽऽपस्तम्बः—अन्तःसदस्यासीनेभ्य ऋत्विग्भ्यो दद्याद्धविर्धा-

नेऽध्वर्युभ्य इति। यद्यपि नेहाऽध्वर्युस्तथाऽपि तस्य होत्रकत्वाद्विज्ञियसमीप आसीनायैव दानम्।

यथाश्रद्धꣳ सदस्याय चमसाध्व-
र्युभ्यः प्रसर्पकेभ्यश्च ददाति।

यथाश्रद्धमित्यनेन तन्त्रसंबन्धिदक्षिणाबहिर्भूतां दद्यादिति बोध्यते। स्पष्टमन्यमर्थ-माहाऽऽपस्तम्बः—अन्यत्र दक्षिणाभ्यश्चमसाध्वर्युप्रसर्पकसदस्येभ्य इति। यथाश्र-द्धमित्यनेन परिमाणानियमोऽपि बोध्यते।

सदस्याऽऽत्मानं ते ददामि तमनेन निष्क्रीणा-
मीति सदस्यायान्तःसदसं दक्षिणार्ध आसीनाय।

स्पष्टम्।

चमसाध्वर्यवोऽङ्गानि वो ददामि तान्यनेन निष्क्री-
णामीति चमसाध्वर्युभ्यो हविर्धान आसीनेभ्यः।

स्पष्टम्।

प्रसर्पका लोमानि वो ददामि तान्यनेन निष्क्रीणा-
मीति प्रसर्पकेभ्योऽन्तःसदसं दक्षिणार्ध आसीनेभ्यः।

स्पष्टम्। यद्यपि सदस्योऽप्यृत्विगेव सप्तदशस्तथाऽपि वचनात्तन्त्रसंबन्धिदक्षिणासु न मानभाग्भवति।

इदं ददामीति सर्वत्रानुषजति।

इदं वचनमनुद्देशः संकल्पमात्रं तथा च मानसिकोऽपि संकल्पः सिध्यति न मन्त्र इति स्यात्तन्मा भूत्किंतु मन्त्रमुच्चार्यैव संकल्पो यथा स्यादित्येतादृशार्थमभार्थम्।

न भीतो ददाति।

भयशङ्कयाऽपि नायोग्याय ददाति।

न याचमानाय।

याचमानाय प्रसर्पकायाप्रसर्पकाय च न ददाति।

न कण्वकाश्यपेभ्यः।

निषिद्धं दानं गोत्रद्वये येषां कण्वकश्यपप्रवरस्तस्मै दानं निषिध्यते।
हेतुर्निगमे—कण्वं तु बधिरं विद्याद्विद्यात्काणं तु कश्यपम्। इति।
वस्तुतस्त्वयं हेतुश्चिन्त्यः। अङ्गहीनत्वेऽपि तेषामचिन्त्यप्रभावत्वाद्वचनमेव शरणमत्र।

न वीणागाथिभ्यः।

वीणागाथाभ्यामे ये जीवन्ति तेभ्यो न देयम्।

नानृत्विजे।

योऽनृत्विक्सदःप्रसृतः स्यात्तस्मै न दद्याद्यदि शाखाध्ययनवान्न भवेत्। अमुमर्थं स्पष्टमाहाऽऽपस्तम्बः—नाब्राह्मणाय ब्राह्मणायाप्यविदुषे न देयमप्यब्राह्मणाय विद्याविदे दद्याद्यां स विद्यां वेद तां तयाऽवरुन्ध इति। त्रैवर्णिकेषु य एव कश्चित्सार्थवित्तस्मै दद्यान्नान्यस्मै यद्यसौ शाखां वेद तां तया दक्षिणयाऽऽप्नोति तस्माद्वेदनमेव दानार्हत्वे निदानमिति भावः।

न ज्ञातये।

ज्ञातयः सजातीयाः संबन्धिनश्च। यां स विद्यां वेद तां तयाऽवरुन्ध इत्यापस्तम्बेनात्रापि सार्थवेदनं निदानमुक्तं न तु स्वरूपमात्रवेदनमिति विवेकः।

नाप्रसृताय।

यः सदसि प्रविष्टो न भवति तस्मै च न दद्यात्। कर्मज्ञानोपयोगित्वेन यः सदसि न प्रवेष्टुं योग्यस्तस्मै न दद्यादिति तात्पर्यार्थः। यां स विद्यां वेद तां तयाऽवरुन्ध इत्ययं हेतुरापस्तम्बेन सर्वत्रैवोक्तः।

नाश्रोत्रियाय।

श्रोत्रियोऽधीतवेदः। न केवलं गान्धर्वादिविद्यावान्, यः केवलगन्धर्वादिविद्यावानेव नाधीतवेदस्तस्मै न दद्यादित्यर्थः।

नाब्राह्मणाय।

ब्राह्मणायैव देयं नान्यस्मै वर्णायेत्युत्सर्गः।

वेदविदे दद्यात्।

यदि अन्यस्मै वर्णाय दद्यात्तदाऽधीतसार्थवेदायेत्यर्थः। अमुमर्थं स्पष्टमुक्तवानापस्तम्बः—नाब्राह्मणाय ब्राह्मणायाप्यविदुषे न देयमप्यब्राह्मणाय विद्याविदे दद्याद्यां स विद्यां वेद तां तयाऽवरुन्ध इति। आर्षेयाय विदुषे दानस्य फलविशेष उक्त आपस्तम्बेन—यामार्षेयाय च विदुषे स्वर्गे तया लोकमवाप्नोतीति।

यामन्यो दीयमानां प्रत्याचक्षीत यं द्विष्यात्तस्मै तां दक्षिणां दद्यात्।

यां दक्षिणां दीयमानामन्यो यः कश्चन प्रत्याचक्षीतैव न कामयीत यदि नेच्छेद्ग्रहीतुं तां प्रत्याख्यातां दक्षिणां यः स्वस्य द्वेष्यस्तस्मै द्वेष्याय दद्यादित्यर्थः।

स हान्यया प्रतिगृह्णीयात्।

स प्रतिग्रहीता, हेति निश्चयार्थे, अन्यया दक्षिणया सहैव प्रतिगृह्णीयात्। प्रतिगृह्णीयादित्यत्रान्तर्भावितो णिच्। तेन तं प्रतिग्राहयेदित्यर्थो भवति। अयमर्थ आप-

---

१ च. छ. 'य वेदवि'।

स्तम्बसूत्रसंवादानुरोधेन। तच्च सूत्रमित्थम्—यामन्यो दीयमानां न कामयेत यं द्विष्यात्तस्मै दद्यात्सहान्येन धनेनेति। यदि सर्वैरपि प्रत्यारूयातां गां यदि गोभिः सह चारयेत्स्वी कुर्याद्वा पृथक्चारयिष्यामीति साऽशिवा भूत्वैव दशेत्, अतस्तां द्वेष्यायैव दद्यात्। अमुमर्थमाहाऽऽपस्तम्बः—यद्यतिनुत्तां दक्षिणां गोषु चारयेत्प्रति वा गृह्णीयात्साला वृक्येव प्रतिनीयादिति।

अन्ततः प्रतिहर्त्रे ददात्यात्रेयाय वा।

प्रतिहर्त्रे दक्षिणामन्ततो दद्यात्। आत्रेयाय वाऽन्ततः। आत्रेयायान्ततो दानपक्षे तृतीयिषु चतुर्थस्थाने प्रतिहर्त्रे दानम्।

न मरुत्वतीययोरनूक्ता दद्यात्।

यदि मरुत्वतीययोर्ग्रहयोः पुरोनुवाक्याऽनूक्ता भवति ततः परं न देयं यस्मै कस्मैचिदागतायाधिकारिणेऽपि यजमानेन न देयमित्यर्थः। प्रतिग्रहीतृभिरपि न प्रतिग्राह्यम्। अत्र दानं प्रतिग्रहोपलक्षणम्। अमुमर्थं स्पष्टमाहाऽऽपस्तम्बः—यदा मरुत्वतेऽनूक्तमथ न देयं न प्रतिगृह्यमिति।

यदि दद्यादनूबन्ध्यावपायाः[1] हुतायां
दद्यादुदवसानीयायां वेष्टौ ॥ १५ ॥
इति हिरण्यकेशिसूत्रे दशमप्रश्ने चतुर्थः पटलः।

अनूबन्ध्यावपायां हुतायां सत्यां दद्यात्प्रतिगृह्णीयुश्च। अत्रापि दानं प्रतिग्रहोपलक्षणम्। अमुमर्थं स्पष्टमाहाऽऽपस्तम्बः—अनूबन्ध्यावपायाः[2] हुतायां दद्यात्प्रतिगृह्णीयुरिति। आमिक्षापक्षश्चेत्तद्यागोत्तरम्। उदवसानीयायामिष्टौ समाप्तायां सत्यां वा दद्यादित्यर्थः। पूर्णाहुतिपक्ष इदम्। सोमप्रवाकायापि यथाश्रद्धं सर्वदक्षिणादानोत्तरं बहिर्भूता दक्षिणा देया प्रसर्पकदक्षिणादानोत्तरम्। छान्दोग्योपनिषदि उषस्तिब्राह्मणदर्शनात्। सदस्याय शक्तौ सत्यां सर्वर्त्विग्दक्षिणासममर्धं चतुर्भागं वा बहिर्भूतं द्रव्यं यथाश्रद्धं देयम्।

नारदः—ऋत्विजो व्यसनेऽप्येवमन्यस्तत्कर्म निस्तरेत्।
लभेत दक्षिणाभागं स तस्मात्संप्रकल्पितम् ॥ इति।

अन्य ऋत्विग्व्यतिरिक्तोऽन्यः।

मनुः—ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्।
तस्य कर्मानुरूपेण देयोंऽशः स हि कर्तृभिः ॥

---

१ क. च. छ. °ति। अनू°। २ क. च. छ. ट. °न्ध्यायां व°।

दक्षिणासु प्रदत्तासु स्वकर्म परिहापयेत् ।
कृतस्यैव लभेतांशमन्येनैव च कारयेत् ॥ इति ।

अन्यच्च मनुः—ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक्त्यजेद्यदि ।
शक्तं कर्मण्यदुष्टं च तयोर्दण्डः शतं शतम् ॥ इति ।

इत्योकोपाहश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखया-
जिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथ-
दीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसू-
त्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-
शामिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्र-
श्नस्य चतुर्थः पटलः ॥ ४ ॥

अथ दशमप्रश्ने पञ्चमः पटलः ।

नीतासु दक्षिणासु हरिणस्य रघुष्यतोऽधिशी-
र्षाणि भेषजꣳ सक्षेत्रियं विषाणया विषूची-
मनीनशदित्युन्मुच्य कृष्णविषाणामनु त्वा
हरिणो मृगः पद्भिश्चतुर्भिरक्रमीन्माऽहि-
र्भूत्सा पृदाकुरिति चात्वाले प्रास्यति ।

नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यतीत्येतस्य ब्राह्मणस्य स्मरणमा-
वश्यकं प्रयोगकाल इतिबोधनार्थं कृष्णविषाणोन्मोचने हरिणस्य रघुष्यत इति मन्त्रः ।
चात्वाले प्रास्यतीत्यत्र पूर्वसूत्रात्कृष्णविषाणामित्यनुवर्तते ।

रथंतरे वरं ददाति ।

यदि रथंतरं पृष्ठं तदैवायं वरो न बृहदादिषु इत्येतदर्थम् । यदि सा(?)अत्राऽऽप-
स्तम्बेन विशेष उक्तः—ऋत्विग्भ्यो नमस्करोति । एवं दत्तासु नीतासु च दक्षिणा-
स्वृत्विग्भ्यो नमस्करोतीत्यर्थः । होतुः पृष्ठे वरं ददातीति सामान्यतो वक्तव्यम् ।
तेनैव सर्वेषु होतुः पृष्ठेषु वरदानसिद्धौ सामान्यतः सर्वेषु होतुः पृष्ठेषु वरदानमिष्टमभ-
विष्यत्तदा होतुः पृष्ठे वरं ददातीति सामान्यत एवावक्ष्यत् । नच तथा कृतम् । अत
एतदर्थत्वमेव ।

वामदेव्ये वरं ददाति ।

वामदेव्यग्रहणप्रयोजनं रथंतरग्रहणवत् । उद्गातृभ्य उद्गात्रे वेदं वरदानम् ।

निष्केवल्ये वरं ददाति।

निष्केवल्याख्ये शस्त्रे। होत्र इति सामर्थ्यात्। पुनः पुनर्वरं ददातीतिवचनं रथंतरपृष्ठस्यामावेऽप्येतयोर्वरदानं भवत्येव न तु संनियोगशिष्टशङ्का कार्येतिबोधनार्थम्।

आदित्यग्रहꣳ हूयमानमन्वारभते।

स्पष्टम्।

आयुषे हिं कुरु तस्यै प्रस्तुहि तस्यै मेऽवरुद्ध्या इति
पुरस्तादार्भवात्पवमानाव्याहृतीः पञ्चहोतारं च जपति।

गतार्थम्।

सघाऽसि जगतीछन्दा अनु त्वाऽऽरभे
स्वस्ति मा संपारयेति स्तूयमानमन्वारभते।

इदमपि कृतव्याख्यानम्।

यत्रै स्वं चमसं न्यन्ते त्रीन्पुरोडाशशकलान्दक्षिणत उपास्यति।

अत्र स्वꣳ स्वमिति त्रीꣳस्त्रीनिति चोभयत्र वीप्सासहितः पाठः प्रामादिक एव। अन्यथैतत्सूत्रप्रणयनमेव व्यर्थं स्यादिति ज्ञेयम्। तेन यजमानकर्तृकमात्रपरतयैवेदं सूत्रमुपपन्नं भवति।

तत्कृत्वा प्राचीनावीतं कृत्वा षड्होतारं व्याख्याय
दानप्रभृतीन्प्रत्यायनान्तान्पिण्डपितृयज्ञमन्त्राञ्जपति*।

उपास्यन्तीति जपन्तीत्युभयत्र बहुवचनान्तपाठोऽपि प्रामादिक एवानन्तरोक्तहेतोः। नन्वाध्वर्यवसूत्रान्तर्गतवीप्सासहितपाठेन बहुवचनान्तपाठेन चैव सिद्धावत्र वचनमृत्विगसाहित्यार्थम्। तेन पृथगेवर्त्विक्कर्तृकपिण्डदानानन्तरमेवैतस्य भवति।

यज्ञायज्ञियाय वरं ददाति।

उद्गातृभ्य उद्गात्रे वा।

पुरस्तादग्निष्टोमस्तोत्राव्याहृतीः सप्तहोतारं च जपति।

यज्ञायज्ञियस्याग्निष्टोमसंस्थास्तोत्रत्वादग्निष्टोमस्तोत्रादित्युक्तम्।

सुभूरसि श्रेष्ठो रश्मीनां प्रियो देवानाꣳ सꣳसाधनीयः।
तं त्वा सुभो देवा अभिसंविशन्त्विषोऽसि त्वेषोऽसि

* ज. ञ. पुस्तकयोर्जपन्तीति पाठः।

१ ङ. च. ज. ञ. म. °त्र स्वꣳ स्वं। २ ङ. च. ज. ञ. म. °न्ते त्रीꣳस्त्रीन्पु°। ३ ङ. च. ज. ञ. म. उपास्यन्ति। ४ ङ. ज. ञ. म. सꣳसध°। ५ ङ. सुनो। च. सुभवो। ज. म. सुतो। ञ. सुवो।

नृम्णोऽसि यहोऽसि व्रतोऽसि स्वोऽसि चारणोऽसि
शूद्रोऽस्यार्योऽसि तस्य त इषस्य त्वेषस्य नृम्णस्य यहस्य
व्रतस्य स्वस्य चारणस्य शूद्रस्य चाऽऽर्यस्य च भक्षिषीय
यथा त्वꣳ सूर्योऽसि विश्वदर्शत एवमहं विश्वदर्शतो भूया-
समित्यग्निष्टोमं निष्पाद्याऽऽदित्यमुपतिष्ठते यद्यस्तमितः
स्यादाहवनीयमेवाऽऽदित्योपस्थानेनोपतिष्ठते ॥ १६ ॥

अग्निष्टोमं निष्पाद्येत्यनेन या या क्रतुसंस्था तां तां तत्तत्संस्थाप्रयुक्तसाम्ना निष्पाद्य समाप्यानन्तरमेवाऽऽदित्योपस्थानं कर्तव्यम् । यदि आदित्योऽस्तं गतो भवेदाहवनीय-मेवाऽऽदित्यभावनयोपतिष्ठते । यत्र यत्रेदं वचनं तत्रैवेदम्, अन्यत्र त्वादित्योपस्था-नलोप एवेति ज्ञेयम् ।

व्याख्यातो हारियोजनः ।

तꣳ सर्वे समशः प्रतिविभज्येत्यादिना रय्यै त्वा पोषाय त्वेत्यन्तेन सूत्रेण व्याख्यात उक्तः ।

दधिद्रप्सः ।

दधिक्राव्णो अकारिषमित्याग्नीध्रागारे दधिद्रप्सान्मक्षयन्तीत्यनेन सूत्रेण व्याख्यात उक्तः ।

अप्सुषोमः ।

अप्सुषोमो नाम चमसस्तत्प्रयुक्तं कर्माप्सुषोमः । उक्ता चेयं संज्ञा लाट्यायनद्रा-ह्यायणाभ्यामप्सुषोमा नाम चमसाश्चात्वालदेशेऽद्भिः पूर्णास्तेषु हरितानि तृणानि प्रास्तानि भवन्तीत्यादिना । एकधनपरिशेषानित्यारभ्य चात्वालेऽवनयन्तीत्येतदन्तं कर्माप्सुषोमशब्देनोच्यते ।

मिन्द्रयोपस्थानम् ।

यन्म आत्मनो मिन्दाऽभूदितिमिन्द्रयाऽऽहवनीयमुपतिष्ठन्त्य(न्त(?))इत्यन्तेन सूत्रेण व्याख्यातमुक्तमित्यर्थः ।

शकलाभ्याधानम् ।

देवकृतस्यैनसोऽवयजनमसीत्यादिना प्रतिमन्त्रमाहवनीये शकलान्याधत्तीत्यन्तेन सूत्रेण व्याख्यातमुक्तमित्यर्थः ।

सख्यविसर्जनं च ।

उमा कवीत्यादिना सख्यानि विसृजन्त इत्यन्तेन सूत्रेण व्याख्यातमुक्तमित्यर्थः । चकारः पूर्वैः कर्मभिः सह समुच्चयार्थः ।

---

१ म. ढ. वारणोऽसि । २ म. ढ. वारणस्य । ३ ज. झ. ञ. यदाऽस्त° । ४ ङ. ज. झ. ढ. °प्सुहोमः ।

हुतेषु समिष्टयजुःषु अग्निना देवेन पृतना
जयामीति जागतान्विष्णुक्रमान्क्रामति ।

हुतेषु समिष्टयजुःष्वित्यनेनैतत्पूर्वतनं तावत्पर्यन्तं प्राकृतं पौरोडाशिकं पाशुकं च कर्म सूच्यते । सौमिका एते विष्णुक्रमा जागतसंज्ञका ये विष्ण्वतिक्रमैर्मन्त्रैः क्रम्यन्ते ।

उपसृजन्धरुणं मात्रे मातरं धरुणो धयन् । रायस्पोषमि-
षमूर्जमस्मासु दीधरदित्युपनिष्क्रामन्नौदुम्बरीमुत्खिदति ।

अवभृथार्थं निष्क्रामन्नौदुम्बरीं स्वस्थानादुत्पाटयतीत्यर्थः । निष्क्रामन्निति शतृप्रत्ययान्निष्क्रमणसमकालमेवौदुम्बर्या उत्खेदनम् ।

अत्र ते हेडो वरुणेत्युन्मुच्य कृष्णाजिनं चात्वाले प्रास्यति ।

औदुम्बर्युत्खेदनानन्तरं तूष्णीमेव स्वाङ्गाद्विसृज्य मन्त्रेण चात्वाले प्रक्षिपतीत्यर्थः ।

उदु त्यं चित्रमिति द्वाभ्यामादित्यमुपतिष्ठते यत्रस्त-
मितः स्यादाहवनीयमेवाऽऽदित्योपस्थानेनोपतिष्ठते ।

यत्र यत्रेदं वचनं तत्रैवेदम् । अन्यत्र त्वादित्योपस्थानलोप एवेत्युक्तमेव प्राक् । उदु त्यं जातवेदसं चित्रं देवानामुदगादनीकमिति द्वाभ्यामादित्योपस्थानम् । अन्यत्स्पष्टम् ।

व्याख्यातं निधनोपायनम् ।

सह पत्न्या त्रिः सर्वे साम्नो निधनमुपयन्ति मध्यदेशे द्वितीयꣳ साम्नो निधनमुपयन्त्युदक्रान्ते तृतीयमित्येतैः सूत्रैर्व्याख्यातमुक्तमित्यर्थः ।

सुमित्रिया च मार्जनम् ।

सुमित्रियेतिस्त्रीलिङ्गनिर्देशादयं मन्त्र ऋक्त्वेन ज्ञेय इति गम्यते । सुमित्रा न आप ओषधयः सन्त्वित्ययं मन्त्रः सुमित्रिया(त्रा) । सुमित्रिया मार्जनं चेत्यन्वयः । सुमित्रा न आप इति मार्जयन्त इत्यनेन व्याख्यातमुक्तमित्यर्थः ।

इन्द्रियाय ज्यैष्ठ्याच्छ्रैष्ठ्यान्मा योषमित्युन्मुच्य कृष्णा-
जिनमभ्युक्ष्य निदधाति यदि पुरस्तादप्रास्तं भवति ।

यदि पुरस्तादप्रास्तं भवतीत्यनेन चात्वाले यत्कृष्णाजिनप्रासनं तस्य पाक्षिकत्वं सूच्यते । तेन यदि पुरस्तादप्रास्तं भवति तदैतन्निधानमिति अवगम्यते ।

सुमित्रा न इत्यभिप्रगाह्यानुपमज्जन्तौ सहशिरस्कौ स्नातोऽ-
न्योन्यस्य पृष्ठं प्रक्षालयतः प्रतीपमाप्लवमानौ गाहेते ।

स्नानं द्विविधम्—आप्लवरूपमुपमज्जनरूपं चेति । तत्राऽऽप्लवरूपं स्नानं तु शरीरप्रक्षालनमात्ररूपम् । उपमज्जनरूपं तु अप्स्वन्तर्धानात्मकम् । तत्रोपमज्जनरूपस्नान-

---

१ ङ. ज. ञ. म. 'रीमाक्खिद' । २ ङ. ज. ञ. म. 'याज्ज्यैष्ठ्या' ।

स्यात्र निषेधः । तेन शरीर उदकोत्क्षेपणमात्रेण स्नानं सिद्धं भवति । गृहस्थधर्मेष्वपि वक्ष्यति—सशिरोवमज्जनमप्सु वर्जयेदिति । लाट्यायनद्राह्यायणावत्रैवाऽऽहतुः—अप उपस्पृश्य त्रिरभ्युक्षेरन्निति । सूत्रस्वरसतोऽपि उपमज्जनरूपं स्नानं प्रतिषिध्याऽऽहाऽऽप्लवमानौ गाहेते इति । यत्त्वत्र केचिदाहुः—अनुपमज्जन्तावशोधयन्तावङ्गानि स्नात इति, तत्तुच्छम् । अन्योन्यस्य पृष्ठं प्रक्षालयत इत्युत्तरसूत्रेण विरोधात् । प्रक्षालनं शोधनं तस्य पृष्ठे स्वयं दुष्करत्वादन्येन कर्तृके कर्तृनियमार्थमिदं नतु भावनार्थे तस्येच्छाप्राप्तत्वात्, अनिच्छतोऽपि त्रिः पादौ प्रक्षालयेत्त्रिरात्मानमित्यादिस्मृतिप्राप्तत्वात्, नवनीतदीक्षादिजन्मनोऽङ्गमलस्य शोध्यतायां अत्रैव सर्वाणि दीक्षितव्यञ्जनान्यप्लावयन्त इति सूत्रेण भरद्वाजेन स्पष्टतयोक्तत्वात्, शुक्रादीक्षायै तपसो विमोचनीरितिमन्त्रलिङ्गाच्च । तस्माच्छोध्यान्येव सर्वाण्यङ्गानीत्येव युक्तम् । अत्राऽऽपस्तम्बेन यद्दिदीक्ष इति मन्त्रत्रयस्य विनियोग उक्तः—यद्दिदीक्षे मनसा ऋषयो येन प्राणा अन्ध्यो लोका दधिरे तेज इन्द्रियं शुक्रादीक्षायै तपसो विमोचनीः, आपो विमोक्त्रीर्मयि तेज इन्द्रियमिति त्रिरञ्जलिना विषिच्येति । शिरसीति शेषः । यथारूपमितर इत्यनेनाविनियुक्तमन्त्राणामपि यथालिङ्गं विनियोगकर्तव्यतायां उक्तत्वादिष्टोऽयं विनियोगोऽस्माकमपि । उदकोत्क्षेपणमात्रेण सशिरस्कौ स्नात इति अभिप्रगाह्यानुपमज्जन्तौ सहशिरस्कौ स्नात इत्येतस्य सूत्रस्यार्थः । प्रतीपमुदकप्रवाहाभिमुखमाप्लवमानौ जलं विलोडयेते इत्यर्थः । अन्यत्स्पष्टम् ।

वि ते मुञ्चामि रशना इति मेखलां यजमानो विस्रंसयते ।

अवभृथे विस्रंसयते विस्रस्य त्यजतीत्यर्थः । देवतास्विति मन्त्रान्तः ।

इमं विष्यामीति योक्त्रपाशं पत्नी ।

योक्त्रं पत्नीत्येव वक्तव्ये पाशशब्दाद्विस्रस्तपाशं योक्त्रं विमुञ्चति पत्नीत्यर्थः सिध्यति ।

मेखलां योक्त्रं जालं दीक्षितवसने च प्लावय्य सोमोपनहनं यजमानः परिधत्ते सोमपरिश्रयणं पत्नी ।

प्लावनं(व्य) निमज्ज्य यजमान एवाधिकारात् । येन मितः सोम उपनह्यते तत्सोमोपनहनं, येनान्ततः पर्याणह्यते तत्सोमपरिश्रयणम् । अधिकारादुत्तरत्र पत्नीतिवचनाच्च पूर्वत्र यजमानस्य प्राप्तौ यस्मिन्काले सोमपरिश्रयणवस्त्रपरिधानं पत्न्यास्तस्मिन्नेव काले सोमोपनहनवस्त्रपरिधानं यजमानस्यापीत्येतादृशार्थज्ञापनार्थम् ।

तावहतवाससावुदितः ।

तौ यजमानपत्नी(त्न्यौ), एताभ्यामेव वासोभ्यामहतवाससावुदकप्रान्तप्रदेशं प्रत्यागच्छत इत्यर्थः ।

---

१ च. ज. ञ. ञ. ट. °पहननं ।

ते उदयनीयायामध्वर्यवे दत्तः ॥ १७ ॥

ते वाससी । अन्यत्स्पष्टम् ।

व्याख्यातमुन्नयनम् ।

उन्नेतर्वसीयो न उन्नयेत्यादिना होतृप्रथमान्यजमानप्रथमान्वोन्नयतीत्यन्तेन सूत्रेण व्याख्यातमुक्तम् ।

महीया ।

महीयाजप इत्यर्थः । प्रथमान्तः पाठ एव युक्तः । अपाम सोममृता अभूमेत्यादिना महीयां जपन्त इत्यन्तेन सूत्रेण व्याख्यात उक्त इत्यर्थः । अत्राऽऽपस्तम्बेन यान्यपामित्यान्यप्रतीत्तान्यस्मि अनृणा अस्मिन्ननृणाः परस्मिन्नित्येतयोर्मन्त्रयोरपि महीयाजपोत्तरं जपे विनियोग उक्तः सोऽप्यस्माकमिष्टः ।

समिदभ्याधानम् ।

औदुम्बरीः समिधो धारयन्त इत्यनेन सूत्रेणैधोऽस्येधिषीमहीत्याहवनीये समिधोऽभ्यादधातीत्येतेन[1] सूत्रेण च व्याख्यातमुक्तमित्यर्थः । प्रतियुतो वरुणस्य पाश इत्यादिनोदकान्तं प्रत्यस्येत्येतदन्तं कर्मापि रूपा संबन्धबोधनाद्गृह्यते । उन्नेतारं पुरस्कृत्वा प्रतीक्षमायन्ति परोगाष्ठे मार्जयन्त इत्येतत्कर्मणोऽप्यत्र ग्रहणं मध्यपातित्वात् ।

उपस्थानं च ।

अपो अन्वचारिषमित्युपतिष्ठन्त इत्यनेन सूत्रेण व्याख्यातमुक्तमित्यर्थः ।

अपरेण शालामुखीयमुपविश्य जुह्वां पञ्चगृहीतं गृहीत्वा कृष्णाजिनमुपस्थ आधाय मयीन्द्र इन्द्रियं ज्यैष्ठ्यꣳ श्रैष्ठ्यं दधात्विति जुहोति ।

चतुर्गृहीतेन सह शालामुखीये जुहोतीत्यर्थः । जुहोतिचोदितत्वादत्र स्वाहाकारः । इन्द्रो देवता लिङ्गात् ।

कृष्णाजिनं प्र वाऽऽपयते ।

प्र वाऽऽपयत इत्यत्राऽऽपयत इति पदच्छेदः । व्यवहिताश्चेति पाणिनिसूत्रेण मध्ये वाकारः । प्रापयते वेत्यन्वयः । शयनासनाद्यर्थं प्रापयते शयनासनाद्यर्थमुपयुञ्ज्यादित्यर्थः ।

स्रुगवधानं वा कुरुते ।

स्रुचामवधानं स्थापनं तस्मिन्कृष्णाजिने कुर्याद्वेत्यर्थः ।

---

१ ज. झ. ञ. महीयाम् । २ च. °दधाती° ।

हविषो वाऽथ पेषणम् ।

कुरुत इति पूर्वसूत्रादनुवर्तते । तस्मिन्कृष्णाजिने हविष्पेषणं वा कुरुते प्राकृतं कृष्णाजिनं परित्यज्य ।

पुनर्दीक्षाया एवैनन्निधत्ते ।

पुनःशब्दात्स्वार्थैक्यं(वेयं)दीक्षा । अन्यत्स्पष्टम् ।

पुत्राय वैनद्ब्रह्मचारिणे वा दद्यात् ।

पुत्राय दीक्षाद्यर्थम् । ब्रह्मचारिणे शयनासनार्थम् ।

यदि पुरस्तादप्रास्तं भवति ।

यदि पुरस्तादप्रास्तं भवति तदैवैता होमाद्याः प्रतिपत्तयः ।

उदयनीयायां व्रतमुपैति ।

स्पष्टम् ।

अनूबन्ध्यावपायाꣳ हुतायां दक्षिणस्यां वेदि-
श्रोण्यां परिश्रिते यजमानस्य केशश्म-
श्रूणि वापयतेऽत्र ददाति यद्दास्यन्भवति ।

रात्रावपीदं क्षौरं श्रौतत्वात् । अत्र ददातीत्यनेन पशुसंबन्धिदक्षिणात्वेनैव गोदानं न वरत्वेन । यद्दास्यन्भवतीत्यनेन द्रव्यजात्यनियमः सूच्यते हिरण्यं गौर्वासो वेति ।

व्याख्यातः स्वरुर्हृदयशूलो यूपोपस्थानं च ।

स्वरुशब्देन स्वरुसंबन्धि कर्म लक्षणयोच्यते । शृङ्गाणीवेच्छृङ्गिणामित्यादिना हुतꣳ स्वरुमुपतिष्ठत इत्यन्तेन पाशुबन्धिकयाजमानसूत्रेण व्याख्यातमुक्तम् । हृदयशूल-शब्देनापि तत्संबन्धि कर्मोच्यते । हृदयशूलेन चरन्त्यस्पृशन्हत्वा शुगसीत्यादिनाऽपो अन्वचारिषमित्युपतिष्ठन्त इत्यन्तेन पाशुबन्धिकाध्वर्यवसूत्रेण व्याख्यातमुक्तम् । यूपोपस्थानमाशासानः सुवीर्यमिति संस्थिते यूपमिति पाशुबन्धिकयाजमानसूत्रेण व्याख्यातमुक्तम् ।

मिथुनौ गावौ मैत्रावरुण्यामामिक्षायां ददाति ।

अत्र मिथुनगोरूपदक्षिणाया उक्तत्वान्मुख्यानुबन्ध्यायां मिथुनगोद्रव्यतो यद्दास्यन्भवतीत्यनेन मौल्याधिक्यं द्रव्यं देयमित्यार्थिकमिति लोकप्रसिद्धं च । स्पष्टः सूत्रस्यार्थः ।

सक्तुहोमे हूयमानेऽयं नो नभसा पुर इत्यग्निमुपतिष्ठते ।

हूयमान इति वर्तमाननिर्देशादध्वर्युणा सक्तुहोमे क्रियमाणे तस्मिन्नेव काल इदमुपस्थानम् । असन्निति मन्त्रान्तः ।

---

१ क. च. छ. ढ. 'ण्यामिं' ।

स त्वं नो नभसस्पत इति वायुं देवसꣳस्फानेत्यादित्यम्।

सक्तुहोमे हूयमान इत्यनुवर्तते। कृधीत्याद्यमन्त्रान्तः। स्वस्तिमित्यन्तिममन्त्रस्यान्तः।

अनड्वाहमनड्वाहो वा हिरण्यमुदवसानीयायां ददाति।

अनड्वाहमनड्वाहो वेत्यनेन संरुयाविकल्पः। हिरण्यस्य समुच्चयः। उदवसानार्थेष्टिरुदवसानीया तस्यामित्यर्थः।

यथाशक्ति पूर्णाहुतौ।

अनेन द्रव्यानियम उच्यते।

अपवृत्ते षोडशिनः स्तोत्रे तमेवाश्वमश्वतरीं वा दक्षिणां ददाति॥१८॥

इति हिरण्यकेशिसूत्रे दशमप्रश्ने पञ्चमः पटलः।

तमेवाश्वमित्यनेन यस्य स्तोत्रकाल उद्गातृणां पुरस्ताद्धारणं विहितं तस्य दानं बोध्यते। गर्दभाद्वडवायां जाता स्त्र्यश्वतरी तां वा दक्षिणां दद्यात्।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनुजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्रश्नस्य पञ्चमः पटलः॥ ५॥

अथ दशमप्रश्ने षष्ठः पटलः।

दक्षिणां प्रतिग्रहीष्यन्प्रतिगृह्य वा सप्तदशकृत्वोऽपानीति।

प्रतिग्रहीष्यन्निति भविष्यनिर्देशादादावेव सप्तदशकृत्वोऽपाननम्। प्रतिगृह्येत्यनेनानन्तरम्। अयं शाखान्तरीयः पक्षः। अधो वायोर्नयनमपाननम्।

बर्हिषा प्रतीयाद्गां वाऽश्वं वा।

बर्हिस्तृणमुष्टिः। गां दीयमानामश्वं वा दीयमानं ग्रासार्थेन तृणमुष्टिना गामश्वं वा प्रतिगच्छेदित्यर्थः। बर्हिषा प्रतीयाद्गां वाऽश्वं वेतिब्राह्मणस्मरणार्थं वाकारद्वयम्।

अन्नेन पुरुषम्।

पुरुषो मनुष्यजातीयो दासो दासी वा। अत्राऽऽपस्तम्बेन हस्तिनं प्रत्यप्यन्नेनैव प्रतिगमनमुक्तं तदप्यस्माकमिष्टम्। पुरुषग्रहणस्य हस्त्युपलक्षणत्वात्।

गन्धेन च प्रियोद्येन च तल्पम् ।

गन्धः सुगन्धिद्रव्यं चन्दनमाल्यादि । प्रियोद्यं प्रियभाषणम् । चकारद्वयं गन्धप्रियोद्ययोरेककालिकत्वं नतु क्रमिकसमुच्चयमात्रमितिज्ञापनार्थम् । तल्पशब्दः शास्त्रेषु स्त्रियां प्रयुक्तो लक्षणया । स्त्रिया दानं वाजपेय एव । तत्र दासीनां दक्षिणात्वेन विहितत्वात्, न तु दैवविवाहविधिना दीयमानायाः कन्यायास्तस्या दक्षिणात्वेनादीयमानत्वात् । दक्षिणात्वेन दीयमानत्वं कन्यायां नास्तीत्यत्र लिङ्गमृत्विजे प्रतिपादयेदितिधर्मसूत्रगतः प्रतिपादनशब्दः । अथ यदि दक्षिणाभिः सह दत्ता स्यात्तां प्रतिगृह्णीयात्प्रजापतिः स्त्रियां यश इत्येताभिः षड्भिरनुच्छन्दसमिति बौधायनसूत्रे दक्षिणाभिः सह दत्ता स्यादिति प्रतिग्रहे मन्त्रान्तरविधानं च लिङ्गम् । एतेन वाजपेयसंबन्धिदासीविषयक एवायं विधिर्नेतु यज्ञतन्त्रान्तर्गतदैवविवाहप्रतिपाद्यकन्याप्रतिग्रहविषयकः । एतेन कन्याप्रतिग्रहमात्रविषयकत्वमेव कैश्चिदुक्तं तन्निरस्तं द्रष्टव्यम् ।

बर्हिः प्रत्युत्तिष्ठति बर्हिर्वै दक्षिणायाः प्रियं धाम
प्रियो दक्षिणाया भवत्येनं दक्षिणाऽऽगच्छति ।

बर्हिः प्रतिबर्हिर्दृष्टा प्रत्युत्तिष्ठति गौर्वाऽश्वो वा । अत्र हेतुभूतत्वेनार्थवादमाह— बर्हिर्वै दक्षिणायाः प्रियं धामेत्यादिनैनं दक्षिणाऽऽगच्छतीत्यन्तेन । वैशब्दो हेतुवाचकस्यर्थे । हि यस्मात्कारणाद्बर्हिर्गोरूपाया अश्वरूपाया वा दक्षिणायाः प्रियं धाम प्रियं स्थानमतस्तस्मिन्प्रदत्ते दक्षिणाया गोरूपाया अश्वरूपाया वा प्रियो भवति । स्वस्मिन्प्रियत्वे संपन्न एनं प्रतिग्रहीतारं दक्षिणाऽऽगच्छति गोरूपा वाऽश्वरूपा वा दक्षिणाऽनुकूला भवति न शृङ्गादिना गोरूपा दक्षिणा ताडितुं प्रवृत्ता भवति । अश्वो*लत्ताप्रहारदंशनादिना प्रकर्तुं प्रवृत्तो [न] भवतीत्यर्थवादार्थः । अत्रार्थवादप्रदर्शनं ज्ञानावश्यकत्वार्थम् । एतच्च गोरूपाश्वरूपदक्षिणाविषय एव नान्यत्र ।

देवा वै वरुणमयाजयन्स यस्यै यस्यै देवतायै दक्षिणामनयत्तामव्लीनात्तेऽब्रुवन्व्यावृत्य प्रतिगृह्णाम तथा नो दक्षिणा न व्लेष्यतीति ते व्यावृत्य प्रत्यगृह्णन्ततो वै तान्दक्षिणा नाव्लीनाद्य एवं विद्वान्व्यावृत्य दक्षिणां प्रतिगृह्णाति नैनं दक्षिणा व्लीनातीति ।

एतदर्थस्तु देवा ऋत्विग्भूताः सन्तो वै निश्चयेन वरुणमयाजयन्नीजितवन्त आसन् । स वरुणो यस्मै यस्मा ऋत्विग्भूताय देवतापरपर्यायदेवाय दक्षिणां दत्तवांस्तां देवतां दक्षिणाऽव्लीनाद्धिंसितवती । ततो देवाः परस्परं विचारं कृतवन्तो

---

* संस्कृतभाषायां लत्ताशब्दस्याभावात्पादप्रहारेति वक्तुं युक्तम् ।

व्यावृत्य प्रतिगृह्णामेति। आत्मनोऽन्यं प्रतिग्रहीतारमपदिश्य प्रतिग्रहो व्यावृत्य प्रतिग्रहः। एतदुक्तं भवति या या दक्षिणाद्रव्यस्य देवता तां तस्य प्रतिग्रहीत्रा वक्ष्यमाणैर्मन्त्रैरपदिश्य प्रतिग्रहः कर्तव्य इति तात्पर्यार्थः। तथा च ब्राह्मणम्—अग्नये हिरण्यमित्याह, आग्नेयं वै हिरण्यं स्वयैवैनद्देवतया प्रतिगृह्णातीति। शेषार्थः सुगमः। एतस्यार्थवादस्य पाठोऽत्र ज्ञानावश्यकत्वार्थः।

अर्थवादबोधितं व्यावृत्य प्रतिग्रहणं विधत्ते—

व्यावृत्य प्रतिग्रहणम्।

व्यावृत्य प्रतिग्रहो व्याख्यातः प्रागेव।

तान्त्रीणां दक्षिणानां दर्शयति ॥ १९ ॥

तान्त्रीणां यज्ञतन्त्रार्थानामेव दक्षिणानां देवा वै वरुणमयाजयन्नित्याद्युदाहृतश्रुतिः प्रतिग्रहप्रकारं व्यावृत्य प्रतिग्रहणं दर्शयतीत्यर्थः। अयाजयन्निति श्रुतावुपक्रमान्निमित्तभूताया दक्षिणाया व्यावृत्य प्रतिग्रहणम्। मन्त्राश्च तदर्था एवेत्यभिप्रायवानाह—तान्त्रीणामिति।

प्रतिग्रहमन्त्रानाह—

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यं तेनामृतत्वमश्यां वयो दात्रे भूयान्मयो मह्यमस्तु प्रतिग्रहीत्रे क इदं कस्मा अदात्कामः कामाय कामो दाता कामः प्रतिग्रहीता कामꣳ समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते एषा ते काम दक्षिणोत्तानस्त्वाऽऽङ्गीरसः प्रतिगृह्णातु सोमाय वासो भास्त्वाऽकृन्तन्नपसोऽतन्वत वरूत्र योऽवयन्नवधियो अपृञ्चत रुद्राय गां वरुणायाश्वं प्रजापतये पुरुषं मनवे तल्पं त्वष्टेऽजां पूष्णेऽविं निर्ऋत्या अश्वतरगर्दभौ हिमवतो हस्तिनं गन्धर्वाप्सराभ्यः स्रगलंकरणे विश्वेभ्यो देवेभ्यो धान्यं वाचेऽनं ब्रह्मण ओदनꣳ समुद्रायाप उत्तानायाऽऽङ्गीरसायानो वैश्वानराय रथं वैश्वानरः प्रत्नथा नाकमारुहद्दिवः पृष्ठं भन्दमानः सुमन्मभिः स पूर्ववज्जनयज्जन्तवे धनꣳ समानमज्मा परियाति जागृविरिति वैश्वानर्यर्चा रथं प्रतिगृह्णाति।

वयो दात्र इत्यनन्तरं भूयानितिपदं सौत्रमधिकं, तद्रहितपाठोऽनेन विकल्पते। गृह्णात्वित्यन्तो हिरण्यस्य मन्त्रः। भास्त्वाऽकृन्तन्नपसोऽतन्वत वरूत्र योऽवयन्नवधियो

---

१ ङ. ञ. झ ञ. °क्षिणां द°।

अपृच्छतेतिसौत्रमन्ते तेनामृतत्वमश्यामित्यनुषज्यते । लिङ्गानुसारेणैतेषां मन्त्राणां प्रतिग्रहे विनियोगः । एतेष्वप्यनुषङ्गः साम्यात् । तत्र तेन तयेति यथार्थमूहः कार्यः । यद्यजो दीयते यस्मिन्कर्मणि तत्र त्वष्टूऽजामित्यूहः कार्यः । गर्दभाश्वतरयोर्व्यत्यस्तयोर्दाने तु निर्ऋत्या अश्वतरं निर्ऋत्यै गर्दभमित्येवं मन्त्रः । स्रगलंकरणयोर्व्यत्यस्तयोर्दाने तु गन्धर्वेभ्यः स्रजमप्सरोभ्योऽलंकरणमिति भवति । धान्यं व्रीहियवादि । अन्नमदनीयं मध्वाज्यादि नत्वोदनः । तस्य पृथगुपादानात् । रथे वैश्वानर्यर्चा समुच्चयः । अप्राणद्रव्यस्योत्तानस्त्वाऽऽङ्गीरसः प्रतिगृह्णात्वित्येव मन्त्रः । तथा च श्रुतिः—तस्य वा उत्तानस्याऽऽङ्गीरसस्याप्राणत्प्रतिजग्रहुष इत्युपक्रम्य य एवं विद्वानप्राणत्प्रतिगृह्णाति अथ योऽविद्वान्प्रतिगृह्णाति अष्टमस्येन्द्रियस्यापक्रामतीत्युपसंहृत्य यद्वा इदं किंचेत्यारभ्यानयैवैनत्प्रतिगृह्णाति नैनꣳ हिनस्तीत्यन्तया श्रुत्या, उत्तानस्त्वाऽऽङ्गीरसः प्रतिगृह्णात्वित्यप्राणिद्रव्यप्रतिग्रहमन्त्रो विहितः । अत्राऽऽपस्तम्बोऽपि—यत्किंचाप्राणत्तत्सर्वमुत्तानस्त्वाऽऽङ्गीरसः प्रतिगृह्णीयाद्यद्वाऽनाम्नातमन्त्रमिति । अस्यार्थः—यत्किंचान्यदप्राणिद्रव्यं तदनेनैव प्रतिगृह्णीयात्, यदनाम्नातमन्त्रं वा स्यात्, आम्नातमन्त्रं हिरण्यादि तु तत्तन्मन्त्रेणैवेत्यर्थः ।

सर्वेषाꣳ सावित्रमेकैकस्याऽऽदितो[1] दधाति
तेनामृतत्वमश्यामित्यनुषङ्गमन्ततः ॥ २० ॥
इति हिरण्यकेशिसूत्रे दशमप्रश्ने षष्ठः पटलः ।

सर्वत्र पुरस्तात्सावित्रः । देवस्य सवितुरित्यादिर्दक्षिण इत्यन्तः सावित्रो मन्त्रः । तं दधाति योजयति । तेनामृतत्वमश्यामित्यादिः(दिः) प्रतिगृह्णात्वित्यन्तस्य मन्त्रस्यानुषङ्गमन्ततः । अग्नये हिरण्यं सोमाय वासो ग्नास्त्वाऽकृन्तन्नपसोऽतन्वत वरूत्र योऽवयन्नवधियो अपृच्छत रुद्राय गां वरुणायाश्वं प्रजापतये पुरुषं मनवे तल्पं त्वष्टूऽजां पूष्णेऽविं निर्ऋत्या अश्वतरगर्दभौ हिमवतो हस्तिनं गन्धर्वाप्सराभ्यः स्रगलंकरणे विश्वेभ्यो देवेभ्यो धान्यं वाचेऽन्नं ब्रह्मण ओदनं समुद्रायाप उत्तानायाऽऽङ्गीरसायानो वैश्वानराय रथं वैश्वानरः प्रत्नथा नाकमारुहद्दिवः पृष्ठं भन्दमानः सुमन्मभिः स पूर्ववज्जनयज्जन्तवे धनꣳ समानमज्मा परियाति जागृविरित्येते मुख्याः प्रतिग्रहमन्त्रांशाः । एतेषां सर्वेषां पुरस्तात्सावित्रः । तेनामृतत्वमश्यामित्युत्तरानुषङ्गः । उपरिष्टादनुषङ्गनीयस्य भागस्यान्वाधिरिति संज्ञा कृताऽऽपस्तम्बेन—सर्वत्र पुरस्तात्सावित्र उपरिष्टादन्वाधिरिति । प्रथमवद्द्वितीयादिमन्त्रेष्वपि देवस्य त्वेत्यादिर्दक्षिण इत्यन्तः सावित्रो मन्त्रः पुरस्तादनुषज्यते । तेनामृतत्वमश्यामितिमन्त्रस्यानुषङ्गमन्तत उपरिष्टादित्यर्थः

---

१ ङ. च ज. ञ. अ. °तो निद° ।

अनु पश्चान्मुख्यः प्रतिग्रहमन्त्रांश आधीयते योज्यत इत्यन्वाधिरिति । वाससि विशेषमाहाऽऽपस्तम्बः—ग्रास्त्वाऽकृन्तन्नपसस्त्वाऽतन्वत वरूत्र यस्त्वा वयमित्येतद्वासस्यनुषजति पुरस्ताद्दैवतादिति । वाससि परस्तात्सावित्रस्य पुरस्ताच्च सोमशब्दस्यैतदनुषजतीत्यर्थः । तेनाकृन्तेत्यनन्तरमनुषङ्गोऽस्मत्सूत्रेऽपि भवति । इदमुपलक्षणं, तेन जागृविरित्यनन्तरं तेनामृतत्वमित्यनुषज्यते ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखया-
जिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथ-
दीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसू-
त्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-
शामिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्र-
श्नस्य षष्ठः पटलः ॥ ६ ॥

अथ दशमप्रश्ने सप्तमः पटलः ।

अथानन्तरपटलेन चतुर्होतृणां काम्यनैमित्तिकान्प्रयोगान्वक्ष्यंस्तदध्ययनव्रतमपि प्रसङ्गादाह—

संवत्सरं चतुर्णामेको नाश्नीयादिति
चतुर्होतृणामुपयोगव्रतं भवति ।

चतुर्णामेकपङ्क्तौ भुञ्जानानामन्यतमः संवत्सरं नाश्नीयादिति यद्व्रतं तच्चतुर्होतृणामुपयोगोऽध्ययनं तदर्थं भवति । उपयोगोऽध्ययनमेव । तथा चाऽऽपस्तम्बः—संवत्सरं चतुर्णामेको नाश्नीयात्तद्व्रतमिति विज्ञायते चतुर्होतृणामनुब्रुवाणस्येति । एतद्व्रतं चतुर्होतृननुब्रुवाणस्याधीयमानस्य विज्ञायते । अत्र विशेषमाहाऽऽपस्तम्बः—एष वा अनाहिताग्नेरिष्टिर्यच्चतुर्होतार इति । अस्यार्थः—इष्टिर्यज्ञः । एतदुक्तं भवति श्रौता अप्येते चतुर्होतृप्रयोगा अनाहिताग्नेरपि भवन्तीति । तत्राऽऽहिताग्नेराहवनीयेऽनाहिताग्नेरौपासने ।

यः कामयेत बहु स्यां प्रजायेयेति सोऽरण्यं परेत्य
दर्भस्तम्बे दशहोतारमूनया पूर्णया वा स्रुचा जुहुयात् ।

बहु सर्वेषां मध्ये बहु धनेन विद्यया वा यथा स्यामिति प्रजायेत बह्व्यः प्रजाश्च जायेत जायेयुरिति च य एवं कामद्वयं कामयेत सोऽरण्यं परेत्य गत्वोनया पूर्णया वा स्रुचा जुहुयात् । आहवनीय आहिताग्नेरनाहिताग्नेरौपासने ।

---

१ च छ °सि पुर° ।

कामान्तरमाह—

यः प्रजया पशुभिर्नैव प्रभवेद्वरासिं परिधाय
तप्तं पिबन्द्वादश रात्रीरधः शयीत द्वादश्यां
प्रातः प्राङुदेत्य प्राण्यापान्यामाणन्दशहोतारं
व्यारुणायेन्द्रं गच्छ स्वाहेत्यपान्यात् ।

यः प्रजया पशुभिर्नैव प्रभवेत्समर्थो नैव भवेत्सः । प्रजापश्वोः कामयोः समुच्चयोऽत्र । तस्येदं पुरश्चरणं, वरासिः स्थूला शाटिः । तप्तमित्यत्रोदकमित्येव शेषः । स्पष्टमेवापठदापस्तम्बः । अधो भूमावेव न मञ्चादौ । असमाप्ते व्रते द्वादश्या रात्र्याः प्रातः साग्निः प्राङ्मुख उदेत्य होमदेशं गत्वा प्राण्यापान्य, ऊर्ध्वं वायोर्नयनं प्राणनम् । अधो वायोर्नयनमपाननम् । पुनरप्राणञ्श्वासमत्यजन्दशहोतारं व्यारुणाय वाक्यशः पठित्वेन्द्राय स्वाहेत्यनेन मन्त्रेणापान्यात्श्वासमुत्सृजेदित्यर्थः ।

देवानां पत्नीभिः पुत्रकामो यजेत संवत्सरम् ।

सेनेन्द्रस्येत्यनुवाकगतमन्त्रप्रतिपाद्या देवानां पत्न्यस्ताभिः संवत्सरं पुत्रकामो यजेत । एतैर्मन्त्रैः संवत्सरं प्रतिदिनं जुहुयादित्यर्थः ।

चतुर्भिर्यजुर्भिरन्तरा त्वष्टारं देवानां च पत्नीभिः पुत्रकामेण
होतव्यꣳ संवत्सरं चेन्न जायेत तदनादृत्य चतुर्होत्रा याजयेत् ।

संवत्सरशब्दस्योभयत्रान्वयः । उभयत्र पुत्रकामपदोपादानात् । तेन चतुर्भिरित्यादिकं भिन्नमेव कर्म दर्शपूर्णमासयोः पत्नीसंयाजेषु । सेनेन्द्रस्येत्यादिभिश्चतुर्भिश्चतुर्भिरन्तरा त्वष्टारं त्वष्टरीष्टे पर्वणि पर्वणि चत्वारि चत्वारि यजुंषि गणयित्वा जुहुयात् । वाक्यानां समाप्तौ पुनरादित आरभ्य प्रयोगः । पुत्रकामेणानेन प्रकारेण होतव्यम् । जुहोतिशब्दं परित्यज्य यजतिशब्दप्रयोगः संकल्पवाक्ये यजिधातोः प्रयोगाय । तेन संकल्पवाक्यं होष्यामीत्येवमेव(?)प्रयोज्यम् । यदि संवत्सरान्न जायेत पुत्रकामना ततः परमुं विधिमनादृत्य चतुर्होत्रैव याजयेत् । तत्प्रयोगपरिसमापनाय चतुर्होत्रा याजनम् ।

राजानमपरुद्धꣳ सङ्ग्रामे संयत्ते खिलेऽच्छदिर्दर्शे
चतुर्गृहीतेनाऽऽज्येन चतुर्होत्रा पूर्वामाहुतिं जुहोति
ग्रहेणोत्तरामपि वा चतुर्होतारं मनसाऽनुद्रुत्य
पूर्वेण ग्रहेणार्धं जुहोत्यर्धमुत्तरेण यत्तत्र विन्देरꣳ-
स्ततो दक्षिणा स्याच्छतमेके समामनन्ति ।

अपरुद्धं शत्रुभिर्वेष्टितं सङ्ग्रामे संयत्ते प्रवृत्ते सति खिल आवृत्तेऽच्छदिर्दर्शो यत्र गृहच्छदींषि न दृश्यन्त एतादृशे देशे चतुर्होत्रा पूर्वामाहुतिं जुहोति ग्रहेणोत्तरामि-

---

१ क. च. छ. ज. ञ. ञ. ट. °पान्य प्रा° । २ च. छ. °रि य° ।

त्येतद्विधिविषयेऽपि वेत्यनेन प्रकारान्तरं विधीयते। अत्र विशेष इयान्, चतुर्होतुर्मनसाऽनुद्रवणं पूर्वेण ग्रहेण ग्रहभागेण वाचस्पतेर्वाचो वीर्येण संभृततमेनाऽऽयक्ष्यसे यजमानाय वार्यमित्येतावान्ग्रहस्य पूर्वो भागः। आसुवस्करस्मै वाचस्पतिः सोमं पिबति जननदिन्द्रमिन्द्रियाय स्वाहेत्युत्तरो ग्रहस्य भागः। पूर्वभागान्तेऽपि जुहोतिचोदितत्वात्स्वाहाकारः प्रयोज्यः। उत्तरत्र पठित एव। अर्धमित्युभयत्राऽऽज्यस्येति शेषः। सङ्ग्रामं जित्वा यत्तत्र धनं लभेरंस्ततोऽपकृष्य दक्षिणा देया। शतमेवं देयमित्येक आचार्या वदन्तीत्यर्थः।

चतुर्होत्रा याजयेत्प्रजाकामम्।

याजयेदित्यन्तर्भावितो णिच्। तेन प्रजाकामो यजेदित्यर्थो भवति। यजिधातुप्रयोजनं पूर्ववत्।

तस्य स एव होमकल्पः।

खिलेऽच्छदिर्देर्श इत्यारभ्यार्धमुत्तरेणेत्यन्तः।

अत्र विशेषमाह—

वरो दक्षिणा।

यत्तत्र विन्देरंस्ततो दक्षिणा स्याच्छतमेके समामनन्तीत्यस्य बाधः।

पञ्चहोत्रा याजयेत्पशुकामम्।

पूर्ववद्व्याख्यानम्।

चतुर्गृहीतेनाऽऽज्येन पञ्चहोत्रा पूर्वामाहुतिं
जुहोति ग्रहेणोत्तरामपि वा पञ्चहोतारमनु-
द्रुत्य पूर्वेण ग्रहेणार्धं जुहोत्यर्धमुत्तरेण।

पूर्ववदेव व्याख्या।

दक्षिणायामत्र विशेषमाह—

तस्यैताश्चतस्रो दक्षिणा अश्वो हिरण्यं वासो गौः।

तस्य पञ्चहोतृहोमस्य।

अन्यमपि प्रकारमाह—

भ्रातृव्यवन्तं चादक्षिणेन होमग्रहाभ्यां सप्तहोत्रा याजयेत्।

होमः सप्तहोतृहोमः। पूर्वेण ग्रहेणार्धं जुहोत्यर्धमुत्तरेणेत्येतौ विधी होमग्रहशब्देनोच्येते। अदक्षिणेनेति सप्तहोतृविशेषणम्।

प्रकारान्तरमाह—

---

१ च. °तारं मनसाऽनु°।

यो यज्ञस्यानुसꣳस्थां पापीयान्स्याच्चतुर्गृहीतेनाऽऽज्येन सप्तहोत्रा पूर्वामाहुतिं जुहोति ग्रहेणोत्तराम् ॥ २१ ॥

यो यजमानो यज्ञस्य संस्थां समाप्तिमनु समाप्तौ सत्यामेव पापीयान्द्वेष्यः स्यादिति कामयेत स चतुर्गृहीतेनाऽऽज्येनेत्यादि ।

व्याख्याताः क्रतुसंयुक्ताः ।

अग्निमादधानो दशहोत्रारणिमवदध्यात् । तेनैवोद्द्रुत्याग्निहोत्रं जुहुयात्, हविर्निर्वप्स्यन्दशहोतारं व्याचक्षीत, सामिधेनीरनुवक्ष्यन्दशहोतारं व्याचक्षीत, दशहोतारं पुरस्तात्सामिधेनीनां व्याचक्षीत, बहिष्पवमाने दशहोतारं व्याचक्षीत, माध्यंदिने पवमाने चतुर्होतारम् । आर्भवे पवमाने पञ्चहोतारं पितृयज्ञे षड्ढोतारं यज्ञायज्ञियस्य स्तोत्रे सप्तहोतारमित्येवमादिभिर्विधिभिस्तत्तत्प्रकरण उक्तास्ते तत्तत्प्रकरणे व्याख्याता उक्ता इत्यर्थः ।

अभिचरन्दशहोतारं जुहुयात्स्वकृत इरिणे प्रदरे वा फडिति वषट्करोति यं ब्राह्मणं विद्यां विद्वाꣳसं यशो नर्छेत्सोऽरण्यं परेत्य दर्भस्तम्बमुद्वृह्य ब्राह्मणं दक्षिणतो निषाद्योच्चैश्चतुर्होतॄन्व्याचक्षीत सग्रहान्सस्वाहाकारान्ससंभारयजुष्कान्सपत्नीकान्सप्रतिग्रहणमन्त्रानपि वा चतुर्होतृनेव यो ब्राह्मणो दक्षिणत आस्ते वरं तस्मै दद्याद्यदेवैनं तत्र यश ऋच्छति तद्वरुणोऽवरुन्ध इति विज्ञायते ।

अभिचारः शत्रुमारणार्थकं कर्मोच्यते । इरिणमुखरो देशस्तत्स्वयं कृतं भवति न पुरुषप्रयत्नकृतम् । प्रदरो भूमिच्छिद्रम् । फडिति वषट्करोति । फडित्येव पाठो न तु वडिति । यद्वाचः क्रूरं तेन वषट्करोतीति श्रुतेः । वाचः क्रूराण्यारण्यकश्रुत्या प्रदर्शितानि-खट्फट्, जहि च्छिन्धि भिन्धि हन्धि कट्, इति वाचः क्रूराणीति । फडिति सर्ववाचः क्रूराणामुपलक्षणम् । एतेषामन्यतमेन वषट्करोति स्वाहाकारस्थाने खडाद्यन्यतमेन शब्देन जुहोतीत्यर्थः । अमुमर्थं स्पष्टमाहाऽऽपस्तम्बः—यद्वाचः क्रूरं तेन वषट्करोति वाच एवैनं क्रूरेण प्रवृश्चति ताजगार्तिमार्छतीति विज्ञायत इति । ब्राह्मणग्रहणात्क्षत्रियवैश्ययोर्नायं विधिः । विद्या वेदः । यशः श्रोत्रियत्वख्यातिः । एते उभे विद्वाꣳसं प्रति न ऋच्छेन्न प्रामुत इत्यर्थः । स विद्वानुद्वृह्य बद्ध्वा दक्षिणतो दर्भस्तम्बस्य यं कंचन ब्राह्मणं निषाद्योपवेश्य, उच्चैः, यजुर्वेदेनोपांशुतिप्राप्तस्योपांशुत्वस्यानेन बाधः । अत्रोच्चैरिति विधानादन्यत्र नेदम् । चतुर्होतॄन्दशहोतृसप्तहोतृषड्ढोतृपञ्चहोतृचतुर्होतॄन्व्याचक्षीत वाक्यशः पठेत् । यदेवैषु चतुर्धा होतारस्तेन चतुर्होतारः, तस्मा-

---

१ ङ. ज. ञ. म. °वडिते । २ च. छ. °र्होतॄन्व्या° ।

चतुर्होतार उच्यन्ते तच्चतुर्होतृणां चतुर्होतृत्वमित्यादिषु बह्वीषु श्रुतिषु सर्वेषां चतुर्होतृपदप्रवृत्तिः प्रदर्शिता। कथंभूतांश्चतुर्होतॄन्, वाचस्पते विधे नामन्, सोमः सोमस्य पुरोगाः, वाचस्पते वाचो वीर्येण, वाचस्पतेऽच्छिद्रया वाचा, वाचस्पते ट्वद्विधे नामन्, इत्येवमादयो ग्रहास्तत्पहितान्। व्याख्याने स्वाहाकाराप्राप्तौ सस्वाहाकारानिति। अग्निर्यजुर्भिरित्यनुवाकोपात्ता मन्त्राः संभारयजूंषि तत्सहितान्। सेनेन्द्रस्येत्यनुवाकोपात्ताः पत्न्यस्तत्सहितान्देवस्य त्वेत्यनुवाकोपात्ता मन्त्राः प्रतिग्रहणसंज्ञका मन्त्रास्तत्सहितान्। प्रतिग्रहणमन्त्राः सानुषङ्गा द्रष्टव्याः। अपि वा चतुर्होतृनेव नैते ग्रहस्वाहाकारसंभारयजुःपत्नीप्रतिग्रहणमन्त्रा इत्यर्थः। यो ब्राह्मणो दक्षिणत आस्ते वरं तस्मै दद्यात्। चतुर्वर्षा गौर्वरः। यदेवैनं तत्र यश ऋच्छति यदभीप्सितं यश ऋच्छतीच्छति तद्यशो वरुणो ददातीत्यर्थः। विज्ञायते श्रुतिरिति शेषः।

यद्येनमार्त्विज्याद्वृतꣳ सन्तं निर्हरेरन्नाग्नीध्रे जुहुयाद्दशहोतारं चतुर्गृहीतेनाऽऽज्येन नवगृहीतेनेत्येकेषां पुरस्तात्प्रत्यङ्तिष्ठन्प्रतिलोमं विग्राहं प्राणानेवास्योपदासयति यद्येनं पुनरुपशिक्षेयुराग्नीध्र एव जुहुयाद्दशहोतारं चतुर्गृहीतेनाऽऽज्येन नवगृहीतेनेत्येकेषां पश्चात्प्राङासीनोऽनुलोममविग्राहं प्राणानेवास्मै कल्पयति।

यद्येनं पुरुषमार्त्विज्ये वृतं सन्तमसति दोषे ततो भ्रंशयेयुर्यजमानकिंकरास्तदाऽसौ तं जिघाꣳसुमाग्नीध्रे दशहोतारमेव जुहुयात्। उत्तमादारभ्य प्रतिपदं यजुषामनुद्रवणं प्रतिलोमता, यजूꣳषि यजुष्यवसायानुद्रवणं विग्राहः। उपदासः क्षपणं, पुनरार्त्विज्ये स्थापनमुपशिक्षणम्। यथाधीतो दशहोताऽनुलोममविग्राहं च भवति।

प्रायश्चित्ती वाग्घोतेत्यृतुमुख ऋतुमुखे षड्ढोतारं जुहुयात्।

प्रायश्चित्तशब्देन शुद्धिरत्रोपलक्ष्यते। शुद्धीच्छावान्पुरुषो वाग्घोतेति षड्ढोतारमृतुमुख ऋत्वादौ। वीप्सया यावत्संवत्सरं सामर्थ्यात्।

यः कामयेत बहोर्भूयान्स्यामिति स दशहोतारं प्रयुञ्जीत।

बहोर्भूयान्प्रजापश्वादिबहोर्बहुतरः प्रयुञ्जीत जुहुयात्। प्रयोगोऽत्र होम एव चतुर्गृहीतेनाऽऽज्येन।

यः कामयेत वीरो म आजायेतेति स चतुर्होतारम्।

वीरः सत्पुत्रः।

यः कामयेत पशुमान्स्यामिति स पञ्चहोतारम्।

पशवो गवाश्वादयः।

यः कामयेतर्तवो मे कल्पेरन्निति स षड्ढोतारम् ।

ऋतवो मे कल्पेरन्स्वं स्वं गुणं पोषयन्तः शिवा गच्छन्त्वित्यर्थः ।

यः कामयेत सोमपः सोमयाजी स्यामा मे
सोमपः सोमयाजी जायेतेति स सप्तहोतारम् ।

सोमयाजी जायेतेति धातुसंबन्धे प्रत्यया इति भविष्यदर्थे भूतवत्प्रत्ययः । सोमेन्यावत्सोमपानस्यापि पुरुषार्थत्वात्पृथक्सोमपवचनम् । अत एवोक्तं शास्त्रेषु तावेवास्मै सोमपीथं प्रयच्छत इति । स सोमं पातुमर्हतीत्यादि ।

यः कामयेत प्रियः स्यामिति यं वा कामयेत प्रियः स्यादिति
तस्मा एतꣳ स्थागरमलंकारं कल्पयित्वा दशहोतारं दक्षिणतः
पञ्चहोतारं पश्चात्षड्ढोतारमुत्तरतः सप्तहोतारमुपरिष्टात्संभारैश्च
पत्निभिश्च मुखेऽलंकृत्यास्यार्धं व्रजेत्प्रियो ह्येव भवति ।

स्वयमन्यं प्रति प्रियः स्यामिति मन्येत, अन्यं वा पुरुषं प्रति यः कामयेत स मह्यं प्रियः स्यादिति तस्मै, एतं स्थागरं स्थागराख्येन द्रव्येण कृतमनुलेपनाद्यर्थमलंकारं स्थापयित्वा तस्य प्रागादिदिक्षु तदभिमुखं स्थितो दशहोत्रादीन्वाक्यशः पठित्वा, एतादृशेन विधिना तेन संस्कृतेन संस्कृतेनाग्नेर्यजुर्भिरित्येतैः संभारैः संभारसंज्ञकैर्मन्त्रैः सेनेन्द्रस्येत्येतैः पत्नीसंज्ञकैर्मन्त्रैश्च मुखे पुण्ड्रकादिरूपमलंकारं कृत्वाऽस्य वशीयस्यार्धं स्थानमाव्रजेत् । स्वयं परो वा यः पर इष्यते स्थानं गतस्य प्रियो भवति । उहशब्दो निश्चयार्थे ।

तेषां ये होमार्थे श्रूयन्ते सग्रहाः सस्वाहाकारास्ते
प्रयुज्येरन्ये त्वहोमार्थेऽग्रहा अस्वाहाकारास्ते ।

अथ प्रकृताप्रकृतविषयाणां चतुर्होतॄणां सामान्यव्याख्या क्रियते सूत्रकृतैव । तेषां चतुर्होतॄणां मध्ये ये चतुर्होतारो यत्र चतुर्होतारो होमार्थे होमनिमित्तत्वेन श्रूयन्ते सस्वाहाकारास्ते तत्र प्रयुज्येरन् । अहोमार्थे ये श्रूयन्ते तेऽग्रहा अस्वाहाकारा ग्रहरहिताः स्वाहाकाररहिताश्च ते तत्र प्रयुज्येरन् । अहोमार्थत्वेनास्वाहाकारत्वे सिद्धेऽपि वचनं चातुर्होत्रीयोपधाने विनियोगे मन्त्रान्ते स्वाहाकारपाठेऽपि चातुर्होत्रचयनेऽपि चतुर्होतॄणां मुख्यतयैव विनियोगात्स्वाहाकारपाठोऽपि मा शङ्कीति वचनम् ।

ये जपा ये याजमानास्तेऽपि क्रतुसंयुक्ताः ।

जपा जपार्था याजमाना यजमानप्रयोज्या जपानामध्वर्यवादिप्रयोज्यत्वं यजमानप्रयोज्यत्वं चेति । याजमानानां तु यजमानप्रयोज्यत्वमेवेति धर्मभेदं प्रदर्शयितुं यच्छब्दद्वयम् ।

---

१ च. °पाठेऽपि । २ म. ढ. ज्ञ्या । ३ ङ. ज. ञ. ट. ढ. °स्ते ये क° ।

त आहिताग्नेरुभयोरक्रतुसंयुक्ता भवन्ति ॥ २२ ॥

इति हिरण्यकेशिसूत्रे दशमप्रश्ने सप्तमः पटलः ।

तेषां चतुर्होतॄणां मध्ये ये विहारसंयुक्तास्त आहिताग्नेर्यथा दर्शपूर्णमासावालभमान-श्चतुर्होतारमित्यादिषु । ये त्वक्रतुसंयुक्ता यः कामयेत प्रजायेयेति यं ब्राह्मणं विद्यां विद्या४सं यशो नर्छेदित्यादिषु दशहोत्रादयस्त उभयोराहिताग्नेरनाहिताग्नेश्च भवन्ति । तत्राऽऽहिताग्नेराहवनीय औपासने वा कर्मण्यवस्थया होमः । अनाहिताग्नेरौपासन एव सर्वाणि । आपस्तम्बेनान्योऽपि विशेष उक्तः—सप्तहोत्रा यज्ञविभ्रष्टं याजयेच्च-तुर्गृहीतेनाऽऽज्येनार्धं वा पूर्वेण ग्रहेणार्धमुत्तरेणेति । तत्र यज्ञविभ्रष्टं विध्यपराधप्रश्ने वक्ष्यति—उपक्रम्याशक्नुवन्यज्ञविभ्रष्ट इति । तत्रेष्टिपशुविभ्रष्टस्येष्टिरेव प्रायश्चित्तं यो यज्ञविभ्रष्टः स्यादिति । सोमविभ्रष्टस्य तु सोम एव । वक्ष्यति च सप्तदशप्रश्ने सप्तद-शेनाग्निष्टुता यज्ञविभ्रष्ट इति । अयं तु दर्विहोमत्वसामान्यादग्निहोत्रविभ्रष्टस्य भवति । अर्वाक्चतुरहविर्भ्रेषात् । ततः परं तु तन्तुमत्युक्ता । पिण्डपितृयज्ञभ्रेषपार्वणपाक-यज्ञभ्रेषे चायमेव विधिर्द्रष्टव्यः ।

इत्योकोपाहश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखया-जिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथ-दीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसू-त्राम्बुधिगतनिमूढार्थरत्नालाभकृतविद्वज्जनसंताप-शामिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्र-श्नस्य सप्तमः पटलः ॥ ७ ॥

अथ दशमप्रश्नेऽष्टमः पटलः ।

वासिष्ठो ब्रह्मा ज्योतिष्टोमे ।

वासिष्ठो वसिष्ठगोत्रोत्पन्नो ज्योतिष्टोमे ब्रह्मा भवति । एतेनाऽऽधानेष्टिपशु-बन्धेषु वासिष्ठत्वस्यानियमः । देवभूतपितृभूतार्त्विक्स्वीकारेऽपि आधानादाववासिष्ठ-ब्रह्मस्वीकारे ज्योतिष्टोमाद्यर्थमन्यो वासिष्ठः स्वीकार्य इति । य आधानादौ स्वीकृतः स स एव ज्योतिष्टोमादिष्विति नियमो न । श्रुतिरपि सोमप्रकरणे—तस्माद्वासिष्ठो ब्रह्मा कार्य इति । तत्रैकार्षेया वासिष्ठा अन्यत्रोपमन्युपराशरकुण्डिनेभ्य इतिप्रवरसूत्रोपात्तो मुख्यो वसिष्ठस्तदपत्यभूता उपमन्युपराशरकुण्डिनाश्चात्र गृह्यन्ते । तदपत्यत्वात्तत्संज्ञया

१ क छ. °त्तत्सत्तया ।

ावरैक्याच्च तेऽपि वासिष्ठा एव । ब्रह्मिष्ठो ब्रह्मेति दर्शपूर्णमासयोर्विहितं तत्प्रकृतीना-
ेष्टिपशुबन्धानां च तथैव । ब्रह्मिष्ठ एव वासिष्ठो भवतीति केचित् । वस्तुतो ज्योति-
ोम इति वचनाज्ज्योतिष्टोम एव वासिष्ठत्वनियमः, अन्यत्रानियम इति यदुक्तं
ादेव समीचीनम् ।

यो वा कश्चित्स्तोमभागानधीयात् ।

यः कश्चनान्योऽपि स्तोमभागान्रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्यादीनि यजूंषि
ार्थं सविनियोगं च यो वेद स ब्रह्मा स्यादित्यर्थः । अत एवाऽऽपस्तम्बेन विद्यादि-
युक्तम् ।

अन्योन्यस्मै वा ऋत्विजो यज्ञसंप्रदायं चरन्ति ।

अन्योन्यस्मा अन्योन्यं परस्परमृत्विजो यस्य यस्य यच्छास्त्रं होतॄणां याजुषाध्व-
प्रतिपादकशास्त्रमनुक्तस्थलप्रवृत्ताश्वलायनशास्त्रं चाध्वर्यूणामाध्वर्यवप्रतिपादकं शास्त्रमुद्गा-
तॄणामौद्गात्रप्रतिपादकं शास्त्रमनुसृत्य परस्परं विरोधं न्यायतः परिहृत्य यज्ञस्य यः
संप्रदायो यज्ञसंबन्धी यः संप्रदायोऽनुष्ठानमर्यादा तां यथा चरन्ति ऋत्विजस्तथा
प्रवर्तको वा ब्रह्मा भवेत्तर्वसूत्रपरिज्ञाता वा ब्रह्मा भवेदित्यर्थः ।

यावदृचाऽऽर्त्विज्यं क्रियते होतृष्वेव तावद्यज्ञो भवति ।

यावदित्यनेन होतृविषयकं कात्स्न्यमुच्यते । ऋचा, ऋग्वेदेन ऋग्वेदशेषेण च
होतृविषयकं कृत्स्नं यावत्कर्म तावता कर्मणा होतृविषयको यज्ञः संपन्नो भवति ।
अथवा यावत्पर्यन्तमृग्वेदेन जायमानमार्त्विज्यकर्म तावत्पर्यन्तं होतृष्वेव यज्ञो भवति
स्थितो भवतीत्यर्थः । तदीयकर्मणि न्यूनतायां यज्ञस्थितिस्तत्र न भवति न्यूनो यज्ञो
भवति तदीयदोषो ब्रह्मणि ब्रह्मिष्ठत्वादियथोक्तलक्षणसंपन्नत्वाभाव आगच्छतीति भावः ।

यावद्यजुषाऽध्वर्युष्वेव तावत् ।

स्पष्टम् ।

यावत्साम्नोद्गातृष्वेव तावत् ।

इदमपि स्पष्टम् । एवं च त्रय्या विद्यया यज्ञः संपन्नो भवतीत्यर्थः । परिभाषाया-
मप्युक्तं स त्रिभिर्वेदैर्विधीयत इति ।

यत्र क्व च यज्ञस्य विरतं ब्रह्मण्येव तावद्यज्ञो भवति ।

यत्र क्व चेत्यनेन त्रयी विद्या गृह्यते । त्रयीविद्याविहितयज्ञस्य त्रयीविद्याविहित-
यज्ञे विरतं मौनमनेन मौनेनैव ब्रह्मणैव तावद्यज्ञः संपन्नो भवति । इदं च मौनमेव
ब्रह्मणो मुख्यं कर्मेत्यर्थः । इदं च दृष्टार्थप्रवृत्तकर्मण्येकाग्रचित्तत्वाय । अत एवाऽऽ-
श्वलायनः—अबहुभाषी यज्ञमना इति यज्ञमनस्त्वमाह ।

तस्मादेतस्मिन्नन्तर्धौ ब्रह्मा वाचंयमः स्यात् ।

अन्तर्धौ, इत्यनन्तरं चकारोऽध्याहार्यः । तस्माद्धेतोस्त्रयीसाध्यतत्तत्कर्मरूपे यज्ञे । अन्तर्धिशब्देन कर्मविरामकाल उच्यते । तत्रापि वाग्यमनं वा भवतीत्यर्थः । तथा च च्छान्दोग्यम्—ब्रह्मण्येव तावद्यज्ञो यत्रोपरतस्तस्मिन्नन्तर्धौ ब्रह्मा वाचंयमो बुभूषेदिति ।

यदि प्रमत्तो व्याहरेद्वैष्णवीमृचं जपि-
त्वा व्याहृतीश्च पुनर्वाचं यच्छति ।

प्रमत्तः प्रमादतो व्याहरेत्, वाचमुच्चारयेत् । वैष्णवी, इदं विष्णुरिति । एतामृचं जपित्वा व्याहृतीर्व्यस्ताः समस्ता वा जपित्वा पुनर्वाचं नियमयेदित्यर्थः । चकारो वैष्णव्यृक्समुच्चयार्थः ।

राजनि मीयमानेऽग्नौ क्रियमाणे महावेद्यामु-
त्तरवेद्यां च क्रियमाणायां राजनि हिय-
माणेऽभिषूयमाणे बर्हिष्यवमाने स्तूयमाने ।

अग्नौ शौल्बेन विधिनाऽग्निक्षेत्रे क्रियमाणे । अन्यत्स्पष्टम् ।

उखायां संभ्रियमाणायामुखाकर्मसु च क्रियमाणेषु ।

उखासंभरणं नामोखार्थं मृदः संभरणम् । उखाकरणार्थानि संसर्जनादीनि कर्माणि तेषु ।

प्रवृज्यमानायां च ।

प्रवृज्यमानायामुखायाम् । चकारः पूर्वेण समुच्चयार्थः ।

अग्नौ मीयमाने ।

अग्नावग्निक्षेत्रेऽदृष्टार्थं दण्डेन मीयमाने ।

कृष्यमाणे ।

अग्निक्षेत्रे लाङ्गलेन कृष्यमाणे ।

ओप्यमाने ।

अग्निक्षेत्र ओषधीनां निवपने क्रियमाणे ।

चितेरुपधीयमानायाः ।

सर्वासु चितिषूपधीयमानासु ।

संचितकर्मसु च ।

यावन्ति संचितकर्माणि संचितमभिमृशतीत्यादीनि ।

एतेषु कर्मसु यथाकालं क्रियमाणेषु दक्षिणत आस्ते ।

उक्तान्येव विशिनष्टि यथाकालं क्रियमाणेषु स्वस्वकाले क्रियमाणेषु दक्षिणत आस्त उपविष्टो भवतीत्यर्थः ।

राजन्योह्यमानेऽग्नौ प्रणीयमाने हविर्धानयोः प्रोह्यमाणयोः ।

राजनि अनसोह्यमानेऽग्नावौत्तरवेदिके प्रणीयमाने । अन्यत्स्पष्टम् ।

उखायाꣳ संभरिष्यमाणायाम् ।

उखायाꣳ संभरिष्यमाणायामिति भविष्यप्रत्ययादुखार्थं मृदं प्रति गमनं गृह्यते । स्पष्टमिदमुक्तमापस्तम्बेन—उखामच्छ गच्छतामिति । अच्छ मृत्खनाभिमुख्येन गच्छतामित्यर्थः ।

ओह्यमानायां च ।

यजमानेन कण्ठे प्रतियुक्ता सती विष्णुक्रममन्त्रैस्तस्यामुखायामोह्यमानायाम् ।

नैर्ऋतीरुपधास्यताम् ।

नैर्ऋतीरिष्टका उपधास्यताम् । अध्वर्युप्रतिप्रस्थातृब्रह्मयजमानाभिप्रायं बहुवचनम् । यद्यप्युपधाने साक्षात्प्रतिप्रस्थातृब्रह्मयजमानानां संबन्धो नास्ति तथाऽपि अग्निचयनसंबन्धमात्रमाश्रित्यैवात्र बहुवचनम् ।

चित्यग्नीनां प्रणीयमानानाम् ।

चित्यर्था इष्टकाश्चित्यग्नयः । चित्यग्नीनामित्यत्राग्निशब्दश्चितिसाधनपरः । चित्यग्निभ्यः प्रणीयमानेभ्योऽनुब्रूहीत्यादिना यद्विहितं चित्यग्नीनां प्रणयनं तत्रापि दक्षिणत आस्ते ।

वसतीवरीः सवनीयाश्च गच्छताम् ।

सवनीयाशब्देनैकधना गृह्यन्ते । सवने सवने तत्प्रयोजनसत्त्वात् । गच्छतां गच्छतां प्रतिगच्छताम् ।

आहियमाणासु च ।

वसतीवरीः सवनीयाश्च यथाकालमाह्रियमाणासु । तत्र वसतीवरीणामाहरणकालोऽग्नीषोमीयवपाहोमोत्तरम् । सवनीयाहरणकालः प्रातरनुवाकोत्तरम् ।

अवभृथं चाभ्यवैष्यताम् ।

अवभृथं प्रति उरुꣳ हि राजेत्यनेनाभ्यवैष्यतामवभृथदेशाभिमुखं प्रत्यवैष्यतां गमनक्रियायां करिष्यमाणायाम् ।

उद्यत्सु च ।

उद्यत्सु आगच्छत्सु ।

एतेषु कर्मसु यथाकालं क्रियमाणेषु दक्षिणत एति ।

अध्वर्यवादीनां गच्छतां दक्षिणतो गच्छति । नित्यः सर्वकर्मणां दक्षिणतो भ्रुवाणां व्रजतां वेत्याश्वलायनः । अग्निसंबन्धिकर्माणि अव्यवधानेन पठितुं युक्तानि कर्मक्रमेण वा पठितुं युक्तानि व्यत्यस्तपाठे हेतुश्चिन्त्यः ।

सदोहविर्धानेषु संमीयमानेष्वन्तरेण चात्वालो-
त्करावन्वेत्यापरेणोत्तरवेदिमतिक्रम्य दक्षिणत उप-
विशति ॥ २३ ॥ आवैसर्जनकालादन्वास्ते ।

अर्वाक्समपित्रताह्वानादत्रैवाऽऽस्ते ।

होष्यमाणेषु वैसर्जनेषु यथेतं प्रत्येत्योत्तरेणाऽऽग्नीध्रीयं
धिष्णियं परीत्य पूर्वेण द्वारेण प्राग्वंशं प्रविश्या-
परेण शालामुखीयमतिक्रम्य दक्षिणत उपविशति ।

स्पष्टम् ।

एवावन्दस्वेत्युपस्थे राजानं कुरुते ।

उपस्थोऽङ्कः ।

आवैसर्जनहोमादन्वास्ते ।

स्पष्टम् ।

हुते वैसर्जनेऽन्वग्नेर्गच्छति ।

पूर्वो निष्क्रम्येत्यापस्तम्बः । हुते गार्हपत्यहोमे सर्वेभ्यः पूर्वो निष्क्रम्य प्राग्वंशा-
त्परमध्वानमग्नेर्गच्छति सोमप्रथमकल्पे ।

पूर्वो वा ।

यदा ह्यग्निप्रथमास्तदाऽन्वाज्यमेवाग्निं निष्क्रम्य गच्छति । अन्यथाऽग्निप्रथमाः
सोमप्रथमा वा प्राञ्चो गच्छन्तीत्यनेन विरोधात् ।

आग्नीध्रीयं प्राप्य दक्षिणत उपविशत्यावैसर्जनहोमाद-
न्वास्ते हुते वैसर्जनेऽन्यस्मै राजानं प्रदायोत्तरेणाऽऽग्नी-
ध्रीयं धिष्णियं परीत्य राजानं प्रत्यादाय सोमो
जिगाति गातुविदिति सौम्यर्चाऽपरेण द्वारेण
हविर्धाने प्रविश्याध्वर्यवे राजानं प्रदाय यथेतं
प्रत्येत्यापरेणोत्तरवेदिमतिक्रम्य दक्षिणत उपविशति ।

अन्यस्मै प्रतिप्रस्थात्रे । स्पष्टमेवापठदापस्तम्बः—आग्नीध्रीयं प्राप्य प्रतिप्रस्थात्रे
राजानं प्रदायेति । अन्यत्स्पष्टम् ।

अग्नीषोमीयस्याऽऽ वपाया होमादन्वास्ते ।

अत्राऽऽङभिविधौ तेन वपाहोमपर्यन्तमित्यर्थः ।

हुतायां वपायां मार्जयते ।

चात्वाले सर्वैः सह । सब्रह्मकाश्चात्वाले मार्जयन्त इत्याश्वलायनः ।

वसतीवरीषु परिगृह्यमाणासु वाचं यच्छत्या सुब्रह्मण्यायाः ।

सुब्रह्मण्याह्वानपर्यन्तमित्यर्थः । अत्राप्याङभिविधौ ।

महारात्रे बुध्यमानेषु बुध्यते ।

प्रथममिति शेषः । बोधनस्यार्थादेव सिद्धेः प्राथम्यविधानेनैव सार्थक्यम् । प्रथम-मित्यध्याहारं विना वैयर्थ्यमेव सूत्रस्य स्यात् ।

उपाकृते प्रातरनुवाके वाचं यच्छत्या परिधानीयायाः ।

अत्राप्याङभिविधौ तेन परिधानीयापर्यन्तमित्यर्थो भवति ।

सवनीयासु प्रपाद्यमानासु पूर्वेण द्वारेण हवि-
र्धाने प्रविश्याग्रेण खरं परीत्य दक्षिणत
उपविशति ॥ २४ ॥ आग्रहकालादन्वास्ते ।

ग्रहकालो दधिग्रहेण प्रचरतीत्यत आरभ्य ।

ग्रहेषु गृह्यमाणेषु वाचं यच्छत्याऽऽग्रयणस्य ग्रहणात् ।

आ, आग्रयणस्य ग्रहणादिति पदच्छेदः । आग्रयणग्रहणपर्यन्तम् । आङ-भिविधौ ।

बहिष्पवमानꣳ सर्पत्सु समन्वारभ्य सर्पति ।

वैप्रुषहोममप्रहोतृहोमौ ब्रह्माणं यजमानो यजमानं ब्रह्मेत्येकेषामित्ययं विकल्प-श्चाऽऽध्वर्यवसूत्रोक्तोऽत्रापि द्रष्टव्यः । एतादृशेन विधिना समन्वारभ्य सर्पति ब्रह्माऽपि ।

ब्रह्मन्स्तोष्यामीत्युच्यमाने देवसवितरेतत्ते प्राह तत्प्र च सुव प्र
च यज बृहस्पतिर्ब्रह्माऽऽयुष्मत्या ऋचो मा गात तनूपात्साम्नः
सत्या व आशिषः सन्तु सत्या आकूतय ऋतं च सत्यं च
वदत स्तुत देवस्य सवितुः प्रसव ओꣳ स्तुतेति प्रसौति ।

संहितामन्त्रस्य कृत्स्नः पाठः स्तोमभागमन्त्रेण संधानार्थः । तेन सह, ओꣳ स्तुतेति अभ्यनुज्ञावाक्येन संधानम् । प्रसवोऽभ्यनुज्ञावाक्यम् ।

सर्वस्तोत्राणामेष कल्पः ।

स्पष्टम् ।

रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्येकत्रिꣳशतः
स्तोमभागाः स्तोत्रे स्तोत्र उत्तरमुत्तरमादधाति ।

एकत्रिंशदेव स्तोमभागा भवन्ति । तेनात्रोर्यामेऽन्यस्याऽऽवृत्तिः । एवं च संख्या-नियमः । एवं च सत्यपि सोमातिरेकनिमित्ते स्तोत्राधिक्ये तस्य तस्य क्रतोस्तत एव

---

१ क. च. ज. ञ. प्रपद्य°।

स्तोममागाः । अत्र सवनान्त्यस्याऽऽवृत्तिः पूर्वयोः सवनयोः । तृतीयसवने त्वधिका एव निविशन्ते । क्रतोरेवोत्तरक्रतुभावित्वात् । बहिष्पवमानार्थमुद्गातृभिः प्रस्तोत्रा वा ब्रह्मन्स्तोष्यामीत्युच्यमाने देवसवितरेतत्त इति मन्त्रम् । उच्यमान इति वर्तमाननिर्देशादेतदामन्त्रणवाक्यसमकालमिमं मन्त्रं पूर्वमेव वाऽऽमन्त्रणान्मन्त्रमुक्त्वा, ओꣳ स्तुतेति तस्मिन्काले प्रसौति । देवस्य सवितुः प्रसव इत्येतदनन्तरमोꣳ स्तुतेत्येतस्मात्पूर्वं स्तोममागमन्त्रं संदधातीत्यादधातिशब्दार्थः । वीप्सा क्रमेण प्रतिस्तोत्रमेकैको मन्त्रो योज्य इत्येतदर्थम् ।

संख्यामाह—

द्वादशाग्निष्टोमे त्रयोदशात्यग्निष्टोमे पञ्चदशोक्थ्ये षोडश षोडशिनि
सप्तदश वाजपेय एकान्नत्रिꣳशतमतिरात्रे त्रयस्त्रिꣳशतमप्तोर्यामे ।

अप्यग्निष्टोमे राजन्यस्य गृह्णीयादिति षोडशिग्रहणमाचार्येणोक्तं तदर्थमेवाऽऽचार्येण स्तोममाग उक्तः । त्रयोदशात्यग्निष्टोम इति । अयमेवात्यग्निष्टोमनामकः क्रतुरनुमितः । स राजन्यस्य गृह्णीयादित्यनेन राजकर्तृको यज्ञ उक्तः । गौतमेन चत्वारिंशत्संस्कारेषु नित्यत्वेन परिगणनाद्ब्राह्मणस्यापि नित्य इति ज्ञेयम् । अर्थः स्पष्टः ।

स्तुते बहिष्पवमाने यथेतं प्रत्येत्यापरेणोत्तरवेदिमतिक्रम्य
दक्षिणत उपविशति सवनीयस्याऽऽ वपाया होमादन्वास्ते ।

यथेतं यथागतम् । अत्राप्याङभिविधौ । तेन वपाहोमपर्यन्तमित्यर्थो भवति ।

हुतायां वपायां मार्जयित्वा पूर्वेण द्वारेण
सदः प्रविश्याग्रेण प्रशास्त्रीयं धिष्ण्यं
परीत्य दक्षिणत उपविशत्यासꣳस्थानादन्वास्ते ।

संस्थानशब्देन सवनसमाप्तिरुच्यते ।

यत्रास्मै चमसमाहरति तं भक्षयति यथेतरे चमसान् ।

याजमानसूत्र एतत्समानार्थके कृतव्याख्यानम् ।

स्तुतशस्त्रयोर्वाचं यच्छति ।

समाप्तिपर्यन्तं, शस्त्रस्य समाप्तिर्याज्यान्ते ।

सꣳस्थिते सवने यथेतं प्रतिनिष्क्रामति ।

येन पथा सदः प्रविष्टस्तेनैव पथेत्यर्थः ।

एवं विहित उत्तरयोः सवनयोः संचरो ब्रह्मत्वं च ।

संचरो मार्गः । इतरद्ब्रह्मत्वं च । गोबलीवर्दन्यायेनोभयोर्ग्रहणम् ।

---

१ च °रनिमित्तः । त ।

आध्वर्यव एवातोऽन्यानि कर्माणि ब्राह्मण आम्नातानि भवन्ति ।

अत उक्तकर्मतोऽन्यानि वरणाङ्गजपादीनि तानूनप्त्रादीनि उपस्थानादीनि चाऽऽध्वर्यव एवाऽऽम्नातानि भवन्ति तान्यध्वर्युवत्कुर्यादित्यर्थः ।

एवं विहितꣳ सꣳस्थानां ब्रह्मत्वं ब्रह्मत्वम् ॥ २९ ॥

इति हिरण्यकेशिसूत्रे दशमप्रश्नस्याष्टमः पटलः ।

एवंप्रकारेण विहितं सर्वासां संस्थानां ब्रह्मत्वं भवति । द्विरुक्तिः प्रश्नसमाप्तिद्योतनार्था ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-शामिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्रश्नस्याष्टमः पटलः ॥ ८ ॥

समाप्तो दशमः प्रश्नः ।